वीर सेवा मन्दिर
दिल्ली

★

क्रम संख्या
काल नं०
खण्ड

न्यायदर्शनम्।

वात्स्यायनमुनिकृत-भाष्य-

विश्वनाथकृत-वृत्तिसहितम्।

महामहोपाध्यायपण्डित-

श्रीकामाख्या-नाथ-तर्कवागीशेन

तथा पण्डित-

श्रीपार्व्वती-चरण-तर्कतीर्थेन

परिवर्त्तितं सन्निवेशितञ्च।

पण्डितकुलपति-वि, ए उपाधिधारि-

श्यामाचरणानन्द-विद्यासागर-भट्टाचार्य्यात्मजाभ्यां

पण्डित-श्रीआशुबोध-विद्याभूषण-

पण्डित-श्रीनित्यबोध-विद्यारत्नाभ्यां

संस्कृतम् प्रकाशितञ्च।

तृतीयसंस्करणम्।

कलिकातानगर्य्याम्

पशुपतियन्त्रे

म

প্রকাশক— পণ্ডিত শ্রীআশুবোধ বিদ্যাভূষণ।
ও
পণ্ডিত শ্রীনিত্যবোধ বিদ্যারত্ন।

প্রাপ্তিস্থান— ২ নং রমানাথ মজুমদারের ষ্ট্রীট্
হ্যারিসন্ রোড্ পোষ্ট্ অফিস্, কলিকাতা।

প্রিণ্টর— শ্রীরাজকুমার রায়।
৮১ নং কলেজ ষ্ট্রীট্, কলিকাতা।

न्यायदर्शनस्य सूचीपत्रम्।

विषयः।		पृष्ठाङ्कः।	पङ्क्त्यङ्कः।
मोक्षरूपशास्त्रप्रयोजनलक्षणम्, पदार्थानामुद्देशश्च	...	२	१४
तत्त्वज्ञानादपवर्गप्राप्तिसूत्रम्,	...	९	६
प्रमाणलक्षणं तद्विभागश्च,	...	११	१७
प्रत्यक्षलक्षणम्	...	१३	२
अनुमानस्य लक्षणम् विभागश्च	...	१५	१०
उपमानलक्षणम्	...	१७	१
शब्दलक्षणम्,	...	१७	१२
शब्दविभागसूत्रम्	...	१८	४
प्रमेयस्य लक्षणम् विभागश्च	...	१८	१९
आत्मनिरूपणम्,	...	१९	१५
शरीरनिरूपणम्,	...	२१	१
इन्द्रियविभागेन्द्रियलक्षणम्	...	२१	९
भूतविभागसूत्रम्,	...	२२	८
अर्थविभागार्थलक्षणम्,	...	२२	१६
बुद्धिलक्षणम्,	...	२३	१
मनोनिरूपणम्,	...	२३	७
प्रवृत्तिलक्षणं तद्विभागश्च,	...	२४	१
दोषलक्षणम्,	...	२४	५
प्रेत्यभावलक्षणम्,	...	२५	१
फललक्षणम्,	...	२५	१०
दुःखलक्षणम्,	...	२६	१
अपवर्गलक्षणम्,	...	२६	९
संशयस्य लक्षणं विभागश्च,	...	२८	४
प्रयोजनलक्षणम्,	...	३१	१
दृष्टान्तलक्षणम्,	...	३१	६
सिद्धान्तलक्षणम्,	...	३२	१
सिद्धान्तविभागः,	...	३२	८
सर्वतन्त्रसिद्धान्तलक्षणम्,	...	३३	१
प्रतितन्त्रसिद्धान्तलक्षणम्,	...	३३	५
अधिकरणसिद्धान्तलक्षणम्	...	३३	१२
अभ्युपगमसिद्धान्तलक्षणम्,	...	३४	७
अवयवविभागसूत्रम्,	...	३५	१
प्रतिज्ञालक्षणम्,	...	३६	१
हेतुलक्षणम्,	...	३६	७
अतिरिक्तहेतुलक्षणम्,	...	३७	१
उदाहरणलक्षणम्,	...	३७	५

व्यतिरेकुदाहरणलक्षणम्,	...	३८	६
उपनयलक्षणम्	...	३९	५
निगमनलक्षणम्,	...	४०	१
सर्वनिरूपणम्,	...	४२	१
निर्णयनिरूपणम्	...	४४	१
वादलक्षणम्,	..	४६	१
जल्पलक्षणम्,	...	४८	१
वितण्डालक्षणम्	...	४९	१०
हेत्वाभासविभागः	...	५०	७
सव्यभिचारलक्षणम्,	...	५१	१
विरुद्धलक्षणम्,	...	५१	१३
प्रकरणसमलक्षणम्,	...	५२	१३
साध्यसमलक्षणम्,	...	५३	१०
अतीतकालालक्षणम्-	..	५४	५
कुलनलक्षणम्,	...	५५	१४
कुलविभागसूत्रम्,	...	५६	१
वाक्कुलनलक्षणम्,	...	५६	४
सामान्यकुलनिरूपणम्,	...	५७	१०
उपचारकुलनलक्षणम्,	...	५८	१९
कुलपूर्वपक्षः	...	५९	१६
तत्समाधानम्,	...	६०	२
समाधानान्तरम्	...	६०	७
जातिलक्षणम्,	...	६०	१२
नियहस्थानलक्षणम्,	...	६१	६
जातिनियहस्थानबहुत्वम्	...	६१	१३
अथ द्वितीयाध्यायः	...	६२	१०
संशयपूर्वपक्षसूत्रम्,	...	६३	१
संशयसिद्धान्तसूत्रम्	...	६५	१०
प्रमाणपूर्वपक्षसूत्रम्,	...	६८	१५
तत्समाधानम्,	...	७१	९
समाधानान्तरम्	...	७२	१४
पूर्वपक्षान्तरम्,	...	७५	७
तत्समाधानम्,	...	७६	९
प्रत्यक्षलक्षणादेशः,	...	७९	८
तत्समाधानम्	...	८०	१
आक्षेपान्तरम्			

समाधानान्तरम्	८०	९
अन:सिद्धौ युक्ति:	८०	१२
प्रत्यक्षसिद्धान्तसूत्रम्,	८१	१७
सन्निकर्षादितुल्यशङ्का,	८१	१
तत्समाधानम्,	८३	९
प्रत्यक्षस्यानुमितित्वशङ्का,	८४	१०
तत्समाधानम्,	८५	६
अवयविपूर्वपक्षसूत्रम्,	८७	५
तत्समाधानम्,	८७	१०
अवयवसिद्धान्तसूत्रम्,	८९	१
अनुमानपूर्वपक्षसूत्रम्	९२	१५
तत्समाधानम्,	९३	५
वर्त्तमानार्थेप:,	९४	४
तत्समाधानम्	९४	११
उपमानपूर्वपक्षसूत्रम्	९७	८
तत्समाधानम्	९७	१३
उपमानस्यानुमानत्वभावनम्	९८	१
तत्खण्डनम्,	९९	१
शब्दपूर्वपक्षसूत्रम्,	९९	४
तत्समाधानम्,	१००	८
वेदप्रामाण्यार्थेप:,	१०३	६
तन्निर्देश:,	१०४	६
वेदवाक्यविभाग:,	१०६	४
विधिलक्षणम्	१०६	७
अर्थवादविभाग:,	१०६	१०
अनुवादलक्षणम्	१०७	१६
वेदप्रामाण्ये युक्ति:,	१०९	१०
प्रमाणचतुष्टयार्थेप:,	१११	१५
तत्समाधानम्,	११२	१३
शब्दानित्यतासाधनम्,	११७	११
शब्दपरिणामसंशय:,	१२१	१६
शब्दविकारनिराकरणम्,	१२२	९
शब्दविकारव्यवहार:,	१२४	१०
पदनिरूपणम्,	१२७	५
पदार्थसंशय:,	१४१	१२
वैशेषिकसम्मतिखण्डनम्,	१४२	१७

केवलाकृतिमिश्रमिमतखण्डनम्,	...	१४४	७
केवलजातिमिश्रमिमतखण्डनम्,	...	१४५	८
पदार्थनिरूपणम्,	...	१४५	१२
व्यक्तिखण्डनम्,	...	१४६	७
आकृतिखण्डनम्,	...	१४६	१२
जातिखण्डनम्,	...	१४७	७
अथ द्वितीयाध्यायः,	...	१४८	१
प्रमेयपरीक्षारम्भः,	...	१४८	१
तत्रापि इन्द्रियचैतन्यवाददूषणम्,	...	१४८	१०
शरीरात्मवाददूषणम्,	...	१५१	४
आद्यपक्षान्तरम्,	...	१५२	१
तत्समाधानम्,	...	१५२	७
चक्षुरद्वैतप्रकरणम्,	...	१५३	१
तत्खण्डनम्	...	१५४	५
मनस आत्मत्वशङ्का,	...	१५७	२१
तत्खण्डनम्,	...	१५८	६
आत्मनित्यत्वप्रतिपादनम्,	...	१५८	१५
शरीरस्यैकभौतिकत्वकथनम्,	...	१६४	१७
पार्थिवत्वे युक्त्यन्तरकथनम्,	...	१६६	१
इन्द्रियभौतिकत्वपरीक्षणम्,	...	१६६	८
इन्द्रियनानात्वपरीक्षणम्,	...	१७६	१
अर्थपरीक्षणम्	...	१८२	१
बुद्ध्यनित्यतासंशयः,	...	१८८	४
बुद्धिनित्यतावादिसाङ्ख्यमतम्,	...	१८९	१
तत्खण्डनम्,	...	१८९	७
साङ्ख्यमतान्तरदूषणम्,	...	१९०	१६
अयुगपदुपलब्ध्यन्यथानुपपत्त्यादि,	...	१९१	५
अधिकवादिसौगतशङ्काकथनम्,	...	१९३	८
सौगतशङ्कासमाधानम्,	...	१९४	४
सौगतमते साङ्ख्यदूषणम्,	...	१९५	१५
तन्निराकरणादि	...	१९६	५
बुद्धेरात्मगुणत्वप्रकरणम्,	...	१९७	१७
बुद्धेरुत्पन्नापवर्गित्वकथनम्,	...	२१४	२
बुद्धौ शरीरगुणत्वाभावस्य विशिष्यकथनम्,	...	२१८	११
मनःपरीक्षाप्रकरणम्,	...	२२१	७
शरीरस्य तत्तत्पुरुषाद्दृष्टनिष्पाद्यताप्रकरणम्,	...	२२३	१४

अथ चतुर्थाध्यायः,	...	२३३	१०
प्रवृत्तिपरीक्षा,	...	२३३	१२
दोषपरीक्षणम्,	...	२३४	१
दोषाणां पक्षत्रयकथनम्,	...	२३५	१
प्रेत्यभावसिद्धान्तः,	...	२३८	८
उत्पत्तिप्रकारप्रदर्शनम्,	...	२३९	३
शून्यतोपादानप्रकरणम्,	...	२४०	१०
ब्रह्मपरिणामवादः	...	२४२	११
आकस्मिकत्वनिराकरणप्रकरणम्	...	२४४	९
प्रकरणसर्वानित्यत्वनिराकरणप्रकरणम्	...	२४६	७
सर्वनित्यत्वनिराकरणम्	...	२४७	९
सर्वपृथक्त्वनिराकरणप्रकरणम्	...	२५०	१
सर्वशून्यतानिराकरणप्रकरणम्	...	२५१	१४
सङ्घैकान्तवादनिराकरणम्	...	२५५	१
फलपरीक्षाप्रकरणम्	...	२५६	१
दुःखपरीक्षा	...	२६०	१९
अपवर्गपरीक्षाप्रकरणम्	...	२६३	१२
तत्त्वज्ञानोत्पत्तिप्रकरणम्	...	२७२	२५
अवयविप्रकरणम्	...	२७६	१
निरवयवप्रकरणम्	...	२८२	३
वाह्यार्थभङ्गनिराकरणप्रकरणम्	...	२८६	३
तत्त्वज्ञानविवृद्धिप्रकरणम्	...	२९२	११
अथ पञ्चमाध्यायः	...	२९९	३
जातिविभागसूत्रम्	...	२९९	६
साधर्म्यवैधर्म्यसमलक्षणम्	...	३००	१
साधर्म्यसमादेरसदुत्तरत्वे बीजम्	...	३०१	११
जातिषट्कनिरूपणम्	...	३०२	५
जातिषट्कासदुत्तरत्वबीजम्	...	३०४	९
प्राप्याप्राप्तिसमनिरूपणम्	...	३०६	१
तयोरसदुत्तरत्वे बीजम्	...	३०६	९
प्रसङ्गप्रतिदृष्टान्तसमनिरूपणम्	...	३०७	३
प्रसङ्गसमोत्तरकथनम्	...	३०८	१
प्रतिदृष्टान्तसमोत्तरकथनम्	...	३०८	११
अनुत्पत्तिसमलक्षणम्	...	३०९	२
तस्योत्तरम्	...	३०९	७
संशयसमनिरूपणम्	...	३१०	३
तस्योत्तरम्	...	३१०	९

प्रकरणसमनिर्देशम्	...	३११	९
प्रकरणसमोत्तरम्	...	३१२	१
अहेतुसमप्रकरणम्	...	३१२	९
अर्थापत्तिसमप्रकरणम्	...	३१३	१२
अविशेषसमप्रकरणम्	...	३१५	१
उपपत्तिसमप्रकरणम्	...	३१६	९
उपलब्धिसमप्रकरणम्	...	३१७	७
अनुपलब्धिसमप्रकरणम्	...	३१८	८
अनित्यसमप्रकरणम्	...	३२०	१०
नित्यसमप्रकरणम्,	...	३२२	७
कार्यसमप्रकरणम्,	...	३२४	१
कथाभासप्रकरणम्,	...	३२५	७
निग्रहस्थानविभागः,	...	३२६	११
प्रतिज्ञाहानिलक्षणम्,	...	३३०	५
प्रतिज्ञान्तरलक्षणम्	...	३३१	४
प्रतिज्ञाविरोधलक्षणम्,	...	३३२	५
प्रतिज्ञासंन्यासलक्षणम्,	...	३३२	१२
हेत्वन्तरलक्षणम्,	...	३३३	२
अर्थान्तरलक्षणम्	...	३३४	६
निरर्थकलक्षणम्,	...	३३४	१५
अविज्ञातार्थलक्षणम्,	...	३३५	४
अपार्थकलक्षणम्,	...	३३६	१
अप्राप्तकाललक्षणम्,	...	३३६	७
न्यूनलक्षणम्,	...	३३७	१
अधिकलक्षणम्,	...	३३७	४
पुनरुक्तलक्षणम्,	...	३३७	७
अननुभाषणलक्षणम्	...	३३८	१२
अज्ञानलक्षणम्	...	३३९	४
अप्रतिभालक्षणम्	...	३३९	८
विक्षेपलक्षणम्	...	३४०	१
मतानुज्ञालक्षणम्	...	३४०	६
पर्यनुयोज्यानुयोगलक्षणम्	...	३४१	१
निरनुयोज्यानुयोगलक्षणम्	...	३४१	७
अपसिद्धान्तलक्षणम्	...	३४२	१
हेत्वाभासमुद्रम्	...	३४३	२

न्यायदर्शनम् ।

अथ प्रथमाध्यायस्य

प्रथमाह्निकभाष्यम् ।

प्रमाणतोऽर्थप्रतियत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् । प्रमाणमन्तरेण नार्थप्रतिपत्तिः । नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम् । प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा । तस्येप्साजिहासा प्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः । समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा । अर्थस्तु सुखं सुखहेतुः दुःखं दुःखहेतुश्च, सोऽयं प्रमाणार्थोऽपरिसङ्ख्येयः प्राणभृद्भेदस्यापरिसङ्ख्येयत्वात् । अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति । कस्मात् ? अन्यतमापाये ऽर्थस्यानुपपत्तेः । तत्र यस्येप्साजिहासाप्रयुक्तस्य

बपुर्लीलालक्ष्मीजितमदनकोटिर्नवधु-
जनानामानन्दं कमपि कमनीयं विरचयन् ।
स कोऽपि प्रेमार्द्रं प्रथयतु मनोमन्दिरवरः
त्रिलोकीलोकानां सजलजलदश्यामलतनुः ॥ १ ॥
संयुक्तां युक्तरूपामभिनवनिर्ह्रादलक्षाकारक्षमाभा
सन्ध्यापीयूषभानोरतिरुचिरतरां चूर्णयन्नीमभिख्याम् ।
मानव्यालोकनस्रविपुरहरशिरोरम्यभूषाविशेषं
सूत्रो भव्यं विधातुं चरणनखरुचं भावयामो भवान्याः ॥ २ ॥

प्रवृत्तिः स प्रमाता। स येनार्थं प्रमिणोति तत् प्रमाणम्। योऽर्थः प्रतीयते तत् प्रमेयम्। यदर्थविज्ञानं सा प्रमितिः। चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते। किं पुनस्तत्त्वम्? मतश्च सद्भावोऽसतश्चासद्भावः। सच्चादिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति, असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। कथमुत्तरस्य प्रमाणेनोपलब्धिरिति सत्यप्युपलभ्यमाने तदनुपलब्धेः प्रदीपवत्, यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति। यद्यभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति। एवं प्रमाणेन मति गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति यद्यभविष्यत् इदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति तदेवं मतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति। अत्र खलु षोड़शधा व्यूढ़मुपदेक्ष्यते तासां खल्वासां सन्निधानाम्।

प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्ता-

यदीयतर्ककिरणैरन्तरध्वान्तसन्ततिम्।
मन्दमरन्ति भास्वन्तमक्षपादं नमामि तम् ॥ ३ ॥
अद्वैतं गुरुधर्मयोरिव लसत्सामञ्जस्यमञ्जनं
रूपं किञ्चन पौरुषं गिर इव प्रागल्भ्यसम्पाटकम्।
दाने कर्णमिवावतीर्णमपरं दीनं दयादक्षिणं
तातं विश्वविसारिचारुयशसं विद्यानिवासं नुमः ॥ ४ ॥
अलसमतिरपीदं विस्मृतं न्यायशास्त्रं
विरचितबहुयत्नो लीलया वेत्तु विज्ञः।
इति विनिहितचेताः कौशलं कर्तुकामो
गुरुचरणरजोऽहं कर्णधारीकरोमि ॥ ५ ॥
विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य।
विदुषामतिभूम्नधियाममत्सराणां मुदे भवितु ॥ ६ ॥

ऽवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ २ ॥

निर्देशे यथावचनं विग्रहः । चार्थे द्वन्द्वः समासः । प्रमाणादीनां तत्त्वमिति शैषिकी षष्ठी, तत्त्वस्य ज्ञानं निःश्रेयसस्याधिगम इति कर्मणि षष्ठी, गमकतया समासः । एतावन्तो विद्यमानार्थाः । एषामविपरीतज्ञानार्थमिहोपदेशः, सोऽयमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः, आत्मादेः खलु प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगमः । तच्चैतदुत्तरसूत्रेणानूद्यत इति । हेयं तस्य निर्वर्त्तकं ज्ञानमात्यन्तिकं तस्योपायोऽधिगन्तव्य इत्येतानि चत्वार्यर्थपदानि सम्यग्बुद्ध्वा निःश्रेयसमधिगच्छति । तत्र संशयादीनां पृथग्वचनमनर्थकं संशयादयो यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्त इति, सत्यमेतत् दमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या । तस्याः पृथक्-

---

प्रयोजनमनभिसन्धाय प्रेक्षावन्तो न प्रवर्त्तन्ते अतः प्रथमं प्रयोजनमभिधानीयं, तथाचाहुः,—"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥" सिद्धो ज्ञातोऽर्थः प्रयोजनं यस्य तत्तथा एवं सिद्धसम्बन्धमित्यपि अतस्तत्प्रतिपादनाय भगवानक्षपादः प्रथमं सूत्रयति । अत्र तत्त्वज्ञाननिःश्रेयसयोः शास्त्रतत्त्वज्ञानयोश्च हेतुहेतुमद्भावः, प्रमाणादितत्त्वज्ञानयोर्विषयविषयिभावः प्रमाणादिशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः शास्त्रनिःश्रेयसयोश्च पर्योज्यप्रयोजकभावः सम्बन्धः तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रं तथा च शास्त्रनिःश्रेयसयोरपि तत्त्वज्ञानद्वारकहेतुहेतुमद्भाव एव सम्बन्ध इति केचित् सम्प्रदायविदः । अत्र च सर्वपदार्थप्रधानो द्वन्द्वः समासः, यद्यपि भेदे द्वन्द्वविधानादत्र च बहूनां पदार्थानामभेदान्न द्वन्द्वसम्भवस्तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोष इत्यन्यत्र विस्तरः । तत्र च "निर्देशे यथा वचनं तथा विग्रहः" इति यथा-

प्रस्थानाः संशयादयः पदार्थाः। तेषां पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात् यथोपनिषदः। तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते। तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते, किन्तर्हि संशयितेऽर्थे ? यथोक्तं "विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति," विमर्शः संशयः। पक्षप्रतिपक्षौ न्यायप्रवृत्तिः। अर्थावधारणं निर्णयः तत्त्वज्ञानमिति। स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुच्यते। अथ प्रयोजनम्।— येन प्रयुक्तः प्रवर्त्तते तत् प्रयोजनम्। यमर्थमभीप्सन् जिहासन् वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ताः, तदाश्रयश्च न्यायः प्रवर्त्तते। कः पुनरयं न्यायः ? प्रमाणैरर्थपरीक्षणं न्यायः, प्रत्यक्षागमाश्रितमनुमानं सान्वीक्षा प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्। यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः स इति। तत्र वादजल्पौ

श्रुतभाष्यानुसारिणः प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनञ्च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलञ्च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयन्ति। सम्प्रदायविदस्तु भाष्यस्थवचनपदेन क्वचित्तौल्यं क्वचिदार्थं वचनं गृह्णते तत्र प्रमाणे प्रमेये च सौत्रं वचनं गृह्णते सप्रयोजनत्वात्, तच्च वक्ष्यते, न तु दृष्टान्तादावेकवचनं सप्रयोजनम्। तथाच दृष्टान्ते द्विवचनम्, अन्वयव्यतिरेकिभेदेन दृष्टान्तद्वैविध्यस्य वक्ष्यमाणत्वात्। संशये सिद्धान्ते छले च बहुवचनं, संशये छले च त्रैविध्यस्य सिद्धान्ते चातुर्विध्यस्य वक्ष्यमाणत्वात्, अन्यथा जातिनिग्रहस्थानयोर्बहुवचनं तथापि व्याख्येयत, एकवचनस्यैव लक्षणसूत्रे सत्त्वादिति वदन्ति। नव्यास्तु सर्वत्र प्रथमोपस्थितैकवचनेनैव विग्रहः, तत्रत्र बहुवचनेनैव प्रमाणादीनां बहुत्वं परिच्छिद्यते तथा सति किंनामायमविभागेन, तत्र क्वचित्-धवखदिरादौ धवस्य खदिरस्य पलाशस्येति न विगच्छते अत एव. प्रयोजनस्यैकवचनान्तस्येऽपि तद्विभागाकरणेऽपि सुखदुःखाभावतत्साधनभेदेन तस्य बहुत्वं न विरुध्यत इति

सप्रयोजनो, वितण्डा तु परीक्ष्यते वितण्डया प्रवर्त्तमानो वैतण्डिकः। सप्रयोजनमनुयुक्तो यदि प्रतिपद्यते सोऽस्य पक्षः सोऽस्य सिद्धान्त इति वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते नायं लौकिको न परीक्षक इत्यापद्यते। अथापि परपक्षप्रतिषेधज्ञापनं प्रयोजनं ब्रवीति, एतदपि तादृगेव। यो ज्ञापयति यो जानाति यच्च ज्ञाप्यते एतच्च प्रतिपद्यते यदि तदा वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते परपक्षप्रतिषेधज्ञापनं प्रयोजनमित्येतदस्य वाक्यमनर्थकं भवति। वाक्यसमूहस्य स्थापनाहीनो वितण्डा, तस्य यद्यभिधेयं प्रतिपद्यते सोऽस्य पक्षः स्थापनीयो भवति। अथ न प्रतिपद्यते प्रलापमात्रमनर्थकं भवति वितण्डात्वं निवर्त्तत इति। अथ दृष्टान्तः। प्रत्यक्षविषयोऽर्थः। यच्च लौकिकपरीक्षकाणां दर्शनं न व्याहन्यते स च प्रमेयं तस्य पृथग्वचनञ्च तदाश्रया-वनुमानागमौ। तस्मिन् सति स्यातामनुमानागमावसति च न स्याताम्। तदाश्रया च न्यायप्रवृत्तिः। दृष्टान्तविरोधेन

प्राहुः। अत्र च निःश्रेयसे सिद्धे पटादिवत् तत्प्राप्तये न प्रयत्नान्तरमपेक्षितमिति प्रतिपादनायाधिगमपदम्। ननु प्रमाणादयः पदार्था इति शब्दात् प्रथममागमादेव वा तत्त्वज्ञानं स्यादिति चेन्न, तेषां विशिष्य ज्ञानं हि तत्त्वज्ञानं तच्चोद्देशलक्षण-परीक्षाप्रकाशकाङ्क्षास्वादेव, शास्त्रं हि विशिष्टानुपूर्विका पङ्क्त्याध्यायी अध्याय-स्त्वाह्निकसमूहः, आह्निकन्तु तादृशप्रकरणसमूहः, प्रकरणन्तु तादृशसूत्रसमूहः, सूत्रन्तु तादृशवाक्यसमूहः, वाक्यन्तु तादृशपदसमूह इति वदन्ति। अत्र समूह-शब्देनानेकत्वं विवक्षितं, नैनाध्यायादेराह्निकादिद्वयात्मकत्वेऽपि न क्षतिः। अत्र च यद्यपि मोक्षजनकज्ञानविषयत्वेन प्रमेयमेवादौ निरूपयितुमर्हं तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथममुद्देशः। ततोऽवसरतो बुभुत्सित-प्रमेयस्य ततश्च पदार्थव्यवस्थापनस्य न्यायाधीनतया न्याये निरूपणीयेऽभ्यर्हितयो-र्न्यायपूर्व्वाङ्गयोः संशयप्रयोजनयोः तदाश्रयत्वेनाभ्यर्हिततया संशयस्य प्रथमम्। "न च निर्णीतेऽपि ननविधानात्र संशयस्य न्यायाङ्गत्वम्" इति वाच्यम्, आदार्थसंशयोद-

च परपक्षप्रतिषेधो वचनीयो भवति दृष्टान्तसमाधिना च स्वपक्षः साधनीयो भवति, नास्तिकस्य दृष्टान्तमभ्युपगच्छन्नास्तिकत्वं जहाति अनभ्युपगच्छन् किंसाधनः परमुपालभेतेति निरुक्तेन दृष्टान्तेन शक्यमभिधातुम् "साध्यसाधर्म्यात् तद्धर्मभावो दृष्टान्त उदाहरणं तद्विपरीतात्तद्विपरीतमिति" अस्त्ययमित्यनुज्ञायमानोऽर्थः सिद्धान्तः, स च प्रमेयं, तस्य पृथग्वचनम्, सत्सु सिद्धान्तभेदेषु वादजल्पवितण्डाः प्रवर्त्तन्ते नातोऽन्यथेति साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः समूहमपेक्ष्यावयवा उच्यन्ते। तेषु प्रमाणसमवाय आगमः प्रतिज्ञा, हेतुरनुमानम्, उदाहरणं प्रत्यक्षम्, उपनयनमुपमानं, सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति, सोऽयं परमो न्याय इति एतेन वादजल्पवितण्डाः प्रवर्त्तन्ते नातोऽन्यथेति तदाश्रया च तत्त्वव्यवस्था। ते चैतेऽवयवाः शब्दविशेषाः सन्तः प्रमेयेऽन्तर्भूता

गमात्। यद्यपि प्रयोजनं न न्यायाङ्गमपि तु तज्ज्ञानं तथापि तदेव निरूपणीयं न तु ज्ञाननिरूपणापेक्षेति। परप्रत्यायने दृष्टान्तस्य मूलत्वादनन्तरं दृष्टान्तस्य, दृष्टान्तमूलको न्यायः, सिद्धान्तविषय इत्यतोऽनन्तरं सिद्धान्तस्य, ततश्चावयवरूपस्य न्यायस्य, ततश्चैककार्यकारितया न्यायसङ्कीर्णस्तर्कस्य, ततश्च तर्कजन्यतया निर्णयस्य, ततश्च निर्णयानुकूलत्वाद्वादस्य, जल्पस्यापि वादकार्यकारित्वादनन्तरं जल्पस्य, ततश्च विजयरूपैककार्यानुकूलतया वितण्डायाः, कथात्रयस्यापि दूषणसाधनोपयोगितयानन्तरं दूषणेषु निरूपणीयेषु वादे दीक्षणीयत्वरूपोत्कर्षवत्त्वाद्धेत्वाभासानामादौ हेत्वाभासानां, ततश्च हेत्वाभासोपजीवनेन छलस्य, स्वयं घातकत्वेन अयथार्थदूषणत्वात्ततो जातेः कथावसानत्वेन अनन्तरं निग्रहस्थानानामिति। अत्र च प्रमेयान्तःपातिबुद्धिरूपस्यापि संशयादेः, निरनुयोज्यानुयोगरूपनिग्रहस्थानान्तःपातित्वाक्षपणकादीव प्रकारभेदेन प्रतिपादनं शिष्यबुद्धिवैशद्यार्थमेव, निग्रहस्थानान्तःपातिनां हेत्वाभासानां पृथगभिधानप्रयोजनन्तु जानाति भगवानक्षपाद एव। भाष्यं तु वादे दीक्षणीयतया हेत्वाभासानां पृथ-

एवमर्थं पृथगुच्यन्त इति। तर्को न प्रमाणसङ्गृहीतो न प्रमाणान्तरं प्रमाणानामनुग्राहकस्तत्त्वज्ञानाय कल्पते, तस्योदाहरणं किमिदं जन्म कृतकेन हेतुना निर्वर्त्त्यते आहोस्विदकृतकेन अथाकस्मिकमिति एवमविज्ञातेऽर्थे कारणोपपत्त्या ऊहः प्रवर्त्तते यदि कृतकेन हेतुना निर्वर्त्त्यते हेतूच्छेदादुपपन्नोऽयं जन्मोच्छेदः। अथाकृतकेन हेतुना ततो हेतूच्छेदस्याप्रक्ल्पत्वादनुपपन्नोऽयं जन्मोच्छेदः। अथाकस्मिकमतोऽकस्मान्निर्वर्त्त्यमानं न पुनर्निवर्त्स्यतीति निवृत्तिकारणं नोपपद्यते तेन जन्मानुच्छेद इति। एतस्मिंस्तर्कविषये कर्मनिमित्तं जन्मेति प्रमाणानि वर्त्तमानानि तर्केणानुगृह्यन्ते तत्त्वज्ञानविषयस्य विभागात्तत्त्वज्ञानाय कल्पते तर्क इति। सोऽयमित्यभूतस्तर्कः प्रमाणसहितो वादे साधनायोपालम्भाय वार्थस्य भवतीत्येवमर्थम्यथगुच्यते प्रमेयान्तर्भूतोऽपीति, निर्णयस्तत्त्वज्ञानं प्रमाणानां फलम्, तदवसानो वादः, तस्य पालनार्थं जल्पवितण्डे, तावेतौ तर्कनिर्णयौ लोकयात्रां वहत इति

गुपन्यास इत्युक्तम्। अत्र वार्त्तिकं, यदि वादे हेत्वनीयत्वात् पृथगभिधानं तदा न्यूनाधिकापसिद्धान्तानां वादे हेत्वनीयत्वात् पृथगभिधानं स्यात्, यदि पृथगभिधानाद्वादे हेत्वनीयत्वं तदा संशयादीनामपि वादे हेत्वनीयत्वं स्यात्। तस्मादान्वीक्षिकीत्रयीवार्त्तादण्डनीतिरूपविद्याप्रस्थानभेदज्ञापनार्थं संशयादिहेत्वाभासस्य च पृथग्वचनमिति, तदप्यसत्। निग्रहस्थानान्तर्गतत्वेनैव तन्निरूपणेन प्रस्थानभेदसम्भवात्। वयन्तु हेत्वाभासानां न निग्रहस्थानत्वं, तथा सति सर्वत्र हेत्वाभाससत्त्वात् सर्वस्यैव निगृहीतत्वापत्तेः। तस्मात् हेत्वाभासप्रयोगो निग्रहस्थानं तद्विभाजकत्वस्य हेत्वाभासपदस्य तत्प्रयोगपरम्। तच्च प्रयोगस्य न लक्षणमपेक्षणीयम्, अपि तु हेत्वाभासानामित्यत उक्तं "हेत्वाभासाश्च यथोक्ता इति" चरमसूत्रम्। न च हेत्वाभासस्यावच्छेदकप्रवेशादेव पृथङ्निरूपणापेक्षेति वाच्यम्। तथा सति प्रमाणतर्कसाधनोपालम्भा इति वादावच्छेदकप्रमाणादेरपि पृथङ्निरूपणापत्तेरिति युक्तमुत्पश्यामः। अत्र केचित् सूत्रादौ मङ्गलाकरणेन "मङ्गलं न प्रामाणिकम्" इत्यत्र

सोऽयं निर्णयः प्रमेयान्तर्भूत एवमर्थं पृथगुद्दिष्ट इति। वादः खलु नानाप्रवक्तृकः प्रत्यधिकरणसाधनाऽन्यतराधिकरणनिर्णयावसानो वाक्यसमूहः पृथगुद्दिष्ट उपलक्षणार्थम्, उपलक्षितेन व्यवहारस्तत्त्वज्ञानाय भवतीति तद्विशेषो जल्पवितण्डे तत्त्वाध्यवसायसंरक्षणार्थमित्युक्तम्। निग्रहस्थानेभ्यः पृथगुद्दिष्टा हेत्वाभासावादे चोदनीया भविष्यन्तीति, जल्पवितण्डयोस्तु निग्रहस्थानानीति छलजातिनिग्रहस्थानानां पृथगुपदेश उपलक्षणार्थ इति। उपलक्षितानां स्ववाक्ये परिवर्जनम्। छलजातिनिग्रहस्थानानां परवाक्ये पर्य्यनुयोगः। जातेश्च परेण प्रयुज्यमानायाः सुलभः समाधिः स्वयञ्च सुकरः प्रयोग इति। सेयमान्वीक्षिकी प्रमाणादिभिः पदार्थैर्विभज्यमाना "प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता:" तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविद्यं वेदितव्यम्। इह खल्वात्मविद्यायामात्मादितत्त्वज्ञानम्, निःश्रेयसाधिगमोऽपवर्गप्राप्तिः। तत्

सूत्रकृतां तात्पर्य्यं वर्णयन्ति, तदसत्। कृतस्याप्यनिबन्धनसम्भवात्, विघ्नाभावनिर्णयेनाकरणसम्भवाच्च। यत्तु "प्रमाणं प्राणनिलयः" इति भगवन्नामगणात्प्रमाणशब्दस्योच्चारणमेव मङ्गलमिति ब्रूमः। अत्र च उद्देशलक्षणपरीक्षाणां पूर्वपूर्वसापेक्षतया प्रथममुद्देशोऽनन्तरं लक्षणं, प्रसङ्गाच्छलपरीक्षेति सोद्देशपदार्थलक्षणच्छलपरीक्षा प्रथमाध्यायार्थः तत्र च सपरिकरत्वाद्यत्नलक्षणं प्रथमाह्निकार्थः, तत्र च प्रयोजनाभिधेयप्रतिपादकं प्रथमद्वितीयसूत्राभ्यामेकं प्रकरणं, ततः प्रमाणलक्षणप्रकरणं, ततः प्रमेयलक्षणप्रकरणं, ततो न्यायपूर्वाङ्गप्रकरणं, ततो न्यायसिद्धान्तप्रकरणं, ततो न्यायस्वरूपप्रकरणं, ततो न्यायोत्तराङ्गप्रकरणमिति प्रथमाह्निके सप्त प्रकरणानि। अवयवादनु पश्चादीक्षा अन्वीक्षा उत्पन्नलक्षणा वर्त्तिका सेयमान्वीक्षिकी न्यायतर्कादिशब्दैरपि व्यवह्रियते। तथा च "न्यायो मीमांसा धर्मशास्त्राणीति" स्मृतिः, "पुराणन्यायमीमांसा" इत्यादि स्मृतिः। "मीमांसा न्यायतर्कश्च उपाङ्गः परिकीर्त्तितः" इति पुराणम्। "वैविध्येऽस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम्। आन्वीक्षिकीञ्चात्मविद्यां

खलु निःश्रेयसं किन्तत्त्वज्ञानानन्तरमेव भवति नेत्युच्यते किं तर्हि तत्त्वज्ञानात् ॥ १ ॥

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥ २ ॥

तत्रात्माद्यपवर्गपर्य्यन्तप्रमेये मिथ्याज्ञानम् अनेकप्रकारकं वर्त्तते आत्मनि तावन्नास्तीति अनात्मन्यात्मेति दुःखे सुखमिति अनित्ये नित्यमिति अत्राणे त्राणमिति सभये निर्भयमिति जुगुप्सितेऽभिमतमिति हातव्येऽप्रतिहातव्यमिति प्रवृत्तौ नास्ति कर्म्म, नास्ति कर्मफलमिति दोषेषु नायं दोषनिमित्तः संसार इति प्रेत्यभावे नास्ति जन्तुर्जीवो वा सत्त्व आत्मा वा यः प्रेयात् प्रेत्य च भवेदिति। अनिमित्तं जन्म। अनिमित्तो जन्मोपरम इत्यादिमान् प्रेत्यभावोऽनन्तश्चेति नैमित्तिकः सत्त्व कर्मनिमित्तः प्रेत्यभाव इति। देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां निरात्मकः प्रेत्यभाव इति। अपवर्गोऽभीष्टः। स खल्वयं सर्वकार्य्योपरमः सर्वविप्रयोगोऽपवर्गे बहु च भद्रकं लुप्यत इति कथं बुद्धिमान् सर्वसुखोच्छेदमचैतन्यमसुमपवर्गं रोचयेदिति। एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः रागद्वेषाधिकाराच्चासूयेर्ष्यामायालोभादयो

वार्त्तारम्भांश्च लोकतः" ॥ इति मनुः, तथा "यत्कर्मणाप्नुवन्त्येते स धर्मं वेद नेतरः" इत्यादि मोक्षधर्मे "तवोपनिषदं तात! परिशेषन्तु पार्थिव!। मथ्नामि मनसा तात दृढा वान्वीक्षिकीं पराम्" ॥ इत्युपनिषदर्थवान्वीक्षिकानुसारी एव यः सः शास्त्र इत्युक्तमिति ॥ १ ॥

ननु तत्त्वज्ञानस्य न साक्षादेव निःश्रेयसहेतुत्वं, निःश्रेयसं तावद्विविधं परापरभेदात्। तत्रापरं जीवन्मुक्तिलक्षणं तत्त्वज्ञानानन्तरमेव, तदध्यवधारितात्मतत्त्वस्य, तत्त्वार्थाभ्यासाप्रवृत्तमिथ्याज्ञानस्य, प्रारब्धं कर्मोपभुञ्जानस्य, परन्तु क्रमेण, तत्र क्रमप्रदिपादनायेदं सूत्रमिति। दुःखादीनां मध्ये यत्तु उत्तरोत्तरं तेषामपाये तदनन्तरस्य

दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति वाचाऽनृतपरुषसूचनासम्बद्धानि मनसा परद्रोहं परद्रव्याभीप्सां नास्तिक्यञ्चेति सेयं पापात्मिका प्रवृत्तिरधर्माय। अथ शुभैः प्रयुक्तः शरीरेण दानं परित्राणं परिचरणञ्च। वाचा सत्यं हितं प्रियं स्वाध्यायञ्च, मनसा दयामस्पृहां श्रद्धाञ्च आचरति सेयं धर्माय। अत्र प्रवृत्तिसाधनौ धर्माधर्मौ प्रवृत्तिशब्देनोक्तौ। यथाऽन्नसाधनाः प्राणाः। "अन्नं वै प्राणिनः प्राणाः" इति। सेयं कुत्सितस्याभिपूजितस्य च जन्मनः कारणम्, जन्म पुनः शरीरेन्द्रिय-बुद्धीनां निकायविशिष्टः प्रादुर्भावः। तस्मिन् सति दुःखम्, तत्पुनः प्रतिकूलवेदनीयं बाधना पीड़ा ताप इति। इमे मिथ्याज्ञानादयो दुःखान्ता धर्मा अविच्छेदेनैव प्रवर्त्तमानाः संसार इति। यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा मिथ्याज्ञानापाये दोषा अपयन्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमपैति, दुःखापाये चात्यन्तिकोऽपवर्गो निःश्रेयसमिति। तत्त्वज्ञानन्तु खलु मिथ्याज्ञानविपर्य्ययेण व्याख्यातम्, आत्मनि तावदस्तीति अनात्मन्यनात्मेति एवं दुःखेऽनित्येऽत्राणे सभये जुगुप्सिते हातव्ये च यथाविषयं वेदितव्यम्, प्रवृत्तौ अस्ति कर्म अस्ति कर्मफलमिति दोषेषु दोष-

---

तत्त्वनिश्चितस्य पूर्वपूर्व्वस्यापायादपवर्गः, प्रयोजकत्वं प्रयोज्यत्वं वा पञ्चम्यर्थः, दुःखाभावाहटाभाव इतिवत् स्वरूपसम्बन्धविशेष एव तत्, तदयमर्थः,—तत्त्वज्ञानेन विरोधितयापहृते मिथ्याज्ञाने कारणाभावाच्च निहते रागद्वेषात्मके दोषे, तदभावाच्च प्रवृत्तेर्धर्माधर्मात्मिकायाः अनुत्पत्तौ तदभावाच्च जन्मनो विशिष्टशरीरसम्बन्धस्याभावे दुःखाभावादपवर्गः। यद्यपि ज्ञानिनोऽपि रागादयः सन्ति तथाप्युत्कटरागाद्यभावे तात्पर्य्यम्। यद्यपि दोषाणां न धर्मादिजनकत्वं व्यभिचारात्तथापि तत्तद्दोषाणां तत्तद्धर्मादिहेतुत्वाद्दोषापाये धर्माद्यपायः, वस्तुतो विनाशेच्छां गङ्गा-

निमित्तोऽयं संसार इति। प्रेत्यभावे खल्वस्ति जन्तुर्जीवः सत्त्व आत्मा वा यः प्रेत्य भवेदिति। निमित्तवज्जन्म निमित्तवान् जन्मोपरम इत्यनादिः प्रेत्यभावोऽपवर्गान्त इति नैमित्तिकः सन् प्रेत्यभावः प्रवृत्तिनिमित्त इति सात्मकः सन् देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां प्रवर्त्तत इति। अपवर्गः शान्तः खल्वयं सर्वविप्रयोगः सर्वोपरमोऽपवर्गः। बहु च खल्वयं घोरं पापकं लुप्यत इति कथं बुद्धिमान् सर्वदुःखोच्छेदं सर्वदुःखासंविदपवर्गं न रोचयेदिति। तद्यथा मधुविषसम्पृक्तान्नमनादेयमिति एवं सुखं दुःखानुषक्तमनादेयमिति। (त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः) उद्देशो लक्षणं परीक्षा चेति, (तत्र नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः,) तत्रोद्दिष्टस्यातत्त्वव्यवच्छेदको धर्मो लक्षणं लक्षितस्य यथा लक्षणमुपपद्यते न वेति (प्रमाणैरवधारणं परीक्षा,) तत्रोद्दिष्टस्य प्रविभक्तस्य लक्षणमुच्यते यथा प्रमाणानां प्रमेयस्य च, उद्दिष्टस्य लक्षितस्य च विभागवचनं यथा छलस्य वचनविघातोऽर्थविकल्पोपपत्त्या छलं तत् त्रिविधमिति अथोद्दिष्टस्य विभागवचनम्॥ २॥

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि॥ ३॥

अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्नि-

---

कर्षसंयोगादिति धर्मोद्दिसम्भवाद्व्यभिचारः। तस्मात् मिथ्याज्ञानजवासनैवात्र दोषः, तस्याश्च मिथ्याज्ञाननाशात् तत्कालीनतत्त्वज्ञानजवासनातो वा नाश इत्याशय इत्यपि वदन्ति। यद्यपि दुःखापायान्नापवर्गः किन्तु स एव सः, तथाप्यभेद एव तत्र पञ्चम्यर्थः, अपवर्गपदं वा तद्व्यवहारपरम्, अनन्तरपदेन अव्यवहितमेव परामृश्यत इति तु न व्याख्यानं दुःखपदवैयर्थ्यापत्तेः। दुःखानुत्पत्तेश्चरमदुःखध्वंसप्रयोजकत्वं कल्पात इत्याशयेनेदमित्यपि कश्चित्॥ २॥

इति सूत्रवृत्तौ सप्रयोजनाभिधेयप्रकरणम्।

कर्षो ज्ञानं वा यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः फलम्। अनुमानम्।—मितेन लिङ्गेनार्थस्य पश्चान्मानमनुमानम्। उपमानं सारूप्यज्ञानं, यथा गौरेवं गवय इति, सारूप्यन्तु सामान्ययोगः। शब्दः—शब्द्यतेऽनेनार्थ इत्यभिधीयते ज्ञाप्यते उपलब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्यादवधेयम्, प्रमीयतेऽनेनेति करणार्थाभिधानो हि प्रमाणशब्दस्तद्विशेषसमाख्याया अपि तथैव व्याख्यानम्। किं पुनः प्रमाणानि प्रमेयमभिसंप्लवन्ते अथ प्रमेयं व्यवतिष्ठन्त इत्युभयथा दर्शनम्। अस्यालेत्यादेरुपदेशात् प्रतीयते तच्चानुमानमिच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति। प्रत्यक्षं युञ्जानस्य योगसमाधिजमात्ममनसोः संयोगविशेषादात्मा प्रत्यक्ष इति, अग्निरित्युपदेशात् प्रतीयते अत्राग्निरिति, प्रत्यासत्तेरता धूमदर्शनेनानुमीयते। प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते, व्यवस्था पुनरग्निहोत्रं जुहुयात् स्वर्गकाम इति। लौकिकस्य स्वर्गे न लिङ्गदर्शनं न प्रत्यक्षम्। स्तनयित्नुशब्दे श्रूयमाणे शब्दहेतोरनुमानं तच्च न प्रत्यक्षं नागमः, पाणौ प्रत्यक्षत उपलभ्यमाने नानुमानं नागम इति। सा चेयं प्रमितिः प्रत्यक्षपरा, जिज्ञासितमर्थमाप्तोपदेशात् प्रतिपद्यमानो लिङ्गदर्शनेनापि बुभुत्सते। लिङ्गदर्शनानुमितञ्च प्रत्यक्षतो दिदृक्षते, प्रत्यक्षत उपलब्धेऽर्थे जिज्ञासा निवर्त्तते। पूर्वोक्तमुदाहरणम् अग्निरिति

अथ यथोद्देशं लक्षणस्यापेक्षितत्वात् प्रथमोद्दिष्टप्रमाणं लक्षयति विभजते च। अत्र तद्यति तत्प्रकारकत्वरूप (प्रकर्षविशिष्टज्ञानं) प्रशब्दविशिष्टेन माधातुना प्रत्याय्यते तत्करणत्वं प्रमाणत्वं, ज्ञानं चावानुभवो विवक्षितस्तेन स्मृतिकरणे नातिव्याप्तिः, लक्षितानां प्रमाणानां विभागः, प्रत्यक्षानुमानोपमानशब्दा इति विभागस्य

प्रमातुः प्रमातव्येऽर्थे प्रमाणानां सङ्करोऽभिसंभवः । असङ्करो व्यवस्थेति अथ विभक्तानां लक्षणवचनमिति ॥ ३ ॥

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥

इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यत् ज्ञानं तत् प्रत्यक्षम् । न तर्हि इदानीमिदं भवति आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति, नेदं कारणावधारणमेतावत् प्रत्यक्षे कारणमिति किन्तु विशिष्टकारणवचनमिति यत्प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते, यत्तु समानमनुमानादिज्ञानस्य न तन्निवर्त्तत इति । मनसस्तर्हि इन्द्रियेण संयोगो वक्तव्यः । भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यत इति समानत्वान्नोक्त इति यावदर्थं वै नामधेयशब्दास्तैरर्थसंप्रत्ययः अर्थसंप्रत्ययाच्च व्यवहारः । तत्रेदमिन्द्रियार्थसन्निकर्षादुत्पन्नमर्थज्ञानं रूपमिति वा रस इत्येवं वा भवति, रूपरसशब्दाश्च विषयनामधेयम् । तेन व्यपदिश्यते ज्ञानं रूपमिति जानीते रस इति जानीते नामधेयशब्देन व्यपदिश्यमानं सत् शाब्दं प्रमज्यते, अत आह—अव्यपदेश्यमिति । यदिदमनुपयुक्ते शब्दार्थसम्बन्धेऽर्थज्ञानं तन्नामधेयशब्देन व्यपदिश्यते, गृहीतेऽपि च शब्दार्थसम्बन्धेऽस्यायं शब्दो नामधेयमिति यदातु सोऽर्थो

उद्देश एवान्तर्भूतत्वादयं त्रिरेषोद्देशः । प्रत्येकलक्षणन्तु वक्ष्यते । इति त्रिसूत्री व्याख्या समाप्ता ॥ २ ॥

अथ विभक्तानि यथाक्रमं लक्षयितुमारभते ।—अथ प्रतिगतमक्षं प्रत्यक्षमिति योगादिन्द्रियवाचकत्वात् प्रत्यक्षशब्दस्य, प्रसृतत्वाच्च करणलक्षणस्य, प्रमितिलक्षणं वक्तव्यमनुचितं, तथापि यत इत्याहारेण, प्रत्यक्षप्रमाकरणलक्षणे वाक्ये तदेकदेशप्रमाखरूपे ज्ञाते, तत्करणत्वं सुज्ञेयमित्याशयेन वा सङ्गतमेतत् । आत्ममनः-

गृह्यते तदा तत् पूर्वस्मादर्थज्ञानाद्व विशिष्यते तदर्थविज्ञानं तादृगेव भवति तस्य त्वर्थज्ञानस्याद्यः समाख्याशब्दो नास्ति येन प्रतीयमानो व्यवहाराय कल्पेत न चाप्रतीयमानेन व्यवहारः। तस्मात्प्रेयस्यार्थस्य संज्ञाशब्देनेतिकरणयुक्तेन निर्दिश्यते रूपमिति ज्ञानं रस इति ज्ञानमिति तदेवमर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते व्यवहारकाले तु व्याप्रियते, तस्मादशाब्दमर्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमिति। यौके मरीचयो भौमेनोष्मणा संसृष्टाः स्यन्दमाना दूरस्थस्य चक्षुषा सन्निकृष्यन्ते तत्रेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञानमुत्पद्यते, तच्च प्रत्यक्षं प्रसज्यत इत्यत आह—अव्यभिचारीति। यदतस्मिंस्तदिति तद्व्यभिचारि, यत्तु तस्मिंस्तदिति तदव्यभिचारि प्रत्यक्षमिति। दूराच्चक्षुषा ह्ययमर्थं पश्यन्नावधारयति धूम इति वा, रेणुरिति वा वदेत् तदिन्द्रियार्थसन्निकर्षोत्पन्नमनवधारणज्ञानं प्रत्यक्षमप्रसज्यत इत्यत आह—व्यवसायात्मकमिति। तच्चैतन्नान्तव्यम् आत्ममनःसन्निकर्षजमेवानवधारणज्ञानमिति। चक्षुषा ह्ययमर्थं पश्यन्नावधारयति तथाचेन्द्रियेणोपलब्धमर्थं मनसोपलभते एवमिन्द्रियेणावधारयन् मनसा नावधारयति यच्चैतदिन्द्रियानवधारणपूर्वकं मनसानवधारणं तदविशेषापेक्षं विमर्शमात्रं संशयोनपूर्वमिति सर्वत्र प्रत्यक्षविषये ज्ञातुरिन्द्रियेण व्यवसायः पश्चात् मनसानुव्यवसायः उपहतेन्द्रियाणामनुव्यवसायाभावादिति। आत्मादिषु सुखादिषु च प्रत्यक्षलक्षणं

संयोगजन्यसुखादिवारणाय ज्ञानमिति। यद्यपि तज्जन्यत्वात् ज्ञानमात्रेऽतिव्याप्तिरीश्वरप्रत्यक्षे चाव्याप्तिः, तथापि साक्षात्कारीत्यनुव्यवसायसिद्धसाक्षात्त्वजात्यवच्छिन्नं ज्ञानमित्यस्य तात्पर्यं, यद्वा इन्द्रियार्थसन्निकर्षोत्पन्नमिति न्यावधारणं, इन्द्रियार्थसन्निकर्षातिरिक्तानुत्पन्नं अतिरिक्तं चाच ज्ञानम्, तेन ज्ञानाकरणकमित्यर्थः। अन-

वक्तव्यम् यमिन्द्रियार्थसन्निकर्षजं हि तदिति, इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो धर्मभेदात्। भौतिकानीन्द्रियाणि नियतविषयाणि। सगुणानाञ्चैषामिन्द्रियभाव इति। मनस्त्वभौतिकं सर्वविषयञ्च नास्य सगुणस्येन्द्रियभाव इति सति चेन्द्रियार्थसन्निकर्षे सन्निधिमसन्निधिं चास्य युगपज्ज्ञानानुत्पत्तिकारणं वक्ष्याम इति। मनसश्चेन्द्रियभावान्न वाच्यं लक्षणान्तरमिति। तन्त्रान्तरसमाचाराच्चैतत् प्रत्येतव्यमिति यन्मतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः। व्याख्यातम् प्रत्यक्षम् ॥ ४ ॥

अथ तत्पूर्वकं त्रिविधमनुमानम् पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च ॥ ५ ॥

तत्पूर्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनञ्चाभिसम्बध्यते लिङ्गलिङ्गिनोः सम्बन्धयोर्दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते स्मृत्वा लिङ्गदर्शनेन चाप्रत्यक्षोऽर्थोऽनुमीयते। पूर्ववदिति यत्र कारणेन कार्य्यमनुमीयते। यथा मेघोन्नत्या भविष्यति वृष्टिरिति। शेषवत्तत् यत्र कार्य्येण कारणमनुमीयते पूर्वादिकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति, सामान्यतो दृष्टं त्रैकाल्यपूर्वकमन्यच्च दृष्टस्यान्यच्च दर्शनमिति तथाचादित्यस्य, तस्मादस्य-

---

वारकमस्यभिचारीति भमभिन्नमित्यर्थः, दृश्यांशिकधर्मस्यालक्षणत्वेन, लक्षणत्वे तु तद्वति तत्प्रकारकत्वं, निर्विकल्पकस्य लक्षणे तदभाववति तद्प्रकारकत्वमर्थः, तस्य विभागः अव्यपदेश्यं व्यवसायात्मकमिति निर्विकल्पकं सविकल्पकं चेति त्रिविधं प्रत्यक्षमित्यर्थः ॥ ४ ॥

अनुमानं लक्षयति विभजते च।—आनन्तर्यार्थो हेतुशब्दो हेतुहेतुमद्भावसङ्गतिसूचनाय तत्पूर्वकं अन्यपूर्वकं प्रत्यक्षं प्रत्यक्षविशेषो व्याप्त्यादिविषयकत्वेन

प्रत्यक्षाप्यादित्यस्य व्रज्येति। अथवा पूर्ववदिति यत्र यथा पूर्वं प्रत्यक्षभूतयोरन्यतरदर्शनेनान्यतरस्याप्रत्यक्षस्यानुमानम्। यथा धूमेनाग्निरिति। शेषवत्काम परिशेषः स च प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः यथा सदनित्यमित्येवमादिना द्रव्यगुणकर्मणामविशेषेण सामान्यविशेषसमवायेभ्यो विभक्तस्य शब्दस्य तस्मिन् द्रव्यकर्मगुणसंश्रये न द्रव्यमेकद्रव्यत्वात् न कर्म शब्दान्तरहेतुत्वात् यत्तु शिष्यते सोऽयमिति शब्दस्य गुणत्वप्रतिपत्तिः। सामान्यतो दृष्टं नाम यत्राप्रत्यक्षे लिङ्गलिङ्गिनोः सम्बन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते यथेच्छादिभिरात्मा इच्छादयो गुणाः गुणाश्च द्रव्यसंस्थानाः तदेषां स्थानं स आत्मेति विभागवचनादेतत् त्रिविधमितिसिद्धे त्रिविधवचनं महतो महाविषयस्य न्यायस्य लघीयसा सूत्रेणोपदेशात् परं वाक्यलाघवं मन्यमानस्यास्मिन् वाक्यलाघवेऽनादरः तथाचायमित्यभूतेन वाक्यविकल्पेन प्रवृत्तः सिद्धान्ते छन्दसि शब्दादिषु च बहुलं समाचारः शास्त्रे इति सदृषयश्च प्रत्यक्षं सदसदृषयश्चानुमानम्, कस्मात् त्रैकाल्यग्रहणात् त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते भविष्यतीत्यनुमीयते भवतीति चाभूदिति च असच्च खल्वतीतमनागतञ्चेति ॥ ५ ॥

व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं लक्ष्यते, अनुमानम् अनुमिति र्यत इत्याद्याकारेण च करणलक्षणं, अथवा करणलक्षणमेवेदं तत्रानुमानमिति करणव्युटा अनुमितिकरणमिति समाख्याबलादेव लब्धं, तत्र व्याप्तिज्ञानं प्रत्यक्षपूर्वकं बहुचारप्रत्यक्षपूर्वकं विभजते त्रिविधमिति, पूर्वं कारणं तदत् तल्लिङ्गकं, यथा मेघोन्नतिविशेषे वृष्ट्यनुमानं, शेषः कार्यं तल्लिङ्गकं शेषवत्, यथा नदीवृद्ध्या वृष्ट्यनुमानं, सामान्यतो दृष्टं कार्यकारणभिन्नलिङ्गकं यथा पृथिवीत्वेन द्रव्यत्वानुमानम्, अथवा पूर्वम् अन्वयसदृशं केवलान्वयीत्यर्थः, यथा अभिधेयं प्रमेयत्वात् इत्यादि, शेषो व्यतिरेकसदृश

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥६॥

अथोपमानम् ।—प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य प्रज्ञापनमुपमानमिति । यथा गौरिव गवय इति, किं पुनरत्रोपमानेन क्रियते यदा खल्वयं गवा समानधर्मं प्रतिपद्यते तदा प्रत्यक्षतस्तमर्थं प्रतिपद्यत इति समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थ इत्याह । यथा गौरिव गवय इत्युपमाने प्रयुक्ते गवा समानधर्मकमर्थमिन्द्रियार्थसन्निकर्षादुपलभमानोऽस्य गवयशब्दः संज्ञेति संज्ञासंज्ञिसम्बन्धं प्रतिपद्यत इति । यथा मुद्गस्तथा मुद्गपर्णी यथा माषस्तथा माषपर्णीत्युपमाने प्रयुक्ते उपमानात् संज्ञासंज्ञिसम्बन्धं प्रतिपद्यमानस्तामोषधीं भैषज्यायाहरति एवमन्योऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति ॥ ६ ॥

आप्तोपदेशः शब्दः ॥ ७ ॥

अथ शब्दः ।—आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्ता उपदेष्टा, साक्षात्करणमर्थस्याप्तिस्तया

केवलव्यतिरेकीत्यर्थः यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादि, सामान्यतो दृष्टं अन्वयव्यतिरेकि यथा वह्निमान् धूमादित्यादि ॥ ५ ॥

उपमानं लक्षयति ।—प्रसिद्धस्य पूर्वप्रमितस्य गवादेः, साधर्म्यात्साहश्यात् तज्ज्ञानात्, साध्यस्य गवयादिपदवाच्यत्वस्य, साधनं सिद्धिरुपमानमुपमितिरित्यर्थः इत्यध्याहारेण च करणलक्षणं, अथवा साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम् । अत्र च वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः, यथा च अतिदीर्घग्रीवत्वादि पश्वन्तरवैधर्म्यज्ञानादुष्ट्र करभपदवाच्यतायाः । एवमन्योऽप्युपमानस्य विषय इति भाष्यं, यथा मुद्गपर्णीसदृशी ओषधी विषं हन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीत्युपमित्या विषयौक्रियत इत्यादि ॥६॥

शब्दं लक्षयति ।—शब्द इति लक्ष्याकथनं, तदर्थः प्रमाणशब्द इति, आप्तोपदेश इति लक्षणं, आप्तः प्रज्ञातवाक्यार्थयथार्थज्ञानवान्, तस्योपदेश इत्यर्थः, प्रज्ञातवाक्यार्थ-

प्रवर्त्तत इत्यासां ऋष्यार्य्यम्लेच्छानां समानं लक्षणम्। तथा च तिसर्वेषां व्यवहाराः प्रवर्त्तन्त इति। एवमेभिः प्रमाणैर्देवमनुष्यतिरश्चां व्यवहाराः प्रकल्प्यन्ते नातोऽन्यथेति ॥ ७ ॥

स द्विविधो दृष्टादृष्टार्थत्वात् ॥ ८ ॥

यस्येह दृश्यतेऽर्थः स दृष्टार्थः यस्यासुत्र प्रतीयते सोऽदृष्टार्थः। एवमपि लौकिकवाक्यानां विभाग इति किमर्थं पुनरिदम्? उच्यते,—स न मन्येत दृष्टार्थएवाप्तोपदेशः प्रमाणम् अर्थस्यावधारणादिति। अदृष्टार्थोऽपि प्रमाणमर्थस्यानुमानादिति। ॥ ८ ॥

आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ ९ ॥

किं पुनरनेन प्रमाणेनार्थजातं प्रमातव्यमिति तदुच्यते।—तत्रात्मा सर्वस्य द्रष्टा, सर्वस्य भोक्ता, सर्वज्ञः, सर्वानुभवकः, तस्य भोगायतनं शरीरम्। भोगसाधनानीन्द्रियाणि भोक्तव्या इन्द्रियार्थाः भोगो बुद्धिः। सर्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्वविषयमन्तःकरणं मनःशरीरेन्द्रियार्थबुद्धिसुखवेद-

---

यथार्थज्ञानप्रयुक्तः शब्द इति फलितार्थः अथवा आप्तो यथार्थः, उपदेशः शाब्दबोधो यस्मात् इति बहुव्रीहिः। शाब्दत्वञ्च जातिविशेषः, तथा च यथार्थशाब्दज्ञानकरणत्वमर्थः। अत्र च विशेषाव्याप्त्यप्रकारकत्व-तद्वति-तत्प्रकारकत्वादिप्रमालक्षणानामेकं लक्षणं परञ्च लक्ष्यतावच्छेदके निवेशनीयमतो नाभेदः ॥ ७ ॥

विभजते।—स प्रमाणशब्दः शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणगम्यार्थको दृष्टार्थकः, शब्दतदुपजीविप्रमाणमात्रगम्यार्थकोऽदृष्टार्थकः, तथा च दृष्टार्थकत्वा दृष्टार्थकत्वभेदात् प्रमाणशब्दस्य द्वैविध्यमित्यर्थः ॥ ८ ॥

समाप्तं प्रमाणलक्षणप्रकरणम्।

प्रमेयं विभजते लक्षयति च।—अत्र "तु" शब्दः पुनरर्थे तथाचैतेषां एव प्रमेयत्वं, न तु प्रमा विषयत्वेन संयोगादीनामपि, प्रमेयशब्दो हि वादादिशब्दवत् परिभाषाविशेषेण दादशसु प्रवर्त्तते, तत्र च प्रकृष्टं मेयं प्रमेयमिति यौगार्थः।

नानां निर्वृत्तिकारणम् प्रवृत्तिर्दोषाश्च, नास्य इदं शरीरमपूर्वमनुत्तरश्च पूर्वशरीराणामादिर्नास्ति उत्तरेषामपवर्गोऽन्त इति प्रेत्यभावः। ससाधनसुखदुःखोपभोगः फलम्। दुःखमिति नेदमनुकूलवेदनीयस्य सुखस्य प्रतीतेः प्रत्याख्यानम्, किन्तर्हि जन्मन एवेदम्। सुखसाधनस्य दुःखानुषङ्गाद्दुःखेनाविप्रयोगाद्विविधबाधनायोगाद्दुःखमिति-समाधि-भावनमुपदिश्यते, समाहितो भावयति, भावयन्निर्विद्यते, निर्विण्णस्य वैराग्यम्, विरक्तस्यापवर्ग इति जन्ममरणप्रबन्धोच्छेदः सर्वदुःखप्रहाणमपवर्ग इति। अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयम् तच्चेदेन चाऽपरिसङ्ख्येयम्। अस्य तु तत्त्वज्ञानादपवर्गः मिथ्याज्ञानात् संसार इत्यत एतदुपदिष्टं विशेषेणेति। तत्रात्मा तावत् प्रत्यक्षतो न गृह्यते स किमाप्तोपदेशमात्रादेव प्रतिपद्यत इति नेत्युच्यते अनुमानाच्च प्रतिपत्तव्य इति कथम् ॥ ९ ॥

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति ॥ १० ॥

यज्जातीयस्यार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान्

प्रकर्षस्य संसारहेतुमिथ्याज्ञानविषयत्वं, मोक्षहेतुधीविषयत्वं वा, रूढ्या च तावदन्यान्यत्वमर्थः लक्षणमपि तदेव प्रमेयं किमित्याकाङ्क्षायामात्मादीनां दर्शिता इत्यतो वचनभेदेऽपि नानन्वयः, "वेदाः प्रमाणम्" इत्यादावप्येवम्। आत्मसूत्रे विगतिः स्यात् तच्च वक्ष्यते।—प्रमेयत्वेनैक्यमिति प्रतिपादनाय, अन्यतमाज्ञानेऽपि सापवर्ग इति प्रतिपादनाय वा प्रमेयमित्येकवचनमित्यन्ये तच्चिन्त्यम्। अवापि आत्मा च शरीरञ्च इन्द्रियाणि च अर्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलञ्च दुःखञ्च अपवर्गश्चेति यथावचनं विग्रहं वर्णयन्ति। अत्र प्राधान्यात्कारणरूपप्रमेयषट्कमभिधाय कार्यरूपप्रमेयषट्कमभिहितं तच्च पूर्वपूर्वस्य प्राधान्यात् प्रथममुद्देश इति वदन्ति ॥ ९ ॥

तज्जातीयमेवार्थं पश्चादुपादातुमिच्छति सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद् भवति लिङ्गमात्मनः, नियतविषये हि बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति। एवमेकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद्दुःखहेतौ द्वेषः यज्जातीयो यस्यार्थः सुखहेतुः प्रसिद्धस्तज्जातीयमर्थमपश्चादादातुम् प्रयतते सोऽयम् प्रयत्न एकमनेकार्थदर्शिनं दर्शनप्रतिसन्धातारमन्तरेण न स्यात् नियतविषये बुद्धिभेदमात्रेण सम्भवति देहान्तरवदिति। एतेन दुःखहेतौ प्रयत्नो व्याख्यातः। सुखदुःखस्मृत्या चायं तत्साधनमाददानः सुखमुपलभते दुःखमुपलभते सुखदुःखे वेदयते पूर्वोक्तएव हेतुः, बुभुक्षमानः खल्वयं विमृशति किंस्विदिति विमृशन् जानीते इदमिति तदिदं ज्ञानं बुभुक्षाविमर्शाभ्यामभिन्नकर्त्तृकं गृह्यमाणमात्मलिङ्गम् पूर्वोक्तएव हेतुरिति। तच्च देहान्तरवदिति विभज्यते। यथाऽनात्मवादिनो देहान्तरेषु नियतविषया बुद्धिभेदा न प्रतिसन्धीयन्ते तथैकदेहविषया अपि न प्रतिसन्धीयेरन् अविशेषात्, सोऽयमेकसन्तत्यस्य समाचारः स्वयं दृष्टस्य स्मरणं नान्यदृष्टस्येति एवं खलु नानासन्तानां समाचारोऽन्यदृष्टमन्ये न स्मरन्तीति। तदेतदुभयमशक्यमनात्मवादिना व्यवस्थापयितुमिति एवमुपपन्नमात्मेति ॥ १० ॥

तत्र प्रथमोद्दिष्टमात्मानं लक्षयति।—अथ आत्मनः प्रत्यक्षत्वाल्लिङ्गकथनमसङ्गतम्। न च शरीरातिरिक्तात्मव्युत्पादनार्थं तत् इति वाच्यं, अग्रिमपरीक्षावैयर्थ्यापत्तेः। लक्षणाकथनेन न्यूनत्वं चेति चेन्न, लिङ्गपदस्य लक्षणार्थत्वात्। न च "लिङ्गमित्येकवचनेन मिलितानां लक्षणत्वं प्रतीयते तच्चायुक्तं वैयर्थ्यात्" इति वाच्यम्। किं लक्षणमित्याकाङ्क्षायामिच्छादीनामभिधानात् मिलितं लक्षणमिति प्रत्यायकाभावात्, तथा

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ ११ ॥

तस्य भोगाधिष्ठानम् ।—कथं चेष्टाश्रयः ? ईप्सितं जिहासितं वार्थमधिकृत्येच्छाजिहासाप्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा सा यत्र वर्त्तते तच्छरीरम् । कथमिन्द्रियाश्रयः ? यस्यानुग्रहेणानुगृहीतानि उपघाते चोपहतानि स्वविषयेषु साध्वसाधुषु वर्त्तन्ते स एषामाश्रयस्तच्छरीरम्, कथमर्थाश्रयः यस्मिन्नायतने इन्द्रियार्थसन्निकर्षात् उत्पन्नयोः सुखदुःखयोः प्रतिसंवेदनं प्रवर्त्तते स एषामाश्रयस्तच्छरीरमिति ॥११॥

घ्राणरसनचक्षुस्त्वक्श्रोत्राण्येन्द्रियाणि भूतेभ्यः॥१२॥

भोगसाधनानि पुनः ।—जिघ्रत्यनेनेति घ्राणं गन्धं गृह्णातीति,

च प्रत्येकमेव लक्षणं, अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वं सुखदुःखद्वेषाणां संसारिणो लक्षणत्वमिति ॥ १० ॥

क्रमप्राप्तं शरीरं लक्षयति ।—अत्र चेष्टादीनां मिलितानां आश्रयत्वं न लक्ष्यं, वैयर्थ्यादपि त्वाश्रयपदस्य प्रत्येकमन्वयात्चेष्टाश्रयत्वादिलक्षणत्वे तात्पर्यं, चेष्टात्वञ्च प्रयत्नजन्यतावच्छेदकी जातिविशेषः । न च "शरीरावयवेऽतिव्याप्तिः" अन्यावयवित्वेन विशेषणात् । न च निष्क्रियशरीरेऽव्याप्तिः, तादृशी नामाभावात्, अत एव वाक्य इन्द्रियाश्रय इति । इन्द्रियाश्रयत्वञ्च अवच्छेदकताख्यस्वरूपसम्बन्धविशेषेण, यज्ञदत्तोऽयमित्यादिप्रतीतेः, अर्थाश्रयत्वमित्यत्रार्थशब्दो न रूपादिपरः, तदाश्रयत्वस्य घटादावतिव्याप्तेः, किन्तु सुखदुःखान्यतरपरः अत एव भाष्यं "यस्मिन्नायतने सुखदुःखयोः प्रतिसंवेदनं प्रवर्त्तते स एषामाश्रयस्तच्छरीरम्" इति । वस्तुतस्तन्मनस्त्वाश्रयत्वमपि न तल्लक्ष्यं, किन्तु सुखाश्रयत्वं दुःखाश्रयत्वञ्चेति लक्षणद्वये तात्पर्यं, शरीरस्य तदाश्रयत्वमवच्छेदकतासम्बन्धेन, इत्यादेरचक्षुत्वे तन्मात्रावयवित्वेन विशेषणीयं, स्वर्गिशरीरे नारकिशरीरे इत्यादौ च सुखदुःखस्वीकाराव्याप्तेः । न च तच्छून्यस्वप्नशरीरेऽव्याप्तिः, सुखाद्याश्रयवृत्तिद्रव्यत्वव्याप्यव्याप्यजातिमत्त्वस्य विवक्षितत्वात् तादृशजातिश्च मनुष्यत्वचैत्रत्वादिः, कल्पभेदेन नरसिंहशरीराणां भेदान्नरसिंहत्वजातिमादाय नरसिंहशरीरे लक्षणसमन्वय इति ॥ ११ ॥

इन्द्रियं विभजते लक्षयति च ।—यद्यपि मनसोऽपीन्द्रियत्वमस्त्येव तथापि घ्राणेत्यादेरुपलक्षणपरत्वान्न दोषः, वस्तुतस्त्विन्द्रियाणीत्यस्य बहिरिन्द्रियाणीत्यर्थः ।

रसयत्यनेनेति रसनं रसं गृह्णातीति। चष्टेऽनेनेति चक्षुः रूपं पश्यतीति, स्पृशत्यनेनेति स्पर्शनम् त्वक्स्थानमिन्द्रियं त्वक् तदुपचारः स्थानादिति। शृणोत्यनेनेति श्रोत्रं शब्दं गृह्णातीति एवं समाख्यानिर्वचनसामर्थ्यादबोध्यं स्वविषयग्रहणलक्षणानीन्द्रियाणीति। भूतेभ्य इति नानाप्रकृतीनामेषां सतां विषयनियमो नैकप्रकृतीनां सति च विषयनियमे स्वविषयग्रहणलक्षणत्वं भवतीति ॥ १२ ॥

पृथिव्यापस्तेजो वायुराकाशमिति भूतानि॥१३॥

कानि पुनरिन्द्रियकारणानि।—संज्ञाशब्दैः पृथगुपदेशो-भूतानां विभक्तानां सुबचं कार्यं भविष्यतीति ॥ १३ ॥

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः॥१४॥

इमे तु खलु।—पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रममर्था विषया इति ॥१४॥

नन्व भूतेभ्य इत्यस्य नास्तीतिः। अथ चैतानीन्द्रियाणीति वदता घ्राणाद्यन्यत्वं लक्षणमिति सूचितं, प्रत्यक्षजनकतावच्छेदकतया इन्द्रियत्वमखण्डोपाधिरूपमित्यग्रे, घ्राणत्वादिकं जातिविशेषरूपं, कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं, घ्राणादीनि किं प्रकृतिकानीत्याकाङ्क्षायामाह—भूतेभ्य इति। तेनेन्द्रियाणामहङ्कारप्रकृतित्वं नेति मन्तव्यं, व्युत्पादयिष्यते चेदं तृतीयाध्याये। अथ घ्राणादीनां चतुर्णां पृथिव्यादिजन्यत्वं सम्भवति श्रोत्रस्य कर्णशष्कुल्यवच्छिन्नाकाशस्य कर्णशष्कुल्याजन्यत्वादेव जन्यत्वव्यपदेशः, अथवा अभिव्रानीति पूरयित्वा भूताभिव्रानीति व्याख्येयम्। घ्राणादीत्यस्योपलक्षणपरत्वं तु भूतेभ्य इति बहिरिन्द्रियपरम् ॥ १२ ॥

भूतान्येव कानीत्याकाङ्क्षायामाह।—कार्यारम्भे परस्परानपेक्षत्वसूचनायासमासकरणं, भूतत्वन्तु बहिरिन्द्रियग्रहणयोग्यविशेषगुणवत्त्वं, पृथिवीत्वादयस्तु जातिविशेषा इति ॥ १३ ॥

क्रमप्राप्तमर्थं विभजते लक्षयति च।—वैशेषिकाणां द्रव्यगुणकर्मसामान्यशब्दाभिधेयत्व मतः पञ्चानां गन्धादीनामेव कथं तत्त्वम् इत्याशङ्कानिरासाय तदर्था इत्युक्तं, तेषामिन्द्रियाणामर्था विषया उद्दिष्टा अपि त एवेत्याशयः, इत्थञ्च तदर्थत्वं लक्षण-

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १५ ॥

अचेतनस्य करणस्य बुद्धेर्ज्ञानं वृत्तिः, चेतनस्य कर्त्तुरुपलब्धिरिति युक्तिविरुद्धमर्थं प्रत्याचष्टाण इदमाह।—नाचेतनस्य करणस्य बुद्धेर्ज्ञानं भवितुमर्हतीति तर्हि चेतनं स्यात्, एकश्चायं चेतनो देहेन्द्रियसङ्घातव्यतिरिक्त इति प्रमेयलक्षणार्थस्यापि वाक्यस्यान्यार्थप्रकाशनमुपपत्तिसामर्थ्यादिति ॥ १५ ॥

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १६ ॥

स्मृत्यनुमानागमसंशयप्रतिभाखप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि तेषु सत्सु इयमपि।—अनिन्द्रियनिमित्ताः स्मृत्यादयः करणान्तरनिमित्ता भवितुमर्हन्तीति युगपच्च खलु घ्राणादीनां गन्धादीनाञ्च सन्निकर्षेषु सत्सु युगपज्ज्ञानानि नोत्पद्यन्ते तेनानुमीयते अस्ति तत्तदिन्द्रियसंयोगिसङ्कारिनिमित्तान्तरमव्यापि, यस्यासन्निधेर्नोत्पद्यते ज्ञानं सन्निधेश्चोत्पद्यत इति मनःसंयोगानपेक्षस्य हीन्द्रियार्थसन्निकर्षस्य ज्ञानहेतुत्वे युगपदुत्पद्येरन् ज्ञानानीति ॥ १६ ॥

मिति मन्तव्यं, तच्छब्देन बहिरिन्द्रियाणि परामृश्यन्ते तथा चैकबहिरिन्द्रियग्राह्यत्वात्सगुणत्वं अर्थत्वं, बहिरिन्द्रियग्राह्याग्राह्यबहिरिन्द्रियग्राह्यगुणत्वं तदर्थाः। पृथिव्यादिगुणा इति लक्ष्यनिर्देशे के गुणा इत्याकाङ्क्षायां गन्धेत्यादि, पृथिव्यादीनां गुणा इति षष्ठीसमासो भाव्यादिसम्बन्धश्च गुणगुणिनोरभेदो वेति सूचितम् ॥ १४ ॥

बुद्धिं लक्षयितुमाह।—चनर्थान्तरं ज्ञानार्थकं, न तु साङ्ख्यानामिव बुद्धितत्त्वस्य महत्त्वाध्यवसायपर्य्यायस्य परिणामविशेषो ज्ञानं, यथा चैतन्यं वक्ष्यते, तथाच ब्रह्मादिपदवाच्यस्यमनुभवसिद्धज्ञानलक्षणातिरेव वा लक्ष्यमिति भावः ॥ १५ ॥

मनो लक्षयति।—युगपत् एकस्मिन्, एवात्रापीति पूरणीयं, ज्ञानानामनुत्पत्तिर्यतः, स एव धर्मो ज्ञानकरणत्वं मनसो लिङ्गं लक्षणमित्यर्थः। तथाहि चक्षुरादिषु विषयसम्बन्धेऽपि यस्यासन्निधानादेकं न ज्ञानं जनयति, यस्मिन्सन्निधानेऽपरञ्च

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ १७ ॥

क्रमप्राप्ता तु।—मनोऽत्र बुद्धिरित्यभिप्रेतं, बुध्यतेऽनेनेति बुद्धिः, सोऽयमारम्भः शरीरेण वाचा मनसा च पुण्यं पापञ्च दशविधं, तदेतत् कृतभाष्यं द्वितीयसूत्र इति ॥ १७ ॥

प्रवर्त्तनालक्षणा दोषाः ॥ १८ ॥

प्रवर्त्तना प्रवृत्तिहेतुत्वम् ज्ञातारं हि रागादयः प्रवर्त्तयन्ति पुण्ये पापे वा। यत्र मिथ्याज्ञानं तत्र रागद्वेषाविति प्रत्यात्मवेदनीया ह्येते दोषाः, तस्मात् लक्षणतो निर्दिश्यन्त इति, कर्मलक्षणाः खलु रक्तद्विष्टमूढाः रक्तो हि तत्कर्म कुरुते येन कर्म्मणा सुखं दुःखं वा भजते, तथा द्विष्टस्तथा मूढ इति, दोषा रागद्वेषमोहा इत्युच्यमाने बहु नोक्तं भवतीति ॥ १८ ॥

ज्ञानं जनयति तदेव चाशु निखिलज्ञानजनकं सुखादिसाक्षात्कारासाधारणकारणं तदेकमेव लाघवान्निवेशं, मन इत्यर्थः। एवमव्याख्याने च लक्षणप्रकरणे प्रमाणोपन्यासोऽसङ्गतः स्यादिति। अन्ये तु सति धर्मिणि लक्षणचिन्तेत्यसोमनःसाधनाय युगपदिति सूत्रं, इत्यस्य मनःसिद्धौ निःप्रत्यूहाणुत्वादिकं लक्षणं सुकरमित्याहुरिति वदन्ति ॥ १६ ॥

प्रवृत्तिं लक्षयति विभजते च।—अत्र च प्रवृत्तित्वं रागजन्यतावच्छेदको जातिविशेषः स एव लक्षणं, ईश्वरज्ञानेरपि लक्षणे यत्नत्वमेव तथा। जीवनयोनियत्नं निवृत्तौ च नानाभावात्, तत्सत्त्वेऽपि प्रवृत्तित्वं नित्ययत्नसाधारणं, तद्याक्तं वा तथा, इच्छानन्तरभूतारब्धपदस्य प्रत्येकमन्वयाद्रागारब्धादिभेदेन त्रिविधा प्रवृत्तिः। बुद्धिशब्देनात्र मनोऽभिप्रेतमिति भाष्यम्। शरीरशब्दश्च चेष्टावत्त्वेन इच्छादिसाधारणः, तथा च वचनानुकूलो यत्नो वाचारब्धः, शरीरगोचरो यत्नश्चेष्टानुकूलयत्नो वा शरीरारब्धः, एतद्व्यभिन्नो यत्नो बुद्ध्यारब्धः, स च ध्यानोदयादेव आत्मदर्शनायानुकूलः वक्ष्यति। प्राचस्तु सत्तासामान्यविशेषलक्षणे चाहृष्टजनकत्वं निवेशयन्ति। इत्थञ्च कारणरूपा प्रवृत्तिः, कार्यरूपा तु धर्माधर्मावेवेति ॥ १७ ॥

दोषं लक्षयति।—दोषा इति बहुवचनं रागद्वेषमोहानामेवलक्षणप्रयोजनाः। प्रवर्त्तना प्रवृत्तिजनकत्वं तदेव लक्षणं येषां, यद्यपीदं शरीराद्यनीश्वरेच्छादावति-

पुनरुत्पत्तिः प्रेत्यभावः ॥ १९ ॥

उत्पन्नस्य क्वचित् सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः। उत्पन्नस्य सम्बद्धस्य सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः, पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः, पुनरित्यभ्यासाभिधानम्। यच्च क्वचित् प्राणभृन्निकाये वर्त्तमानः पूर्वोपात्तान् देहादीन् जहाति तत् प्रैति यत् तत्रान्यत्र वा देहादीनन्यानुपादत्ते तद्भवति प्रेत्यभावो मृत्वा पुनर्जन्म, सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति ॥ १९ ॥

प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ २० ॥

सुखदुःखसंवेदनं फलम् सुखविपाकं कर्म दुःखविपाकञ्च तत्पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम् तथाहि प्रवृत्तिदोषजनितोऽर्थः फलमितम् सर्वञ्चैवति तदेतत् फलमुपात्तमुपात्तं हेयं त्यक्तं त्यक्तमुपादेयमिति नास्य हानोपादानयोर्निष्ठा पर्य्यवसानं वाऽस्ति

त्यात्तं तथापि लौकिकमानसप्रत्यक्षव्यावृत्तये सतीति विशेषणीयं, यावादिगोचरप्रमाणव्यावृत्तये प्रामाण्यवत्ते सतीति विशेषणीयम् ॥ १८ ॥

प्रेत्यभावं लक्षयति।—प्रेत्य मृत्वा भावो जननं प्रेत्यभावः। अत्र पुनरित्यनेनाभ्यासकथनात् प्रागुत्पत्तिसतो मरणं तत उत्पत्तिरिति प्रेत्यभावोऽयमनादिरपवर्गान्तः। एतज्ज्ञानञ्च वैराग्य उपयुज्यते इति प्रेत्येति न व्यर्थं, तदीयमरणञ्च तदीयजीवनाकृष्टनाशस्तदीयचरमप्राणसंयोगध्वंसस्तदीयप्राणध्वंसो वा तदीयोत्पत्तिस्तु तदीयविजातीयशरीराद्यप्राणसंयोग इति ॥ १९ ॥

फलं लक्षयति।—अत्र च सुख्यं फलं सुखदुःखोपभोगः, तथाच भाष्यम्—"सुखदुःखसंवेदनं फलम्", तत्र च धर्माधर्मात्मकप्रवृत्तेः प्रयोजकत्वात्तत्र च दोषस्य हेतुत्वात् प्रवृत्तिदोषजनितं इत्युक्तं, लक्षयन्तु सुखदुःखान्तरसाक्षात्कार इति। मौर्खं फलन्तु

न खल्वर्थं फलस्य हानोपादानसोतसोच्यते लोक इति। अथेतदेव ॥ २० ॥

बाधनालक्षणं दुःखमिति ॥ २१ ॥

बाधना पीड़ा ताप इति। तयानुविद्धमनुषक्तमविनिर्भागेण वर्त्तमानं दुःखयोगाद्दुःखमिति सोऽयं सर्वं दुःखेनानुविद्धं हृहन्तमिति पश्यन् दुःखं जिहासुर्जन्मनि दुःखदर्शी निर्विद्यते, निर्विण्णो विरज्यते, विरक्तो विमुच्यते ; यत्र तु निष्ठा सोऽयं यत्र तु पर्य्यवसानम् ॥ २१ ॥

तदत्यन्तविमोक्षोऽपवर्गः ॥ २२ ॥

तेन दुःखेन जन्मनात्यन्तं विमुक्तिरपवर्गः कथमुपात्तस्य जन्मनो हानमन्यस्य चानुपादानम् एतामवस्थामपर्य्यन्तामपवर्गं वेदयन्तेऽपवर्गविदः अभयदमजरममृत्युपदं ब्रह्मक्षेमप्राप्तिरिति। नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते तेनाभिव्यक्तेनात्यन्तं विमुक्तः सुखी भवतीति केचित् मन्यन्ते तेषां प्रमाणाभावादनुपपत्तिः, न प्रत्यक्षं नानुमानं नागमो वा विद्यते नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यत इति नित्यस्याभिव्यक्तिः संवेदनं ज्ञानमिति तस्य हेतुर्वाच्यो यतः तदुपपद्यत इति, सुखवन्नित्यमिति चेत् संसारस्थस्य मुक्तेना-

---

शरीरादिकं सर्वमेव। तथा च भाष्यम्—"तत्पुनर्देहेन्द्रियबुद्धिषु सतीषु भवति इति सह देहेन्द्रियादिभिः फलमभिप्रेतं, तथाहि प्रवृत्तिदोषजनितोऽर्थः फलमेतत्सर्वं भवति" इति। इत्थञ्च जन्यत्वमेव फलत्वं, प्रवृत्तिदोषजनित इति तु निर्वेदोपयोगादुक्तम् ॥ २० ॥

दुःखं लक्षयति।—बाधना पीड़ा तदेव लक्षणं स्वरूपं यस्य तत्। तथाचानुभवसिद्धदुःखत्वजातिरेव लक्ष्यतम्। शरीरेन्द्रियार्थेषु दुःखसाधनत्वात् सुखे च दुःखानुषङ्गात् दुःखव्यवहारो गौण इति अत एवाग्रिमसूत्रे तत्पदेन मुख्यदुःखपरामर्शः ॥ २१ ॥

ऽविशेषः यथा मुक्तः सुखेन तत् संवेदनेन च सन्नित्येनोपपन्नस्तथा संसारस्थोऽपि प्रसज्यत इति। उभयस्य नित्यत्वात् अभ्यनुज्ञाने च धर्माधर्मफलेन साहचर्यं योगपद्यं गच्छेत यदिदमुत्पत्तिस्थानेषु धर्माधर्मफलं सुखं दुःखं वा संवेद्यते पर्य्यायेण तस्य च नित्यं स्वसंवेदनस्य च सह भावो योगपद्यं गच्छेत न सुखाभावो नाऽनभिव्यक्तिरस्ति उभयस्य नित्यत्वात् अनित्यत्वे हेतुवचनम्। अथ मोक्षे नित्यस्य सुखस्य संवेदनमनित्यं यत उत्पद्यते स हेतुर्वाच्यः आत्ममनःसंयोगस्य निमित्तान्तरसहितस्य हेतुत्वम्। आत्ममनःसंयोगो हेतुरिति चेत् एवमपि तस्य सहकारिनिमित्तान्तरं वचनीयमिति धर्मस्य कारणवचनं यदि धर्मो निमित्तान्तरं तस्य हेतुर्वाच्यो यत उत्पद्यत इति योगसमाधिजस्य कार्य्यावसायविरोधात् प्रलये संवेदनानिवृत्तिः, यदि योगसमाधिजो धर्मो हेतुः तस्य कार्य्यावसायविरोधात् प्रलये संवेदनमत्यन्तं निवर्त्तयति असंवेदने चाविद्यमानाविशेषः यदि धर्मक्षयात् संवेदनोपरमो नित्यं सुखं न संवेद्यत इति किं विद्यमानं न संवेद्यते अथाविद्यमानमिति नानुमानं विशिष्टेऽस्तीति अप्रक्षयश्च धर्मस्य निरनुमानमुत्पत्तिधर्मकत्वात् योगसमाधिजो धर्मो न क्षीयते इति नास्त्यनुमानमुत्पत्तिधर्मकमनित्यमिति विपर्य्ययस्य तु अनुमानम्, यस्य तु संवेदनोपरमो नास्ति तेन संवेदनेन हेतुर्नित्य इत्यनुमेयम्। नित्ये च मुक्तसंसारस्थयोरविशेष इत्युक्तम्, यथा मुक्तस्य नित्यं सुखं तत्संवेदनहेतुश्च संवेदनस्य तूपरमो नास्ति कारणस्य नित्यत्वात्, तथा संसारस्थस्यापीति एवञ्च सति धर्माधर्मफलेन सुखदुःखसंवेदनेन साहचर्यं गच्छेतेति। शरीरादिसम्बन्धः प्रतिबन्धहेतुरिति चेत् न, शरीरादीनामुप-

भोगार्थत्वात् विपर्ययस्य चाननुमानात्। स्यान्मतं संसारावस्थशरीरादिसम्बन्धो नित्यसुखसंवेदनहेतोः प्रतिबन्धकस्तेनाविशेषो नास्तीति, एतच्चायुक्तम्, शरीरादय उपभोगार्थास्ते भोगप्रतिबन्धं करिष्यन्तीत्यनुपपन्नम्। न चास्त्यनुमानमशरीरस्यात्मनो भोगः कश्चिदस्तीति, दृष्टाभिगमार्था प्रवृत्तिरिति चेत् न, अनिष्टोपरमार्थत्वात्। दृष्टाधिगमार्थो मोक्षोपदेशः प्रवृत्तिश्च मुमुक्षूणामिति नेष्टमनिष्टेनाननुविद्धं सम्भवतीति दृष्टमप्यनिष्टं सम्पद्यते अनिष्टहानाय घटमान दृष्टमपि जहाति विवेकज्ञानस्याशक्यत्वादिति दृष्टातिक्रमश्च देहादिषु तुल्यः यथा दृष्टमनित्यं सुखं परित्यज्य नित्यं सुखं कामयते एवं देहेन्द्रियबुद्धिरनित्या दृष्टा अतिक्रम्य मुक्तस्य नित्या देहेन्द्रियबुद्धयः कल्पयितव्याः, साधीयश्चैवं मुक्तस्य चैकात्म्यं कल्पितं भवतीति, उपपत्तिविरुद्धमिति चेत् समानम्। देहादीनां नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति समानं सुखस्यापि नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति, आत्यन्तिके च संसारदुःखाभावे सुखवचनादागमोऽपि सत्य विरोधः। यद्यपि कश्चिदागमः स्यान्मुक्तस्यात्यन्तिकं सुखमिति सुखशब्द आत्यन्तिके दुःखाभावे प्रयुक्त इत्येवमुपपद्यते। दृष्टो हि दुःखाभावे सुखशब्दप्रयोगो बहुलं लोक इति, नित्यसुखरागस्याप्रहाणे मोक्षाधिगमाभावो रागस्य बन्धनसमाम्नानात्। यद्ययं मोक्षे नित्यं सुखमभिव्यज्यत इति नित्यसुखरागेण मोक्षाय घटमानो न मोक्षमधिगच्छेन्नाधिगन्तुमर्हतीति बन्धनसमाम्नातो हि रागः। न च बन्धने सत्यपि कांश्चन्मुक्त इत्युपपद्यत इति प्रहीणनित्यसुखरागस्याप्रतिकूलत्वम्। अथास्य नित्यसुखरागः प्रहीयते तस्मिन् प्रहीणे नास्य नित्यसुखरागः

अपवर्गं लक्षयति।—तस्य दुःखस्य अत्यन्तविमोचः, सकलमानाधिकरणदुःखा-

प्रतिकूलो भवति यद्येवं मुक्तस्य नित्यं सुखं भवति अथापि न भवति नास्योभयोः पक्षयोर्मोक्षाधिगमो विकल्पात इति । ॥ २२ ॥

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥२३॥

स्थानवत एव तर्हि संशयस्य लक्षणं वाच्यमिति तदुच्यते ।— समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन् पूर्वदृष्टं च तयोर्विशेषं बुभुत्समानः किंस्विदित्यन्यतरत्रावधारयति तदनवधारणं ज्ञानं संशयः समानमनयोर्धर्ममुपलभे विशेषमन्यतरस्य नोपलभ इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्त्तिका वर्त्तते, तेन विशेषापेक्षो विमर्शः संशयः । अनेकधर्मोपपत्तेरिति समानजातीयमसमानजातीयञ्चानेकम् तत्रानेकस्य धर्मोपपत्तेर्विशेषस्योभयथा दृष्टत्वात् समानजातीयेभ्योऽसमानजातीयेभ्यश्चार्था विशेष्यन्ते । गन्धवत्त्वात् पृथिवी अबादिभ्यो विशिष्यते गुणकर्मभ्यश्च, अस्ति च शब्दे विभागजन्यत्वं विशेषः, तस्मिन् द्रव्यं गुणः कर्म वेति सन्देहः, विशेषस्योभयथा दृष्टत्वात् । किं द्रव्यस्य सतो गुणकर्मभ्यो विशेष आहोस्विद्गुणस्य मत इति अथ कर्मणः सत इति विशेषापेक्षो अन्यतमस्य व्यव-

---

समानकालोनत्वं ध्वसः, तत्र च जन्मापायादेव सम्भव इत्याशयेन "दुःखेन जन्मनात्यन्तं विमुक्तिः अपवर्गः" इति भाष्यम् । दुःखेन दुःखानुषङ्गिणेत्यर्थः ॥ २२ ॥

समाप्तं प्रमेयलक्षणप्रकरणम् ।

क्रमप्राप्तं संशयं लक्षयति —संशय इति लक्षणनिर्देशः विमर्श इत्यत्र "वि-शब्दो विरोधार्थः सम्मिश्रणार्थः." एकस्मिन् धर्मिणीति पूरणीयं तेन "एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञानं संशयः," तच्च कारणमुखेन विशेषलक्षणाह,—समानेत्यादि ।

स्थापकं धर्ममनोपलभे इति बुद्धिरिति। विप्रतिपत्तेरिति व्याहतमेकार्थदर्शनं विप्रतिपत्तिः। व्याघातो विरोधोऽसहभाव इति अस्त्यात्मेत्येकं दर्शनमाह नास्त्यात्मेत्यपरम्, न च सद्भावासद्भावौ सहैकत्र सम्भवतः, न चान्यतरसाधको हेतुरुपलभ्यते तत्र तत्त्वानवधारणं संशय इति। उपलब्ध्यव्यवस्थातः खल्वपि सच्चोदकमुपलभ्यते तड़ागादिषु मरीचिषु वा विद्यमानमुदकमिति ततः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते अथासदिति संशयो भवति। अनुपलब्ध्यव्यवस्थातः सच्च नोपलभ्यते मूलकीलकोदकादि, असच्चानुत्पन्नं विरुद्धं वा, ततः क्वचिदनुपलभ्यमाने संशयः किं सच्चोपलभ्यते उतासदिति संशयो भवति विशेषापेक्षा पूर्ववत्, पूर्वः समानोऽनेकश्च धर्मो ज्ञेयश्चः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे, एतावता विशेषेण पुनर्वचनम्, समानधर्माधिगमात् समानधर्मोपपत्तेर्विशेषस्मृत्यपेक्षो विमर्श इति स्थानवतां लक्षणवचनमिति समानम् ॥ २३ ॥

उपपत्तिज्ञानं, तथाच समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः, अनेकधर्मः असाधारणधर्मः तज्ज्ञानादित्यर्थः, तथाच साधारणधर्मस्यैवहर्निज्ञानजन्यो-ऽसाधारणधर्मस्यवहर्निज्ञानजन्यश्चेत्यर्थः. विप्रतिपत्तिर्विरुद्धकोटिद्वयोपस्थापकः शब्द इत्यादित्यर्थः यद्यपि शब्दस्य न संशयजनकत्वं तथापि शब्दोत्थकोटिद्वयोपस्थिता मानसः संशय इति वदन्ति। उपलब्ध्यज्ञानस्य अनुपलब्ध्यतिरिक्तज्ञानस्य या अव्यवस्था सद्विषयकज्ञानाभावः तस्या निर्धारणं प्रामाण्यसंशय इति फलितोऽर्थः। अन्ये तु उपलब्ध्यव्यवस्थाप्रामाण्यसंशयः अनुपलब्धिरूपलब्धिविरोधिधर्मवत्त्वं सदव्यवस्था तत् संशय इत्याहुः। वस्तुतस्तु प्रामाण्यसंशयस्य न संशयहेतुत्वं किं त्वगृहीताप्रामाण्यकज्ञानस्य विरोधितया सति प्रामाण्यसंशये तज्ज्ञानस्याविरोधितया साधारणधर्मदर्शनादित एव संशयोत्पत्तेरिति, उपलब्धेत्यादिकं, तादृशस्थले संशयो भवतीत्येतावन्मात्रपरं, चकारो व्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति, विशेषापेक्षः कोटिस्मरणसापेक्षः। वस्तुतस्तु संशये धारावाहिकत्वादत आह—विशेषेति। "विशेषं

यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम् ॥ २४ ॥

यमर्थमाप्तव्यं हातव्यं वाध्यवसाय तदाप्तिहानोपायमनुतिष्ठति प्रयोजनं तद्वेदितव्यम्, प्रवृत्तिहेतुत्वादिममर्थमाप्स्यामि हास्यामि वेति व्यवसायोऽर्थस्याधिकारः, एवं व्यवसीयमानोऽर्थोऽधिक्रियत इति ॥ २४ ॥

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ २५ ॥

लोकसाम्यमनतीता लौकिका नैसर्गिकं वैनयिकं बुद्धातिशयमप्राप्तास्तद्विपरीताः परीक्षकास्तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्तीति, यया यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि सोऽर्थो दृष्टान्तः । दृष्टान्तविरोधेन हि प्रतिपक्षाः प्रतिषेद्धव्या भवन्तीति । दृष्टान्तसमाधना च स्वपक्षाः स्थापनीया भवन्तीति । अवयवेषु चोदाहरणाय कल्पत इति ॥ २५ ॥

विशेषदर्शनं अपेक्षते निवर्त्तकत्वेन" तथाच विशेषदर्शननिवर्त्यसंशयसुखेन विशेषादर्शनजन्यसंशय इत्युक्तम् ॥ २३ ॥

क्रमप्राप्तं प्रयोजनं लक्षयति ।—अधिकृत्य उद्दिश्य तथाच प्रवृत्तिहेत्विच्छाविषयत्वं प्रयोजनत्वं, विषयत्वं साध्यतावच्छेदकविशेषः, तेन तं सुखत्वादिवारणं, प्रवृत्तिहेत्विति स्वरूपकथनं तत्तत्कचूडामणिसुमेर्वादिप्राप्तिवारकं तदिति केचित् । अत्र च निरुपधीच्छाविषयत्वात् सुखदुःखाभावयोर्मुख्यप्रयोजनत्वं तदुपायस्य तु तदिच्छाधीनेच्छाविषयत्वाद्गौणप्रयोजनत्वमिति ॥ २४ ॥

क्रमप्राप्तं दृष्टान्तं लक्षयति ।—लौकिकोऽप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः प्रतिपाद्य इति फलितोऽर्थः, परीक्षकः शास्त्रपरिशीलनप्राप्तबुद्धिप्रकर्षः प्रतिपादक इति फलितार्थः, तथाच प्रतिपाद्यप्रतिपादकयोरिति पर्य्यवसन्नं, बहुवचनं कथाबहुत्वमभिप्रेत्य, बुद्धेः साध्यसाधनोभयविषयिण्या तदभावविषयिण्या वा साम्यम्

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः॥२६॥

अथ सिद्धान्तः।—इदमित्थमूतत्वेत्यभ्यनुज्ञायमानमर्थजातं सिद्धं सिद्धस्य संस्थितिः सिद्धान्तः। संस्थितिरित्यभावव्यवस्था, धर्मनियमः। स खल्वयम्।—तन्त्वार्थसंस्थितिस्तन्त्रसंस्थितिः। तन्त्रमितरेतराभिसम्बद्धस्यार्थसमूहस्योपदेशः शास्त्रम्। अधिकरणानुषक्तार्था संस्थितिरधिकरणसंस्थितिः। अभ्युपगमसंस्थितिरनवधारितार्थपरिग्रहः तद्विशेषपरीक्षणायाभ्युपगमसिद्धान्तः॥२६॥

सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्॥ २७॥

तन्त्रभेदात् खलु स चतुर्विधः।—तत्रैतावत्तमः संस्थितयोऽर्थान्तरभूताः, तासाम्॥ २७॥

अविरोधी यस्मिन्नर्थे सोऽर्थो दृष्टान्तः, वादिप्रतिवादिनोः साधनोभयप्रकारकतदभावद्वयप्रकारकज्ञानयोरनिश्चयविषयो दृष्टान्त इति पथवदसौ॥ २५॥

समाप्तं न्यायपूर्वीयप्रकरणम्।

क्रमप्राप्तं सिद्धान्तं लक्षयति।—तन्त्रं शास्त्रं तद्विषयाधिकरणं शास्त्रकतया यस्य तादृशोऽस्य योऽभ्युपगमस्तस्य समीचीनतयाऽसंशयरूपतया स्थितिः तथाच "शास्त्रितार्थनिश्चयः सिद्धान्तः", अत्र चाभ्युपगम्यमानोऽर्थः सिद्धान्त इति भाष्यम्, अभ्युपगमः सिद्धान्त इति वार्तिक-टीकै नचाचार्यविरोधः शङ्कनीयः, आचार्यैः परिगृहीतत्वात्। तथाच विमृतौनिबन्धः, "अर्थाभ्युपगमयोर्गुणप्रधानभावस्य विवक्षा" तन्त्रत्वादर्थाभ्युपगमोऽभ्युपगम्यमानो वार्थः सिद्धान्तः तेन सूत्रभाष्यवार्त्तिकटीकासु न विरोधः। अत्र च भाष्यानुसारात्सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तान्यतमः सिद्धान्त इति समार्थ इति तु न युक्तं, अधिकसूत्रानुत्थानापत्तेः, तन्त्रसिद्धान्तत्वेन इयमनुगमस्य तन्त्राधिकरणाभ्युपगमान्यतमः सिद्धान्त इति कथित्॥ २६॥

विभजते।—स चतुर्विध इति शेषः सर्वतन्त्रादिसंस्थितीनामर्थान्तरभावात् भेदादित्यर्थः॥ २७॥

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २८ ॥

यथा घ्राणादीनीन्द्रियाणि गन्धादय इन्द्रियार्थाः पृथिव्यादीनि भूतानि प्रमाणैरर्थस्य ग्रहणमिति ॥ २८ ॥

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ २९ ॥

यथा नासत आत्मलाभः न सत आत्महानं निरतिशयाश्चेतनाः देहेन्द्रियमनःसु विषयेषु तत्तत्कारणेषु च विशेष इति साङ्ख्यानाम्. पुरुषकर्मनिमित्तो भूतसर्गः, कर्महेतवो दोषाः प्रवृत्तिश्च, स्वगुणविशिष्टाश्चेतनाः, असदुत्पद्यते, उत्पन्नं निरुध्यते इति, योगानाम् ॥ २९ ॥

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ ३० ॥

यस्यार्थस्य सिद्धावन्येऽर्था अनुषज्यन्ते न तैर्विना सोऽर्थः

सर्वतन्त्रसिद्धान्तं लक्षयति ।—सर्वतन्त्राविरुद्धः सर्वशास्त्राभ्युपगत इति वदन्ति । वस्तुतो यथाश्रुत एवार्थः अन्यथा तन्त्रेऽधिकृत इत्यस्य वेयर्थ्यापत्तेरत एव आत्यार्थरसदुत्तरत्वमपि सर्वतन्त्रसिद्धान्तः । न च "तन्त्रेऽधिकृत इति स्पष्टार्थं लक्षणं तु न देयमेव" इति वाच्यं, मनस इन्द्रियत्वस्यापि सर्वतन्त्रसिद्धान्तत्वापत्तेः । तत्र्यास्तु ध्रुवस्यो पलक्षणमात्रत्वाद्वादिप्रतिवाद्यभ्युपगतः कथानुकूलोऽर्थः स इति वदन्ति ॥ २८ ॥

प्रतितन्त्रसिद्धान्तं लक्षयति ।—समानशब्द एकार्थः तेनैकतन्त्रसिद्ध इत्यर्थः, स्वतन्त्रसिद्ध इति पर्य्यवसितोऽर्थः, तथा च वादिप्रतिवाद्येकतरस्याभ्युपगतस्तदैकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः, यथा मीमांसकानां शब्द नित्यत्वम् ॥ २९ ॥

अधिकरणसिद्धान्तं लक्षयति ।—यस्यार्थस्य सिद्धौ जायमानायाम् एवान्यस्य

सिध्यति तेऽर्था यदधिष्ठानाः सोऽधिकरणसिद्धान्तः, यथा देहेन्द्रियव्यतिरिक्तो ज्ञाता, दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति। अत्रानुषङ्गिणोऽर्था इन्द्रियनानात्वं नियतविषयाणीन्द्रियाणि स्वविषयग्रहणलिङ्गानि ज्ञातुर्ज्ञानसाधनानि गन्धादिगुणव्यतिरिक्तं द्रव्यं गुणाधिकरणं नियतविषयचेतना इति पूर्वार्थसिद्धावेतेऽर्थाः सिध्यन्ति न तैर्विना सोऽर्थः सम्भवतीति ॥ ३० ॥

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ ३१ ॥

यत्र किञ्चिदर्थजातमभ्युपगम्यते अस्तु द्रव्यं शब्दः, स तु नित्योऽथाऽनित्य इति द्रव्यस्य सतो नित्यताऽनित्यता वा तद्विशेषः परीक्ष्यते सोऽभ्युपगमसिद्धान्तः स्वबुद्ध्यतिशयं ख्यापयिषया परबुद्ध्यवज्ञानाच्च प्रवर्त्तत इति ॥ ३१ ॥

प्रकरणस्य प्रस्तुतस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः। यथा चलनाद्यनुकार्यादिकं पचौदनत्वोपादानगोचरापरोक्षज्ञानचिकीर्षाक्रतिमज्जन्यत्वे साध्यमाने सर्वज्ञत्वसौम्यस्य, एवं हेतुबलादपि। यथा दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिन्द्रियादिव्यतिरिक्तं ज्ञातरि साधिते इन्द्रियनानात्वं, तथाच यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद्वा न सिध्यति सोऽधिकरणसिद्धान्त इति। वस्तुतस्तु शब्दत्वमनुमानत्वं वाविवक्षितं, प्रमाणमात्रमपेक्षितम्, अत एव ग्रन्थेऽस्मिन् स्थूलत्वसाधनानन्तरमुक्तमाकाशतत्त्वविवेके "सोऽयमधिकरणसिद्धान्तन्यायेन स्थूलत्वसिद्धौ सत्यभङ्गभङ्ग" इति, तत्र च वाक्यार्थसिद्धौ तदनुषङ्गी यो यः सोऽधिकरणसिद्धान्त इति वार्त्तिकटीकां लिखित्वा येन केनापि प्रमाणेन वाक्यार्थसिद्धौ जन्यमानायां योऽन्यार्थः सिध्यति स तथेत्यर्थः, इति व्याख्यातं दीधितिकृता, "एवं हेतुरीदृशः पक्षस्य वाक्यार्थः" इति टीकावचने च उपलक्षणमेतदित्युक्तं तत्र तत्र विशिष्यैव लक्षणं कार्यम्। यत्तु जनकीभूतव्यापकताज्ञाने व्यापककोटाविविषयः प्रकृतानुमित्या व्यापककोटौ विषयीक्रियते, शाब्दजनकपदार्थज्ञानाविषयत्वे सति शाब्दविषयत्वेति स्वयमधिकरणसिद्धान्त इति, तत्र, इन्द्रियनानात्वादौ भाष्याद्युदाहरणेऽव्याप्तेरिति ॥ ३० ॥

अभ्युपगमसिद्धान्तं लक्षयति।—अपरीक्षितस्य साक्षादनुमितस्य विशेषपरीक्षणं

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः

॥ ३२॥

अथावयवाः।—दश्यावयवानेके नैयायिका वाक्ये सञ्चक्षते। जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदास इति ते कस्मान्नोच्यन्त इति तत्राप्रतीयमानेऽर्थे प्रत्ययार्थस्य प्रवर्त्तिका जिज्ञासा, अप्रतीयमानमर्थं कस्माज्जिज्ञासते तं तत्त्वतो ज्ञातं हास्यामि वोपादास्ये वा, उपेक्षिष्ये वेति तावता हानोपादानोपेक्षाबुद्धयस्तत्त्वज्ञानस्यार्थस्तदर्थमयं जिज्ञासते सा खल्वियमाधनमर्थस्येति, जिज्ञासाधिष्ठानं संशयश्च व्याहतधर्मोपसङ्गात्वात् तत्त्वज्ञाने प्रत्यासन्नः व्याहतयोर्हि धर्मयोरन्यतरत्तत्त्वं भवितुमर्हतीति स पृथगुपदिष्टोऽप्यसाधनमर्थस्येति, प्रमातुः प्रमाणानि प्रमेयाधिगमार्थानि सा शक्यप्राप्तिर्न साधकस्य वाक्यस्य भागेन युज्यते प्रतिज्ञादिवदिति। प्रयोजनं तत्त्वावधारणमर्थसाधकस्य वाक्यस्य फलं नैकदेश इति, संशयव्युदासः प्रतिपक्षोपवर्णनं तत्प्रतिषेधेन तत्त्वज्ञानाभ्यनुज्ञानार्थं न त्वयं साधकवाक्यैकदेश इति, प्रकरणं तु जिज्ञासादयः समर्थाः

विशेषधर्मकथनम्, अभ्युपगमादिति ज्ञापकत्वे पञ्चमी अभ्युपगमज्ञापकमित्यर्थः, विशेषपरीक्षणाज्ज्ञायते सूत्रकृतोऽभ्युपगतमिदमिति तथाच साक्षात्सूत्रिताभ्युपगमोऽभ्युपगमसिद्धान्तः यथा मनस इन्द्रियत्वमिति ॥ ३१ ॥

समाप्तं न्यायसिद्धान्तलक्षणप्रकरणम् ॥

क्रमप्राप्तानवयवान् लक्षयितुं विभजते।—अनेन विभागेन प्रतिज्ञाद्यन्यतमत्वमवयवत्वमिति लक्षणं सूचितम्। अत्र च प्रतिज्ञादीनां पञ्चानामवयवत्वकथनाद्दशावयववादी व्युदस्त इति मन्तव्यं, तेन च यथा दर्शिता भाष्ये जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति एते प्रतिज्ञादिसहिता दश। व्याख्यातारश्च तात्पर्यटीकायां, प्रयोजनं हानादिबुद्धयः, तत्प्रवर्त्तिका जिज्ञासा तज्जनकः संशयः शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं संशयव्युदासस्तर्कः, अयमेवार्थो निबन्धे

अवधारणीयार्थोपकारा अर्थसाधकाः, भावात्तु प्रतिज्ञादयः साधकवाक्यस्य भागाः एकदेशा अवयवा इति ॥ ३२ ॥

साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥

तेषां तु यथाविभक्तानाम्।—प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञा साध्यनिर्देशः अनित्यः शब्द इति ॥ ३३ ॥

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ॥३४॥

उदाहरणेन सामान्यात् साध्यस्य धर्मस्य साधनं प्रज्ञापनं हेतुः साध्ये प्रतिसन्धाय धर्ममुदाहरणे च प्रतिसन्धाय तस्य साधनतावचनं हेतुः उत्पत्तिधर्मकत्वादिति उत्पत्तिधर्मकमनित्यं दृष्टमिति। किमेतावद्धेतुलक्षणमिति नेत्युच्यते, किं तर्हि ॥ ३४ ॥

निष्टङ्कितः। जिज्ञासा विप्रतिपत्तिरिति कश्चित्। एतेषान्तु न न्यायावयवत्वं न्यायाघटकत्वात्। न च न्यायजन्यबोधानुकूलत्वेनैवावयवत्वम्, एकदेशस्यापि तत्त्वप्रसङ्गात् प्रयोजनेऽव्याप्तेश्च ॥ ३२ ॥

प्रतिज्ञां लक्षयति।—साधनीयस्यार्थस्य यो निर्देशः स प्रतिज्ञा, साधनीयश्च वह्निमत्त्वादिना पर्वतादिः तथाच पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधकशब्द इत्यर्थः, निगमनवारणाय च साध्यांशे साध्यतावच्छेदकेति विशेष्यप्रकारकत्वं वाच्यं, तदर्थश्च साध्यतावच्छेदकप्रकारतावैलक्षण्यप्रकारतायाश्चत्वं, तेन प्रमेयवतः साध्यत्वे नासिद्धिः। उदाहरणवाक्यवारणाय च न्यायान्तर्गतत्वे सतीति विशेषणीयम्, न्यायान्तर्गतत्वे सति प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविषयतावैलक्षण्यविषयताकबोधजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकत्वं तत् प्रतिज्ञावयवत्वादिकं, परिभाषाविशेषविषयत्वरूपं तत्तद्व्यक्तित्वरूपं चेत्यपि वदन्ति ॥ ३३ ॥

क्रमप्राप्तं हेतुं लक्षयति विभजते च सूत्राभ्याम्।—अत्र साध्यसाधनं हेतुरिति सामान्यलक्षणं साध्यसाधनं साध्यसिद्ध्यनुकूलज्ञापकत्वबोधक इत्यर्थः, तथाच

तथा वैधर्म्यात् ॥ २५ ॥

उदाहरणवैधर्म्याच्च साध्यसाधनं हेतुः कथम् अनित्यः शब्द उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकं नित्यं यथात्मादि द्रव्यमिति ॥ २५ ॥

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ २६ ॥

साध्येन साधर्म्यं समानधर्मता साध्यसाधर्म्यात् कारणात् तद्धर्मभावी दृष्टान्त इति तस्य धर्मस्तद्धर्मः तस्य साध्यस्य साध्यश्च द्विविधं, धर्मः धर्मविशिष्टो वा, धर्मः शब्दस्यानित्यत्वम् । धर्मविशिष्टो वा धर्मी अनित्यः शब्द इति, दृष्टोत्तरं तदुग्रहणेन गृह्यत इति कस्मात् पृथग्धर्मवचनात् । तस्य धर्मस्तद्धर्मस्तस्य भावस्तद्धर्मभावः स यस्मिन् दृष्टान्ते वर्त्तते स दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावी भवति स चोदाहरणमिष्यते तत्र यदुत्पद्यते तदुत्पत्तिधर्मकं तच्च भूत्वा न भवति आत्मानं जहाति

साध्यतावच्छेदकावच्छिन्नसाध्यान्वितग्राप्यकत्वबोधकः साध्यान्वितस्वार्थबोधकोऽन्वयव वा इति फलितार्थः, तस्य वैविध्यमाह उदाहरणसाधर्म्यात् तथा वैधर्म्यादिति साधर्म्यमन्वयः वैधर्म्यं व्यतिरेकः ताद्दश्यव्याप्तिरिति फलितार्थः । उदाहरणसाधर्म्यम् उदाहरणबोध्यान्वयव्याप्तिः ततोऽन्वयी हेतुर्ज्ञातव्य उदाहरणेति स्पष्टार्थं, तथा च ज्ञातान्वयव्याप्तिकहेतुबोधको हेत्ववयवः, अज्ञातव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयव इति फलितार्थः । एवमप्रतीतान्वयव्याप्तिकहेतुबोधको हेत्ववयवो व्यतिरेकी हेतुः, इत्थमेव प्रतीतान्वयव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयवोऽन्वयव्यतिरेकीत्यपि सूचितमिति वदन्ति ॥ २४ ॥ २५ ॥

क्रमेणप्राप्तमुदाहरणं लक्षयति ।—दृष्टान्त उदाहरणमिति लक्ष्यं दृष्टान्तो दृष्टान्तवचनं दृष्टान्तलक्षणयोग्यावयव इत्यर्थः तेन दृष्टान्तस्य सामयिकत्वेनासार्वत्रिकत्वेऽपि न क्षतिः योग्यतावच्छेदकत्वन्तु अवयवान्तरार्थानन्वितार्थकावयवत्वं, तच्च

निरुध्यत इत्यनित्यम्। एवमुत्पत्तिधर्मकत्वं साधनमनित्यत्वं साध्यं सोऽयमेकस्मिन् द्वयोर्धर्मयोः साध्यसाधनभावः साधर्म्याद् व्यवस्थित उपलभ्यते तं दृष्टान्ते उपलभमानः शब्देऽप्यनुमिनोति शब्दोऽप्युत्पत्तिधर्मकत्वादनित्यः स्थाल्यादिवदित्युदाक्रियते तेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम्॥ ३६॥

तद्विपर्य्ययाद्वा विपरीतम्॥ ३७॥

दृष्टान्त उदाहरणमिति प्रकृतं साध्यवैधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणमिति अनित्यः शब्द उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकं नित्यमात्मादि सोऽयमात्मादिर्दृष्टान्तः साध्यवैधर्म्यादनुत्पत्तिधर्मकत्वादतद्धर्मभावी योऽसौ साध्यस्य धर्मोऽनित्यत्वं स तस्मिन् भवतीति। अचात्मादौ दृष्टान्ते उत्पत्तिधर्मकत्वस्याभावादनित्यत्वं न भवतीति उपलभमानः शब्दे विपर्य्ययमनुमिनोति उत्पत्तिधर्मकत्वस्य भावादनित्यः शब्द इति साधर्म्योक्तस्य हेतोः साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणं वैधर्म्योक्तस्य हेतोः साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त उदाहरणं पूर्वस्मिन् दृष्टान्ते यौ तौ धर्मौ साध्यसाधनभूतौ पश्यति साध्येऽपि तयोः साध्यसाधनभावमनुमिनोति उत्तरस्मिन् दृष्टान्ते ययोर्धर्मयोरेकस्याभावादितरस्याभावं

द्विविधम् अन्वयिव्यतिरेकिभेदात् तत्रान्वय्युदाहरणं लक्षयति, साध्यसाधर्म्यात्तद्धर्मभावीति अन्वय्युदाहरणमिति शेषः, परे तु सम्पूर्णसूत्रमन्वय्युदाहरणलक्षणमेव सामान्यलक्षणं वृत्तमित्याहुः, साध्यसाधर्म्यात् साध्यसदृचरितधर्मात् प्रकृतसाधनादित्यर्थः तं साध्यरूपं धर्मं भावयति तथाच साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोऽवयवः साध्यसाधनव्याप्त्युपदर्शकोदाहरणमिति यावत्॥ ३६॥

व्यतिरेक्युदाहरणं लक्षयति।—तद्विपर्ययात् साध्यसाधनव्यतिरेकव्याप्तिप्रदर्शनात् तथा च साध्यसाधनव्यतिरेकव्याप्त्युपदर्शकोदाहरणं व्यतिरेक्युदाहरणं

पश्यति तयोरेकस्याभावादितरस्याभावं साध्ये अनुमिनोतीति, तदेतद्धेत्वाभासेषु न सम्भवतीत्यहेतवो हेत्वाभासाः तदिदं हेतूदाहरणयोः सामर्थ्यम्परमसूक्ष्मं दुःखबोधं पण्डितैरुपवेदनीयमिति ॥ ३७ ॥

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ ३८ ॥

उदाहरणापेक्ष उदाहरणतन्त्रः उदाहरणवशः, वशः सामर्थ्यम्, साध्यसाधर्म्ययुक्ते उदाहरणे स्थाल्यादिद्रव्यमुत्पत्तिधर्मकमनित्यं दृष्टं तथा शब्द उत्पत्तिधर्मक इति साध्यस्य शब्दस्योत्पत्तिधर्मकत्वमुपसंक्रियते, साध्यवैधर्म्ययुक्ते पुनरुदाहरणे आत्मादिद्रव्यमनुत्पत्तिधर्मकं नित्यं दृष्टं न च तथा शब्द इति अनुत्पत्तिधर्मकत्वस्योपसंहारप्रतिषेधेनोत्पत्तिधर्मकत्वमुपसंक्रियते तदिदमुपसंहारहेतमुदाहरणहेताङ्गवति उपसंक्रियतेऽनेनेति चोपसंहारो वेदितव्य इति । द्विविधस्य पुनर्हेतोर्द्विविधस्य चोदाहरणस्योपसंहारहेते च समानम् ॥ ३८ ॥

यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यच्चैवं तच्चैवं, यथा घट इति, वाक्यैः प्रयोगमपेक्ष्य न तु लक्षणानुवर्त्तीं, तथा चान्वय्युदाहरणं व्यतिरेक्युदाहरणं वा प्रयोक्तव्यमित्यर्थः ॥ ३७ ॥

क्रमप्राप्तमुपनयं लक्षयति ।—साध्यस्य पक्षस्य उदाहरणापेक्ष उदाहरणानुसारी य उपसंहार उपन्यासः प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविषयकबोधजनको न्यायावयव इत्यर्थः, निगमनं हेतुविशिष्टत्वेन न पक्षबोधकं, किन्तु पक्षवृत्तिहेतुबोधकमिति तदव्युदासः, अत्र चान्वयव्यतिरेक्यन्यतरत्वादिनानुगमः कार्य्य उदाहरणोपदर्शितेति तु परिचायकमात्रमिति तु न वाच्यम्, उदाहरणविपरीतव्याप्त्युपदर्शकोपनयवारणत्वात् । वस्तुतोऽवयवपदेनैव तदुदासः । स चोपनयो द्विविधोऽन्वयिव्यतिरेकिभेदात् तथेति साध्यस्योपसंहारोऽन्वय्युपनयः न तथेति साध्यस्योपसंहारो व्यतिरेक्युपनयः अत्र च तथाशब्दप्रयोगावश्यकत्वे न तात्पर्य्यं, किन्तु व्याप्तिविशिष्टहेतुमत्त्वबोधे तथा च वह्निव्याप्यधूमवांश्चायमिति वा तथा

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ ३९ ॥

साधर्म्योक्तेः वैधर्म्योक्तेः वा यथोदाहरणमुपसंक्रियते तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्दः इति निगमनम्, निगम्यन्तेऽनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकत्रेति निगमनं निगम्यन्ते समर्थ्यन्ते सम्बध्यन्ते, तत्र साधर्म्योक्तेः तावत्तेतौ वाक्यमनित्यः शब्दः इति प्रतिज्ञा, उत्पत्तिधर्मकत्वादिति हेतुः। उत्पत्तिधर्मकं स्थाल्यादिद्रव्यमनित्यमित्युदाहरणम्, तथाचोत्पत्तिधर्मकः शब्द इत्युपनयः, तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम्, वैधर्म्योक्तेरपि अनित्यः शब्दः उत्पत्तिधर्मकत्वात्, अनुत्पत्तिधर्मकमात्मादिद्रव्यं नित्यं दृष्टम्, न च तथानुत्पत्तिधर्मकः शब्दः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति, अवयवसमुदाये च वाक्ये सम्भूय इतरेतराभिसम्बन्धात् प्रमाणान्यर्थं साधयन्तीति, सम्भवस्तावच्छब्दविषया प्रतिज्ञा आप्तोपदेशस्य प्रत्यक्षानुमानाभ्यां प्रतिसन्धानादृषिषु स्वातन्त्र्यानुपपत्तेः अनुमाने हेतुः उदाहरणे साधर्म्यप्रतिपत्तेः, तत्रोदाहरणं भाष्ये व्याख्यातं प्रत्यक्षविषयमुदाहरणं दृष्टेनादृष्टसिद्धेः। उपमानमुपनयः तथेत्युपसंहारात् न च तथेत्युपमानधर्मप्रतिषेधे विपरीतधर्मोपसंहारसिद्धेः, सर्वेषामेकार्थप्रतिपत्तौ सामर्थ्यप्रदर्शनं निगमनमिति। इतरेतराभिसम्बन्धेऽप्यसत्यां प्रति-

---

क्षायमिति वोपन्यासः एवं व्यतिरेकिण्यपि वक्तृभावव्यापकीभूताभावप्रतियोगिधर्मवत्त्वायमिति वा न तथेति वोपन्यासः ॥ ३८ ॥

निगमनं लक्षयति।—हेतोर्व्याप्तिविशिष्टपक्षधर्मस्य उपदेशः कथनं प्रतिज्ञायाः प्रतिज्ञार्थस्य साध्यविशिष्टपक्षस्य वचनं निगमनं तथा च व्याप्तिविशिष्टपक्षधर्म-

न्यायामनाश्रया हेत्वादयो न प्रवर्त्तेरन्, असति हेतौ कस्य साधनभावः प्रदर्श्यते उदाहरणे साध्ये च कस्योपसंहारः स्यात् कस्य चापदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनं स्यादिति, असत्युदाहरणे केन साधर्म्ये वैधर्म्ये वा साध्यसाधनमुपादीयेत कस्य वा साधर्म्यवशादुपसंहारः प्रवर्त्तेत, उपनयनद्वारान्तरेण साध्येऽनुपसंहृतः साधको धर्मो नार्थं साधयेत्, निगमनाभावे वानभिव्यक्तसम्बन्धानां प्रतिज्ञादीनामेकार्थे न प्रवर्त्तनं, तथेति प्रतिपादनं कस्येति। अथावयवार्थः साध्यस्य धर्मस्य धर्मिणा सम्बन्धोपादानं प्रतिज्ञार्थः। उदाहरणेन समानस्य विपरीतस्य वा धर्मस्य साधकभाववचनं हेत्वर्थः, धर्मयोः साध्यसाधनभाव-प्रदर्शनमेकदेशोदाहरणार्थः। साधनभूतस्य धर्मस्य साध्येन धर्मेण सामानाधिकरण्योपपादनमुपनयार्थः। उदाहरण-स्थयोर्धर्मयोः साध्यसाधनभावोपपत्तौ साध्ये विपरीतप्रसङ्ग-प्रतिषेधार्थं निगमनम्। न चैतस्यां हेतूदाहरणपरिशुद्धौ सत्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिनिग्रहस्थान-बहुत्वं प्रक्रमते, अप्यवस्थाप्य खलु साध्यसाधनभावमुदाहरणे जातिवादो प्रत्यवतिष्ठते व्यवस्थिते तु खलु धर्मयोः साध्य-साधनभावे दृष्टान्तस्थे गृह्यमाणे साधनभूतस्य धर्मस्य हेतुत्वे-नोपमानं न साधर्म्यमात्रस्य न वैधर्म्यमात्रस्य वेति। अत ऊर्द्धं तर्को लक्षणीय इति॥ ३९॥

हेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः व्याप्यपक्षधर्महेतुज्ञाप्यसाध्यविशिष्टपक्ष-बोधकलक्षणाद्दशसाध्यबोधको वा न्यायावयवो निगमनमिति कस्य चिन्नैयायिकस्यैवा-भेदान्न भेद इत्याशयः, व्यतिरेकिणि तु तस्मान्न तथेत्येवाकार इत्यपरे॥ ३९॥

समाप्तं न्यायस्वरूपप्रकरणम्॥ १॥

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ ४० ॥

अथेदमुच्यते।—अविज्ञायमानतत्त्वेऽर्थे जिज्ञासा तावज्जायते जानीयेममर्थमिति, अथ जिज्ञासितस्य वस्तुनो व्याहतौ धर्मौ विभागेन विमृशति किंस्विदित्थमाहोस्विन्नेत्थमिति विमृश्यमानयोर्धर्मयोरेकं कारणोपपत्त्याऽनुजानाति सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति, कारणोपपत्त्या स्यादेवमेतन्नेतरदिति तच्च निदर्शनं योऽयं ज्ञाता ज्ञातव्यमर्थं जानीते तच्च भो जानीयेति जिज्ञासा, स किमुत्पत्तिधर्मकोऽनुत्पत्तिधर्मक इति विमर्शः, विमृश्यमानेऽविज्ञाततत्त्वेऽर्थे यस्य धर्मस्याभ्यनुज्ञाकारणमुपपद्यते तमनुजानाति, यद्ययमनुत्पत्तिधर्मकस्ततः स्वकृतस्य कर्मणः फलमनुभवति ज्ञाता, दुःखजन्यप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरमुत्तरं पूर्वस्य पूर्वस्य कारणमुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति स्यातां संसारापवर्गौ, उत्पत्तिधर्मके ज्ञातरि पुनर्न स्याताम्, उत्पन्नः खलु ज्ञाता

क्रमप्राप्तं तर्कं लक्षयति।—तर्क इति लक्ष्यनिर्देशः कारणोपपत्तित ऊह इति लक्षणम् अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति प्रयोजनकथनं कारणं व्याप्य तस्योपपत्तिरारोपस्तस्मात्, ऊह आरोपः अर्थाद्व्यापकस्य तथाच व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याहार्यारोपाद्यो व्यापकस्याहार्यारोपः स तर्कः, यथा निर्वह्नित्वारोपान्निर्धूमत्वारोपः, निर्वह्निः स्यान्निर्धूमः स्यादित्यादि। ह्रदो निर्वह्निः स्यान्निर्धूमः स्यादित्यादिवारणाय व्यापकाभाववत्त्वेन निर्णीत इति। निर्वह्निः स्यात् अह्रदत्वं स्यादित्यादिवारणाय व्याप्यस्येति। तद्व्याप्यारोपाधीनस्तदारोप इत्यर्थलाभाय व्यापकेति। न चानुमानादितोऽर्थसिद्धेस्तर्कोऽर्थ इति वाच्यम्, अप्रयोजकत्वादिशङ्काकलङ्कितेन हेतुनार्थस्य साधयितुमशक्यत्वात्, तदेतदुक्तमविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति तत्त्वनिर्णयार्थमित्यर्थः। यत्र नाप्रयोजकत्वाद्याशङ्का तत्र नापेक्ष्य एवेति भावः। परे तु ऊह इत्येव लक्षणम्, ऊहत्वञ्च मानसत्वव्याप्यो जातिविशेषस्तर्कत्वानीत्यनुभव-

देहेन्द्रियबुद्धिवेदनाभिः सम्बध्यत इति नास्येदं स्वकृतस्य कर्मणः फलमुत्पत्त्वा च भूत्वा न भवतीति तस्याविद्यमानस्य निरूढस्य वा स्वकृतकर्मणः फलोपभोगो नास्ति, तदेवमेकस्यानेकशरीरयोगः शरीरादिवियोगश्चात्यन्तं न स्यादिति। यत्र कारणमनुपपद्यमानं पश्यति तत्रानुजानाति, सोऽयमेवं लक्षण ऊहस्तर्क इत्युच्यते। कथं पुनरयं तत्त्वज्ञानार्थो न तत्त्वज्ञानमेवेति अनवधारणात् अनुजानात्ययमेकतरं धर्मं कारणोपपत्त्या न त्ववधारयति न व्यवस्यति न निश्चिनोति एवमेवेदमिति। कथं तत्त्वज्ञानार्थ इति, तत्त्वज्ञानविषयाभ्यनुज्ञालक्षणानुग्रहेक्षावितात् प्रसञ्जनानन्तरप्रमाणसामर्थ्यात् तत्त्वज्ञानमुत्पद्यत इत्येव तत्त्वज्ञानार्थ इति। सोऽयं तर्कः प्रमाणानि प्रतिसन्दधानः प्रमाणाभ्यनुज्ञानात् प्रमाणसहितो वादे उपदिष्ट इत्यविज्ञाततत्त्वमनुजानातीति यथा सोऽर्थो भवति तस्य यथाभावस्तत्त्वमविपर्ययो याथातथ्यम्। एतस्मिंश्च तर्कविषये ॥ ४० ॥

सिद्धः। तर्कः किं स्वत एव निर्णायकः परम्परया वेत्यत आह—कारणेति। कारणस्य व्याप्तिज्ञानादिरूपयादनद्वारेत्यर्थः, तथा च धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादित्यनेन व्यभिचारशङ्कानिरासे निरङ्कुशेन व्याप्तिज्ञानेनानुमितिरिति परम्परयैवास्योपयोग इत्याहुः। स चायं पञ्चविधः आत्माश्रयान्योन्याश्रयचक्रकानवस्थातदन्यबाधितार्थप्रसङ्गभेदात् स्वस्य स्वापेक्षितेऽनिष्टप्रसङ्ग आत्माश्रयः। स च उत्पत्तिस्थितिज्ञप्तिद्वारा त्रेधा, यथा यद्यं घट एतद्घटजन्यः स्यात्तदैतद्घटानधिकरणक्षणोत्तरवर्ती न स्यात्, यद्यं घट एतद्घटवृत्तिः स्यात् एतद्घटव्याप्यो न स्यात् यद्यं घट एतद्घटज्ञानाभिन्नः स्यात् ज्ञानसामग्रीजन्यः स्यात्, एतद्घटभिन्नः स्यादिति वा सर्वत्रापाद्यं, तदपेक्षापेक्षितनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः। सोऽपि पूर्ववत् त्रेधा तदपेक्षापेक्षापेक्षितनिबन्धनोऽनिष्टप्रसङ्गः चक्रकं, चतुःपञ्चादावपि स्वस्य स्वापेक्षापेक्षापेक्षितसत्त्वान्नाधिक्यम् अस्यापि पूर्ववत् त्रैविध्यम्, अन्यवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गोऽनवस्था यथा यदि घटत्वं घटजन्यत्वव्याप्यं स्यात्कपालसमवेत-

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः

॥ ४१ ॥

स्थापना साधनं, प्रतिषेध उपालम्भः, तौ साधनोपालम्भौ पक्षप्रतिपक्षाश्रयौ व्यतिषङ्गावनुबन्धेन प्रवर्त्तमानौ पक्षप्रतिपक्षावित्युच्येते, तयोरन्यतरस्य निवृत्तिरेकतरस्यावस्थानम् अवश्यम्भावि, यस्यावस्थानं तस्यावधारणं निर्णयः। नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं सम्भवतीति एको हि प्रतिज्ञातमर्थं हेतुतः स्थापयति प्रतिमिषं चोद्धरतीति द्वितीयस्य द्वितीयेन स्थापनाहेतुः प्रतिषिध्यते तस्यैव प्रतिषेधहेतुरुद्धियते स निवर्त्तते तस्य निवृत्तौ योऽवतिष्ठते तेनार्थावधारणं निर्णय इति उभाभ्यामेवार्थावधारणमित्याह, कया युक्त्या एकस्य सम्भवो द्वितीयस्यासम्भवः तावेतौ सम्भवासम्भवौ विमर्शं सह निवर्त्तयतः, उभयसम्भवे उभयासम्भवे त्वनिवृत्तौ विमर्श इति। विमृश्येति विमर्शं कृत्वा, सोऽयं विमर्शः पक्षप्रतिपक्षाभावद्योत्यं न्यायं प्रवर्त्तयतीत्युपादीयत इति, एतच्च विरुद्धयोरेकधर्म्मिस्थयोर्बोद्धव्यं, यत्र तु धर्म्मिसामान्यगतौ विरुद्धौ धर्म्मौ हेतुतः सम्भवतः तत्र समुच्चयहेतुतोऽर्थस्य तत्त्वाभावोपपत्तेः, यथा क्रियावद्द्रव्यमिति लक्षणवचने यस्य द्रव्यस्य क्रियायोगो हेतुतः सम्भवति तत् क्रियावत् यस्य न

त्वव्याप्यं न स्यात्, तदव्याधितार्थप्रसङ्गस्तु धूमी यदि वह्नित्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादि। प्रथमोपस्थितत्वोत्सर्गविनिगमनाविरहज्ञाघवगौरवादिकन्तु प्रसङ्गानामङ्गत्वात् न तर्कः, किन्तु प्रमाणसहकारित्वरूपसाधर्म्यात् तथा व्यवहार इति संक्षेपः॥ ४०॥

क्रमप्राप्तं निर्णयं लक्षयति।—विमृश्य सन्दिह्य पक्षप्रतिपक्षाभ्यां साधनोपालम्भाभ्याम् उपालम्भः परपक्षदूषणम्। अर्थस्यावधारणं तदभावाप्रकारकं तत्प्रकारकं

सम्भवति तदक्रियमिति एकधर्मिस्थयोश्च विरुद्धयोरयुग-पद्भाविनोः कालविकल्पः, यथा तदेव द्रव्यं क्रियायुक्तं क्रियावत् अनुत्पन्नोपरतक्रियं पुनरक्रियमिति। न चायं निर्णये नियमो विमृश्यैव पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति किन्त्विन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षेऽर्थावधारणं निर्णय इति परोक्षाविषये तु विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः शास्त्रे वादे च विमर्शवर्जम् ॥ ४१ ॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमाध्यायस्य
प्रथममाह्निकम्।

प्रथमाध्यायस्य

द्वितीयाह्निकम्।

तिस्रः कथा भवन्ति, वादो जल्पो वितण्डा चेति। तासाम्—

स्यात्, यद्यप्येतावदेव निर्णयसामान्यलक्षणं तथापि विमृश्येत्यादिकं जल्पवितण्डा स्थलीयनिर्णयमधिकृत्य तदुक्तं भाष्ये—"शास्त्रे वादे च विमर्शवर्जम्" इति एवं प्रत्यक्षतः शब्दाच्च निर्णये न विमर्शपक्षप्रतिपक्षापेक्षेति ॥ ४१ ॥

समाप्तं न्यायोत्तराङ्गप्रकरणम्।

इति श्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ
प्रथमाध्यायस्य प्रथममाह्निकम्।

प्रथमाह्निकेन सपरिकरे न्याये लक्षिते वादादिलक्षणाय द्वितीयाह्निकारम्भः छलपरीक्षा च प्रसङ्गान्निष्पत्स्यति, तथाच छलपरीक्षासहितवादादिलक्षणं द्वितीयाह्निकार्थः। तत्र चत्वारि प्रकरणानि। आदौ कथाप्रकरणं, ततो हेत्वाभासप्रकरणं, छलप्रकरणं, दोषलक्षणप्रकरणं चेति। तत्र कथासामान्यस्यायं विशेषो वादादिः तथा च त्रिभिः सूत्रैरेकं कथाप्रकरणम्, अन्यथैकसूत्रस्य प्रकरणभावाभावादसङ्गतिः

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥४२॥

एकाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ प्रत्यनीकभावादस्त्यात्मा नास्त्यात्मेति, नानाधिकरणौ विरुद्धौ न पक्षप्रतिपक्षौ. यथा नित्य आत्मा अनित्या बुद्धिरिति, परिग्रहोऽभ्युपगमव्यवस्था, सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः तस्य विशेषणं प्रमाणतर्कसाधनोपालम्भः प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् क्रियत इति, साधनं स्थापना, उपालम्भः प्रतिषेधः, एतौ साधनोपालम्भौ उभयोरपि पक्षयोर्व्यतिषक्तावनवद्धौ च यावदेको निहत्त एकतरो व्यवस्थित इति निहत्तस्योपालम्भो व्यवस्थितस्य साधनमिति जल्पे निग्रहस्थानविनियोगत्वादेतत्प्रतिषेधः, प्रतिषेधे कस्यचिदभ्यनुज्ञानार्थं सिद्धान्ताविरुद्ध इति वचनम्, सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति

स्यात् इत्याशयेनोक्तं भाष्यकृता—तिस्रः खलु कथा भवन्ति। वादो जल्पो वितण्डा चेति। तत्र तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यो न्यायानुगतवचनसन्दर्भः कथा, लौकिकविवादवारणाय न्यायेत्यादि. यथैकेन न्यायः प्रयुक्तोऽपरेण तु मतपरिग्रहोऽपि न कृतस्तद्वारणाय आद्यं विशेषणमिति। कथाधिकारिणस्तु तत्त्वनिर्णयविजयान्यतराभिलाषिणः सर्वज्ञतसिद्धानुभवानपलापिनः शमदमादिपटवः अकलङ्कचारित्राः कथौपयिकव्यापारक्षमा इति।

तत्र वादं लक्षयति।—अत्र च वाद इति लक्ष्यनिर्देशः पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी, तयोः परिग्रहस्तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भः, तावन्मात्रस्य कथान्तरसाधारणमत आह—प्रमाणेत्यादि। प्रमाणतर्काभ्यां तदुपेण ज्ञाताभ्यां साधनोपालम्भौ यत्र सः। तथाच उभयत्रापि प्रमाणादिसद्भावे इति कोटिद्वयस्यापि सिद्धिः स्यादतस्तदुपेण ज्ञाताभ्यामिति। ज्ञापनमात्रार्थं विवक्षितम्, उपालम्भो दूषणं, जल्पादौ तु प्रमाणाभासत्वादिना ज्ञाताभ्यामपि साधनोपालम्भौ भवत इति तद्वारणम्। तत्रच प्रमाणाभासत्वप्रकारकज्ञानविषयकरणक-

हेत्वाभासस्य निग्रहस्थानस्याभ्यनुज्ञावादे पञ्चावयवोपपन्न इति, हीनमन्यतमेनाप्यवयवेन न्यूनं हेतूदाहरणाधिकमधिकमिति चैतयोरभ्यनुज्ञानार्थमिति अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कग्रहणं साधनोपालम्भव्यतिषङ्गज्ञापनार्थम् । अन्यथोभावपि पक्षौ स्थापनाहेतुना प्रकृतौ वाद इति स्यात् । अन्तरेणाप्यवयवसम्बन्धम् प्रमाणान्यर्थं साधयन्तीति दृष्टं तेनापि कल्पेन साधनोपालम्भो वादे भवत इति ज्ञापयति । छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति वचनाद्विनिग्रहो जल्प इति मा विज्ञायि । छलजातिनिग्रहस्थानसाधनोपालम्भ एव जल्पः प्रमाणतर्कसाधनोपालम्भो वाद एवेति मा विज्ञायीत्येवमर्थं पृथक् प्रमाणतर्कग्रहणमिति ॥ ४२ ॥

साधनोपालम्भयोरन्यत्वे सतीत्यर्थः तेन तादृशजल्पविशेषे नातिव्याप्तिः । तत्र च निग्रहस्थानविशेषनियमार्थं सिद्धान्तेत्यादिविशेषणद्वयम् । अन्ये तु तदपि लक्षणघटकमेव तदर्थस्य तावन्मात्रनिग्रहस्थानयोग्यत्वं तावदतिरिक्तनिग्रहस्थानोपन्यासायोग्यत्वं वा, निग्रहस्थानं प्रतिज्ञाहान्यादीनामेकैकं बुद्धा तदुपन्यासायोग्यत्वमिति निष्कर्षः, तेनोक्तजल्पविशेषवारणमित्याहुः । सिद्धान्ताविरुद्ध इत्यनेनापसिद्धान्तोद्भावनं पञ्चावयवोपपन्न इत्यनेन न्यूनाधिकोद्भावने, अवयवाभासस्य दृष्टान्तासिद्धादेरुद्भावनं, प्रमाणेत्यनेन च प्रमाणाभासेन हेत्वाभासानां तर्काभासस्य चोपन्यासो नियम्यते । तथा चात्र हेत्वाभासन्यूनाधिकापसिद्धान्तरूपनिग्रहस्थानचतुष्टयोद्भावनमिति वदन्ति । वस्तुतस्तु वादस्य वीतरागकथात्वेन तत्त्वनिर्णयस्योद्देश्यतया पुरुषदोषस्याविज्ञातार्थादेरिव न्यूनाधिकयोरपि नोद्भावनमुचितम् । अत एव पञ्चावयवावयवत्वमपि भाष्यकारो नानुमेने हेत्वाभासाद्युद्भावनेनापि च तदैव कथाविच्छेदो यदि हेत्वन्तरेणापि साधयितुं न शक्यते, इतरथा तु तद्धेतोरेव दृष्टत्वम् । इत्यत्र पञ्चावयवोपपन्न इति प्रायिकत्वाभिप्रायेणेति तत्त्वम् । वादाधिकारिणस्तु तत्त्वबुभुत्सवः प्रकृतोक्तिकाः अविप्रलम्भकाः यथाकालस्पर्शिकाः, अनाक्षेपकाः युक्तिसिद्धप्रलेतारः । अनुविधेयस्थेयःसभ्यपुरुषवती जनता सभा, अनुविधेयौ राजादिः, स्थेयान् मध्यस्थः, सा च वादे नावश्यकी वीतरागकथात्वादिति ॥ ४२ ॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ ४३ ॥

यथोक्तोपपन्न इति प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः। छलजातिनिग्रहस्थानसाधनोपालम्भ इति। छलजातिनिग्रहस्थानैः साधनमुपालम्भश्चास्मिन् क्रियत इति। एवंविशेषणो जल्पः न खलु वै छलजातिनिग्रहस्थानैः साधनं कस्यचिदर्थस्य सम्भवति, प्रतिषेधार्थं चैषां सामान्यलक्षणे च श्रूयते वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति। विशेषलक्षणेष्वपि यथास्वमिति न चैतदिज्ञानीयात् प्रतिषेधार्थतयैवार्थं साधयन्नीति। छलजातिनिग्रहस्थानोपालम्भ इत्येवमभ्युच्यमाने विज्ञायत एतदिति। प्रमाणैः साधनोपालम्भयोश्छलजात्योरङ्गभावो रक्षणार्थत्वात् न तु स्वतन्त्राणां साधन-

---

जल्पं लक्षयति।—यथोक्तेषु यदुपपन्नं तेनोपपन्न इत्यर्थः मध्यपदलोपी समासः, तथा च प्रमाणतर्कसाधनोपालम्भः पञ्चप्रतिपक्षपरिग्रह इत्यस्य योग्यतया परामर्शः। अन्यथा जल्पस्य वादविशेषत्वापत्तिः, प्रमाणतर्काभ्यां तदुपेक्ष ज्ञाताभ्यां, न तु ज्ञानेऽनाहार्यत्वं विवक्षितम्, आरोपितप्रमाणाभासैऽपि जल्पनिर्वाहात्। यद्यपि छलादिभिरुपालम्भ एव न तु साधनं, तथापि साधनस्य परकीयानुमानस्योपालम्भो यस्मेत्यर्थान्न दोषः। परपक्षदूषणे सति स्वपक्षसिद्धिरित्यतः साधने तदुपयोग इत्यस्मे उभयपक्षस्थापनासत्त्वेन च विशेषणीयम् अतो वितण्डायामतिव्याप्तिः, स प्रतिपक्षस्थापनाहीन इत्युत्तरसूत्रात् प्रकृते उभयपक्षस्थापनावत्त्वलाभः, स्थापनावत्त्वादेव च पञ्चावयवन्यियमोऽपि लभ्यत इति वदन्ति। अत्र च छलादिभिः सर्वैरुपालम्भो न विशेषणं अव्याप्तेरपि तु तदौग्यतैव, यौग्यतावच्छेदकन्तु वादभिन्नकथात्वमेव। तत्र यौक्तवादत्वावच्छिन्नभेदप्रतियोगितावादभेदो वा विशेषणमिति, छलेत्यादिना विजिगीषुकथात्वं बोध्यते विजिगीषुर्हि छलादिकं करोति तथाचोभयपक्षस्थापनावतो

भावः । यत् तत्प्रमाणेरर्थस्य साधनं तच्च छलजातिनिग्रहस्थानानामङ्गभावो रक्षणार्थत्वात्, तानि हि प्रयुज्यमानानि परपक्षविघातेन स्वपक्षं रक्षयन्ति । तथा चोक्तम् ।—"तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्" इति । यश्चासौ प्रमाणैः प्रतिपक्षस्योपालम्भस्तस्य चैतानि प्रयुज्यमानानि प्रतिषेधविघातात् सहकारीणि भवन्ति तदेवमङ्गीभूतानां छलादीनामुपादानं जल्पे न स्वतन्त्राणां साधनभावः । उपालम्भे तु स्वातन्त्र्यमप्यस्तीति ॥ ४३ ॥

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥४४॥

स जल्पो वितण्डा भवति, किंविशेषणः ?—प्रतिपक्षस्थापनया हीनः । यौ तौ समानाधिकरणौ विरुद्धौ धर्मौ पक्षप्रतिपक्षा-

---

विजिगीषुकथा जल्प इत्यर्थः इत्यपि वदन्ति । अत्र चायं क्रमः, वादिना स्वपक्षसाधनं प्रयुज्य नायं हेत्वाभासलक्षणायोगादिति सामान्यतो नायमसिद्ध इत्यादि विशेषतो वा स्वपक्षदूषणे उद्भूते प्रतिवादिना स्वस्याज्ञानादिनिरासाय परोक्तमनद्य अनुक्तायाश्चाधमज्ञानाननुभाषणाप्रतिभानासम्बन्धादेर्व्याजेन उच्यमानायाश्चाधमप्राप्तकालाद्यन्तरनिरर्थकानामन्यतमे उक्तायाश्चार्थाः प्रतिज्ञादीनि प्रतिज्ञाविरोध प्रतिज्ञान्तर प्रतिज्ञासंन्यासहेत्वन्तरार्थान्तरविज्ञातार्थ-विक्षेपमतानुज्ञान्यूनाधिकपुनरुक्तनिरनुयोज्यानुयोज्योपसिद्धान्तानामन्यतमे पर्यनुयोज्योपेक्षणस्य मध्यस्थीभाव्यत्वादेवानुपन्यासार्हतया, यथासम्भवं हेत्वाभासेन परोक्तं दूषयित्वा स्वपक्षं उपन्यसनीयः, ततो वादिना तृतीय कक्षाप्राप्तेन परोक्तमनद्य स्वपक्षदूषणमुद्भूत्यानुक्तायाश्चाधमज्ञानायाश्च हेत्वाभासातिरिक्तोक्तायाश्चाधमज्ञाने हेत्वाभासेन यथासम्भवं प्रतिपक्षवादिनः स्थापना दूषणीया । अन्यथा क्रमविपर्यासेऽप्राप्तकालमनवसरे दूषणोद्भावने च निरनुयोज्यानुयोगः तथाच लक्ष्यमिदं प्रतिज्ञाहानिर्विशेषणे चेद्धेत्वन्तरमित्यादि, प्रतिज्ञाहान्यादिवद्धेत्वाभासानामुक्तायास्त्वाविशेषेऽपि अर्थदोषत्वेन प्रधानत्वाच्चरममनुसन्धानमिति ॥ ४३ ॥

वितण्डां क्रमप्राप्तां लक्षयति ।—यद्यपि तच्छब्देन जल्पो न परामर्शं अर्हति,

वित्युक्ती तयोरेकतरं वैतण्डिको न स्थापयतीति परपक्षप्रतिषेधेनैव प्रवर्त्तत इति। अस्तु तर्हि स प्रतिपक्षहीना वितण्डा, यद्वै खलु तत्परप्रतिषेधलक्षणं वाक्यं स वैतण्डिकस्य पक्षः, न त्वसौ साध्यं कञ्चिदर्थं प्रतिज्ञाय स्थापयतीति तस्माद् यथान्यासमेवास्त्विति हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमानाः ॥ ४४ ॥

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ॥ ४५ ॥

त इमे तेषाम् ॥ ४५ ॥

जल्पस्य स्थापनाश्रयवतः प्रतिपक्षस्थापनाहीनत्वस्य विरुद्धत्वात्, तथापि स्थापनाश्रयत्वं विहाय जल्पैकदेशः परामृश्यते। प्रतिपक्षो द्वितीयपक्षः तथा च प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डेति। न च "स्वस्य स्थापनीयाभावात् कथमियं कथा प्रवर्त्तताम्" इति वाच्यम् ? परपक्षखण्डनेन जयस्यैवाभिप्रेतत्वात्। परे तु परपक्षखण्डनेनैव स्वपक्षसिद्धेरर्थादेव सिद्धेः तत्साधनाभावेऽपि न प्रवृत्त्यनुपपत्तिरिति वदन्ति ॥ ४४ ॥

समाप्तं कथाप्रकरणम्।

क्रमप्राप्तान् हेत्वाभासान् लक्षयति विभजते च।—न च "अत्र लक्षणं न प्रतीयते" इति वाच्यं, हेत्वाभासशब्दस्य हेतुवदाभासमानार्थकत्वेनैव तत्सूचनात्। तथा हि पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वोपपन्नो हेतुगर्भकः, तद्वदाभासत इत्यत्र वत्यर्थलक्षिन्नत्वे सति तद्धर्मवत्त्वं, तथा च पक्षरूपोपपन्नत्वाभावे सति तद्रूपेण भासमान इति फलितार्थः। तत्र च लक्षणं सत्यन्तं, तस्यैव दूषकताधामुपयोगात्। न च "असाधकतायां पक्षसत्त्वाद्येकैकाभावस्यैव गमकत्वसम्भवेऽधिकवैयर्थ्यम्, एतेन पक्षान्यत्वं लक्षणमित्यपि प्रत्युक्तम्" इति वाच्यं, पक्षत्वावच्छिन्नाभावस्य पक्षसत्त्वाभावाद्यघटितत्वेन वैयर्थ्याभावात्। वस्तुतस्तु पृथिवी इतरेभ्यो भिद्यते सत्यर्थवत्त्वात् प्रमेयमाकाशादित्यादौ सपक्षाद्यप्रसिद्धेर्नैतस्य लक्षणत्वे तात्पर्यम्। परन्तु विपक्षासत्त्वसपक्षसत्त्वाभ्यामन्यभिचरितसामानाधिकरण्यं, पक्षसत्त्वसहितस्य चैतस्य विरोधित्वं विभिलक्ष्यं तेन व्याप्तिविशिष्टपक्षधर्मताबोधित्वं.

अनैकान्तिकः सव्यभिचारः ॥ ४६ ॥

व्यभिचार एकत्र अवस्थाभावः सह व्यभिचारेण वर्त्तत इति सव्यभिचारः, निदर्शनम्, नित्यः शब्दोऽस्पर्शत्वात्, स्पर्शवान् कुम्भोऽनित्यो दृष्टो न च तथा स्पर्शवान् शब्दस्तस्मादस्पर्शत्वान्नित्यः शब्द इति दृष्टान्ते स्पर्शवत्त्वमनित्यत्वं च धर्मौ द्वौ न साध्यसाधनभूतौ दृश्येते स्पर्शवांश्चाणुर्नित्यश्चेति । आत्मादौ च दृष्टान्ते उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरिति । अस्पर्शत्वादिति हेतुर्नित्यत्वं व्यभिचरति अस्पर्शा बुद्धिरनित्या चेति, एवं द्विविधेऽपि दृष्टान्ते व्यभिचारात् साध्यसाधनभावो नास्तीति लक्षणाभावादहेतुरिति । नित्यत्वमप्येकोऽन्तः । अनित्यत्वमप्येकोऽन्तः, एकस्मिन्नन्ते विद्यत इति ऐकान्तिकः । विपर्ययादनैकान्तिकः उभयान्तव्यापकत्वादिति ॥ ४६ ॥

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥४७॥

चरमयोस्त्वनुमितिविरोधिरूपानवच्छिन्नत्वार्थक्योरभावादनुमितिविरोधित्वं', तेनानुमितितत्कारणज्ञानान्यतरविरोधित्वं पर्य्यवस्यति ॥ ४५ ॥

सव्यभिचारं लक्षयति ।—एकस्य साध्यस्य तदभावस्य च योऽन्तः सहचारः अव्यभिचरितसहचारः इत्याशयः । स चात्र व्याप्तिग्राहकतर्कयोश्चैकभावव्याप्तिग्राहकसहचारज्ञानैकान्तिकत्वदन्योऽनैकान्तिकः । स च साधारणोऽसाधारणोऽनुपसंहारी चेति त्रिविधः, साधारणः साध्यवत् तदन्यवृत्तिः, यथा शब्दो नित्यः निस्पर्शत्वात् । न च विरुद्धसङ्कीर्णदोषः उपधेयसङ्करेऽप्युपाधेरसङ्करात् । असाधारणः सपक्षविपक्षव्यावृत्तः सपक्षः साध्यवत्त्वनिश्चयविषयः, यथा शब्दोऽनित्यः शब्दत्वादित्यादौ, अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षकः, यथा सर्वं नित्यं मेयत्वादित्यादि, अत्र च साध्यसन्देहाद्व्याप्तिग्रही न भवतीत्याशयः । नव्यास्तु असाधारणः साध्यवदवृत्तिः एतस्य साध्यसहचारग्रहप्रतिबन्धेन व्याप्तिग्रहप्रतिबन्धो दूषकतावीजम् अनुपसंहारी च केवलान्वयिसाध्यकत्वस्य चात्यन्ताभावाप्रतियोगिसाध्यकत्वरूपस्य ज्ञानाद्व्यतिरेकव्याप्तिग्रहप्रतिबन्धो दूषकतावीजम् इत्याहुः ॥ ४६ ॥

तं विरुद्धयतीति तद्विरोधो अभ्युपेतं सिद्धान्तं व्याहन्तीति यथा सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधादपेतोऽप्यस्ति विनाशप्रतिषेधात् न नित्यो विकार उपपद्यते इत्येव हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते। कथं व्यक्तिरात्मलाभः अपायः प्रच्युतिः यद्यात्मलाभात् प्रच्युतो विकारोऽस्ति नित्यत्वप्रतिषेधो नोपपद्यते यद्व्यक्तेरपेतस्यापि विकारस्यास्तित्वं तत् खलु नित्यत्वमिति। नित्यत्वप्रतिषेधो नाम विकारस्यात्मलाभात् प्रच्युतेरुपपत्तिः। यदात्मलाभात् प्रच्यवते तदानित्यं दृष्टं यदस्ति न तदात्मलाभात् प्रच्यवते। अस्तित्वं चात्मलाभात् प्रच्युतिरिति विरुद्धावेतौ न सह सम्भवत इति सोऽयं हेतुर्यत्सिद्धान्तमाश्रित्य प्रवर्त्तते तमेव व्याहन्तीति ॥ ४७ ॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ ४८ ॥

विमर्शाधिष्ठानौ पक्षप्रतिपक्षावनवसितौ प्रकरणं तस्य चिन्ता विमर्शाभृति प्राङ्निर्णयाद् यत् समीक्षणं सा जिज्ञासा यत्कृता स निर्णयार्थं प्रयुक्त उभयपक्षसाम्यात्

क्रमप्राप्तं विरुद्धं लक्षयति।—अत्र च सिद्धान्तं साध्यं प्रतिज्ञायां हि पक्षस्य सिद्धस्थाने साध्यमभिधीयते, तथा च साध्यमभ्युपेत्य तद्विरुद्धो प्रयुक्तस्तद्विरोधी साध्याभावव्याप्त इति फलितार्थः, यथा वह्निमान् द्रव्यत्वादिति, एतस्य साध्याभावानुमितिसामग्रीत्वेन साध्यानुमितिप्रतिबन्धो दूषकतावीजम्, न च सत्प्रतिपक्षाविशेषः, तत्र हेत्वन्तरं साध्याभावसाधकम्, इह तु हेतुरेव साध्याभावसाधकः साध्यसाधकत्वेन त्वयोपन्यस्त इत्यशक्तिविशेषोन्नायकत्वेन विशेषात् ॥ ४७ ॥

क्रमप्राप्तं प्रकरणसमं लक्षयति।—स हेतुः स्वसाध्यस्य परसाध्याभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम उच्यते, स च क इत्याकाङ्क्षायामाह—यस्मात्

प्रकरणमनतिवर्त्तमानः प्रकरणसमो निर्णयाय न प्रकल्पते प्रज्ञापनं तु अनित्यः शब्दो नित्यधर्मानुपलब्धेरित्यनुपलभ्यमाननित्यधर्मकमनित्यं दृष्टं स्थाल्यादि, यत्र समानो धर्मः संशयकारणं हेतुत्वेनोपादीयते स संशयसमः सव्यभिचार एव। या तु विमर्शस्य विशेषापेक्षिता उभयपक्षविशेषानुपलब्धिश्च सा प्रकरणं प्रवर्त्तयति। कथम्? विपर्यये हि प्रकरणनिवृत्तेः यदि नित्यधर्मश्शब्दे गृह्यते न स्यात् प्रकरणम्, यदि वा अनित्यधर्मे गृह्येत एवमपि निवर्त्तेत प्रकरणम्, सोऽयं हेतुरुभौ पक्षौ प्रवर्त्तयन्नन्यतरस्य निर्णयाय न प्रकल्पते ॥ ४८ ॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥४९॥

द्रव्यं क्रियेति साध्यम्, गतिमत्त्वादिति हेतुः साध्येनाविशिष्टः साधनीयत्वात्साध्यसमः, अयमप्यसिद्धत्वात् साध्यवत्प्रज्ञापयितव्यः, साध्यं तावदेतत् किं पुरुषवच्छायापि

प्रकरणचिन्तेति प्रकरणं पक्षप्रतिपक्षाविति भाष्यं, साध्यतदभाववत्त्वाविति तदर्थस्तथा च निर्णयार्थं प्रयुक्तो हेतुर्यत्र निर्णयं जनयितुमशक्नुवन्प्रत्यक्षेण परेण प्रतिबन्धात्, किन्तु धर्मिणः साध्यवत्त्वं तदभाववत्त्वं वेति चिन्तां जिज्ञासां प्रवर्त्तयति स प्रकरणसमः। यद्वा प्रकृष्टं करणं लिङ्गं परामर्शो वा, को हेतुरनयोः साधकः एतयोः कः परामर्शः प्रमेति वा यत्र जिज्ञासा भवतीत्यर्थः, यत्नादित्यादि तु वस्तुस्थितिमात्रं. लक्षणन्तु तुल्यबल-विरोधिपरामर्शकालीनतुल्यबलपरामर्शविषयत्वं स्वसाध्यपरामर्शकालीन तुल्यबल-विरोधिपरामर्शो वा, विरोधिपरामर्शस्य स्वहेतुनिष्ठबलैककारणविषयत्वसम्बन्धेन अन्यथाहेतोर्दुष्टत्वं न स्यात्। अयञ्च दशावियवे दोषः इत्यतः सङ्क्षेपोऽपि विरोधिपरामर्शकाले दुष्टत्वमिष्टमेवेत्यवधेयम् ॥ ४८ ॥

क्रमप्राप्तं साध्यसमं लक्षयति।—साध्येन वक्ष्यादिनाऽविशिष्टः कुतः? इत्यत आह—साध्यत्वादिति। साधनीयत्वादित्यर्थः। यथा हि साध्यं साधनीयं तथा हेतुरपि चेत् साध्यसम इत्युच्यते, अत एव चासिद्ध इति व्यवह्रियते। अयञ्चाश्रयासिद्धिस्वरूपासिद्धिव्याप्यत्वासिद्धिभेदात् त्रिविधः। आश्रयासिद्धिश्च पक्षे पक्षतावच्छेदका-

गच्छति आहोस्विदावरकद्रव्ये संसर्पति आवरणसन्तानादसन्निधिसन्तानोऽयं तेजसो गच्छतः इति सर्पता खलु द्रव्येण घ्राणाद्यो यस्तेजोभाग आप्रियते तस्य तस्यासन्निधिरेवावच्छिन्नो गच्छत इति। आवरणन्तु प्राप्तिप्रतिषेधः ॥ ४९ ॥

कालात्ययापदिष्टः कालातीतः ॥ ५० ॥

कालात्ययेन युक्तो यस्यार्थस्यैकदेशोऽपदिश्यमानस्य स कालात्ययापदिष्टः कालातीत इत्युच्यते। निदर्शनम्। नित्यः शब्दः संयोगव्यङ्ग्यत्वात् रूपवत् प्रागूर्द्ध्वञ्च व्यक्तेरवस्थितं रूपं प्रदीपघटसंयोगेन व्यज्यते तथा च शब्दोऽप्यवस्थितो भेरीदण्डसंयोगेन व्यज्यते दारुपरशुसंयोगेन वा तस्मात् संयोगव्यङ्ग्यत्वान्नित्यः शब्द इत्ययमहेतुः कालात्ययापदेशात् व्यङ्ग-

---

भावः यथा काञ्चनमयः पर्वतो वह्निमानित्यादौ स्वरूपासिद्धिः, पक्षे हेतुतावच्छेदकावच्छिन्नस्याभावः, यथा ह्रदो द्रव्यं धूमादित्यादौ व्याप्यत्वासिद्धिरव्यभिचरितसामानाधिकरण्यस्याभावः। न च स्वरूपासिद्धिरेव सूत्रान्तरत्वप्रतीतेर्नेतरत्वत्वमिति वाच्यं, हेतुरिति पदं स्वत पूरणीयं हेतुपदञ्च गमकहेतुत्वविशिष्टपक्षधर्मस्य वाचकं, व्याप्तिविशिष्टपक्षधर्म इत्येव वा पूर्यताम्। तथा च तस्य किञ्चिदंशसाध्यत्वेनैव साध्यसमत्वम्, अत एव साध्ये साध्यतावच्छेदकभावः साधने साधनतावच्छेदकाभावश्च व्याप्यत्वासिद्धिः। यथा पक्षतावच्छेदकाभावपक्षतावच्छेदकवह्नेदादेरन्यतमत्वेनाश्रयासिद्धित्वं, यथा च पक्षे हेत्वभावहेतुमद्वृत्तेदादेरन्यतमत्वेन स्वरूपासिद्धित्वं, तथा साध्यतावच्छेदकाभावादेरन्यतमत्वेन व्याप्यत्वासिद्धित्वं. विपक्षव्यावृत्तत्वं चासिद्धिसामान्यलक्षणं, नीलधूमत्वादेरपि व्याप्यत्वासिद्धावव्यभिचरितत्वमिति, तेषामयमाशयः व्याप्तिर्हि साध्यसम्बन्धितावच्छेदकरूपा गुरुधर्मश्च साध्यसम्बन्धितानवच्छेदको अतो नीलधूमत्वादेः साध्यसम्बन्धितानवच्छेदकत्वान्न व्याप्तिस्वरूपत्वं, तथा च साध्यतावच्छेदकाभावादिरिव साधनतावच्छेदके व्याप्यतानवच्छेदकत्वमपि भवति व्याप्यत्वासिद्धिरिति ॥ ४९ ॥

क्रमप्राप्तमतीतकालं लक्षयति।—अतीतकालस्य समानार्थकत्वात् कालातीतशब्देनोक्तं कालस्य साधनकालस्यात्ययेऽभावेऽपदिष्टः प्रयुक्तो हेतुः, एतेन

कस्य संयोगस्य कालं न व्यङ्ग्यस्य रूपस्य व्यक्तिरत्येति सति प्रदीपघटसंयोगे रूपस्य ग्रहणं भवति न निवृत्ते संयोगे रूपं गृह्यते, निवृत्ते दारुपरशुसंयोगे दूरस्थेन शब्दः श्रूयते। विभागकाले सेयं शब्दव्यक्तिः संयोगकालमत्येतीति न संयोग-निर्मिता भवति, कस्मात् ? कारणाभावादपि कार्याभाव इति। एवमुदाहरणसाधर्म्यस्याभावादसाधनमयं हेतुर्हेत्वाभास इति। अवयवविपर्यासवचनं न सूत्रार्थः। कस्मात् ?—"यस्य येनार्थ-सम्बन्धो दूरस्थस्यापि तस्य सः। अर्थतो ह्यसमर्थानामानन्तर्य-मकारणम्" इत्येतद्वचनाद् विपर्यासेनोक्तोहेतुरुदाहरण-साधर्म्यात् तथा वैधर्म्यात् साधनं हेतुलक्षणं न जहाति। अजहद्धेतुलक्षणं न हेत्वाभासो भवतीति अवयवविपर्यास-वचनमप्राप्तकालमिति निग्रहस्थानमुक्तं तदेवेदं पुनरुच्यत इति अतस्तव सूत्रार्थः॥ ५०॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम्॥ ५१॥

अथ छलम्।—न सामान्यलक्षणे छलं शक्यमुदाहर्त्तुम् विभागे तूदाहरणानि॥ ५१॥

साध्याभावप्रमा लक्षणार्थ इति सूचितम्। साध्याभावनिश्चये सति साधनाऽसम्भवादयमेव बाधितसाध्यक इति गीयते, तथा वह्निरनुष्णः कृतकत्वादित्यादौ, न च "बाधे आवश्यकस्य व्यभिचारस्वरूपासिद्ध्यन्यतरस्यैव दोषत्वमुचितम्" इति वाच्यम्। तदप्रति-सन्धानेन बाधस्य दोषत्वावश्यकत्वात्, उपधेयसङ्करेऽप्युपाधेरसङ्करात्, उत्पत्तिकाला-वच्छिन्नो घटो गन्धवान्, शिखरावच्छिन्नः पर्वतो वह्निमानित्यादावसङ्कराच्च, साध्या-भाववत्पक्षतावच्छेदकावच्छिन्नकत्वस्य तव सत्त्वात्। परे तु घटः सकर्तृकः कार्यत्वादित्यादौ यत्र लाघवोपनीतमेकभावकर्तृकत्वं भासत इत्युच्यते तत्र तद-भावोऽसङ्कीर्णोदाहरणमिति वदन्ति॥ ५०॥

समाप्तं हेत्वाभासप्रकरणम्॥ ९॥

क्रमप्राप्तं छलं लक्षयति।—अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्धः

तत् त्रिविधं, वाक्छलं सामान्यछलमुपचारछलञ्च ॥ ५२ ॥

विभागश्च तेषाम् ॥ ५२ ॥

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ ५३ ॥

नवकम्बलकोऽयं माणवक इति प्रयोगः। अत्र नवः कम्बलोऽस्येति वक्तुरभिप्रायः। विग्रहे तु विशेषो न समासे, तत्रायं छलवादी वक्तुरभिप्रायादविवक्षितमन्यमर्थं नव कम्बला अस्येति तावदभिहितं भवतीति कल्पयति, कल्पयित्वा चासम्भवेन प्रतिषेधति—एकोऽस्य कम्बलः कुतो नव कम्बला इति। तदिदं सामान्यशब्दे वाचि छलं वाक्छलमिति। अस्य प्रत्यव-

---

कल्पो अर्थान्तरकल्पनेति यावत तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वादिनोक्तस्य विघातो दूषणं तच्छलमित्यर्थः वक्तुतात्पर्य्यविषयार्थकल्पनेन दूषणाभिधानमिति फलितं, तात्पर्य्यविषयत्वं विशेषणे विशेष्ये संसर्गे वा। यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसङ्ख्यापरत्वकल्पनयाऽसिद्धाभिधानं सर्वं प्रमेयं धर्मत्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्धाभिधानं, वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् ॥ ५१ ॥

लक्षितं छलं विभजते।—तत्र वाक्छलं लक्षयति।—यत्र शब्दार्थद्वये सम्भवति एकार्थनिर्णायकविशेषाभावानभिप्रेतशब्दार्थकल्पनेन दूषणाभिधानं तद्वाक्छलं, लक्षणन्तु शब्दस्य एकार्थशब्दबोधतात्पर्य्यकशब्दस्य शब्दार्थान्तरतात्पर्य्यकल्पकल्पनया दूषणाभिधानम्। यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्युक्ते कुतोऽस्य नवसङ्ख्याकाः कम्बला इति। एवं गौर्विषाणीत्युक्ते कुतो वाणस्य विषाणं, गजो विषाणीत्युक्ते कुतो गजस्य शृङ्गं, श्वेतो धावतीति श्वेतरूपवद्भिप्रायेणोक्ते श्वेतो न धावतीत्यभिधानमित्यादिकमूह्यम् ॥ ५३ ॥

स्यानं सामान्यशब्दस्यानेकार्थत्वेऽन्यतराभिधानकल्पनायां विशेषवचनम्। नव कम्बलक इत्यनेकार्थस्याभिधानं नवः कम्बलोऽस्य नवकम्बला अस्येति। एतस्मिन् प्रयुक्ते येयं कल्पना नव कम्बला अस्येत्येतद्भवताभिहितं तच्च न सम्भवतीति। एतस्यामन्यतराभिधानकल्पनायां विशेषो वक्तव्यः। यस्माद्विशेषोऽर्थविशेषेषु विज्ञायते। अयमर्थोऽनेनाभिहित इति, स च विशेषो नास्ति तस्मान्मिथ्याभियोगमात्रमेतदिति। प्रसिद्धश्च लोके शब्दार्थसम्बन्धोऽभिधानाभिधेयनियमनियोगः। अस्याभिधानस्यायमर्थोऽभिधेय इति समानः सामान्यशब्दस्य विशेषो विशिष्टशब्दस्य प्रयुक्तपूर्वोऽयमे शब्दा अर्थं प्रयुञ्जन्ते नाप्रयुक्तपूर्वाः, प्रयोगसार्थसम्प्रत्ययार्थः, अर्थप्रत्ययाच्च व्यवहार इति। तत्रैवमर्थवत्यर्थे शब्दप्रयोगसामर्थ्यात् सामान्यशब्दस्य प्रयोगनियमः। अजां ग्रामं नय, सर्पिराहर, ब्राह्मणं भोजयेति सामान्यशब्दाः सन्तोऽर्था अवयवेषु प्रयुञ्जन्ते सामर्थ्याद्यत्रार्थक्रियादेशना सम्भवति तत्र प्रवर्त्तन्ते नार्थसामान्ये क्रियादेशनाऽसम्भवात्। एवमयं सामान्यशब्दो नवकम्बलक इति योऽर्थः सम्भवति नवः कम्बलोऽस्येति तत्र प्रवर्त्तते, यस्तु न सम्भवति नव कम्बला अस्येति तत्र न प्रवर्त्तते सोऽयमनुपपद्यमानार्थकल्पनया परवाक्योपालम्भस्तेन कल्पत इति ॥ ५३ ॥

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ॥ ५४ ॥

अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न इत्युक्ते कश्चिदाह

सामान्यच्छलं लक्षयति।—सामान्यविशिष्टसम्भवदर्थाभिप्रायेणोक्तस्य अति-

सम्भवति हि ब्राह्मणे विद्याचरणसम्पत् इत्यस्य वचनस्य विघातोऽर्थविकल्पोपपत्त्याऽसम्भूतार्थकल्पनया क्रियते यदि ब्राह्मणे विद्याचरणसम्पत् सम्भवति व्रात्येऽपि सम्भवेत्, व्रात्योऽपि ब्राह्मणः सोऽप्यस्तु विद्याचरणसम्पन्न इति। यद्विवक्षितमर्थमाप्नोति चात्येति च तदतिसामान्यम्। यथा ब्राह्मणत्वं विद्याचरणसम्पदं क्वचिदाप्नोति क्वचिदत्येति सामान्यलक्षणं छलं सामान्यच्छलमिति। अस्य च प्रत्यवस्थानमविवक्षितहेतुकस्य विषयानुवादः प्रशंसार्थत्वात् वाक्यस्य, तदत्रासम्भूतार्थकल्पनानुपपत्तिः। यथा सम्भवन्त्यस्मिन् क्षेत्रे शालय इति। अनिराकृतमविवक्षितञ्च बीजजन्म, प्रवृत्तिविषयस्तु क्षेत्रं प्रशस्यते सोऽयं क्षेत्रानुवादो नास्मिन् शालयो विधीयन्त इति। बीजात्तु शालिनिर्वृत्तिः सती न विवक्षिता एवं सम्भवति ब्राह्मणे विद्याचरणसम्पदिति सम्पद्विषयो ब्राह्मणत्वं न सम्पद्धेतुः। नचात्र हेतुर्विवक्षितः। विषयानुवादस्त्वयं प्रशंसार्थत्वाद्वाक्यस्य, सति ब्राह्मणत्वे सम्पद्धेतुः समर्थ इति विषयञ्च प्रशंसता वाक्येन यथा हेतुतः फलनिर्वृत्तिर्न प्रत्याख्यायते तदेवं सति वचनविघातोऽसम्भूतार्थकल्पनया नोपपद्यत इति ॥ ५४ ॥

धर्मविकल्पनिर्देशोऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ ५५ ॥

अभिधानस्य धर्मो यथार्थप्रयोगः। धर्मविकल्पोऽन्यत्र

सामान्ययोगादसम्भवद्धर्थत्वकल्पनया दूषणाभिधानं सामान्यच्छलम्। यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयतीति व्यभिचारं दर्शयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पद्व्रात्ये व्यभिचारात् ॥ ५४ ॥

उपचारच्छलं लक्षयति।—शब्दस्याथवा सम्बन्धः तस्य विकल्पो विविधः कल्पः

दृष्टस्यान्यत्र प्रयोगः। तस्य निर्देशे धर्मविकल्पनिर्देशे। यथा मञ्चाः क्रोशन्तीति अर्थसद्भावेन प्रतिषेधः मञ्चस्थाः पुरुषाः क्रोशन्ति न तु मञ्चाः क्रोशन्ति, का पुनरत्रार्थविकल्पोपपत्तिः अन्यथा प्रयुक्तस्यान्यथार्थकल्पनं भक्त्या प्रयोगे प्राधान्येन कल्पनम्, उपचारविषयं छलम् उपचारच्छलमुपचारो नीतार्थः सहचरणादिनिमित्तेनाऽतद्भावे तद्वदभिधानमुपचार इति। अत्र समाधिः प्रसिद्धाप्रसिद्धे प्रयोगे वक्तुर्यथाभिप्रायं शब्दार्थयोरनुज्ञा प्रतिषेधो वा न छन्दतः प्रधानभूतस्य शब्दस्य भाक्तस्य च गुणभूतस्य प्रयोग उभयोर्लोकसिद्धः। सिद्धे प्रयोगे यथा वक्तुरभिप्रायस्तथा शब्दार्थावनुज्ञेयौ प्रतिषेध्यौ वा न छन्दतः। यदि वक्ता प्रधानशब्दं प्रयुङ्क्ते यथा भूतस्याभ्यनुज्ञा प्रतिषेधो वा न छन्दतः। अथ गुणभूतं तदा गुणभूतस्य, यत्र तु वक्ता गुणभूतं शब्दं प्रयुङ्क्ते प्रधानभूतमभिप्रेत्य परः प्रतिषेधति स्वमनीषया प्रतिषेधोऽसौ भवति न परोपालम्भ इति ॥ ५५ ॥

वाक्छलमेवोपचारच्छलं तद्विशेषात् ॥ ५६ ॥

न वाक्छलादुपचारच्छलं भिद्यते तस्याप्यर्थान्तरकल्प-

श्लिष्टत्वाच्चान्यतररूपः तथा च श्लिष्टत्वयोरेकतरत्वेन प्रयुक्ते शब्दे तदपरत्वेन यः प्रतिषेधः स उपचारच्छलं, यथा मञ्चाः क्रोशन्ति नीडो घट इत्यादौ मञ्चस्था एव क्रोशन्ति, न तु मञ्चाः, एवं घटस्थं कार्यं नीडरूपमिति। एवम् अहं नित्य इति शब्दं प्रयुक्ते अमुकत्वादुत्पन्नत्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलं, वादाभिप्रेतार्थस्यादूषणेन छलत्वासदुत्तरत्वम्। न च "श्लिष्टत्वाच्चिकप्रयोगादादिन एवापराधः स्यात्" इति वाच्यं, तत्तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽपराधात्। अन्यथा पर्वतो वह्निमानित्युक्ते पर्वतोऽयं कथमवह्निमानित्यादिदूषणानुमानायुच्छेदः स्यात् ॥ ५५ ॥

नाया अविशेषात्, इहापि स्यान्यर्थो गुणशब्दः, प्रधानशब्दः स्थानार्थ इति कल्पयित्वा प्रतिषिध्यत इति ॥ ५६ ॥

न तदर्थान्तरभावात् ॥ ५७ ॥

न वाक्छलमेवोपचारच्छलं तस्यार्थसद्भावप्रतिषेधस्यार्थान्तरभावात्। कुतः? अर्थान्तरकल्पनातोऽन्यार्थान्तरसद्भावकल्पना अन्यार्थसद्भावप्रतिषेध इति ॥ ५७ ॥

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः॥५८॥

छलस्य हित्वमभ्यनुज्ञाय चित्वं प्रतिषिध्यते किञ्चित्साधर्म्यात् यथाचायं हेतुश्चित्वं प्रतिषेधति तथा हित्वमप्यनुज्ञातं प्रतिषेधति, विद्यते हि किञ्चित्साधर्म्यं द्वयोरपीति, अथ हित्वं किञ्चित्साधर्म्यान्न निवर्त्तते चित्वमपि न निवर्त्स्यतीति ॥ ५८ ॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ ५९ ॥

अत ऊर्द्धं प्रयुक्ते हि हेतौ यः प्रसङ्गो जायते सा जातिः

प्रसङ्गाच्छलं परीक्षितुं पूर्वपक्षयति।—शब्दस्यार्थान्तरकल्पनाऽविशेषाद्वाक्छलमेवोपचारच्छलं स्यादिति छलस्य हित्वमेव नतु चित्वमिति शङ्कार्थः ॥ ५६ ॥

समाधत्ते।—उपचारच्छलस्य वाक्छलाभेदो न तयोरर्थान्तरभावात् भिन्नत्वात् भिन्नतया प्रमाणसिद्धत्वादिति फलितार्थः, पूर्वोक्तभेदकधर्मेण भेदसाधर्म्येऽपि यत्किञ्चिद्धर्मेणाभेदे सामान्यधर्मेणाभेदस्य सर्वत्र सम्भवादविभागः कुत्रापि न स्यादिति ॥ ५७ ॥

विपक्षं बाधकमभिप्रेत्याह।—यत्किञ्चिद्धर्मादविशेषे किञ्चित्साधर्म्याच्छलत्वादिरूपाच्छलस्यैकं स्यान्न तु त्वदभिमतं हित्वमपीति भावः ॥ ५८ ॥

समाप्तं छलप्रकरणम् ॥ १० ॥

क्रमप्राप्तां जातिं लक्षयति।—साधर्म्यवैधर्म्याभ्यामिति साधारणो निर्देशः तेन

स च प्रसङ्गसाधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमुपालभ्यः प्रतिषेध इति उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरित्यस्योदाहरणसाधर्म्येण प्रत्यवस्थानम्। उदाहरणवैधर्म्यात् साध्यसाधनं हेतुरित्यस्योदाहरणवैधर्म्येण प्रत्यवस्थानम्। प्रत्यनीकभावाज्जायमानोऽर्थो जातिरिति ॥ ५८ ॥

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥६०॥

विपरीता कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः। विप्रतिपद्यमानः पराजयं प्राप्नोति निग्रहस्थानं खलु पराजयप्राप्तिः। अप्रतिपत्तिस्त्वारब्धविषये न प्रारब्धः। परेण स्थापितं न प्रतिषेधति प्रतिषेधं वा नोद्धरति, असमासाच्च नैते एव निग्रहस्थाने इति। किं पुनर्दृष्टान्तवज्जातिनिग्रहस्थानयो रभेदोऽथ सिद्धान्तवद्भेद इत्यत आह ॥ ६० ॥

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ ६१ ॥

तस्य साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वम्। तयोश्च विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वम्, नानाकल्पो विकल्पः, विविधो वा कल्पो विकल्पः।

व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः. यद्यप्युभाभ्यां प्रत्यवस्थानस्य प्रत्येकप्रत्यवस्थानेऽव्याप्तिरेकप्रत्यवस्थानस्य लक्षणत्वेऽपरप्रत्यवस्थानेऽव्याप्तिर्नवान्यतरप्रत्यवस्थानं नियतं सर्वत्र जातावभावात्तथापि व्याप्तिनिरपेक्षतया दूषणाभिधानमित्येव वाच्यं, तेन च सन्दिग्धत्वं दूषणासमर्थत्वं व्यभिचारित्वं वा दर्शितं, तथा च छलादिभिन्नदूषणासमर्थमुत्तरं व्यभिचारिप्रत्युत्तरं वा, जातिरिति सूचितं साधर्म्यसमादिचतुर्विंशत्यन्यान्यत्वं तदर्थं इत्यपि वदन्ति ॥ ५९ ॥

क्रमप्राप्तं निग्रहस्थानं लक्षयति।—निग्रहस्य स्वीकारस्य स्थानं तच्च विप्रतिपत्तिरप्रतिपत्तिश्च विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिरप्रतिपत्तिः प्रकृताज्ञानं यद्यप्येतदन्यतरत् परनिष्ठं तथाप्यविनुमर्दं प्रतिज्ञाहान्यादेर्निग्रहस्थानत्वानुप

तत्त्वाननुभाषणमज्ञानमप्रतिभा विक्षेपोमतानुज्ञा पर्य्यनुयोज्योपेक्षणमित्यप्रतिपत्तिर्निग्रहस्थानं शेषस्तु विप्रतिपत्तिरिति। इमे प्रमाणादयः पदार्था उद्दिष्टा यथोद्देशलक्षिता यथालक्षणं परीक्षिष्यन्त इति त्रिविधस्य शास्त्रस्य प्रवृत्तिर्वेदितव्येति ॥ ६१ ॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमाध्यायस्य द्वितीयमाह्निकम्।

समाप्तश्चायं प्रथमोऽध्यायः ॥ १ ॥

द्वितीयाध्यायस्य

प्रथमाह्निकम्।

अत ऊर्द्धं प्रमाणादिपरीक्षा सा च विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इत्यग्रे विमर्श एव परीक्ष्यते।

यद्यपि तथापि विप्रतिपत्त्यप्रतिपत्त्यन्यतरोन्नायकधर्मवत्त्वं तदर्थः उद्देश्यानुगम सम्यक् ज्ञानाभावलिङ्गत्वं प्रतिज्ञाहान्याद्यन्यतमत्वं वा लक्षणमित्यपि वदन्ति ॥ ६० ॥

जातिनिग्रहस्थानयोर्विभागो नास्तीति भ्रमो मा भूदित्यत आह।—तद्विकल्पात् साधर्म्यादिना प्रत्यवस्थानस्य विप्रतिपत्त्याद्युन्नायकत्वापादस्य च विकल्पाद्वैलक्षण्यादिति यावत्, इत्थञ्च तयोर्वैलक्षण्येऽपि प्रमाणादिपरीक्षाविषयकशिष्यजिज्ञासया प्रतिबन्धान्नेदानीं तद्विभागः क्रियत इति भावः ॥ ६१ ॥

समाप्तं पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम् ॥ ११ ॥

प्रथमाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

इति श्रीविश्वनाथभट्टाचार्यकृतन्यायसूत्रवृत्तौ प्रथमाध्यायस्य

इतिः समाप्ता।

प्रमाणैः प्रथितैर्दोषैर्विवादेषु परीक्षितैः।

इदं द्वितीयमध्यायं भासमानमहं भजे ॥ १ ॥

अथ प्रमाणादिषु लक्षितेषु परीक्षणीयेषु संशयं विना परीक्षाया अनवसरादौ

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्धिव्यवस्थातश्च संशयः ॥ १ ॥

समानस्य धर्मस्योपपत्तेः संशयो न धर्ममात्रात्। अथवा समानमनयोर्धर्ममुपलभत इति धर्मधर्मिग्रहणे संशयाभाव इति। अथवा समानधर्मोपपत्तेरर्थान्तरभूते धर्मिणि संशयोऽनुपपन्न इति न जातु रूपस्यार्थान्तरभूतस्योपपत्तेरर्थान्तरभूते स्पर्शे संशय इति। अथवा नोपपत्तेरर्थावधारणादनवधारणज्ञानं संशय उपपद्यते कार्यकारणयोः सारूप्याभावादिति। एतेनानेकधर्मोपपत्तेरिति व्याख्यातम्। अन्यतरधर्मोपपत्तेश्च संशयो न भवति। ततो ह्यन्यतरावधारणमेवेति ॥ १ ॥

संशय एव परीक्षणीयः शिष्यबुद्धिप्रसादनानुसारतः सूचीकटाहन्यायाच्चातः संशयपरीक्षाया: प्रमाणादिपरीक्षोपयोगित्वात् प्रमाणपरीक्षैवाध्यायार्थ इति वदन्ति। वस्तुतस्तु छलस्य परीक्षितत्वात् तृतीयचतुर्थयोः प्रमेयस्य पञ्चमे च जातेः परीक्षिष्यमाणत्वात् तदतिरिक्तावयवपदार्थपरीक्षैवाध्यायार्थः। प्रयोजनादिपरीक्षाया अप्यवयवातिरिक्तेन करिष्यमाणत्वात् तत्र विभागसापेक्षप्रमाणपरीक्षातिरिक्तोद्देशावयवपदार्थपरीक्षाप्रकरणमात्रमेवास्य प्रकरणस्य तत्र च नव प्रकरणानि। तत्रादौ संशयपरीक्षाप्रकरणस्य अन्यानि यथायथं वक्ष्यन्ते तत्र संशयपरीक्षणाय पूर्वपक्षसूत्रम्।

अत्र सूत्रकृता संशयस्याऽदर्शनात् संशयपरीक्षायां संशयो नाङ्गमनवस्थाभयादित्याशयं सूत्रकृतो वर्णयन्ति तदसत्। न ह्यत्र संशयस्वरूपं परीक्ष्यते येनानवस्था स्यात्, अपि तु लक्षणमुद्दिश्य संशयकारणम्। तथा च संशयः समानधर्मदर्शनादिजन्यो न वेति संशयः सम्भवत्येव। परन्तु सूत्रकृतो निर्णयसत्त्वात् पूर्वपक्षनिरासस्यावश्यापेक्षणात् संशयो न दर्शितः एवमेव प्रमाणादिपरीक्षायामपि अतएवाभिहितं भाष्ये शास्त्रे वादे च विमर्षवर्जमिति, तत्र समानादिधर्मदर्शनान्न संशयः प्रत्येकं व्यभिचारात् अन्यतरत्वेनानुमतीक्षणतद्दर्शनादपि न संशयः, न हि स्थाणुधर्मसमानधर्मार्थं पुरुषधर्मसमानधर्मार्थमिति वा जानन् स्थाणुर्नवेति सन्दिग्धे,

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥

न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा संशयः। किं तर्हि विप्रतिपत्तिमुपलभमानस्य संशयः। एवमव्यवस्थायामपीति। अथवास्त्यात्मेत्येके, नास्त्यात्मेत्यपरे मन्यन्त इत्युपलब्धेः कथं संशयः स्यादिति। अथोपलब्धिरव्यवस्थिता अनुपलब्धिश्चाव्यवस्थितेति विभागो नाध्यवसितं संशयो नोपपद्यत इति ॥२॥

विप्रतिपत्तौ च सम्प्रतिपत्तेः ॥ ३ ॥

यां च विप्रतिपत्तिं भवान् संशयहेतुं मन्यते सा सम्प्रतिपत्तिः। सा हि द्वयोः प्रत्यनीकधर्म्मविषया, तत्र यदि विप्रतिपत्तेः संशयः सम्प्रतिपत्तेरेव संशय इति ॥ ३ ॥

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः॥४॥

न संशयः। यदि तावदियमव्यवस्था आत्मन्येव व्यव-

समानत्वस्य भेदगर्भत्वाद्विरुद्धधर्म्मत्वेन ज्ञाने तद्वैदग्रहस्यैव सम्भवात्। यद्वा समानानेक धर्मोपपत्तेरिति लक्षणसूत्रे उपपत्तिपदं स्वरूपपरमिति भान्तस्येयं शङ्का, तथाचायमर्थः न संशयः समानधर्मादितः स्वरूपमत इति शेषः यतः समानधर्मादिरध्यवसायादन्यतरत्वेनानुगतीक्रततदध्यवसायाद्वा संशयः अन्यथा संशयस्य सार्वत्रिकत्वापत्तेः ॥ १ ॥

विप्रतिपत्त्यादिजन्यसंशयवयं प्रतिक्षिपति।—न संशय इत्यनुवर्त्तते विप्रतिपत्तेरुपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च न संशयजनकत्वं प्रत्येकं व्यभिचारादित्यर्थः, यद्वा स्वरूपसद्विप्रतिपत्त्यादितो न संशयः किन्तु तदध्यवसायादित्यर्थः ॥ २ ॥

विप्रतिपत्तिजसंशयभावप्रतिक्षेपाय सूत्रान्तरम्। विप्रतिपत्तौ न संशयहेतुत्वं सम्प्रतिपत्तेः निश्चयात् वादिनोर्मध्यस्थस्य च निश्चयसत्त्वात् सति च निश्चये संशयायोगादिति भावः ॥ ३ ॥

उपलब्ध्यनुपलब्ध्यव्यवस्थातः संशयद्वयनिरासाय सूत्रम्। उपलब्ध्यव्यवस्थाया

स्थिता व्यवस्थानादव्यवस्था न भवतीत्यनुपपन्नः संशयः, अथा-व्यवस्थात्मनि न व्यवस्थिता, एवमतादात्म्यादव्यवस्था न भवतीति संशयाभाव इति ॥ ४ ॥

तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ॥ ५ ॥

येन कल्पेन भवान् समानधर्मोपपत्तेः संशय इति मन्यते नैन खल्वत्यन्तसंशयः प्रसज्यते समानधर्मोपपत्तेरनुच्छेदात् संशयानुच्छेदः नायमतद्धर्मा धर्मी विसदृश्यमाणे गच्छति सततन्तु तद्धर्मा भवतीति अस्य प्रतिषेधप्रपञ्चस्य संक्षेपेणोद्धारः ॥ ५ ॥

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥

संशयानुपपत्तेः संशयानुच्छेदश्च न प्रसज्यते । कथम् ? यत्तावत्समानधर्माध्यवसायः संशयहेतुर्न समानधर्ममात्रमिति ।

अनुपलब्धाव्यवस्थायाश्च संशयजनकत्वं तदा स्यात् यदि खस्मिन्नप्यव्यवस्थितत्वं स्यात् नत्वेवं तथा च स्वात्मनि व्यवस्थितायास्तस्याः कथमन्यत्राव्यवस्थात्वमित्यर्थः ॥ ४ ॥

ननु भाष्यव्यवस्था प्रमाणसंशयस्य च न स्वसंशयरूपत्वं संशयस्य विषयविशेषघटितत्वात् तस्य चान्यसंशयजनकत्वं न विरुद्धम् । अतो दृष्टान्तमाह —तथेत्यादि । तथा सति अन्यव्यवस्थाया हेतुत्वे सति, तथाशब्दोऽयं न सूत्रान्तर्गतोऽपि भाष्यस्य इत्यस्ये अत्यन्तसंशयः संशयानुच्छेदः स्यात् तद्धर्मस्य तज्जनकस्य ज्ञानत्वादिसाधारणधर्मदर्शनस्य सातत्योपपत्तेः सर्वदा सम्भवादेव ज्ञानत्वादिसाधारणधर्मदर्शनेऽपि कारणान्तरविलम्बान्न सर्वत्र प्रामाण्यसंशय इति यदि ब्रूयात् तदा तत्रैव विषयसंशयेऽपि हेतुत्वमस्तिति किं प्रामाण्यसंशयस्य साधारणधर्मदर्शनादेर्वा संशयहेतुत्वेनेति भावः ॥ ५ ॥

सिद्धान्तमाह ।—यथोक्ताध्यवसायात् साधारणादिधर्मदर्शनात् तस्य पक्ष-

एवमेतत्, कस्मादेवं नोच्यत इति विशेषापेक्ष इति वचनात् सिद्धेः। विशेषस्यापेक्षाकाङ्क्षा, सा चानुपलभ्यमाने विशेषे समर्था न चोक्तं समानधर्मापेक्ष इति समाने च धर्मे कथमाकाङ्क्षा न भवेत् यद्ययं प्रत्यक्षः स्यात्। एतेन सामर्थ्येन विज्ञायते समानधर्माध्यवसायादिति उपपत्तिवचनाद्वा समानधर्मोपपत्तेरित्युच्यते न चान्यासङ्गावसंवेदनादृते समानधर्मोपपत्तिरस्ति। अनुपलभ्यमानसद्भावो हि समानो धर्मो विद्यमानवद्भवतीति। विषयशब्देन वा विषयिणः प्रत्ययस्याभिधानम्। यथा लोके धूमेनाग्निरनुमीयते इत्युक्ते धूमदर्शनेनाग्निरनुमीयत इति ज्ञायते कथं दृष्ट्वा हि धूमोऽग्निमनुमिनोति नादृष्ट्वा, न च वाक्ये दर्शनशब्दः श्रूयते अनुजानाति च वाक्यस्यार्थप्रत्यायकत्वम्, तेन मन्यामहे विषयशब्देन विषयिणः प्रत्ययस्याभिधानं वोद्वाऽनुजानाति एवमिहापि समानधर्मशब्देन समानधर्माध्यवसायमाहेति। यथोक्त्वा समानमनयोर्धर्ममुपलभत इति। धर्मधर्मिग्रहणे संशयाभाव इति। पूर्वदृष्टविषयमेतत्। यावदयमर्थो पूर्वमद्राक्षन्तयोः समानं धर्ममुपलभे विशेषं नोपलभ इति। कथं तु विशेषं पश्येयं तेनान्यतरमवधारयेयमिति, न चैतत्समानधर्मोपलब्धौ धर्मधर्मिग्रहणमात्रेण निवर्त्तत इति यच्चोक्तम् नार्थान्तराध्यवसायादन्यत्र संशय इति यो ह्यर्थान्तराध्यवसायमात्रं संशयहेतुमुपाददीत स एवं वाच्य इति। यत्पुनरेतत्कार्य्यकारणयोः सारूप्याभावादिति कारणस्य भावाभावयोः कार्य्यस्य

त्वादेर्यो विशेष इतरव्यावर्त्तको धर्मस्तस्यापगत इच्छ इच्छया तत: विशेषादर्शनादित्यर्थः, तथा च विशेषादर्शनसहितसाधारणधर्मदर्शनादितः संशये स्वीक्रियते न

भावाभावौ कार्यकारणयोः सारूप्यम् यस्योत्पादाद्यदुत्पद्यते यस्य चानुत्पादाद्यन्नोत्पद्यते तत्कारणं कार्यमितरदित्येतत्सारूप्यम्, अस्ति च संशयकारणे संशये चैतदिति, एतेनानेकधर्माध्यवसायादिति प्रतिषेधः परिहृत इति, यत्पुनरेतदुक्तं विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च न संशय इति। पृथक्प्रवादयोर्व्याहतमर्थमुपलभे विशेषञ्च न जानामि नोपलभे येनान्यतरमवधारयेयम्। तत् कोऽत्र विशेषः स्याद् येनैकतरमवधारयेयमिति। संशयो विप्रतिपत्तिजनितोऽयं न शक्यो विप्रतिपत्तिसम्प्रतिपत्तिमात्रेण निवर्त्तयितुमिति। एवमुपलब्ध्यनुपलब्ध्यवस्थाकृते संशये वेदितव्यमिति। यत् पुनरेतत् विप्रतिपत्तौ च सम्प्रतिपत्तेरिति विप्रतिपत्तिशब्दस्य योऽर्थः तदध्यवसायो विशेषापेक्षः संशयहेतुस्तस्य च समाख्यान्तरेण न निवृत्तिः समानेऽधिकरणे व्याहतार्थौ प्रवादौ विप्रतिपत्तिशब्दस्यार्थः तदध्यवसायश्च विशेषापेक्षः संशयहेतुः न चास्य सम्प्रतिपत्तिशब्दे समाख्यान्तरे योज्यमाने संशयहेतुत्वं निवर्त्तते। तदिदमकृतबुद्धिसम्मोहनमिति। यत्पुनरव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया इति संशयहेतोरर्थस्याप्रतिषेधादव्यवस्थाऽभ्यनुज्ञानाच्च निमित्तान्तरेण शब्दान्तरकल्पना व्यर्था शब्दान्तरकल्पना, अव्यवस्था खलु व्यवस्था न भवत्यव्यवस्थात्मनि व्यवस्थितत्वादिति नानयोरुपलब्ध्यनुपलब्ध्योः सदसद्विषयत्वं विशेषापेक्षं संशयहेतुर्न भवतीति प्रतिषिध्यते यावता चाव्यवस्थात्मनि व्यवस्थिता न तावता-

---

कारणाभावादसंशयो नवा यत्किञ्चित्कारणसत्त्वादत्यन्तसंशय इत्यर्थः, साधारणधर्मदर्शनादेश्च संशयविशेषे जनकत्वात् संशयत्वावच्छिन्नं प्रति व्यभिचारेऽपि न क्षतिः, विप्रतिपत्तौ च वादिवाक्याभ्यां मध्यस्थस्यैव संशयोपगमात्, यत्तोक्तं समानधर्मदर्श-

त्मानं जहाति तावता ह्यनुज्ञाता भवत्यव्यवस्था। एवमियं क्रियमाणापि शब्दान्तरकल्पना नार्थान्तरं साधयतीति। यत् पुनरेतत्तथात्वेऽन्तसंशयस्तद्धर्मसातत्योपपत्तेरिति नायं समानधर्मादिभ्य एव संशयः किं तर्हि तत्तद्विषयाध्यवसायाद्विशेषस्मृतिसहितादित्यतो नात्यन्तसंशय इति अन्यतरधर्माध्यवसायाद्वा न संशय इति तत्र युक्तम् विशेषापेक्षो विमर्शः संशय इति वचनात् विशेषान्यतरधर्मो न च तस्मिन्नध्यवसीयमाने विशेषापेक्षा सम्भवतीति ॥ ६ ॥

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ॥ ७ ॥

यत्र यत्र संशयपूर्विका परीक्षा शास्त्रे कथायां वा तत्र तत्रैवं संशये परेण प्रतिषिद्धे समाधिर्वाच्य इति। अतः सर्वपरीक्षाव्यापित्वात्प्रथमं संशयः परीक्षित इति अथ प्रमाणपरीक्षा ॥ ७ ॥

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥८॥

प्रत्यक्षादीनां प्रमाणत्वं नास्ति त्रैकाल्यासिद्धेः पूर्वापरसद्भावानुपपत्तेरिति। अस्य सामान्यवचनस्यार्थविभागः ॥८॥

नात्, कथं संशयः समानत्वस्य भेदगर्भत्वादिति तदपि न, न हि समानधर्मत्वेन तज्ज्ञानं हेतुः, अपि तु उभयसद्भचरितधर्मवत्त्वज्ञानं तथेत्युक्तदोषाभावात् ॥ ६ ॥

सम्प्रति संशयपरीक्षयैव परेषां पदार्थानां परीक्षामतिदिशन्नाह।—एवमुक्तरीत्या उत्तरोत्तरेषु प्रयोजनादिषु प्रसङ्गः प्रकृष्टः सङ्गः परीक्षायाः सम्बन्धो बोद्धव्यः किं प्रयोजनरूपि परीक्षणीयं नेत्याह—यत्र संशय इति। यदि तत्परीक्षणार्थसंशयस्तदा तदपि परीक्षणीयम् अथवा उत्तरोत्तरम् उक्तिप्रत्युक्तिरूपं तत्प्रसङ्गः तद्रूपा परीक्षा संशयिनेऽर्थे कर्त्तव्येत्यर्थः ॥ ७ ॥

समाप्तं संशयपरीक्षाप्रकरणम् ॥ १२ ॥

इदानीमवसरतः प्रमाणसामान्यपरीक्षणाय पूर्वपक्षयति।—त्रैकाल्यसिद्धेऽपि प्रमाणात् प्रमायाः सिद्धेर्वक्तुमशक्यत्वात् प्रत्यक्षादीनां न प्रामाण्यमित्यर्थः ॥ ८ ॥

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥ ९ ॥

गन्धादिविषयकं ज्ञानं प्रत्यक्षं तच्चेदि पूर्वं, पश्चाद्गन्धादीनां सिद्धिः, नेदं गन्धादिसन्निकर्षादुत्पद्यत इति ॥ ९ ॥

पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १० ॥

असति प्रमाणे केन प्रमीयमाणोऽर्थः प्रमेयः स्यात् प्रमाणेन खलु प्रमीयमाणोऽर्थः प्रमेयमित्येतल्लिध्यति ॥ १० ॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥

यदि प्रमाणं प्रमेयञ्च युगपद्भवतः । एवमपि गन्धादिष्विन्द्रियार्थेषु ज्ञानानि प्रत्यर्थनियतानि युगपत्सम्भवन्तीति ज्ञानानां प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावः । या इमा बुद्धयः क्रमेणार्थेषु प्रवर्त्तन्ते तासां क्रमवृत्तित्वं न सम्भवतीति.

विमृश्या वैकाल्यासिद्धत्वं व्युत्पादयति ।—प्रमाणस्य पूर्वत्वं तावन्न सम्भवति हि यतः प्रमायाः पूर्वं प्रमाणसिद्धौ प्रमाणसत्त्वे इन्द्रियार्थसन्निकर्षात् प्रत्यक्षं सिध्यतीति न स्यात् प्रत्यक्षप्रमाणतः पूर्वमेव प्रमायाः सत्त्वात्, प्रमाणत्वं हि प्रमाकरणत्वं पूर्वं प्रमाया अभावे प्रमाकरणत्वमपि कथं स्यात् पूर्वमेव प्रमायाः सिद्धिरुपपद्यते कथम् इन्द्रियार्थसन्निकर्षात्, इन्द्रियार्थसन्निकर्षादितः प्रत्यक्षोत्पत्तिः प्रत्यक्षादनुत्पत्तिः परं तु प्रत्यक्षं प्रति करणत्वे खण्डिते तद्भिन्नाकरणान्तरमपि खण्डनीयमित्याशयं सूचयतो वर्णयन्ति प्रमाणस्य प्रमावैशिष्ट्याभावे प्रमाणमिति ज्ञानेऽपि प्रमावैशिष्ट्यसंशयः स्यादिति भावः ॥ ९ ॥

प्रमाणस्य प्रमातः पश्चात् सिद्धौ विषयस्य प्रमेयत्वं प्रमाणात् पूर्वमेव सिद्धमिति न प्रमाणतः प्रमेयस्य उत्पत्तिः प्रमेयस्य च सिद्धिरिति ॥ १० ॥

इदञ्च सूत्रद्वयम् अनुमानाद्यभिप्रायेण चक्षुः श्रोत्रादेः प्रमानन्तरं प्रमासमकालं

व्याघातश्च युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति, एतावांश्च प्रमाणप्रमेययोः सद्भावविषयः स चानुपपन्न इति तस्मात् प्रत्यक्षादीनां प्रमाणत्वं न सम्भवतीति, अस्य समाधिः उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद्यथादर्शनं विभागवचनम् क्वचिदुपलब्धिहेतुः पूर्वं पश्चादुपलब्धिविषयः। यथादित्यस्य प्रकाशः उत्पद्यमानानां क्वचित् पूर्वमुपलब्धिविषयः पश्चादुपलब्धिहेतुः, यथावस्थितानां प्रदीपः क्वचिदुपलब्धिहेतुरुपलब्धिविषयश्च सह सम्भवतः, यथा धूमेनाग्नेर्ग्रहणमिति, उपलब्धिहेतुश्च प्रमाणं, प्रमेयन्तूपलब्धिविषयः, एवं प्रमाणप्रमेययोः पूर्वापरसहभावेऽनियते यथाऽर्थो दृश्यते तथा विभज्य वक्तव्य इति। तत्रैकान्तेन प्रतिषेधानुपपत्तिः सामान्येन खलु विभज्य प्रतिषेध उक्त इति समाख्याहेतोश्चैकाक्ष्ययोगात् तथाभूता समाख्या, यत्पुनरिदं पश्चात् सिद्धे च प्रमाणेन प्रमीयमाणोऽर्थः प्रमेयमिति विज्ञायत इति। प्रमाणमित्येतस्याः समाख्याया उपलब्धिहेतुत्वं निमित्तं तस्य चैकाक्ष्ययोगः, उपलब्धिमकार्षीदुपलब्धिं करोति उपलब्धिं करिष्यतीति समाख्याहेतोश्चैकाक्ष्ययोगात् समाख्या तथाभूता प्रमितोऽनेनार्थः प्रमीयते प्रमास्यते इति प्रमाणं, प्रमितं प्रमीयते प्रमास्यत इति च प्रमेयम्। एवं सति भविष्यत्यस्मिन् हेतुत उपलब्धिः, प्रमास्यतेऽयमर्थः, प्रमेयमिदमित्येतत् सर्वं भवतीति, चैकाक्ष्यानभ्युपगमे च व्यवहारानुपपत्तिः। यश्चैवं

वा सत्त्वस्येष्टत्वादुत्पत्तेः शङ्कितुमप्यशक्यत्वात् तदयमर्थः प्रमाणप्रमेयोर्युगपदसत्त्वे युगपत्परीक्षाबुद्धीनामर्थविशेषनियतत्वादयत्नक्रमहेतुत्वं तत्र स्यात् पदज्ञानं हि शब्दविषयकं श्रावणप्रत्यक्षरूपं शाब्दबोधश्च पदार्थविषयकः परीक्षारूपो विजातीय यत्नजन्यो न यौगपद्यं सम्भवति कार्यकारणभावसत्त्वात् क्रमिकत्वेनैव सिद्धेः, अत एवैक-

नाभ्यनुजानीयात् तस्य पाचकमानय पश्यति, लावकमानय लविष्यतीति व्यवहारो नोपपद्यत इति। प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेरित्येवमादिवाक्यं प्रमाणप्रतिषेधः। तत्रायं प्रष्टव्यः। अथानेन प्रतिषेधेन भवता किं क्रियत इति, किं सम्भवो निवर्त्यते अथासम्भवो ज्ञाप्यत इति, तत्र यदि सम्भवो निवर्त्यते सति सम्भवे प्रत्यक्षादीनां प्रतिषेधानुपपत्तिः अथासम्भवो ज्ञाप्यते प्रमाणलक्षणं प्राप्तस्तर्हि प्रतिषेधः प्रमाणासम्भवस्योपलब्धिहेतुत्वादिति ॥ ११ ॥

चैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥

किञ्चातः अस्य तु विभागः पूर्वं हि प्रतिषेधसिद्धावसति प्रतिषेध्ये किमनेन प्रतिषिध्यते, पश्चात् सिद्धौ प्रतिषेध्यासिद्धिः प्रतिषेधाभावादिति युगपत्सिद्धौ प्रतिषेधसिद्ध्यभ्यनुज्ञानादनर्थकः प्रतिषेधः इति। प्रतिषेधलक्षणे च वाक्येऽनुपपद्यमाने सिद्धं प्रत्यक्षादीनां प्रामाण्यमिति ॥ १२ ॥

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधासिद्धिः ॥ १३ ॥

कथं चैकाल्यासिद्धेरित्यस्य हेतोर्यदुदाहरणमुपादीयते हेत्वर्थस्य साधकत्वं दृष्टान्ते दर्शयितव्यमिति न च तर्हि

मेव ज्ञानमुभयविषयकमित्यपि नाशङ्कनीयं सङ्करप्रसङ्गात्, एवं व्याप्तिज्ञानानुमित्यादावपि द्रष्टव्यं, परे तु प्रमाणप्रमेययोर्न युगपत्सिद्धिर्न युगपज्ज्ञानं बुद्धीनामर्थविषयनियतत्वात् क्रमवत्तित्वं तथा सति तन्न स्यात्तथा हि चक्षुषो ज्ञानमनुमित्यादिरूपं घटादेश्च प्रत्यक्षादिरूपं न चानयोर्योगपद्यं सम्भवतीत्यर्थ इत्याहुः ॥ ११ ॥

सिद्धान्तसूत्रम्।—यदि चैकाल्यासिद्ध्या प्रमाणात् प्रमेयसिद्धिर्नेष्यते तदा तद्दीप्या त्वदीयः प्रतिषेधोऽप्यनुपपन्न इति आत्मुत्तरमेतदिति भावः ॥ १२ ।

प्रत्यक्षादीनामप्रामाण्यम्। अथ प्रत्यक्षादीनामप्रामाण्यमुपादीयमानमप्युदाहरणं नार्थं साधयिष्यतीति सोऽयं सर्वप्रमाणैर्व्याहतो हेतुरहेतुः। सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति, वाक्यार्थो ह्यस्य सिद्धान्तः स च वाक्यार्थः प्रत्यक्षादीनि नार्थं साधयन्तीति। इदञ्चावयवानामुपादानमर्थस्य साधनायेति। अथ नोपादीयते अप्रदर्शितहेत्वर्थस्य दृष्टान्तेन साधकत्वमिति निषेधो नोपपद्यते हेतुत्वासिद्धेरिति ॥ १३ ॥

तत्प्रामाण्ये वा न सर्वप्रमाणप्रतिषेधः ॥ १४ ॥

प्रतिषेधलक्षणे स्ववाक्ये तेषामवयवाश्रितानां प्रत्यक्षादीनामप्रामाण्येऽभ्यनुज्ञायमाने परवाक्येऽप्यवयवाश्रितानां प्रामाण्यं प्रसज्यते अविशेषादिति। एवञ्च न सर्वाणि प्रमाणानि प्रतिषिध्यन्त इति। विप्रतिषेध इति वीत्ययमुपसर्गः सम्प्रतिपत्त्यर्थे, न व्याघातेऽर्थाभावादिति ॥ १४ ॥

वैकाल्यप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत्सिद्धेः ॥ १५ ॥

किमर्थं पुनरिदमुच्यते, पूर्वोक्तनिबन्धनार्थं यत्तावत् पूर्वोक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद् यथादर्शनं विभागवचनमिति। तदितः समुत्थानं यथा

किञ्च सर्वप्रमाणप्रतिषेधे प्रतिषेधकं प्रमाणमपि नाभ्युपगन्तव्यम्। तथा च कथं प्रतिषेधसिद्धिरित्याह ॥ १३ ॥

यदि च प्रतिषेधकं प्रमाणमुपेयते तदा कथं सर्वप्रमाणप्रतिषेध इत्याह ॥ १४ ॥

ननु मन्यते वस्तुसिद्धिनापेक्षिता विश्वस्य शून्यत्वात् प्रमाणप्रमेयभावोऽपि न वास्तविकस्वन्यते च वैकाल्यासिद्धिरुक्तैवेत्यतस्तदुद्धरति—वैकाल्ये यः प्रतिषेध उक्तः स न सम्भवति, कुतः? इत्यत आह—शब्दादिति। यथा शब्दात् तस्याश्रयिणः पूर्वसिद्धस्यातीतस्य सुरजादेः सिद्धिर्भवति: यथा वा पूर्वसिद्धात्

विज्ञायेत। अनियमदर्शी खल्वयमृषिर्नियमेन प्रतिषेधं प्रत्याचष्टे, चैकाक्षस्य चायुक्तः प्रतिषेध इति। तत्रैकां विधामुदाहरति शब्दादातोद्यसिद्धिवदिति यथा पश्चात्-सिद्धेन शब्देन पूर्वसिद्धमातोद्यमनुमीयते साध्यश्चातोद्यं साधनश्च शब्दः। अन्तर्हिते ह्यातोद्ये खननोऽनुमानं भवतीति। वीणा वाद्यते, वेणुः पूर्यत इति खनविशेषेण आतोद्य-विशेषं प्रतिपद्यते। तथा पूर्वसिद्धमुपलब्धिहेतुना प्रतिपद्यत इति। निदर्शनार्थत्वाच्चास्य शेषयोर्विधयोर्यथोक्तमुदाहरणं वेदितव्यमिति। कस्मात् पुनरिह तन्नोच्यते पूर्वोक्तमुपपाद्यत इति सर्वथा तावदयमर्थः प्रकाशयितव्यः सह इह वा प्रकाश्येत तत्र वा न कश्चिद्विशेष इति यदा चोपलब्धिविषयः कस्य-चिदुपलब्धिसाधनं भवति तदा प्रमाणं प्रमेयमिति चैकोऽर्थोऽभिधीयते। अस्यार्थस्यावद्योतनार्थमिदमुच्यते ॥ १५ ॥

प्रमेयता च तुलाप्रामाण्यवत् ॥ १६ ॥

गुरुत्वपरिमाणज्ञानसाधनं तुला प्रमाणं, ज्ञानविषयो गुरुद्रव्यं सुवर्णादि प्रमेयम्। यदा तु सुवर्णादिना तुलान्तरं व्यवस्थाप्यते तदा तुलान्तरप्रतिपत्तौ सुवर्णादि प्रमाणं, तुला-न्तरं प्रमेयमिति एवमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः।

पदार्थादुत्तरकालीनवस्तुप्रकाशनं यथा वा वह्निसमकालीनाद् धूमाद् वह्निसिद्धिरुक्तथा-वापि प्रमा सर्वत्र प्रमाणादुत्तरभाविन्येव प्रमाणस्य चक्षुरादेः प्रमातः पूर्वभावित्व-मस्त्येव, पूर्वं प्रमावैशिष्ट्यन्तु तस्य नोपेयते यदा कदाचित् प्रमासम्बन्धेनैव प्रमाणत्व-सम्भवाद्यदा कदाचित् पाकसम्बन्धेनैव पाचकमानयेत्यादिवदिति भावः। अत्र चकारान्तं न सूत्रान्तर्गतमिति तत्त्वालोके वस्तुतष्टीकादिस्वरसात् सूत्रान्त-र्गतमेव ॥ १५ ॥

नन्वनियतत्वादेव प्रमाणप्रमेयव्यवहारो न पारमार्थिकः रज्जौ सर्पादिक-

आत्मा तावदुपलब्धिविषयत्वात् प्रमेये परिपठितः। उपलब्धौ स्वातन्त्र्यात् प्रमाता। बुद्धिरुपलब्धिसाधनत्वात् प्रमाणम्, उपलब्धिविषयत्वात्तु प्रमेयम्, उभयाभावात्तु प्रमितिः। एवमर्थविशेषे समाख्यासमावेशो योज्यः। तथाच कारकशब्दा निमित्तवशात् समावेशेन वर्त्तन्त इति। वृक्षस्तिष्ठतीति स्वस्थितौ स्वातन्त्र्यात् कर्त्ता, वृक्षं पश्यतीति दर्शनेनाप्तुमिष्यमाणतमत्वात् कर्म, वृक्षेण चन्द्रमसं ज्ञापयतीति ज्ञापकस्य साधकतमत्वात् करणम्। वृक्षायोदकमासिञ्चतीत्यासिच्यमानेनोदकेन वृक्षमभिप्रैतीति सम्प्रदानं, वृक्षात् पर्णं पततीति ध्रुवमपायेऽपादानमित्यपादानम्। वृक्षे वयांसि सन्तीत्याधारोऽधिकरणमित्यधिकरणम्। एवञ्च सति न द्रव्यमात्रं कारकं न क्रियामात्रं; किं तर्हि, क्रियासाधनं क्रियाविशेषयुक्तं कारकम्। यत् क्रियासाधनं स्वतन्त्रः स कर्त्ता न द्रव्यमात्रं न क्रियामात्रम्। क्रियया ह्याप्तुमिष्यमाणतमं कर्म न द्रव्यमात्रं न क्रियामात्रम्। एवं साधकतमादिष्वपि, एवञ्च कारकार्थान्वाख्यानं यथैवोपपत्तित एवं लक्षणतः कारकान्वाख्यानमपि न द्रव्यमात्रेण न क्रियया वा, किं तर्हि क्रियासाधने क्रियाविशेषे युक्त इति कारकशब्दस्यायं प्रमाणं प्रमेयमिति न च कारकधर्मं न हातुमर्हति अस्ति च भोः कारकशब्दानां निमित्तवशात् समावेशः। प्रत्यक्षादीनि च प्रमाणानि उपलब्धिहेतुत्वात्, प्रमेयञ्चोपलब्धिविषयत्वात्, संवेद्यानि च प्रत्यक्षादीनि प्रत्यक्षेणोपलभे अनुमानेनोपलभे उपमानेनोप-

---

व्यवहारवदित्याशङ्क्याहाह। यथा हि तुलायाः सुवर्णादिगुरुत्वेयत्तापरिच्छेदकत्वात् प्रमाणव्यवहारस्तुलान्तरेण च तदीयगुरुत्वेयत्तापरिच्छेदे च प्रमेयव्यवहारस्तथा निमित्तद्वयसमावेशादिन्द्रियादेरपि प्रमाणप्रमेयव्यवहार इति यद्वा प्रमाणता

क्षमे आगमेनोपक्षमे प्रत्यक्षं मे ज्ञानमनुमानिकं मे ज्ञानमौपमानिकं मे ज्ञानमागमिकं मे ज्ञानमिति ज्ञानविशेषा गृह्यन्ते, लक्षणतश्च ज्ञाप्यमानानि ज्ञायन्ते विशेषेण इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्येवमादिना, सेयमुपलब्धिः प्रत्यक्षादिविषया किं प्रमाणान्तरतोऽर्थान्तरेण प्रमाणान्तरमसाधनमिति कश्चात्र विशेषः ॥ १६ ॥

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ १७ ॥

यदि प्रत्यक्षादीनि प्रमाणेन नोपलभ्यन्ते। येन प्रमाणेनोपलभ्यन्ते तत्प्रमाणान्तरसद्भावः प्रसज्यत इति। अनवस्थामाह तस्याप्यन्यतरस्याप्यन्येनेति नचानवस्था शक्यानुज्ञातुमनुपपत्तेरिति। अस्तु तर्हि प्रमाणान्तरमन्तरेण निःसाधनेति ॥ १७ ॥

तद्विनिवृत्तेर्वा प्रमाणान्तरसिद्धिवत् प्रमेयसिद्धिः ॥ १८ ॥

यदि प्रत्यक्षाद्युपलब्धौ प्रमाणान्तरं निवर्त्तते आत्मेत्युप-

प्रमेयता च प्रमातृवैशिष्ट्यादिति यत्प्रागाशङ्कितं तदाह प्रमेयता चेति यथा कदाचिद् गुरुत्वेयत्तापरिच्छेदकत्वात् तुलायाः प्रमाणव्यवहारस्तथेन्द्रियघटादेरपि प्रमाणप्रमेयव्यवहार इति ॥ १६ ॥

अनवस्थया प्रत्यवस्थानपरं पूर्वपक्षसूत्रम्। प्रमाणानां प्रमाणतः सिद्धेः स्वीकारे प्रमाणान्तरस्वीकारः स्यात् तथाहि प्रमाणस्य तावन्न स्वतः सिद्धिरात्माश्रयापत्तेरतः प्रमाणान्तरं स्वीकार्यं तयोश्च परस्परसाधकत्वेऽन्योन्याश्रयापत्तिरतस्तत्रापि प्रमाणान्तरमङ्गीकार्यमित्येवमनवस्थेति भावः ॥ १७ ॥

न तु प्रमाणसिद्धिः प्रमाणं विनैव स्यादित्याह।—यदि च प्रमाणविनि-

लब्धावपि प्रमाणान्तरं निवर्त्तयत्वविशेषात्। एवञ्च सर्वप्रमाण-विलोप इत्यत आह ॥ १८ ॥

न प्रदीपप्रकाशवत् तत्सिद्धेः ॥ १९ ॥

यथा प्रदीपप्रकाशः प्रत्यक्षाङ्गत्वाद्दृश्यदर्शने प्रमाणम्, स च प्रत्यक्षान्तरेण चक्षुषः सन्निकर्षेण गृह्यते। प्रदीपभावाभावयो-र्दर्शनस्य तथा भावादर्शनहेतुरनुमीयते। तमसि प्रदीपमुपा-दधीथा इत्याप्तोपदेशेनापि प्रतिपद्यते। एवं प्रत्यक्षादीनां यथादर्शनं प्रत्यक्षादिभिरेवोपलब्धिः। इन्द्रियाणि तावत् स्वविषयग्रहणेनैवानुमीयन्ते। अर्थाः प्रत्यक्षतो गृह्यन्ते, इन्द्रियार्थसन्निकर्षस्तु आवरणेन लिङ्गेनानुमीयते, इन्द्रियार्थ-सन्निकर्षोत्पन्नं ज्ञानमात्ममनसोः संयोगविशेषादात्मसमवायाच्च सुखादिवद्गृह्यते। एवं प्रमाणविशेषो विभज्य वचनीयः। यथा च दृश्यः सन् प्रदीपप्रकाशो दृश्यान्तराणां दर्शनहेतु-रिति दृश्यदर्शनव्यवस्थां लभते। एवं प्रमेयं सत् किञ्चिदर्थ-जातमुपलब्धिहेतुत्वात् प्रमाणप्रमेयव्यवस्थां लभते, सेयं प्रत्य-क्षादिभिरेव प्रत्यक्षादीनां यथादर्शनमुपलब्धिर्न प्रमाणान्तरतो न च प्रमाणमन्तरेण निःसाधनेति, तेनैव तस्या ग्रहणमिति चेत् नार्थभेदस्य लक्षणसामान्यात् प्रत्यक्षादीनां प्रत्यक्षादिभि-

---

क्षितः प्रमाणव्यतिरेकात् प्रमाणसिद्धिः स्वीक्रियते तदा तवैव तत्सिद्धिः स्वीक्रियतां किं प्रमाणाङ्गीकारेण तथाच अन्यवस्थितमेव जगत्स्यादिति शून्यतायां पर्य्यवसानमिति भावः ॥ १८ ॥

सिद्धान्तसूत्रम्। यथाहि प्रदीपालोकाद्घटादिप्रकाशस्तथा प्रमाणानां प्रमेय-प्रकाशकत्वमन्यथा प्रदीपस्य घटप्रकाशकत्वं प्रदीपप्रकाशकं चक्षुः तत्प्रकाशकमन्य-दित्यनवस्थाभयात् प्रदीपोऽपि न घटप्रकाशकः स्याद् यदि च घटप्रत्यक्षे तत्प्रकाश-

रेव ग्रहणमित्युक्तम्। अन्येन ह्यन्यस्य ग्रहणं दृष्टमिति नार्थभेदस्य लक्षणसामान्यात् प्रत्यक्षलक्षणेनानेकोऽर्थः संगृहीतः। तत्र केनचित् कस्यचिद्ग्रहणमित्यदोषः। एवमनुमानादिष्वपीति, यथोद्भूतेनोदकेनाश्रयस्यस्य ग्रहणमिति ज्ञात्मनसोश्च दर्शनात्। अहं सुखी अहं दुःखी चेति तेनैव ज्ञात्रा तस्यैव ग्रहणं दृश्यते, युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति च तेनैव मनसा तस्यैवानुमानं दृश्यते, ज्ञातृज्ञेयस्य चाभेदो ग्रहणस्य ग्राह्यस्य चाभेद इति। निमित्तभेदोऽत्रेति चेत् समानं, न निमित्तान्तरेण विना ज्ञातात्मानं जानीते न च निमित्तान्तरेण विना मनसा मनो गृह्यत इति समानमेतत्, प्रत्यक्षादिभिः प्रत्यक्षादीनां ग्रहणमित्यत्राप्यर्थभेदो न गृह्यत इति। प्रत्यक्षादीनाञ्चाविषयत्वानुपपत्तेः। यदि स्यात् किञ्चिदर्थजातं प्रत्यक्षादीनामविषयः। यत् प्रत्यक्षादिभिर्न शक्यं ग्रहीतुं तस्य ग्रहणाय प्रमाणान्तरमुपादीयेत। तत्तु न शक्यं केनचिदुपपादयितुमिति। प्रत्यक्षादीनां यथादर्शनमेवेदं सच्चासच्च सर्वं विषय इति, केचित्तु दृष्टान्तमपरिगृहीतं हेतुना विशेषहेतुमन्तरेण साध्यमाधनायोपादत्ते। यथा प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते, तथा प्रमाणानि प्रमाणान्तरमन्तरेण गृह्यन्त इति। स चायं किञ्चि-

---

शकानां नापेक्षेति नानवस्थेत्युच्यते तदा प्रकृतेऽपि तुल्यं नहि प्रमाणात् प्रमेयसिद्धौ प्रमाणसिद्धिरपेक्षिता, यदा च प्रमाणसिद्धिरपेक्षिता तदा तवापि प्रमाणमपेक्षितव्यं तत्रानुमानादिकमेवेति न प्रमाणान्तरकल्पना न चानवस्था सर्वत्र प्रमाणसिद्धेरनपेक्षितत्वात् क्वचिद्दीपाङ्कुरवदपेक्षापि न क्षतिकरीति भावः, प्रदीपस्य प्रदीपान्तरं विना प्रकाशकत्ववत्प्रमाणानामपि प्रमाणमन्तरेणैव प्रमेयप्रकाशकत्वमिति सूत्रार्थः, केचित्तु मन्यन्ते तान् प्रत्याह भाष्यकारः। क्वचिन्निहसिद्धर्थनादनिहसि-

निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्तः। यथा चायं प्रसङ्गोऽनिवृत्तिदर्शनात् प्रमाणसाधनायोपादीयते, एवं प्रमेयसाधनायाप्युपादेयो विशेषहेतुत्वात् यथा स्थाल्यादिरूपग्रहणे प्रदीपप्रकाशः प्रमेयसाधनायोपादीयते। एवं प्रमाणसाधनायाप्युपादेयो विशेषहेत्वभावात् सोऽयं विशेषहेतुपरिग्रहमन्तरेण दृष्टान्त एकस्मिन् पक्षे उपादेयो न प्रतिपक्ष इत्यनैकान्तः एकस्मिंश्च पक्षे दृष्टान्त इत्यनैकान्तो विशेषहेतुत्वाभावादिति। विशेषहेतुपरिग्रहे सति उपसंहाराभ्यनुज्ञानाद्प्रतिषेधः। विशेषहेतुपरिगृहीतस्तु दृष्टान्त एकस्मिन् पक्षे उपसंक्रियमाणो न शक्यो ज्ञातुम्। एवञ्च सत्यनैकान्त इत्ययं प्रतिषेधो न भवति। प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्थेति चेत् न संविद्विषयनिमित्तानामुपलब्ध्या व्यवहारापपत्तेः। प्रत्यक्षेणार्थमुपलभे अनुमानेनार्थमुपलभे उपमानेनार्थमुपलभे आगमेनार्थमुपलभ इति। प्रत्यक्षं मे ज्ञानमानुमानिकं मे ज्ञानमौपमानिकं मे ज्ञानमागमिकं मे ज्ञानमिति संविन्निमित्तञ्चोपलभमानस्य धर्मार्थसुखापवर्गप्रयोजनस्तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च व्यवहार उपपद्यते, सोऽयं तावत्येव निवर्त्तते, न चास्य व्यवहारान्तरमनवस्थासाधनोयं, येन प्रयुक्तोऽनवस्थामुपाददीतेति। सामान्येन प्रमाणानि परीक्ष्य विशेषेण परीक्ष्यन्ते तत्त्व ॥ १८ ॥

दर्शनादनैकान्तः क्वचित् प्रदीपादौ प्रमाणान्तरनिवृत्तिदर्शनात् क्वचिद्घटादौ प्रमाणान्तरानिवृत्तिदर्शनात् प्रमाणान्तरापेक्षादर्शनात् त्वदीयो हेतुरनैकान्तः अनियतः तथाच प्रदीपदृष्टान्तात् प्रमाणान्तरापेक्षा निवृत्तिः साध्यते घटदृष्टान्तेन प्रमाणान्तरापेक्षैव किं न साध्यते? तथाच दृष्टान्तसमा जातिरियमिति भावः। तदाख्याने कथं नानैकान्त इत्यवाह भाष्यकारः विशेषहेतुपरिग्रहे सत्युप-

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २० ॥

आत्ममनःसन्निकर्षो हि कारणान्तरं नोक्तमिति। न चासंयुक्ते द्रव्ये संयोगजस्य गुणस्यात्पत्तिरिति ज्ञानोत्पत्तिदर्शनादात्ममनःसन्निकर्षः कारणम्, मनःसन्निकर्षानपेक्षस्य चेन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वे युगपदुत्पद्येरन् बुद्धय इति मनःसन्निकर्षोऽपि कारणम्। तदिदं सूत्रं पुरस्तात् क्षतभाथम् ॥ २० ॥

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥२१॥

आत्ममनसोः सन्निकर्षाभावे नोत्पद्यते प्रत्यक्षम् इन्द्रियार्थसन्निकर्षाभाववदिति, सति चेन्द्रियार्थसन्निकर्षे ज्ञानोत्पत्तिदर्शनात् कारणभावं ब्रुवते ॥ २१ ॥

संहाराभ्यनुज्ञानादप्रतिषेधः, मन्यते विशेषहेतोः व्याप्तिपक्षधर्मतात्रयस्य परिपूर्णे सत्युपसंहारस्य साध्यसाधनस्याभ्यनुज्ञानादुक्तानैकान्तात्मकः प्रतिषेधो न भवति ॥१९॥

समानं प्रमाणसामान्यपरीक्षाप्रकरणम् ॥ १३ ॥

प्रमाणसामान्यपरीक्षानन्तरं प्रमाणविशेषेषु परीक्षणीयेषु प्रथमोद्दिष्टं प्रत्यक्षं परीक्षणीयं तत्र च फलद्वारकमेव लक्षणं पूर्वमुक्तमतः फललक्षणं यथाश्रुतमाक्षिपति। प्रत्यक्षस्य यल्लक्षणमिन्द्रियार्थसन्निकर्षोत्पन्नत्वं तन्नोपपद्यतेऽसमग्रवचनात्, अयमर्थः प्रत्यक्षस्य कारणघटितं लक्षणमभिहितं तत्र कारणकलापघटितायाः सामग्र्या विनिवेशनमतिव्याप्तिनिरासकं तच्च नाभिहितम् असमग्रम् इन्द्रियार्थसन्निकर्षजन्यत्वमात्रं ह्यभिहितम्, आत्ममनःसंयोगेन्द्रियमनःसंयोगादिकन्तु नाभिहितं तथाचात्ममनःसंयोगरूपेन्द्रियार्थसंयोगजन्यतयानुमित्यादावतिव्याप्तिरित्यर्थः ॥ २० ॥

नन्वात्ममनोयोगादेः कारणत्वमेव नास्तीत्याशङ्क्यायाह।—शरीरावच्छिन्नस्यात्मनो मनसा यः सन्निकर्षस्तदभावे न प्रत्यक्षोत्पत्तिर्यतोऽत आत्ममनःसंयोगस्य कारणत्वमावश्यकम्। प्रत्यक्षोत्पत्तिरिति प्रकृतं ज्ञानोत्पत्तिरिति विवक्षितम् ॥२१॥

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥ २२ ॥

दिगादिषु सत्सु ज्ञानाभावात् तान्यपि कारणानीति। अकारणभावेऽपि ज्ञानोत्पत्तिर्दिगादिसन्निधेरवर्जनीयत्वात्। यदाप्यकारणं दिगादीनि ज्ञानोत्पत्तौ तदापि सत्सु दिगादिषु ज्ञानेन भवितव्यम्, न हि दिगादीनां सन्निधिः शक्यः परिवर्जयितुमिति, तत्र कारणभावे हेतुवचनम् एतस्माद्धेतोर्दिगादीनि ज्ञानकारणानीति। आत्ममनःसन्निकर्षस्त्वर्थापसङ्ग्रह इति तत्रेदमुच्यते ॥ २२ ॥

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २३ ॥

ज्ञानमात्मनो लिङ्गं तद्गुणत्वात् न चामंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरस्तीति ॥ २३ ॥

तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २४ ॥

अनवरोध इति वर्त्तते, युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्युच्यमाने सिध्यत्येव मनःसन्निकर्षापेक्ष इन्द्रियार्थसन्निकर्षो ज्ञानकारणमिति प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य शब्देन वचनम्, प्रत्यक्षानुमानोपमानशब्दानां निमित्तमात्म-

---

नन्वेवं दिगादीनामपि कारणत्वं स्यादित्याशङ्क्याह।—यथाकथञ्चित् पौर्व्वापर्य्यस्य तत्रापि सत्त्वात्तेषामन्यथासिद्धित्वेन प्रकृतेऽप्येवम् ॥ २२ ॥

अतोऽवसरमभिधातुमाह।—आत्मनो नावरोधोऽसंयुक्तः कारणत्वेनेति न कृतः ज्ञानलिङ्गत्वात् ज्ञानं लिङ्गं यस्य तत्तथा, ज्ञानं हि भावकार्य्यं समवायिकारणं साधयति, तत्र परिशेषादात्मैव दिगादीनाञ्च कारणत्वे न मानमिति भावः। इत्थञ्च समवायिकारणस्यात्मनो मनसा संयोगोऽसमवायिकारणमित्यप्ययं सिद्धम् ॥ २३ ॥

आत्मशरीरादिसंयोगस्य कुतो नासमवायिकारणत्वमित्यतो मनसः प्राधान्ये

मनःसन्निकर्षः प्रत्यक्षस्येवेन्द्रियार्थसन्निकर्ष इत्यसमानो-ऽसमानत्वात्तस्य ग्रहणं सुप्तव्यासक्तमनसाञ्चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वादिन्द्रियार्थसन्निकर्षस्य ग्रहणं, नात्ममनसोः सन्निकर्षस्येति। एकदा खल्वयं प्रबोधकालं प्रणिधाय सुप्तः प्रणिधानवशात् प्रबुध्यते। यदातु तीव्रौ ध्वनिस्पर्शौ प्रबोधकारणं भवतस्तदा प्रसुप्तस्येन्द्रियार्थसन्निकर्षनिमित्तं प्रबोधज्ञानमुत्पद्यते, तत्र न ज्ञातुर्मनसश्च सन्निकर्षस्य प्राधान्यं भवति, किं तर्हीन्द्रियार्थयोः सन्निकर्षस्य, न ह्यात्मा जिज्ञासमानः प्रयत्नेन मनस्तदा प्रेरयतीति एकदा खल्वयं विषयान्तरासक्तमनाः सङ्कल्पवशाद्विषयान्तरं जिज्ञासमानः प्रयत्नप्रेरितेन मनसेन्द्रियं संयोज्य तत्तद्विषयान्तरं जानीते। यदा तु खल्वस्य निःसङ्कल्पस्य निर्जिज्ञासस्य च व्यासक्तमनसो वाह्यविषयोपनिपातनाज्ज्ञानमुत्पद्यते तदेन्द्रियार्थसन्निकर्षस्य प्राधान्यं न ह्यत्रात्मा जिज्ञासमानः प्रयत्नेन मनः प्रेरयतीति प्राधान्याच्चेन्द्रियार्थसन्निकर्षस्य ग्रहणं कार्यं, गुणत्वात् नात्म-मनसोः सन्निकर्षस्येति प्राधान्ये च हेत्वन्तरम् ॥ २४ ॥

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य पृथग्वचनम् ॥ २४ ॥ क

युक्तिमाह। नानवरोध इत्यनुवर्त्तते इन्द्रियमनोयोगद्वारा ज्ञानायौगपद्यनियामकत्वान्मनसोऽपि हेतुत्वमावश्यकमिति शरीरमनोयोगादेश्च न तन्नियामकत्वमिति भावः, इत्यश्चात्ममनःसंयोगसमवायिकारणत्वं युक्तम् ॥ २४ ॥

सिद्धान्तसूत्रम्। प्रत्यक्षनिमित्तत्वात् प्रत्यक्षसाधारणकारणत्वात् अयमर्थः प्रत्यक्षसूत्रे इन्द्रियार्थसन्निकर्षाभिधानं हि न कारणाभिधित्सया येनात्ममनो-योगाद्यनभिधानेन न्यूनत्वम्, अपि तु लक्षणाभिप्रायेण, तत्र च सामयीघटितस्यैव

सुप्तव्यासक्तमनसोरिन्द्रियार्थयोः सन्निकर्ष-निमित्तत्वात् ॥ २४ ॥ ख

तैस्त्वापदेशो ज्ञानविशेषाणाम् ॥ २५ ॥

तैरिन्द्रियैरर्थैश्च व्यपदिश्यन्ते ज्ञानविशेषाः, कथम्? घ्राणेन जिघ्रति, चक्षुषा पश्यति, रसनया रसयतीति, घ्राणविज्ञानं चक्षुर्विज्ञानं, रसनाविज्ञानमिति, गन्धविज्ञानं, रूपविज्ञानं, रसविज्ञानमिति च इन्द्रियविषयविशेषाश्च पञ्चधा बुद्धिर्भवति, अतः प्राधान्यमिन्द्रियार्थसन्निकर्षस्येति। यदुक्तमिन्द्रियार्थ-सन्निकर्षयत्नेन कार्यम् आत्ममनसोः सन्निकर्षस्येति, कस्मात्? सुप्तव्यासक्तमनसामिन्द्रियार्थयोः सन्निकर्षस्य ज्ञाननिमित्त-त्वादिति ॥ २५ ॥

असाधारणकारणघटितस्यापि लक्षणस्य सुवचत्वादिन्द्रियार्थसन्निकर्षस्य चासाधा रणत्वात् पृथग्वचनम् आत्ममनःसंयोगादिसाधारणकारणाद् व्यवच्छिद्य लक्षण-घटकतया वचनं युक्तम्, अयं भावः, इन्द्रियार्थसन्निकर्षत्वावच्छिन्नकारणताप्रति-योगिककार्यतानाश्रयत्वस्य इन्द्रियत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयत्वस्य वा लक्षणस्य सम्यक्त्वे कृतमात्ममनोयोगाद्यनपवेक्षीतेति परिष्कृतं चेदमधस्तात् इदं न सूत्रं किन्तु भाष्यमिति केचित्। इति वृत्तिसम्मतम् अधिकमूत्वम् ॥२४॥ क

समाधत्तरमाह।—ज्ञानस्येति शेषः। सुप्तानां व्यासक्तमनसाञ्च घनगर्जितादिना श्रोत्रसन्निकर्षाभावादिना त्वक्सन्निकर्षाभावेन च ज्ञानोत्पत्तेरिन्द्रियार्थसन्निकर्षस्य प्राधान्यम्। इति वृत्तिसम्मतम् अधिकमूत्वम् ॥ २४ ॥ ख

युक्त्यन्तरमाह।—ज्ञानविशेषाणां तैरिन्द्रियार्थसन्निकर्षैरपदेशो विशेषणं व्याहृतिः आत्ममनोयोगादिकं हि न व्यावर्त्तकं तज्जन्यत्वस्य ज्ञानान्तरसाधारणत्वात् एव मिन्द्रियमनोयोगजत्वमपि न लक्षणं मानसेऽव्याप्तेः, परे तु तैरिन्द्रियैर्ज्ञानविशेषाणां प्रत्यक्षविशेषाणामपदेशो भाषणं यतस्तेनेन्द्रियार्थसन्निकर्षस्य प्राधान्यं भाषन्ते हि चाक्षुषं प्रत्यक्षं रासनं प्रत्यक्षमित्याहुः। नव्यास्तु प्रत्यक्षविशेषाणामिन्द्रियैरपदेशो

व्याहतत्वादहेतुः ॥ २६ ॥

सोऽयम् यदि तावत् क्वचिदात्ममनसोः सन्निकर्षस्य ज्ञानकारणत्वं नेष्यते तदा युगपज्ज्ञानानुत्पत्तिर्मनसो: लिङ्गमिति व्याहन्येत तदानीं मनसः सन्निकर्षमिन्द्रियार्थसन्निकर्षोऽपेक्षते, मनःसंयोगानपेक्षायाश्च युगपज्ज्ञानोत्पत्तिप्रसङ्गः। अथ मा भूदव्याघात इति सर्वविज्ञानानामात्ममनसोः सन्निकर्षः कारणमिष्यते तदवस्थमेवेदं भवति ज्ञानकारणत्वादात्ममनसोः सन्निकर्षस्य ग्रहणं कार्य्यमिति ॥ २६ ॥

नार्थविशेषप्रावल्यात् ॥ २७ ॥

नास्ति व्याघातः न ह्यात्ममनःसन्निकर्षस्य ज्ञानकारणत्वं व्यभिचरति, इन्द्रियार्थसन्निकर्षस्य प्राधान्यमुपादीयते अर्थविशेषप्रावल्याद्धि सुप्तव्यासक्तमनसां ज्ञानोत्पत्तिरेकदा भवति, अर्थविशेषः कश्चिदेवेन्द्रियार्थः तस्य प्रावल्यं तीव्रतापटुते तच्चार्थविशेषप्रावल्यमिन्द्रियार्थसन्निकर्षविषयं नात्ममनसोः सन्निकर्षविषयं, तस्मादिन्द्रियार्थसन्निकर्षः प्रधानमिति, असति प्रणिधाने सङ्कल्पे चासति सुप्तव्यासक्तमनसां यदिन्द्रियार्थ-

---

यसोऽतस्त्वाक्षुषादिघटितविशेषलक्षणान्यपि सम्भवन्ति चाक्षुषत्वमनुभित्यहस्तित्वादिमत्त्वादीनि लक्षणान्तराण्यपि द्रष्टव्यानीत्याशयं वर्णयन्ति ॥ २५ ॥

इन्द्रियार्थसन्निकर्षो न हेतुरन्वयव्यभिचारादित्याशयेन शङ्कते। गीतश्रवणादिकाले चक्षुर्घटसंयोगादौ विद्यमानेऽपि चाक्षुषादेर्व्याहतत्वे इन्द्रियार्थसंयोगो न हेतुरित्यर्थः ॥ २६ ॥

समाधत्ते। अर्थविशेषस्य गीतादेः प्राबल्यात् बुभुत्सितत्वाद्गीतादिश्रवणं तथा च गीतश्रवणादेश्चाक्षुषादिप्रतिबन्धकत्वात् प्रतिबन्धकाभावस्य च कार्य्याङ्गत्वात्तत्सहकारिण चेन्द्रियार्थसन्निकर्षस्य हेतुत्वमित्यतः पूर्वपक्षो न युक्त इति। परे तु इन्द्रियार्थसन्निकर्षस्य हेतुत्वमित्यत्र इन्द्रियमनोयोगादेरहेतुत्वमिति भाग्यः शङ्कते

सन्निकर्षादुत्पद्यते ज्ञानं, तत्र मनःसंयोगोऽपि कारणमिति मनसि क्रिया कारणं वाच्यमिति यथैव ज्ञातुः खल्वयमिच्छाजनितः प्रयत्नो मनसः प्रेरक आत्मगुण एवमात्मनि गुणान्तरं सर्वस्य साधकं प्रवृत्तिदोषजनितमस्ति येन प्रेरितं मन इन्द्रियेण सम्बध्यते तेन ह्यप्रेर्यमाणे मनसि संयोगाभावाज्ज्ञानानुत्पत्तौ सर्वार्थतास्य निवर्त्तते, एषितव्यश्चास्य गुणान्तरस्य द्रव्यगुणकर्मकारणकत्वम् अन्यथा हि चतुर्विधानामणूनां भूतसूक्ष्माणां मनसाञ्च ततोऽन्यस्य क्रियाहेतोरसम्भवात् शरीरेन्द्रियविषयाणामनुत्पत्तिप्रसङ्गः ॥ २७ ॥

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ २८ ॥

यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानं वृक्ष इत्येतत् किल प्रत्यक्षं तत् खल्वनुमानमेव, कस्मात् ? एकदेशग्रहणात्, वृक्षस्योपलब्धेरर्वाग्भागमयं गृहीत्वा वृक्षमुपलभते न चैकदेशो वृक्षः। तत्र यथा धूमं गृहीत्वा वह्निमनुमिनोति तादृगेव तद्भवति। किं पुनर्गृह्यमाणादेकदेशादर्थान्तरमनुमेयं मन्यसे अवयवसमूहपक्षे अवयवान्तराणि, द्रव्योत्पत्तिपक्षे तानि चावयवी चेति अवयवसमूहपक्षे तावत् एकदेशग्रहणाद्वृक्षबुद्धेरभावः नागृह्यमाणमेकदेशान्तरं वृक्षो गृह्यमाणैकदेशवदिति, अथैकदेशग्रहणादेकदेशान्तरानुमाने समुदाय-

---

व्याहतत्वादहेतुः, इन्द्रियार्थसन्निकर्षस्यैव हेतुत्वमित्यत्र यो हेतुरुक्तः स न युक्तः कुतः ? व्याहतत्वात्, इन्द्रियमनोयोगादहेतुतायां अभ्युपगम्यमानायां व्याघातापत्तेः, अयं खण्ड्यति, नार्थविशेषप्रावल्यात् नास्ति व्याघातः कुतः ? अर्थविशेषस्य इन्द्रियार्थसन्निकर्षस्य प्रावल्यात् तथा चेन्द्रियार्थसन्निकर्षप्राधान्यार्थं हि पूर्वसूत्रं नञ्तिरनिषेधार्थमिति ॥ २७ ॥

ननु सति प्रत्यक्षस्य प्रमाणान्तरत्वे तल्लक्षणपरीक्षा सङ्गच्छते तदेव तु नास्तीत्या-

प्रतिसन्धानात् तत्र हृच्चबुद्धिः न तर्हि हृच्चबुद्धिरनुमानमेवं सति भवितुमर्हतीति । द्रव्यान्तरोत्पत्तिपक्षे नावयव्यनुमेयः । अस्यैकदेशसम्बन्धस्याग्रहणात् एकदेशसम्बन्धस्य ग्रहणे चाविशेषादनुमेयत्वाभावः । तस्माद् हृच्चबुद्धिरनुमानं न भवति । एकदेशग्रहणमाश्रित्य प्रत्यक्षस्यानुमानत्वमुपपाद्यते तच्च ॥ २८ ॥

न प्रत्यक्षेण यावत्तावदप्युपलम्भात् ॥ २९ ॥

न प्रत्यक्षमनुमानं कस्मात् प्रत्यक्षेणैवोपलम्भात् यत्तदेकदेशग्रहणमाश्रीयते प्रत्यक्षेणासावुपलभ्यः न चोपलम्भो निर्विषयोऽस्ति यावच्चार्थजातं तस्य विषयस्तावदभ्यनुज्ञायमानं प्रत्यक्षव्यवस्थापकं भवति । किं पुनस्ततोऽन्यदर्थजातमवयवी समुदायो वा न चैकदेशग्रहणमनुमानं भावयितुं शक्यं हेत्वभावादिति । अन्यथापि च प्रत्यक्षस्य नानुमानत्वप्रसङ्गस्तत्पूर्वकत्वात्, प्रत्यक्षपूर्वकमनुमानं, सम्बन्धावग्निधूमौ प्रत्यक्षतो दृष्टवतो धूमप्रत्यक्षदर्शनादग्नावनुमानं भवति यच्च सम्बन्धयोर्लिङ्गलिङ्गिनोः प्रत्यक्षं यच्च लिङ्गमात्रप्रत्यक्षग्रहणं नैतदन्तरेणानुमानस्य प्रवृत्तिरस्ति न चैतदनुमानमिन्द्रियार्थसन्निकर्षजत्वात् न चानुमेयस्येन्द्रियेण सन्निकर्षादनुमानं भवति सोऽयं प्रत्यक्षानुमानयोर्लक्षणभेदो महानाश्रयितव्य इति ॥ २९ ॥

ग्रहते । प्रत्यक्षेणाभिमतं घटादिज्ञानमनुमानमनुमितिरेकदेशस्य पुरोभागस्य ग्रहणानन्तरमुपलब्धेः तथाचैकदेशग्रहणात्मकलिङ्गज्ञानजन्यत्वाद् हृच्चादिज्ञानम् अनुमितिरित्यर्थः ॥ २८ ॥

समाधत्ते ।—प्रत्यक्षमनुमानमिति न प्रत्यक्षत्वावच्छेदेनानुमितित्वं मेत्यर्थः । यावत्तावदुपलम्भात् यावत्तावतोऽपि यस्य कस्यचिद् भावस्य प्रत्यक्षेणेन्द्रियेणोपलम्भात्

न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ३० ॥

न चैकदेशोपलब्धिमात्रं किं तर्ह्येकदेशोपलब्धिस्तत्सहचरितावयव्युपलब्धिश्च, कस्मात् अवयविसद्भावात् अस्ति ह्यवयवेकदेशव्यतिरिक्तोऽवयवी तस्यावयवस्थानस्योपलब्धिकारणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्नेति। अकृत्स्नग्रहणादिति चेत् न कारणतोऽन्यस्यैकदेशस्याभावात् न चावयवाः कृत्स्नाः गृह्यन्ते अवयवैरेवावयवान्तरव्यवधानात् नावयवी कृत्स्नो गृह्यत इति नायं गृह्यमाणेष्ववयवेषु परिसमाप्त इति, सेयमेकदेशोपलब्धिरनिवृत्तेति कृत्स्नमिति वै खल्वशेषतायां सत्यां भवति, अकृत्स्नमिति शेषे सति, तच्चेतदवयवेषु बहुष्वस्ति। अव्यवधाने ग्रहणात् व्यवधाने चाग्रहणादिति। अङ्ग तु भवान् पृष्टो व्याचष्टां गृह्यमाणस्यावयविनः किमगृहीतं मन्यसे येनैकदेशोपलब्धिः स्यादिति न ह्यस्य कारणेभ्योऽन्ये एकदेशा भवन्तीति तच्चावयवबद्धत्तं नोपपद्यत इति इदं तस्य वृत्तम्, येषामिन्द्रियार्थसन्निकर्षाद् ग्रहणमवयवानां व्यवधानादग्रहणं तैः सह गृह्यते येषामवयवानां व्यवधानादग्रहणं तैः सह न गृह्यते न चैतत्कृतोऽस्ति भेद इति समुदायोऽप्यशेषता वा समुदायो वृत्तः स्यात् तत्प्राप्तिर्वा उभयथाग्रहणभावः। मूलस्कन्धशाखापलाशादीनाम् अशेषता वा समुदायो वृत्त इति स्यात् प्राप्तिर्वा समुदायिनामिति उभयथा समुदायभूतस्य वृत्तस्य ग्रहणं नोपपद्यत इति अवयवैः

उपलब्धस्य तथाप्यनुपगमात् यदनुपलक्षणं शब्दगन्धादिप्रत्यक्षस्यावारणात् न प्रत्यक्षनानत्वनिमित्तं इत्यपि बोध्यम् ॥ २९ ॥

यदपि भाष्यादिभाणस्यानुमितित्वमिति तदपि दूषयति :—न च भवेत्यर्थः न

तावदवयवान्तरस्य व्यवधानादशेषग्रहणं नोपपद्यते प्राप्ति-ग्रहणमपि नोपपद्यते प्राप्तिमतामग्रहणात् सेयमेकदेशग्रहस्य-सहचरिता द्रव्यबुद्धिर्द्रव्यान्तरोत्पत्तौ कल्पते न समुदायमात्रे इति ॥ ३० ॥

साध्यत्वादवयविनि सन्देहः ॥ ३१ ॥

यदुक्तमवयविसद्भावात् प्राप्तिमतामग्रहेतुः साध्यत्वात् साध्यत्वावदेतत्कारणेभ्यो द्रव्यान्तरमुत्पद्यत इति अनुपपादितमेतत्, एवञ्च सति विप्रतिपत्तिमात्रञ्भवति विप्रतिपत्तेश्चावयविनि संशय इति ॥ ३१ ॥

सर्वाग्रहणमवयव्यसिद्धेः ॥ ३२ ॥

चैकदेशस्यैवोपलब्धिरित्यपि युक्तम् अवयविसद्भावात् यतो हि अवयव्यस्ति अतस्तदवयवप्रत्यक्षकालेऽवयविनोऽपि प्रत्यक्षं न व्याहतं तेनापि सह चक्षुःसंयोगादिसत्त्वादिति भावः ॥ ३० ॥

समाप्तं प्रत्यक्षपरीक्षाप्रकरणम् ॥ १४ ॥

अवयविसद्भावादिति हेतुसाधनायोपोद्घातसङ्गत्यावयविप्रकरणमारभते।—अत्र चावयविनि सन्देहः साध्यत्वादिति यथा श्रुतार्थो न सङ्गच्छते वह्न्यादौ व्यभिचारात्तस्मादयमर्थः अवयविनि साध्यत्वादसिद्धत्वात् सन्देहोऽवयविसद्भावादिलक्षणहेतोस्तथाच सन्दिग्धासिद्धे हेतुरिति भावः। तत्र च द्रव्यत्वं स्पर्शवत्त्वं वा चक्षुष्यत्वं न वेत्यादयो विप्रतिपत्तयः, तत्र च सक्रियत्वाक्रियत्वरूपत्वारूपत्वाद्यतत्वानाद्यतत्वादिलक्षणविरुद्धधर्माध्यासादेकोऽवयवी न सम्भवति, तथाहि शाखावच्छेदेन कप्यो मूलावच्छेदेन तदभावोऽप्युपलभ्यते न चैकस्मिन्नेव द्रव्ये एकदैव विरुद्धधर्मसमावेशः सम्भवति तस्मादवयवा एव तथाभूता न त्वन्योऽवयवी मानाभावात्, एवं महारजतरूपैकदेशस्यांशुकस्य दशावच्छेदेनारक्तत्वोपलम्भादेवमाद्यतपृष्ठादेरनाद्यतत्वोपलम्भादवसेयम् इति बौद्धानां पूर्वपक्षः, अत्र च बौद्धानां पूर्वपक्षसूत्राणि वार्त्तिककृता लिखितानि च विस्तरभयान्न लिख्यन्ते ॥ ३१ ॥

यद्यवयवी नास्ति सर्वस्य ग्रहणं नोपपद्यते किं तत्सर्वं द्रव्यगुणकर्मसामान्यविशेषसमवायाः। कथं ज्ञात्वा परमाणुसमवस्थानं तावद्दर्शनविषयो भवतीत्यतीन्द्रियत्वादणूनां द्रव्यान्तरत्वावयविभूतं दर्शनविषयस्थाश्चेमे द्रव्यादयो गृह्यन्ते तेन निरधिष्ठाना न गृह्येरन्, गृह्यन्ते तु कुम्भोऽयं श्याम एको महान् संयुक्तः स्यन्दते अस्ति सन्नयश्चेति, सन्ति चेमे गुणादयो धर्मा इति तेन सर्वस्य ग्रहणात् पश्यामोऽस्ति द्रव्यान्तरभूतोऽवयवीति ॥ ३२ ॥

धारणाकर्षणोपपत्तेश्च ॥ ३३ ॥

अवयव्यर्थान्तरभूत इति संग्रहकारिते वै धारणाकर्षणे संग्रहो नाम संयोगसहचरितं गुणान्तरम्। स्नेहद्रव्यत्वकारितमपां संयोगादामे कुम्भे अग्निसङ्गात् पक्वे यदि त्ववयविकारिते अभविष्यतां पांशुराशिप्रभृतिष्वप्यश्नास्येतां द्रव्यान्तरानुत्पत्तौ च तृणोपलकाष्ठादिषु जन्तुसंगृह्णातीष्वपि नाभविष्यतामिति। अथावयविनं प्रत्याचक्षाणको मा भूत् प्रत्यक्षलोप इत्यणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति। एकमिदं द्रव्यमित्येकबुद्धेर्विषयं पर्यनुयोज्य किमेकबुद्धिरभिन्नार्थविषया, आहोस्वित् नानार्थविषयेति। अभिन्नार्थविषयेति चेत् अर्थान्तरानुज्ञानादवयविसिद्धिः, नानार्थविषयेति चेत् भिन्नेष्वेकदर्शनानुपपत्तिः। अनेकास्वप्येक इति व्याहता बुद्धिर्न दृश्यत इति ॥ ३३ ॥

सिद्धान्तसूत्रम्। अवयविनोऽसिद्धौ तद्गुणकर्मादीनां सर्वेषामग्रहणं तथा च सकम्पाकम्पत्वरक्तारक्तत्वादिकमपि न सुग्रहं परमाणुगतत्वात् प्रत्यक्षे महत्त्वस्य हेतुत्वात् ॥ ३२ ॥

हेत्वन्तरमाह।—अवयवेभ्योऽवयव्यतिरिच्यते तथा सति धारणाकर्षणयोरुप-

सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ ३४ ॥

यथा सेनाङ्गेषु वनाङ्गेषु च दूरादगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिः, एवं परमाणुषु सञ्चितेष्वगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिरिति, यथाऽगृह्यमाणपृथक्त्वानां खलु सेनावनाङ्गानामारात् कारणान्तरतः पृथक्त्वस्याग्रहणं, यथाऽगृह्यमाणजातीनां पलाश इति वा खदिर इति वा नाराज्जातिग्रहणं भवति, गृह्यमाणप्रस्यन्दानाच्चारात् स्यन्दग्रहणं. गृह्यमाणे चार्थजाते पृथक्त्वस्याग्रहणादेकमिति भाक्तः प्रत्ययो भवति, न त्वणूनां गृह्यमाणपृथक्त्वानां कारणतः पृथक्त्वस्याग्रहणात् भाक्त एकप्रत्ययोऽतीन्द्रियत्वादणूनामिति । इदमेव च परीक्ष्यते किमेकप्रत्ययोऽणुसञ्चयविषय आहोस्विन्नेति । अणुसञ्चय एव सेनावनाङ्गानि न च परीक्ष्यमाणमुदाहरणमिति युक्तं, साध्यत्वादिति, दृष्टमिति चेन्न तद्विषयस्य परीक्षोपपत्तेः । यदपि मन्यते दृष्टमिदं सेनावनाङ्गानां पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणं न च दृष्टं शक्यं प्रत्याख्यातुमिति, तथा नैवं तद्विषयस्य परीक्षोपपत्तेः । दर्शनविषय एवायं परीक्ष्यते योऽयमेकमिति प्रत्ययो दृश्यते स परीक्ष्यते किं द्रव्यान्तरविषयो वाऽथाणुसञ्चयविषय इत्यत्र दर्शनमन्यतरस्य साधकं न भवति नानाभावे चाणूनां पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणम् । अतस्मिंस्तदिति प्रत्ययो यथा स्थाणौ

पत्तेरन्यथा परमाणुपुञ्जत्वे चैकदेशधारणेन सकलधारणमेकदेशाकर्षणेन सकलाकर्षणञ्च न स्यादित्यर्थः ॥ ३२ ॥

इदमवद्यं नौकाघर्षणेन नौकास्थाकर्षणवत् कुण्डधारणेन कुण्डस्थदधिधारण-

पुरुष इति ततः किमतस्मिंस्तदिति प्रत्ययस्य प्रधानापेक्षितत्वात् प्रधानसिद्धिः, स्थाणौ पुरुष इति प्रत्ययस्य किं प्रधानम्, योऽसौ पुरुषे पुरुषप्रत्ययस्तस्मिन् सति पुरुषसामान्यग्रहणात् स्थाणौ पुरुषोऽयमिति, एवं नानाभूतेष्वेकमिति प्रामाण्यग्रहणात् प्रधाने सति भवितुमर्हति। प्रधानञ्च सर्वस्याग्रहणादिति नोपपद्यते, तस्मादभिन्न एवायमभेदप्रत्यय एकमिति, इन्द्रियान्तरविषयेष्वभेदप्रत्ययः प्रधानमिति चेत् न विशेषहेत्वभावात् दृष्टान्ताव्यवस्था, श्रोत्रादिविषयेषु शब्दादिष्वभिन्नेष्वेकप्रत्ययः प्रधानमनेकस्मिन्नेकप्रत्ययस्येति। एवञ्च सति दृष्टान्तोपादानं न व्यवतिष्ठते, विशेषहेत्वभावात्, अणुषु सच्चितेषु एकप्रत्ययः किमतस्मिंस्तत्प्रत्ययः स्थाणौ पुरुषप्रत्ययवत्, अथार्थस्य तथाभावात् तस्मिंस्तदिति प्रत्ययो यथा शब्दस्यैकत्वादेकः शब्द इति। विशेषहेतुपरिग्रहणमन्तरेण दृष्टान्तौ संशयमापादयत इति, कुम्भवत् सञ्चयमात्रं गन्धादयोऽपीत्यनुदाहरणं गन्धादय इति, एवं परिमाणसंयोगशब्दजातिविशेषप्रत्यया अप्यनुयोज्याव्यास्तेषु चैवं प्रसङ्ग इति। एकत्वबुद्धिस्तस्मिंस्तदिति प्रत्यय इति विशेषहेतुर्महदिति प्रत्ययेन सामानाधिकरण्यात् एकमिदं महच्चेति एकविषयौ प्रत्ययौ समानाधिकरणौ भवतः तेन विज्ञायते यन्महत् तदेकमिति। अणुसमूहातिशयग्रहणं महत्प्रत्यय इति चेत् सोऽयममहत्स्वणुषु महत्प्रत्ययोऽतस्मिंस्तदिति प्रत्ययो भवतीति, किञ्चातः अतस्मिंस्तदितिप्रत्ययस्य प्रधानापेक्षितत्वात् प्रधानसिद्धिरिति भवितव्यं महत्येव महत्प्रत्ययेनेति। अणुशब्दो महानिति

वशोपपत्तेर्विजातीयसंयोगवत्तैवावयवावयविभावाभावेऽप्युपपत्तेरतः पूर्वोक्तां युक्तिमेव साधीयसीं मन्यमानस्तच परोक्तं समाधानमाशङ्क्य दूषयति। अतिदूर-

च व्यवसायात् प्रधानसिद्धिरिति चेत् न मन्दतीव्रताग्रहण-मियत्तानवधारणात् यथा द्रव्येऽणुः शब्दोऽल्पो मन्द इत्येतस्य ग्रहणं, महान् शब्दः पटुतीव्र इत्येतस्य ग्रहणात्। कस्मात् इयत्तानवधारणात् न ह्ययं महान् शब्द इति व्यवस्थियानय-मित्यवधारयति। यथा बदरामलकविल्वादीनि संयुक्ते इमे इति च द्वित्वसमानाश्रयं प्राप्तिग्रहणं, द्वौ समुदायावाश्रयः संयोगस्येति चेत् कोऽयं समुदायः। प्राप्तिरनेकस्याऽनेका वा प्राप्तिरेकस्य समुदाय इति चेत् प्राप्तेरग्रहणं प्राप्त्याश्रितायाः संयुक्ते इमे वस्तुनी इति नात्र द्वे प्राप्ती संयुक्ते गृह्येते, अनेक-समूहः समुदाय इति चेन्न द्वित्वेन समानाधिकरणस्य ग्रहणात् द्वाविमौ संयुक्तावर्थाविति ग्रहणे सति नानेकसमुदायाश्रयः संयोगो गृह्यते न च द्वयोरवयोर्ग्रहणमस्ति तस्माद्यहतौ द्वित्वा-श्रयभूते द्रव्यसंयोगस्य स्थानमिति प्रत्यासत्तिः प्रतीच्छा तावता संयोगो नार्थान्तरमिति चेत् नार्थान्तरहेतुत्वात् संयोगस्य शब्दरूपादिस्यन्दानां हेतुः संयोगो नच द्रव्ययोर्गुणान्तरोपजनन-मन्तरेण शब्दे रूपादिषु स्पर्शे च कारणत्वं गृह्यते तस्माद् गुणा-न्तरं प्रत्ययविषयश्चार्थान्तरं तत्प्रतिषेधो वा कुण्डलो गुरुरकुण्डल-श्चाच इति संयोगबुद्धेश्च यद्यर्थान्तरं न विषयः अर्थान्तरप्रति-षेधस्तर्हि विषयस्तत्र प्रतिषिध्यमानवचनं संयुक्ते द्रव्ये इति यद-र्थान्तरमन्यच्च दृष्टमिह प्रतिषिध्यते तद्वक्तव्यमिति द्वयोर्महतो-राश्रितस्य ग्रहणान्नाश्रय इति जातिविशेषस्य प्रत्ययानुवृत्ति-लिङ्गस्याप्रत्याख्यानं प्रत्याख्याने वा प्रत्ययव्यवस्थानुपपत्तिः।

स्त्रीकमनुष्यैकत्वादेः अप्रत्यक्षत्वेऽपि सेनावनादिप्रत्यक्षवत् एकपरमाणोः अप्रत्यक्षत्वेऽपि तत्समूहरूपघटादेः प्रत्यक्षं स्यादिति चेन्न तदपि, अणूनामतीन्द्रियत्वात् प्रत्यक्षे

व्यधिकरणस्थानभिव्यक्तेरधिकरणवचनम्, अणुसमवस्थानं विषय इति चेत्, प्राप्ताप्राप्तसामर्थ्यवचनम्। किमप्राप्ते अणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्यते, अथ प्राप्ते इति अप्राप्ते ग्रहणमिति चेत् व्यवहितस्याणुसमानस्थानस्याप्युपलब्धिप्रसङ्गः, अव्यवहितेऽणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्येत, प्राप्ते ग्रहणमिति चेत्, मध्यपरभागयोरप्राप्तावनभिव्यक्तिः, यावत् प्राप्तं भवति तावत्यभिव्यक्तिरिति चेत् तावतोऽधिकरणत्वमणुसमवस्थानस्य यावति प्राप्ते जातिविशेषो गृह्यते तावदस्याधिकरणमिति प्राप्तं भवति, तत्रैकसमुदाये प्रतीयमानेऽर्थभेदः। एवञ्च सति योऽयमणुसमुदायो ह्रस्व इति प्रतीयते तत्र ह्रस्वबहुत्वं प्रतीयेत। यत्र यत्र ह्यणुसमुदायस्य भागे ह्रस्वत्वं गृह्यते स स ह्रस्व इति। तस्मात् समुदिताणुसमवस्थानस्यार्थान्तरस्य जातिविशेषस्याभिव्यक्तिर्विषयत्वादवयव्यर्थान्तरभूत इति॥ ३४॥

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम्॥ ३५॥

परीक्षितं प्रत्यक्षम्, अनुमानमिदानीं परीक्ष्यते—अप्रमाणमिति। एकदाप्यर्थस्य न प्रतिपादकमिति। रोधादपि नदी

महत्त्वस्य हेतुत्वात् सत्त्वात् सेनावनादि प्रत्यक्षं युज्यते न त्वणूनां महत्त्वाभावादिति भावः॥ ३४॥

समाप्तमवयविपरीक्षाप्रकरणम्॥ १५॥

अवसरेण क्रमप्राप्तमनुमानं परीक्षितुं पूर्वपक्षयति।—अनुमानस्य त्रैविध्यं पूर्वसूत्रे तव त्रिविधस्याप्रामाण्ये साधितेऽनुमानमप्रमाणमर्थात् सिद्धमित्याशयेनेदम्, अनुमानम् अनुमानत्वेनाभिमतं न प्रमाणं प्रमितिकरणं व्यभिचारिहेतुकत्वात् तव

पूर्णा गच्छते तदा चोपरिष्टाद्दृष्टो देव इति मिथ्यानुमानम्। नीड़ोपघातादपि पिपीलिकाण्डसञ्चारो भवति तदा च भविष्यति वृष्टिरिति मिथ्यानुमानमिति। पुरुषोऽपि मयूरवासितमनुकरोति तदापि शब्दसादृश्यान्मिथ्यानुमानं भवति ॥ ३५ ॥

नैकदेशत्वाससादृश्येभ्योऽर्थान्तरभावात् ॥ ३६ ॥

नायमनुमानव्यभिचारः अननुमाने तु खल्वयमनुमानाभिमानः, कथं, नाविशिष्टो लिङ्गं भवितुमर्हति। पूर्वोदकविशिष्टं खलु वर्षादकं शीघ्रतरत्वं स्रोतसो बहुतरफेनफलपर्णकाष्ठादिबहुलत्वोपलभमानः पूर्णत्वेन नद्या उपरि वृष्टो देव इत्यनुमिनोति नोदकवृद्धिमात्रेण। पिपीलिकाप्रायस्याण्डसञ्चारे भविष्यति वृष्टिरित्यनुमीयते न कासाञ्चिदिति। नेदं मयूरवासितं तत्सदृशोऽयं शब्द इति विशेषापरिज्ञानान्मिथ्यानुमानमिति यस्तु सदृशात् विशिष्टाच्छब्दाद्विशिष्टं मयूरवासितं गृह्णाति तस्य विशिष्टोऽर्थो गृह्यमाणो लिङ्गं यथा

विविधे व्यभिचारं दर्शयति रोधेत्यादिना नदीवृद्ध्या पिपीलिकाण्डसञ्चारेण मयूरकृतेन च वृष्ट्यनुमानं विविधमुदाहरणं न सम्भवति नदीरोधाधीननदीवृद्ध्या आश्रयोपघाताधीनपिपीलिकाण्डसञ्चारेण मनुष्यकर्तृकमयूरकृतसदृशकृतेन व्यभिचारात् पिपीलिकाण्डसञ्चारस्य वृष्टिहेतुत्वाभिप्रायेणेदम्, अथवा लक्षणसूत्रे पूर्ववत् पूर्वकालीनसाध्यानुमापकं शेषवदुत्तरकालीनसाध्यानुमापकं, सामान्यतो दृष्टं विद्यमानसाध्यस्याप्यनुमापकमित्यर्थ इत्याशयः, एतेन त्रैकालिकसाध्यानुमापकत्वं न सम्भवति, परे तु पिपीलिकाण्डसञ्चारेणात्यल्पीभानुमानं ततश्च सद्भूतचीभानुमानं तस्य च वृष्टिहेतुत्वात्तेन वृष्ट्यनुमानमिति वदन्ति, एवमन्यत्रापि व्यभिचारशङ्कासम्भवादव्यभिचारनिश्चयस्यानुमितिहेतोरेव दुर्लभत्वात्तत् प्रामाण्यं न सम्भवतीत्याशयः ॥ ३५ ॥

समाधत्ते।—अनुमानाप्रामाण्यं न युक्तम् एकदेशरोधजनदीवृद्धेस्सासजपिपीलिकाण्डसञ्चाराज्जयूरकृतसदृशकृताच्च लिङ्गीभूतानां नदीवृद्ध्यादीनां भिन्नत्वाच्च

सर्पादीनामिति, सोऽयमनुमातुरपराधो नानुमानस्य योऽर्थ-विशेषेणानुमेयमर्थमविशिष्टार्थदर्शनेन बुभुत्सत इति। त्रिकाल-विषयमनुमानं त्रैकाल्यग्रहणादित्युक्तमत्र च ॥ ३६ ॥

वर्त्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥ ३७ ॥

वृन्तात् प्रच्युतस्य फलस्य भूमौ प्रत्यासीदतो यदूर्ध्वं स पतितोऽध्वा तत्संयुक्तः कालः पतितकालः, योऽधस्तात् स पतितव्योऽध्वा तत्संयुक्तः कालः पतितव्यकालः नेदानीं तृतीयोऽध्वा वर्त्तते यत्र पततीति वर्त्तमानः कालो गृह्येत, तस्माद्वर्त्तमानः कालो न विद्यते इति ॥ ३७ ॥

तयोरप्यभावो वर्त्तमानाभावे तदपेक्षत्वात्॥३८॥

नाध्वव्यङ्ग्यः कालः, किं तर्हि क्रियाव्यङ्ग्यः पततीति यदा पतनक्रिया व्यपरता भवति स कालः पतितकालः, यदोत्पत्स्यते स पतितव्यकालः। यदा द्रव्ये वर्त्तमाने क्रिया गृह्यते स वर्त्तमानः कालः। यदि चायं द्रव्ये वर्त्तमानं पतनं न गृह्णाति

दोषः न च सर्वत्र व्यभिचारशङ्का सत्यां तस्यां तर्केण तदपनयनान्न दोष इत्याशयः ॥ ३६ ॥

समाप्तमनुमानपरीक्षाप्रकरणम् ॥ १६ ॥

अनुमानस्य त्रिकालविषयत्वमभिमतं तन्न युक्तं वर्त्तमानाभावेन तदधीनग्राह्यतीतानागतयोरभावेन कालत्रयात्मकविषयाभावादित्याशयेन वर्त्तमानपरीक्षाप्रकरणमारभमाणो वर्त्तमानमाक्षिपति। वर्त्तमानाभावः अतीतानागतभिन्ने कालत्वाभावः व्युत्पादयति पतत इति, पततः फलादेर्वृन्तावधिकः कश्चन देशः पतिताध्वा भूम्यवधिकः कश्चन पतितव्याध्वा न तु वर्त्तमानस्य प्रसङ्गोऽपीति भावः ॥ ३७ ॥

समाधत्ते।—वर्त्तमानाभावे तयोरतीतानागतयोरप्यभावः स्यात् तयोस्तद-

कस्योपरममुत्पत्स्यमानतां वा प्रतिपद्यते पतितः काल इति भूता क्रिया, पतितश्चः काल इति चोत्पत्स्यमाना क्रिया, उभयोः कालयोः क्रियाहीनं द्रव्यमधःपततीति क्रियासम्बन्धं सोऽयं क्रियाद्रव्ययोः सम्बन्धं गच्छतीति वर्त्तमानः कालस्तदाश्रयौ चेतरौ कालौ तदभावे न स्यातामिति ॥३८॥

नातीतानागतयोरितरेतरापेक्षा सिद्धिः॥३९॥

अथापि यद्यतीतानागतावितरेतरापेक्षौ सिध्येताम्, प्रतिपद्येमहि वर्त्तमानविलोपम्। नातीतापेक्षाऽनागतसिद्धिः। नाप्यनागतापेक्षा अतीतसिद्धिः, कया युक्त्या केन कल्पेनातीताः कथमतीतानागतयोरिति तन्नोपपद्यते विशेषहेत्वभावात्। दृष्टान्तवत् प्रतिदृष्टान्तोऽपि प्रसज्यते। यथा रूपस्पर्शौ गन्धरसौ नेतरेतरापेक्षौ सिध्येते एवमतीतानागताविति नेतरेतरापेक्षा कस्यचित् सिद्धिरिति। यस्मादेकाभावेऽन्यतराभावादुभयाभावः। यद्येकस्यान्यतरापेक्षासिद्धिरेकस्येदानीं किमपेक्षा यद्यन्यतरस्येकापेक्षा सिद्धिरेकस्येदनीं किमपेक्षा एवमेकस्याभावेऽन्यतरन्न सिध्यतीत्युभयाभावः प्रसज्यते। अर्थसद्भावश्चयुक्तश्चायं वर्त्तमानः कालः विद्यते द्रव्यं विद्यते गुणः विद्यते कर्मेति। यस्य चायं नास्ति तस्य ॥ ३९ ॥

वर्त्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥४०॥

प्रत्यक्षमिन्द्रियार्थसन्निकर्षजं न चाविद्यमानमसदिन्द्रियैरु

पेक्षत्वात् वर्त्तमानध्वंसप्रतियोगित्वं अतीतत्वं वर्त्तमानप्रागभावप्रतियोगित्वं अनागतत्वमिति भावः॥ ३८ ॥

ननु तयोः परस्परापेक्षयैव सिद्धेर्न वर्त्तमानापेक्षेत्यत आह। अन्योन्याश्रयादिति भावः॥ ३९ ॥

सन्निकृष्यते न चायं विद्यमानं सत् किञ्चिदनुजानाति प्रत्यक्षनिमित्तं प्रत्यक्षविषयः प्रत्यक्षज्ञानं सर्वमेवोपपद्यते प्रत्यक्षानुपपत्तौ च तत्पूर्वकत्वात् अनुमानागमयोरनुपपत्तिः। सर्वप्रमाणविलोपे सर्वग्रहणं न भवतीति। उभयथा च वर्त्तमानः कालो गृह्यते क्वचिदर्थसद्भावव्यङ्ग्यः, यथा—द्रव्ये द्रव्यमिति, क्वचित् क्रियासन्तानव्यङ्ग्यः, यथा—पचति छिनत्तीति, नानाविधा चैकार्था क्रिया क्रियासन्तानः क्रियाभ्यासश्च नानाविधा चैकार्था क्रिया, पचतीति स्थाल्यधिश्रयणमुदकसेचनं तण्डुलावपनमेधोऽपसर्पणमग्न्यभिज्वालनं दर्दीघट्टनं मण्डस्रावणमधोऽवतारणमिति। छिनत्तीति क्रियाभ्यास उद्यम्योद्यम्य परशुं दारुणि निपातयन् छिनत्तीत्युच्यते। यच्चेदं पच्यमानं च्छिद्यमानञ्च तत् क्रियमाणं तस्मिन् क्रियमाणे॥ ४०॥

कृततां कर्त्तव्यतोपपत्तेस्तूभयथाग्रहणम्॥४१॥

क्रियासन्तानोऽनारब्धचिकीर्षितोऽनागतः कालः पक्ष्यतीति। प्रयोजनावसानः क्रियासन्तानोपरमोऽतीतः कालोऽपाक्षीदिति। आरब्धक्रियासन्तानो वर्त्तमानः कालः पचतीति। तत्र या उपरता सा कृतता, या चिकीर्षिता सा कर्त्तव्यता, या विद्यमाना सा क्रियमाणा। तदेवं क्रियासन्तानस्थस्यैकाल्यसमाहारः पचति पक्ष्यत इति वर्त्तमान-

---

तयोरप्यभावे का चतिरती युक्त्यन्तरमाह।—वर्त्तमानाभावे प्रत्यक्षं नोपपद्यते प्रत्यक्षस्य वर्त्तमानविषयत्वात् अत एवाह "सन्निकृष्टं वर्त्तमानञ्च गृह्यते चक्षुरादिना" इति प्रत्यक्षाभावे च सर्वमेव ग्रहणं ज्ञानं न स्यात् प्रत्यक्षमूलकत्वादितरज्ञानानामिति भावः॥ ४०॥

ननु यदि वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वं वर्त्तमानप्रागभावप्रतियोगित्वञ्च भविष्यत्त्वं तदा वर्त्तमान एव घटे कथं श्याम आसीद्रक्तो भविष्यतीति धीः अत

ग्रहणेन गृह्यते क्रियासन्तानस्य क्षणविच्छेदो विधीयते नारब्धो नोपरम इति सोऽयमुभयथा वर्त्तमानो गृह्यते। अपवृक्तो व्यपवृक्तश्च। अतीतानागताभ्यां स्थितिव्यङ्गो विद्यते द्रव्यमिति क्रियासन्तानविच्छेदाभिधायी च चैकाख्यान्वितः पचति छिनत्तीति, अन्यस्य प्रत्यासत्तिप्रभृतेरर्थस्य विवक्षायां तदभिधायी बहुप्रकारो लोकेषु उत्प्रेक्षितव्यः तस्मादस्ति वर्त्तमानः काल इति ॥ ४१ ॥

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥४२॥

अत्यन्तसाधर्म्यादुपमानं न सिध्यति, नचैवं भवति यथा गौरेवं गौरिति, प्रायः साधर्म्यादुपमानं न सिध्यति, न हि भवति यथानड्वानेवं महिष इति, एकदेशसाधर्म्यादुपमानं न सिध्यति, न हि सर्वेण सर्वमुपमीयत इति ॥ ४२ ॥

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ ४३ ॥

न साध्यस्य कृतत्वप्रायात्मभावमाश्रित्योपमानं प्रवर्त्तते, किं तर्हि प्रसिद्धसाधर्म्यात् साध्यसाधनभावमाश्रित्य प्रवर्त्तते,

---

भाष्ट। वर्त्तमानस्यापि घटादेः श्यामरक्तरूपादीनां कृततात्कर्त्तव्यतयीरतीतता-भविष्यतयोरुपपत्तेर्घटादेरप्यतीतानागतत्वेन व्यवहारः परम्परासम्बन्धादित्यर्थः ॥४१॥

समाप्तं वर्त्तमानपरीक्षाप्रकरणम् ॥ १६ ॥

अथावसरेण क्रमप्राप्तोपमानं परीक्षितुं पूर्वपक्षयति।—प्रसिद्धसाधर्म्यादुपमानमुक्तं तन्न युक्तं यतः साधर्म्यमात्यन्तिकं प्रायिकमेकदेशिकं वा न सम्भवति न हि आत्यन्तिकसाधर्म्येण गौरिव गौरित्युपमानं प्रवर्त्तते न वा प्रायिकसाधर्म्येण गौरिव महिष इति न च यत्किञ्चित् साधर्म्येण गौरिव सर्वम इति साधर्म्यस्य चोपचयवत्त्वाद्वैधर्म्योपमानमप्येवं सम्भवतीयम् ॥ ४२ ॥

समाधत्ते।—प्रसिद्धं प्रकर्षेण महिषादिभ्याहृत्या सिद्धं ज्ञानं यत् साधर्म्यमज्-

यत्र चैतदस्ति न तत्रोपमानं प्रतिषेद्धुं शक्यम्, तस्मादयमुक्तदोषो नोपपद्यत इति। अस्तु तर्ह्युपमानमनुमानम् ॥ ४३ ॥

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४४ ॥

यथा धूमेन प्रत्यक्षेणाप्रत्यक्षस्य वह्नेर्ग्रहणमनुमानमेवं गवा प्रत्यक्षेणाप्रत्यक्षस्य गवयस्य ग्रहणमिति नेदमनुमानादिति शिष्यते ॥ ४४ ॥

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति ॥ ४५ ॥

विशिष्यत इत्याह, कया युक्त्या ? यदा ह्ययमुपयुक्तोपमानो नोदपादि गवयसमानमर्थं पश्यति, तदाऽयं गवय इत्यस्य संज्ञाशब्दस्य व्यवस्था प्रतिपद्यते, न चैवमनुमानमिति परार्थं चोपमानं यस्य ह्युपमानमप्रसिद्धं तदर्थं प्रसिद्धाभ्येन क्रियत इति परार्थमुपमानमिति चेत् न स्वयमध्यवसायात् भवति च भोः स्वयमध्यवसायः, यथा गौरेवं गवय इति। नाध्यवसायः प्रतिषिध्यते उपमाने तु तन्न भवति प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानं न च यस्योभयं प्रसिद्धं तं प्रति साध्यसाधनभावो विद्यत इति ॥ ४५ ॥

ज्ञानस्योपमितिकरणत्वान्न दोषः साधर्म्यञ्च प्रकरणाद्यनुसारात् क्वचित् किञ्चिदिति ॥ ४३ ॥

अनुमानेन चरितार्थं नोपमानं प्रमाणान्तरमिति वैशेषिकमतमाशङ्क्यते। प्रत्यक्षेण गोसादृश्यविशिष्टेन अप्रत्यक्षस्य गवयपदवाच्यत्वस्यानुमितेर्नोपमानं प्रमाणान्तरमिति ॥ ४४ ॥

अथोत्तरयति।—अप्रत्यक्षे व्याप्यत्वेनाऽप्रत्यक्षे अनुमानत्वेन प्रमाणार्थं प्रमाप्रयोजनमुपमानस्य न पश्याम इत्यर्थः, अथवा गवये गवयशब्दे अप्रत्यक्षे

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥४६॥

अथापि तथेति समानधर्मोपसंहारादुपमानं सिध्यति नानुमानम् । अयञ्चानयोर्विशेष इति ॥ ४६ ॥

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥४७॥

शब्दोऽनुमानं न प्रमाणान्तरम्, कस्मात् ? शब्दार्थस्यानुमेयत्वात् । कथमनुमेयत्वम् ? प्रत्यक्षतोऽनुपलब्धे यथाऽनुपलभ्यमानो लिङ्गो लिङ्गेन पश्चान्मीयत इति अनुमानम् एवं लिङ्गेन शब्देन पश्चान्मीयतेऽर्थोऽयमनुमानं शब्दः ॥ ४७ ॥

उपलब्धेरद्विप्रवृत्तित्वात् ॥ ४८ ॥

इतश्चानुमानं शब्दः । प्रमाणान्तरभावे द्विप्रवृत्तिरुपलब्धिरन्यथा ह्युपलब्धिरनुमाने अन्यथोपमाने, तद्व्याख्यानं शब्दानु-

---

गवयपदवाच्यत्वे उपमानस्य प्रमाणार्थं प्रमाम् उपमानजन्यां प्रमाम् अनुमानत्वेन न पश्याम इत्यर्थः व्याप्तिज्ञानाभावादिति भावः ॥ ४५ ॥

ननु व्याप्तिज्ञानेनियमः कस्यातानिचाग्रहेण युक्त्यन्तरमाह ।—अनुमानादुपमानस्य नाविशेषः तथेत्युपसंहारात् यथा गौस्तथा गवय इति ज्ञानादुपमानसिद्धेरुपमानाधीनसिद्धेरुपमितेः तथा च व्याप्तिज्ञानानपेक्षत्वाद्दृश्यज्ञानाधीनोपमितिरित्यनुभवसिद्धं किञ्च नानुमिनोमि किन्तूपमिनोमीत्यनुव्यवसायसिद्धोपमितिर्नापलपितुं शक्यत इत्याशयः ॥ ४६ ॥

समानमुपमानप्रामाण्यपरीक्षाप्रकरणम् ॥ १७ ॥

क्रमप्राप्तं शब्दं परीक्षितुं पूर्वपक्षयति ।—शब्दोऽनुमानमित्यस्य शाब्दबोधोऽनुमितिरिति पर्यवसितार्थस्तथा च शब्दो लिङ्गविधयानुमितिकरणम् अर्थस्य शब्दप्रतिपाद्यस्य अनुपलब्धेरप्रत्यक्षत्वात् अनुमेयत्वादिति तथा च शाब्दज्ञानमनुमितिरप्रत्यक्षविषयत्वात् प्रत्यक्षभिन्नत्वाद्वेत्यत्र तात्पर्यम् ॥ ४७ ॥

हेत्वन्तरमाह —उपलब्धेः शाब्दबोधत्वेनाभिमतायाः अनुमितित्वेनाभिमतायाश्च

मानयोस्तूपलब्धिरहिप्रवृत्तिर्यथानुमाने प्रवर्त्तते तथा शब्देऽपि विशेषाभावादनुमानं शब्द इति ॥ ४८ ॥

सम्बन्धाच्च ॥ ४९ ॥

शब्दोऽनुमानमिति वर्त्तते, सम्बद्धयोश्च शब्दार्थयोः सम्बन्धप्रसिद्धौ शब्दोपलब्धेरर्थग्रहणम्। यथा सम्बद्धयोर्लिङ्गलिङ्गिनोः सम्बन्धप्रतीतौ लिङ्गोपलब्धौ लिङ्गिग्रहणमिति। यत्तावदर्थस्यानुमेयत्वादिति तत्र ॥ ४९ ॥

आप्तोपदेशसामर्थ्यात्शब्दादर्थे सम्प्रत्ययः॥५०॥

स्वर्गः अप्सरस उत्तराः कुरवः सप्त द्वीपाः समुद्रो लोकसन्निवेश इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात् प्रत्ययः, किं तर्हि आप्तैरयमुक्तः शब्द इतः सम्प्रत्ययः। विपर्ययेण सम्प्रत्ययाभावात्। न त्वेवमनुमानमिति। यत् पुनरुपलब्धेरहिप्रवृत्तित्वादिति, अयमेव शब्दानुमानयोरुपलब्धेः प्रवृत्तिभेदः। तत्र विशेषे सत्यहेतुर्विशेषाभावादिति। यत्तु पुनरिदं सम्बन्धाच्चेति अस्ति शब्दार्थयोः सम्बन्धोऽनुज्ञातः अस्ति च प्रतिषिद्धः। अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः प्राप्तिलक्षणस्तु शब्दार्थयोः सम्बन्धः प्रतिषिद्धः ॥ ५० ॥

अहिप्रवृत्तित्वात् अहिप्रकारत्वात् अनुमितित्वं शाब्दत्वञ्च न जातिद्वयं शब्दस्य लिङ्गविधया बोधकत्वाल्लिङ्गान्तरजज्ञानवह्निज्ञानीयत्वाभावात् ॥ ४८ ॥

हेत्वन्तरमाह।—सम्बन्धान्नियतसम्बन्धात् ज्ञायमानादिति शेषः, शब्दो हि व्याप्तियुक्तसापेक्षो बोधयति तेन शाब्दबोधोऽनुमितिरिति भावः ॥ ४९ ॥

सिद्धान्तसूत्रम्।—आप्तस्य भ्रमादियुक्तस्य च उपदेशः शब्दत्व यत् सामर्थ्यं आकाङ्क्षायोग्यतादिमत्त्वं ततः अथवा आप्तं प्राप्तं यदुपदेशसामर्थ्यम् आकाङ्क्षादिमत्त्वं ततः तत्प्रकारात् सावधारणत्वायं निर्देशस्तेन व्याप्तिनिरपेक्षादाकाङ्क्षादिज्ञानादर्थे सम्प्रत्ययः शाब्दबोधः सम्भवतीति नानुमानान्तर्भावः शब्दस्येत्यर्थः शब्दादनुमर्थे प्रत्येमि तत्वनुमिनोमीत्यनुभवादिति भावः ॥ ५० ॥

प्रमाणतोऽनुपलब्धेः ॥ ५१ ॥

कस्मात् ? प्रत्यक्षतस्तावच्छब्दार्थप्राप्ते नोपलब्धिरतीन्द्रियत्वात् येनेन्द्रियेण गृह्यते शब्दस्तस्य विषयभावमतिवृत्तोऽर्थो न गृह्यते। अस्ति चातीन्द्रियविषयभूतोऽप्यर्थः समानेन चेन्द्रियेण गृह्यमाणयोः प्राप्तिर्गृह्यत इति प्राप्तिलक्षणे च गृह्यमाणे शब्दार्थयोः शब्दान्तिके वार्थः स्यात्, अर्थान्तिके वा शब्दः स्यात्, उभयं वोभयत्र ॥ ५१ ॥

पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः ॥५२॥

अथ खल्वयं स्थानकरणाभावादिति चार्थः। न चायमनुमानतोऽप्युपलभ्यते शब्दान्तिकेऽर्थ इति। एकस्मिन् पक्षेऽप्यस्य स्थानकरणोच्चारणीयः शब्दस्तदन्तिकेऽर्थ इति। अत्रान्यस्मिन्शब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्णीयुः, न च प्रगृह्यन्ते। अग्रहणान्नानुमेयः प्राप्तिलक्षणः सम्बन्धः अर्थान्तिके शब्द इति। स्थानकरणासम्भवादनुच्चारणम्, स्थानं कण्ठादयः, करणं प्रयत्नविशेषः। तस्यार्थान्तिकेऽनुपपत्तिरिति उभयप्रतिषेधाच्च नोभयम्। तस्माद्न शब्देनार्थः प्राप्त इति ॥५२॥

शब्दार्थव्यवस्थानादप्रतिषेधः ॥ ५३ ॥

शब्दार्थप्रत्ययस्य व्यवस्थादर्शनादनुमीयतेऽस्ति शब्दार्थ-

शब्दार्थयोः सम्बन्धाभाव इत्याह।—शब्देन सहार्थस्य सम्बन्धाभावः व्याप्त्याभावः, हेतुमाह पूरणेति, यदि शब्दस्यार्थेन व्याप्तिः स्यात्तदाऽन्नान्यस्मिन्शब्दे मुखपूरणमुखप्रदाहमुखपाटनानि स्युः, शब्दस्य व्याप्यत्व सत्त्वेनान्नादेरर्थस्यापि सत्त्वात् ॥ ५२ ॥

तत् किं शब्दोऽसम्बद्धमेवार्थं प्रत्याययति तथा सत्यतिप्रसङ्ग इत्याशङ्क्याह।—

सम्बन्धो व्यवस्थाकारणम्। असम्बन्धे हि शब्दमात्रादर्थमात्रे प्रत्ययप्रसङ्गः। तस्मादप्रतिषेधः सम्बन्धस्येति ॥ ५३ ॥

न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य ॥ ५४ ॥

अत्र समाधिः। न सम्बन्धाकारितं शब्दार्थव्यवस्थानं किं तर्हि समयकारितं यत्तदवोचाम। अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः शब्दार्थयोः सम्बन्ध इति समयं तदवोचामेति। कः पुनरयं समयः? अस्य शब्दस्येदमर्थजातमभिधेयमित्यभिधानाभिधेयनियमनियोगः। तस्मिन्नुपयुक्ते शब्दादर्थसम्प्रत्ययो भवति। विपर्यये हि शब्दश्रवणेऽपि प्रत्ययाभावः, सम्बन्धवादिनापि चायमवर्जनीय इति। प्रयुज्यमानग्रहणाच्च समयोपयोगो लौकिकानाम्, समयपालनार्थं चेदपदलक्षणया वाचोऽन्वाख्यानं व्याकरणवाक्यलक्षणया वाचोऽर्थो लक्षणम्। पदसमूहो वाक्यमर्थपरिसमाप्ताविति। तदेवं प्राप्तिलक्षणस्य शब्दार्थसम्बन्धस्यार्थजुषोऽप्यनुमानहेतुर्न भवतीति ॥ ५४ ॥

जातिविशेषे चानियमात् ॥ ५५ ॥

अप्रतिषेधः शब्दार्थयोः सम्बन्धप्रतिषेधो न शब्दार्थयोः सम्बन्धस्य व्यवस्थितत्वात् कश्चिदेव हि शब्दः कञ्चिदेवार्थं बोधयति न सर्वः सर्वमिति शब्दस्य सम्बन्धे स्वीकृते तेन सम्बन्धेन व्याप्तिरप्यावश्यकी स च सम्बन्धो न मुखपूरणादिनियामक इति भावः ॥५३॥

उत्तरयति।—सम्बन्धेऽपि शब्दार्थयोरव्यवस्था न शब्दाधीनस्यार्थसम्प्रत्ययस्य सामयिकत्वात् शक्तिग्रहाधीनत्वात् शक्तिरूपसम्बन्धेन च न व्याप्तिसाध्यहेतुनियामकसम्बन्धाधीनत्वादिति भावः ॥ ५४ ॥

सामयिकः शब्दार्थसम्प्रत्ययो न स्वाभाविकः। ऋष्यार्य-म्लेच्छानां यथाकामं शब्दविनियोगोऽर्थप्रत्यायनाय प्रवर्त्तते, स्वाभाविके हि शब्दस्यार्थप्रत्यायकत्वे यथाकामं न स्यात्। यथा तैजसस्य प्रकाशस्य रूपप्रत्ययहेतुत्वं न जातिविशेषे व्यभिचरतीति ॥ ५५ ॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥५६॥

पुत्रकामेष्टिहवनाभ्यामिषु तस्येति शब्दविशेषमेवाधिकुरुते भगवानृषिः। शब्दस्य प्रमाणत्वं न सम्भवति, कस्मात्? अनृत-दोषात्। पुत्रकामेष्टौ पुत्रकामः पुत्रेष्ट्या यजेतेति, नेष्टौ संस्थितायां पुत्रजन्म दृश्यते। दृष्टार्थस्य वाक्यस्यानृतत्वात् अदृष्टार्थमपि वाक्यमग्निहोत्रं जुहुयात् स्वर्गकाम इत्यानृत-मिति ज्ञायते। विहितव्याघातदोषाच्च हवने "उदिते होतव्य-मनुदिते होतव्यं समयाध्युषिते होतव्यम्" इति विधाय विहितं व्याहन्ति, "श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति शबलोऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोति

शब्दस्यार्थेन सह न स्वाभाविकः सम्बन्धः; जातिविशेषेऽनियमात् शब्दस्या-नियतार्थकत्वदर्शनादार्याणां हि यवशब्दाद्दीर्घशूककविशेषं प्रतियन्ति म्लेच्छास्तु कङ्गुमिति, नियमे तु सर्वैः सर्वं प्रतीयात् आपाततश्चेदं नानाशक्तावपि यत्र यस्य शक्तिग्रहस्य तदर्थोपस्थितेः ॥ ५५ ॥

समाप्तं शब्दसामान्यपरीक्षाप्रकरणम् ॥ १८ ॥

शब्दस्य दृष्टादृष्टार्थकत्वेन वैविध्यमुक्तं, तत्र चादृष्टार्थकशब्दस्य वेदस्य प्रामाण्यं परीक्षितुं पूर्वपक्षयति।—तस्य दृष्टार्थकव्यतिरिक्तशब्दस्य वेदस्य अप्रामाण्यं, कुतः? अनृतत्वादिदोषात्। तत्र च पुत्रेष्टिकारी यागादौ क्वचित् फलानुत्पत्तिदर्शना-दनृतत्वं व्याघातः पूर्वापरविरोधः, यथा उदिते जुहोति अनुदिते जुहोति समयाध्युषिते जुहोति श्यावोऽस्याहुतिमभ्यवहरति य उदिते शबलोऽस्याहुतिमभ्यव-

श्यावशबलौ वाय्वाहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति" व्याहतत्वाद्वाक्यानर्थक्यमिति। पुनरुक्तदोषाच्च अभ्यासे देश्यमाने "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति पुनरुक्तदोषो भवति। पुनरुक्तञ्च प्रमत्तवाक्यमिति तस्मादप्रमाणं शब्दोऽनृतव्याघातपुनरुक्तदोषेभ्य इति ॥ ५६ ॥

न कर्मकर्तृसाधनवैगुण्यात् ॥ ५७ ॥

नानृतदोषः पुत्रकामेष्टौ, कस्मात्? कर्मकर्तृसाधनवैगुण्यात्। इष्ट्या पितरौ संयुज्यमानौ पुत्रं जनयत इति इष्टेः करणं साधनं पितरौ कर्त्तारौ संयोगः कर्म त्रयाणां गुणयोगात् पुत्रजन्म वैगुण्यादपपद्यते। इज्याश्रयं तावत्कर्मवैगुण्यं समीक्षाभ्रंशः कर्तृवैगुण्यम् अविद्वान् प्रयोक्ता कपूयाचरणश्च। साधनवैगुण्यं हविरसंस्कृतमपहृतमिति। मन्त्रा न्यूनाधिकाः स्वरवर्णहीना इति। दक्षिणा दूरागता हीना निन्दिता चेति। अथोपयजनाश्रयं कर्मवैगुण्यं मिथ्यासम्प्रयोगः। कर्तृवैगुण्यं योनिव्यापादो बीजोपघातश्चेति। साधनवैगुण्यम् इष्टावभिहितं लोके चाग्निकामो दारुणी मथ्नीयादिति विधिवाक्यं, तत्र कर्मवैगुण्यं मिथ्याभिमन्थनं, कर्तृ-

---

हरति योऽनुदिते जुहोति श्यावशबलावस्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोतीति, अत्र चोदितादिवाक्यानां निन्दानुमितानिष्टसाधनताबोधकवाक्येन सह विरोधः, पौनरुक्त्यादप्रामाण्यं यथा त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यत्रोत्तमत्वस्य प्रथमत्वापर्यवसानात्पि त्रिःकथनेन पौनरुक्त्यम् एतेषामप्रामाण्यं तदृष्टान्तेन तदेककर्तृकत्वेन तदेकजातीयत्वेन वा सर्ववेदाप्रामाण्यं साधनीयमिति भावः ॥ ५६ ॥

सिद्धान्तसूत्रम्। न वेदाप्रामाण्यं कर्मकर्तृसाधनवैगुण्यात् फलाभावोपपत्तेः कर्मणः क्रियाया वैगुण्यमयथाविधित्वादि कर्तुर्वैगुण्यमविद्वत्त्वादि साधनस्य हवि-

वैगुण्यं प्रज्ञाप्रयत्नगतः प्रमादः, साधनवैगुण्यम् आर्द्रं सुषिरं दार्विति, तत्र फलं न निष्पद्यत इति नानृतदोषः। गुणयोगेन फलनिष्पत्तिदर्शनात् न चेदं लौकिकाद्विद्यते पुत्रकामः पुत्रेष्ट्या यजेतेति ॥ ५७ ॥

अभ्युपेत्य कालभेदे दोषवचनात् ॥ ५८ ॥

न व्याघातो हवन इत्यनुवर्त्तते योऽभ्युपगतं हवनकालं भिनत्ति ततोऽन्यत्र जुहोति तत्रायमभ्युपगतकालभेदे दोष उच्यते श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति तदिदं विधिभङ्गे निन्दावचनमिति ॥ ५८ ॥

अनुवादोपपत्तेश्च ॥ ५९ ॥

पुनरुक्तदोषोऽभ्यासे नेति प्रकृतम्। अनर्थको ऽभ्यासः पुनरुक्तः अर्थवानभ्यासोऽनुवादः योऽयमभ्यासस्त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यनुवाद उपपद्यते अर्थवत्त्वात्। त्रिर्वचनेन हि प्रथमोत्तमयोः पञ्चदशत्वं सामिधेनीनां भवति। तथाच मन्त्राभिवादः। इदमहं भ्रातृव्यं पञ्चदशावरेण वाग्वज्रेण बाधे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म इति पञ्चदशसामिधेनीर्वज्रं मन्त्रोऽभिवदति तदभ्यासमन्तरेण न स्यादिति ॥ ५९ ॥

दार्विवैगुण्यमप्रोक्षितत्वादि यथोक्तकर्म्मणः फलाभावे स्यानृतत्वं न चैवमस्तीति भावः ॥ ५७ ॥

व्याघातं परिहरति।—न व्याघात इति शेषः अभ्याधानकाले उदितहोमादिकमभ्युपेत्य स्वीकृत्यानुदितहोमादिकरणे पूर्वोक्तदोषकथनान्न व्याघात इत्यर्थः ॥ ५८ ॥

पौनरुक्त्यं परिहरति।—च पुनरर्थे अनुवादोपपत्तेः पुनर्मं पौनरुक्त्यं निष्प्रयोजनत्वे हि पौनरुक्त्यं दोष उक्तस्यले त्वनुवादस्य उपपत्तेः प्रयोजनस्य सत्त्वात्

वाक्यविभागस्य चार्थग्रहणात् ॥ ६० ॥

प्रमाणं शब्दो यथा लोके विभागश्च ब्राह्मणवाक्यानां त्रिविधः ॥ ६० ॥

विध्यर्थवादानुवादवचनविनियोगात् ॥ ६१ ॥

त्रिधा खलु ब्राह्मणवाक्यानि विनियुक्तानि विधिवचनानि अर्थवादवचनानि अनुवादवचनानीति ॥ ६१ ॥

विधिर्विधायकः ॥ ६२ ॥

तत्र यद्वाक्यं विधायकं चोदकं स विधिः। विधिस्तु नियोगोऽनुज्ञा वा यथाग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि ॥ ६२ ॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ ६३ ॥

एकादशसामिधेनीनां प्रथमोत्तमयोः विरभिधाने हि पञ्चदशत्वं सम्भवति, तथा च पञ्चदशत्वं युक्तं इमसङ्ख्यं भाक्तत्वं पञ्चदशावरेण वाक्येन च बाधे योऽन्यान् द्वेष्टि यस्य वयं द्विष्म इति ॥ ५९ ॥

अनुवादस्य सार्थकत्वं लोकसिद्धमित्याह।—वाक्यविभागस्य अनुवादत्वेन विधिकवाक्यस्यार्थग्रहणात् प्रयोजनवत्त्वात् सिद्धेरिति शेषः, सिद्धा हि विधायकानुवादकादिभेदेन वाक्यं विभज्यानुवादकस्यापि सप्रयोजनत्वं मन्यन्ते वैदिज्ञा इति भावः ॥ ६० ॥

वेदे वाक्यविभागं दर्शयति।—मन्त्रब्राह्मणभेदाद् द्विधा वेदस्य च ब्राह्मणस्यापि विभागः विधिवचनत्वेनार्थवादवचनत्वेनानुवादवचनत्वेन च वेदस्य विनियोगात् विभजनात्, अथवा विनियोगात् भेदात् तथा च विध्यादिभेदाद् ब्राह्मणभागस्त्रिविधेति शेषः ॥ ६१ ॥

तत्र विधिलक्षणमाह।—इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यं विधिः अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि ॥ ६२ ॥

विधेः फलवादलक्षणा वा प्रशंसा सा स्तुतिः सम्प्रत्ययार्थं स्मर्यमाणं अदधीतेति प्रवर्त्तिका च फलश्रवणात् प्रवर्त्तते। सर्वजिता वै देवाः सर्वमजयन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयतीत्येवमादि। अनिष्टफलवादो निन्दा वर्जनार्थं निन्दितं न समाचरेदिति। स एष वा प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन यजते गर्त्तं पतत्ययमेवैतज्जीर्य्यते वा इत्येवमादि। अन्यकर्तृकस्य व्याहृतस्य विधेर्वादः परकृतिः। हुत्वावपामेवाग्नेऽभिधारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्नेऽभिधारयन्ति। अग्नेः प्राणाः पृषदाज्यं स्तोममित्येवमभिदधतीत्येवमादि। ऐतिह्यसमाचरितो विधिः पुराकल्प इति। तस्माद्वा एतेन ब्राह्मणा हविः पवमानं सामस्तोममस्तौषन् योने यज्ञं प्रतनवामहै इत्येवमादि। कथं परकृतिपुराकल्पौ अर्थवादाविति। स्तुतिनिन्दाव्यतिरेकेणाभिसम्बन्धाद्विध्याश्रयस्य कस्य कस्यचिदर्थस्य द्योतनादर्थवाद इति ॥ ६३ ॥

विधिविहितस्यानुवचनमनुवादः ॥ ६४ ॥

अर्थवादः अर्थस्य प्रयोजनस्य वदनं विध्यर्थप्रशंसापरं वचनमित्यर्थः, अर्थवादो हि स्तुत्यादिद्वारा विध्यर्थं शीघ्रं प्रवर्त्तयति प्रशंसति। तत्र स्तुत्यादिभेदादर्थवादं विभजते।— स्तुतिः साचाद्विध्यर्थस्य प्रशंसार्थकं वाक्यं, यथा सर्वजिता वै देवाः सर्वमजयन् सर्वस्य आप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयतीत्यादि अनिष्टबोधनद्वारा विध्यर्थप्रवर्त्तकं निन्दा एष वावप्रथमो यज्ञानां यज्ज्योतिष्टोमोऽयम् एतेनानिष्ट्वा अन्येन यजते स गर्त्तं पतत्ययमेवैतज्जीर्य्यते प्रवामीवत इत्यादि पुरुषविशेषनिष्ठमिष्टविरुद्धफलश्रवणं परकृतिः, यथा हुत्वा वपामेवाग्नेऽभिधारयन्त्यथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्नेऽभिधारयन्त्यग्नेः प्राणाः पृषदाज्यमित्यभिदधतीत्यादि, ऐतिह्यसमाचरिततया कीर्त्तनं पुराकल्पः, यथा तस्माद्वा एतेन पुरा ब्राह्मणा हविः पवमानसामस्तोममस्तौषन् यज्ञं प्रतनवामहै इत्यादि ॥ ६३ ॥

विध्यनुवचनञ्चानुवादो विहितानुवचनञ्च, पूर्वः शब्दानुवादोऽपरोऽर्थानुवादः। यथा पुनरुक्तं द्विविधमेवमनुवादोऽपि। किमर्थं पुनर्विहितमनूद्यते? अधिकारार्थं, विहितमधिकृत्य स्तुतिर्बोध्यते निन्दा वा विधिशेषो वाभिधीयते। विहितानन्तरार्थोऽपि चानुवादो भवति। एवमन्यदप्युत्प्रेक्षणीयम्। लोकेऽपि च विधिरर्थवादोऽनुवाद इति च त्रिविधं वाक्यम्। ओदनं पचेदिति विधिवाक्यम्। अर्थवादवाक्यमायुर्वर्चो बलं सुखं प्रतिभानञ्चान्ने प्रतिष्ठितम्। अनुवादः पचतु पचतु भवानित्यभ्यासः क्षिप्रं पच्यतामिति वा, अङ्ग पच्यतामित्यध्येषणार्थम्। पच्यतामेवेति वाऽवधारणार्थम्। यथा लौकिके वाक्ये विभागेनार्थग्रहणात् प्रमाणत्वमेवं वेदवाक्यानामपि विभागेनार्थग्रहणात् प्रमाणत्वं भवितुमर्हतीति ॥ ६४ ॥

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः॥६५॥

पुनरुक्तमसाधु, साधुरनुवाद इति अयं विशेषो नोपपद्यते। कस्मात्? उभयत्र हि प्रतीतार्थः शब्दोऽभ्यस्यते चरितार्थस्य शब्दस्याभ्यासादुभयमसाध्विति ॥ ६५ ॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥६६॥

अनुवादलक्षणमाह।—प्राप्तस्य अनु पश्चात् कथनं स प्रयोजनमनुवाद इति शाब्दान्वयलक्षणं, तद्विशेषो विधिविहितस्येति विध्यनुवादो विहितानुवादश्चेत्यर्थः। अयं चार्थवादानुवादविभागो विधिसमभिव्याहृतवाक्यानां तेन भूतार्थवादरूपाणां वेदवाक्यानामपरिग्रहान्न दूषणम्॥ ६४ ॥

प्रकृते।—शब्दस्य बोधितार्थकशब्दस्य योऽभ्यासः पुनः प्रयोगस्तस्योपपत्तेः कस्मात् अनुवादः पुनरुक्तान्न भिद्यत इत्यर्थः॥ ६५ ॥

नानुवादपुनरुक्तयोरविशेषः। कस्मात्? अर्थवदभ्यासस्यानुवादभावात्, समानेऽभ्यासे पुनरुक्तमनर्थकम्। अर्थवानभ्यासोऽनुवादः। शीघ्रतरगमनोपदेशवत्। शीघ्रं शीघ्रं गम्यतां शीघ्रतरं गम्यतामिति क्रियातिशयोऽभ्यासेनैवोच्यते। उदाहरणार्थश्चेदम् एवमन्योऽप्यभ्यासः। पचति पचतीति क्रियानुपरमः। ग्रामो ग्रामो रमणीय इति व्याप्तिः। परिपरि त्रिगर्त्तेभ्यो वृष्टो देव इति परिवर्जनम्, अध्यधि कुरुषु निषण्णमिति सामीप्यम्। तिक्तं तिक्तमिति प्रकारः। एवमनुवादस्य स्तुतिनिन्दाशेषविधिर्थविधिकारार्थता विहितार्थता चेति ॥ ६६ ॥

मन्त्रायुर्वेदाप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ ६७ ॥

किं पुनः प्रतिषेधहेतूद्धारादेव शब्दस्य प्रमाणत्वं सिध्यति? किं पुनरायुर्वेदस्य प्रामाण्यं यदायुर्वेदेनोपदिश्यते इदं कृत्वेष्टमधिगच्छति इदं वर्जयित्वाऽनिष्टं जहाति तस्यानुष्ठीयमानस्य तथाभावः सत्यार्थताऽविपर्ययः, मन्त्रपदानाञ्च विषभूताग्न्यनिप्रतिषेधार्थानां प्रयोगेऽर्थस्य तथाभावः एतत् प्रामाण्यं किं कृतमेतत्। आप्तप्रामाण्यकृतम्। किं पुनराप्तानां प्रामाण्यं साक्षात्कृतधर्मता भूतदया यथाभूतार्थ-

---

समाधत्ते।—अनुवादस्य पुनरुक्तावाविशेषः अभ्यासात् अभ्यासस्य सप्रयोजनत्वात् तत्र दृष्टान्तमाह—शीघ्रमिति। यथा लोके गम्यतामित्युक्ता पुनर्गम्यतां गम्यताम् इत्यादिकमभिलम्बादिबोधार्थमुच्यते तथा प्रकृतेऽपीति ॥ ६६ ॥

एवमप्रामाण्यबाधकं विरस्य प्रामाण्यं साधयति।—आप्तस्य वेदकर्तुः प्रामाण्यात् यथार्थोपदेशकत्वात् वेदस्य तदुक्तत्वमर्थाल्लभ्यं तेन हेतुना वेदस्य प्रामाण्यम्

चिख्यापयिषेति । आप्ताः खलु साक्षात्कृतधर्माणः । इदं हातव्यमयमस्य हानिहेतुरिदमस्याधिगन्तव्यमयमस्याधिगमहेतुरिति भूतान्यनुकम्पन्ते । तेषां खलु वै प्राणभृतां स्वयमनवबुध्यमानानां नान्यदुपदेशादवबोधकारणमस्ति, न चानवबोधे समीहा वर्जनं वा, न वाऽकृत्वा स्वास्थ्यभावः, नाप्यस्यान्य उपकारकोऽप्यस्ति । हन्त वयमेभ्यो यथादर्शनं यथाभूतमुपदिशामस्त इमे श्रुत्वा प्रतिपद्यमाना हेयं हास्यन्त्यधिगन्तव्यमेवाधिगमिष्यन्तीति । एवमाप्तोपदेशः एतेन त्रिविधेनाप्तप्रामाण्येन परिगृहीतोऽनुष्ठीयमानोऽर्थस्य साधको भवति । एवमाप्तोपदेशः प्रमाणमेवमाप्ताः प्रमाणम् । दृष्टार्थनाप्तोपदेशेनायुर्वेदेनादृष्टार्थो वेदभागोऽनुमातव्यः प्रमाणमिति आप्तप्रामाण्यस्य हेतोः समानत्वादिति, अस्यापि चैकदेशो ग्रामकामो यजेतेत्येवमादिर्दृष्टार्थस्तेनानुमातव्यमिति । लोके च भूयानुपदेशाश्रयो व्यवहारः । लौकिकस्याप्युपदेष्टुरुपदेष्टव्यार्थज्ञानपरानुग्रहेच्छया यथाभूतार्थाचख्यापयिषया च प्रामाण्यम् । तत्पारम्पर्यादाप्तोपदेशः प्रमाणमिति द्रष्टृप्रवक्तृसामान्याच्चानुमानम् । य एवाप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एवायुर्वेदप्रभृतीनामित्यायुर्वेदप्रामाण्यवद्वेदप्रामाण्यमनुमातव्यमिति । नित्यत्वाद्वेदवाक्यानां प्रमाणत्वे तत्प्रामाण्यमाप्तप्रामाण्यादित्ययुक्तम्, शब्दस्य वाचकत्वादर्थप्रतिपत्तौ प्रमाणत्वं न नित्यत्वात् नित्यत्वे हि सर्वस्य सर्वेण वचनाच्छब्दार्थव्यवस्थानुपपत्तिः । नानित्यत्वे वाचकत्वमिति चेत्

अनुमेयं तत्र दृष्टान्तमाह—मन्वायुर्वेदप्रामाण्यवदिति । मन्वो विधादिनायकः आयुर्वेदस्य वैद्यस्य एव तत्र संवादेन प्रामाण्यग्रहात् तद्दृष्टान्तेन वेदत्वावच्छेदेन प्रामाण्यम्

न लौकिकेष्वदर्शनात्, तेऽपि नित्या इति चेत् न अनाप्तोपदेशादर्थविसंवादोऽनुपपन्नः । नित्यत्वाद्वि शब्दः प्रमाणमिति अनित्यः स इति चेत् अविशेषवचनम् अनाप्तोपदेशो लौकिको न नित्य इति कारणं वाच्यमिति । यथानियोगश्चार्थस्य प्रत्यायनान्नामधेयशब्दानां लोके प्रामाण्यं नित्यत्वात्प्रामाण्यानुपपत्तिः । यत्रार्थे नामधेयशब्दो नियुज्यते लोके तस्य नियोगसामर्थ्यात् प्रत्यायको न भवति नित्यत्वात् मन्वन्तरयुगान्तरेषु चातीतानागतेषु सम्प्रदायाभ्यासप्रयोगाविच्छेदो वेदानां नित्यत्वम् आप्तप्रामाण्याच्च प्रामाण्यं लौकिकेषु शब्देषु चैतत् समानमिति ॥ ६७ ॥

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्याद्यमाह्निकम् ।

द्वितीयाध्यायस्य

द्वितीयाह्निकम् ।

अयथार्थः प्रमाणोद्देश इति मत्वाह ।—

न चतुष्टयैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्॥ १॥

न चत्वार्येव प्रमाणानि, किं तर्हि, ऐतिह्यमर्थापत्तिः

अनुमेयम् आप्तं गृहीतं प्रामाण्यं यत्र स वेदलाक्षणेन वेदत्वेन प्रामाण्यमनुमेयमिति केचित् ॥ ६७ ॥

समाप्तं शब्दविशेषपरीक्षाप्रकरणम् ॥ १८ ॥

इति श्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ विभागपरीक्षा-निरपेक्षसाङ्गप्रमाणपरीक्षणं नाम द्वितीयाध्यायस्याद्याह्निकम् ॥ १ ॥

अत्र विभागसापेक्षप्रमाणपरीक्षणं तदेव चाह्निकार्थः । चत्वारि चात्र प्रकरणानि

सम्भवोऽभाव इत्येतान्यपि प्रमाणानि, इति ह्येचुरित्यनिर्दिष्ट-प्रवक्तृकमप्रवादपारम्पर्यमैतिह्यम्, अर्थादापत्तिरर्थापत्तिः आपत्तिः प्राप्तिः प्रसङ्गः। यत्राभिधीयमानेऽर्थे योऽन्योऽर्थः प्रसज्यते सोऽर्थापत्तिः। यथा मेघेष्वसत्सु वृष्टिर्न भवतीति किमत्र प्रसज्यते सत्सु भवतीति। सम्भवो नाम अविनाभाविनोऽर्थस्य सत्ताग्रहणादन्यस्य सत्ताग्रहणम्। यथा द्रोणस्य सत्ताग्रहणादाढकस्य सत्ताग्रहणम् आढकस्य सत्ताग्रहणात् प्रस्थस्येति। अभावो विरोधी अभूतं भूतस्य, अविद्यमानं वर्षकर्म विद्यमानस्य वायुभ्रसंयोगस्य प्रतिपादकम् विधारके हि वायुभ्रसंयोगे गुरुत्वादपां पतनकर्म्म न भवतीति। सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणि प्रमाणान्तरत्वं मन्यमानेन प्रतिषेधः उच्यते सोऽयम् ॥ १ ॥

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥ २ ॥

अनुपपन्नः प्रतिषेधः कथम् आप्तोपदेशः शब्द इति न च

तत्रादौ चतुष्टयपरीक्षाप्रकरणम्। अन्यानि च तत्र तत्र वक्ष्यन्ते तत्रोपसंहरिष्यते। प्रमाणानां न चतुष्टं, प्रमाणत्वं नीलरूपवत्त्वान्यतमत्वव्याप्यम् उक्तान्यवृत्तित्वात् तत्रान्यवृत्तित्वं व्युत्पादयति ऐतिह्यं त्यादि ऐतिह्यम् इति ह्येचुरित्यनेन प्रकारेण यदुच्यते तद्धि अनिर्दिष्टप्रवक्तृकं परम्परागतं वाक्यं, यथा वटे वटे यक्ष इत्यादि तस्य चाप्तोक्तत्वानिश्चयान्न शब्देऽन्तर्भाव इति भावः। अर्थापत्तिरनुपपद्यमानेनार्थेनोपपादकस्य कल्पनं, यथा हुत्वा मेघध्वानं, हुत्वा सह मेघस्य वैयधिकरण्यान्न व्याप्तिरिति नानुमानेऽन्तर्भावः सम्भवो भूयः सहचराधीनज्ञानं यथा सम्भवति द्रोणे विद्या सम्भवति सहस्रे शतम् अत्र च व्याप्तिर्नापेक्षितेत्याशयः अभावस्तु विरोध्यभावज्ञानाधीनविरोध्यन्तरकल्पनं, यथा नकुलाभावज्ञानेन नकुलविरोधिनो व्यालस्य कल्पनम् अत्रापि व्याप्तिर्नापेक्षितेत्याशयः अथवा कारणाभावादिना कार्याभावादिज्ञानम् अभावः भावनिष्ठव्याप्तिरेवानुमानाङ्गमित्याशयः ॥ १ ॥

शब्दलक्षणमेतिश्चाद्यावर्त्तते सोऽयं भेदः सामान्यात् संगृह्यत इति। प्रत्यक्षेणाप्रत्यक्षस्य सम्बन्धस्य प्रतिपत्तिरनुमानं, तथा चार्थापत्तिसम्भवाभावाः, वाक्यार्थसम्प्रत्ययेनानभिहितस्यार्थस्य प्रत्यनीकभावाद् ग्रहणमर्थापत्तिरनुमानमेव, अविनाभावलक्षणा च सम्बन्धयोः समुदायसमुदायिनोः समुदायेनेतरस्य ग्रहणं सम्भवः। तदप्यनुमानमेव। अस्मिन् सतीदं नोपपद्यत इति विरोधित्वे प्रसिद्धे कार्यानुत्पत्त्या कारणस्य प्रतिबन्धकमनुमीयते सोऽयं यथार्थ एव प्रमाणोद्देश इति सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणीत्युक्तम् ॥ २ ॥

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ ३ ॥

अत्रार्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते तथाहीयम्। अमत्सु मेघेषु वृष्टिर्न भवतीति, सत्सु भवतीत्येतदर्थादापद्यते सत्स्वपि चैकदा न भवति सेयमर्थापत्तिरप्रमाणमिति ॥ ३ ॥

अनर्थापत्तावर्थापत्त्यभिमानात् ॥ ४ ॥

मिज्ञानमुक्तम्।—न प्रमाणचतुष्टयस्य प्रतिषेधः शब्दे चेतिशब्दस्यानर्थान्तरभावादन्तर्भावात् सामान्यत आप्तोक्तत्वज्ञानसम्भवाच्चास्य आप्तोक्तत्वज्ञानं न शाब्दे कारणं, किन्तु आकाङ्क्षादिज्ञानं योग्यताप्रत्याधीना च शाब्दप्रमितिः, अर्थापत्त्याटेरनुमानेऽन्तर्भावः उपपादककल्पनं हि विना व्याप्तिज्ञानं न सम्भवति दृष्टित्वादावपि मेघजन्यत्वव्याप्तिरस्त्येव सम्भवोऽपि व्याप्तिसूचकत्वादनुमानं व्याप्त्यपेक्षित्वे च व्यभिचारादप्रमाणम् एवमभावो व्याप्तिमापेक्षोऽनुमानम् अभावनिष्ठव्याप्तेरज्ञानाङ्गत्वे न विरोध इति भावः ॥ २ ॥

सत्यर्थापत्तेः प्रामाण्ये वह्निर्भावान्तर्भावचिन्ता तदेव तु नास्तीति तटस्थः शङ्कते। असति मेघे वृष्टिर्न भवतीत्यनेन सति मेघे वृष्टिर्भवतीत्यर्थापत्तिविषयस्य च न प्रामाण्यं सत्यपि मेघे वृष्त्यभावादनैकान्तिकत्वात् ॥ ३ ॥

नानैकान्तिकत्वमर्थापत्तेः। असति कारणे कार्यं नोत्पद्यते इति वाक्यात् प्रत्यनीकभूतोऽर्थः सति कारणे कार्यमुत्पद्यत इत्यर्थादापद्यते अभावस्य हि भावः प्रत्यनीक इति। सोऽयं कार्योत्पादः सति कारणेऽर्थादापद्यमानो न कारणस्य सत्तां व्यभिचरति न खल्वसति कारणे कार्यमुत्पद्यते तस्मान्नानैकान्तिको यत्तु सति कारणे निमित्तप्रतिबन्धात् कार्यं नोत्पद्यत इति कारणधर्मोऽसौ न त्वर्थापत्तेः प्रमेयं किं तर्ह्यस्याः प्रमेयं सति कारणे कार्यमुत्पद्यत इति योऽसौ कार्योत्पादः कारणस्य सत्तां न व्यभिचरति एतदस्याः प्रमेयम्। एवन्तु सति अनर्थापत्तावर्थापत्त्यभिमानं कृत्वा प्रतिषेध उच्यत इति। दृष्टश्च कारणधर्मो न शक्यः प्रत्याख्यातुमिति ॥ ४ ॥

प्रतिषेधाप्रामाण्यञ्चानैकान्तिकत्वात् ॥ ५ ॥

अर्थापत्तिर्न प्रमाणमनैकान्तिकत्वादिति वाक्यं प्रतिषेधः तेनानेनार्थापत्तेः प्रमाणत्वं प्रतिषिध्यते न सद्भावः एवमनैकान्तिको भवति अनैकान्तिकत्वादप्रमाणेनानेन न कश्चिदर्थः प्रतिषिध्यते इति। अथ मन्यसे नियतविषयेष्वर्थेषु स्वविषये व्यभिचारो भवति नच प्रतिषेधस्यासद्भावो विषयः एवं तर्हि ॥ ५ ॥

समाधत्ते।—अर्थापत्तेर्नानैकान्तिकत्वमिति शेषः अमत्सु मेघेषु न वृष्टिरित्यनेन सति मेघे वृष्टिरिति तव च वृष्ट्या मेघज्ञानमभिमतं यत्र च मेघेन वृष्टिज्ञानं तत्रानर्थापत्तावर्थापत्तिभ्रमः। न चैतावता प्रामाण्यविरोधः, व्याप्त्यादिभ्रमात् धूमानुमितिदर्शनादनुमानस्याप्रामाण्यापत्तेः नानैकान्तिकत्वमर्थापत्तेरिति भाष्यस्वतरणिकां सूत्रादौ केचिल्लिखन्ति ॥ ४ ॥

प्रतिबन्धिमप्याह।—त्वदुक्तरीत्या त्वदीयप्रतिषेधस्याप्यप्रामाण्यं स्यादप्रामाण्यसम्भवेऽनैकान्तिकत्वात् यत्र कुत्रचिदनैकान्तिकत्वस्य प्रतिषेधासाधकत्वादनैकान्तिकत्वात् ॥५॥

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥

अर्थापत्तेरपि कार्य्योत्पादेन कारणसत्ताया अव्यभिचारो विषयः न च कारणधर्मो निमित्तप्रतिबन्धात् कार्य्यानुत्पादत्वमिति । अभावस्य तर्हि प्रमाणभावाभ्यनुज्ञा नोपपद्यते ॥ ६ ॥

'नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ ७ ॥

कथमिति अभावस्य भूयसि प्रमेये लोकसिद्धैर्वैजात्यादुच्यते नाभावप्रामाण्यं प्रमेयासिद्धेरिति ॥ ७ ॥

लक्षितेष्वलक्षणलक्षितत्वाल्लक्षितानां तत्प्रमेयासिद्धेः ॥ ८ ॥

अथाऽयमर्थबहुत्वादर्थैकदेश उदाह्रियते । तस्याभावस्य सिध्यति प्रमेयं, कथं लक्षितेषु वामःसु अनुपादेयेषु उपादेयानामलक्षितानां लक्षणलक्षितत्वात् लक्षणाभावेन लक्षितत्वादिति । उभयमन्निधावलक्षितानि वामांस्यानयेति प्रयुक्तो येषु वामःसु लक्षणानि न भवन्ति तानि

अथ यत्र क्वचिदनैकान्तिकत्वं न दोषाय किन्तु स्वविषये इति यदि तदार्थापत्तेरपि नाप्रामाण्यमित्याह । अनैकान्तिकत्वस्य स्वविषये साधकत्वाद् यदि स्वहेतोः प्रामाण्यं मन्यसे तदार्थापत्तेरपि स्वविषये प्रामाण्यमिति ॥ ६ ॥

अभावस्य न प्रमाणेऽलाभाव इति तटस्थः शङ्कते । अभावनामकं प्रमाणं तदा स्याद् यदि तस्य प्रमेयं सिध्येत्तदैव तु नास्ति अभावस्य तुच्छत्वान्न तत्र प्रमाणप्रवृत्तिरिति भावः ॥ ७ ॥

सिद्धान्तसूत्रम् ।—तस्याभावप्रमाणस्य प्रमेयसिद्धिः भावप्रधानो निर्देशः किं तत्प्रमेयमित्यत्राह—लक्षितेषु इति । लक्षितेषु घटादिषु सत्सु । अलक्षितानां तत्प्रमेयत्वसिद्धिः अलक्षितानां कथं प्रमेयत्वमत आह—अलक्षणलक्षितत्वादिति । यद्यप्यभावस्य

लक्षणाभावेन प्रतिपद्यते प्रतिपद्य चानयति प्रतिपत्तिहेतुश्च प्रमाणमिति ॥ ८ ॥

असत्यर्थे नाभाव इति चेन्नान्यत्र लक्षणोपपत्तेः॥९॥

यत्र भूत्वा किञ्चिन्न भवति तत्र तस्याभावः उपपद्यते। अलक्षितेषु च वासःसु लक्षणानि भूत्वा न भवन्ति ,तस्मात् तेषु लक्षणाभावोऽनुपपन्न इति नान्यलक्षणोपपत्तेः यथाऽयमन्येषु वासःसु लक्षणानामुपपत्तिं पश्यति नैवमलक्षितेषु सोऽयंलक्षणाभावं पश्यन्नभावेनार्थं प्रतिपद्यते इति ॥ ९ ॥

तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥

तेषु वासःसु लक्षितेषु सिद्धिर्विद्यमानता येषां भवति न तेषामभावो लक्षणानाम्, यानि च लक्षितेषु विद्यन्ते लक्षणानि, तेषामलक्षितेष्वभाव इत्यहेतुः। यानि खलु भवन्ति तेषामभावो व्याहत इति ॥ १० ॥

न लक्षणावस्थितार्थसिद्धेः ॥ ११ ॥

न ब्रूमो यानि लक्षणानि भवन्ति तेषामभाव इति।

गुणकर्मादिनिर्लक्षणं न सम्भवति तथाप्यनक्षणेनैव तल्लक्षितं भवति अनीलमानयेत्युक्ते नीलाभावो हि इतरव्यावर्त्तकतया लक्षणम् अतोऽभावो नाप्रामाणिक इति भावः ॥ ८ ॥

आक्षिप्य समाधत्ते।—असति प्रतियोगिन्यभावो वक्तुं न शक्यते सति च प्रतियोगिनि कथं तदभाव इति चेन्नान्यत्र लक्षणेन सत्त्वेनार्थात् प्रतियोगिनः उपपत्तेरभावव्यवहारोपपत्तेः; न हि तत्रैव प्रतियोगिनः सत्त्वमपेक्षितम् ॥ ९ ॥

शङ्कते।—लक्षितेषु लक्षणस्य तत्सिद्धेः व्यावर्त्तकत्वसिद्धेरलक्षितेषु अभावेषु अहेतुः अहेतुत्वं व्यावृत्यहेतुत्वम् अभावस्य लक्षणाभावान्निःस्वरूपस्य न व्यावर्त्तकत्वमिति भावः ॥ १० ॥

किन्तु केषुचिल्लक्षण्यान्यवस्थितानि अनवस्थितानि केषुचिदपेक्ष-माणो येषु लक्षणानां भावं न पश्यति तानि लक्षणाभावेन प्रतिपद्यत इति ॥ ११ ॥

प्रागुत्पत्तेरभावोपपत्तेश्च ॥ १२ ॥

अभावश्चैतं खलु भवति प्राक् चोत्पत्तेरविद्यमानता उत्पन्नस्य चात्मनो ज्ञानादविद्यमानता, तत्रालक्षितेषु वासःसु प्रागुत्पत्तेरविद्यमानतालक्षणो लक्षणानामभावो नेतर इति। आप्तोपदेशः शब्द इति प्रमाणभावे विशेषणं ब्रुवता नाना-प्रकारः शब्द इति ज्ञाप्यते तस्मिन् सामान्येन विचारः किं नित्योऽथानित्य इति ॥ १२ ॥

विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः ॥ १३ ॥

आकाशगुणः शब्दो विभुर्नित्योऽभिव्यक्तिधर्मक इत्येके, गन्धादिसहवृत्तिर्द्रव्येषु मन्निविष्टो गन्धादिवदवस्थितोऽभि-व्यक्तिधर्मक इत्यपरे, आकाशगुणः शब्द उत्पत्तिनिरोधधर्मको बुद्धिवदित्यपरे, महाभूतसङ्घोभजः शब्दोऽनाश्रित उत्पत्ति-

---

समाधत्ते।—पूर्वपक्षो न युक्तः प्रतियोगिनो लक्षणस्य यदवस्थितमवस्थानं तस्यापेक्षया यत्र तादृशसिद्धिः अयमर्थः प्रतियोगिस्वरूपज्ञानादेवाभावस्वरूपनिरूपण-सम्भवान्नाभावलक्षणापेक्षेति भावः ॥ ११ ॥

प्रमेयसिद्धिरिति। मरुकप्रत्यानुवर्त्तते प्रतियोगिन उत्पत्तेः प्राक् अभावस्य उपपत्तेः उपलम्भात् घटो भविष्यतीत्यादिप्रागभावविषयकप्रत्यक्षस्य सार्वलौकिक-त्वादिति भावः चकारेण ध्वंसादेरपि प्रत्यक्षसिद्धत्वं समुच्चीयते चेष्टाया नित्या-धारत्वेन न प्रामाण्यं वस्तुतो लिप्यादिवत्सांकेतिकत्वात् तस्याप्यनुमाने शब्दे वाक्य-भाव इति ॥ १२ ॥

समाप्तं प्रमाणचतुष्टयप्रकरणम् ॥ २० ॥

धर्मको निरोधधर्मक इत्यन्ये, अतः संशयः किमत्र तत्त्वमिति ॥ १३ ॥

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च॥१४॥

अनित्यः शब्द इत्युत्तरम्, कथम्? आदिर्योनिः कारणम्, आदीयतेऽस्मादिति कारणवदनित्यं दृष्टं संयोगविभागजश्च शब्दः कारणवत्त्वादनित्य इति, का पुनरियमर्थदेशना कारणवदिति उत्पत्तिधर्मकत्वादनित्यः शब्द इति। भूत्वा न भवति विनाशधर्मक इति, सांशयिकमेतत् किमुत्पत्तिकारणं संयोगविभागौ शब्दस्य, आहोस्विदभिव्यक्तिकारणमित्यत आह। ऐन्द्रियकत्वात् इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियः। किमयं व्यञ्जकेन समानदेशोऽभिव्यज्यते रूपादिवत्। अथ संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नो गृह्यत इति, संयोगनिवृत्तौ शब्दग्रहणान्न व्यञ्जकेन समानदेशस्य ग्रहणम्। दारुव्रश्चने दारुपरशुसंयोगनिवृत्तौ दूरस्थेन शब्दो गृह्यते न च व्यञ्जकाभावे व्यङ्ग्यस्य ग्रहणं भवति, तस्मान्न व्यञ्जकः संयोगः। उत्पादके तु संयोगे संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नस्य ग्रहणमिति। इतश्च शब्द उत्पद्यते नाभिव्यज्यते कृतकवदुपचारात् तीव्रं मन्दमिति कृतकमुपचर्यते तीव्रं सुखं मन्दं सुखं तीव्रं दुःखं मन्दं दुःखमिति उपचर्यते च तीव्रः शब्दो मन्दः शब्द इति। व्यञ्जकस्य तथाभावाद् ग्रहणस्य तीव्रमन्दता रूप-

---

वेदस्य प्रामाण्यमाप्तप्रामाण्यात् सिद्धं न चेदं युज्यते वेदस्य नित्यत्वादित्याशङ्क्याह वर्णानामनित्यत्वात् कथं तत्समुदायरूपस्य वेदस्य नित्यत्वमित्याशयेन शब्दानित्यत्वप्रकरणमारभते तत्र सिद्धान्तसूत्रम्। शब्दोऽनित्य इत्यादिः पूरणीयम् आदिमत्त्वात् सकारणकत्वात्, ननु न सकारणकत्वं कण्ठताल्वाद्यभिघातादेर्व्यञ्जकत्वेनाभ्युपगतेः

वदिति चेन्न अभिभवोपपत्तेः संयोगस्य व्यञ्जकस्य तीव्रमन्दतया शब्दग्रहणस्य तीव्रमन्दता भवति न तु शब्दो भिद्यते यथा प्रकाशस्य तीव्रमन्दतया रूपग्रहणस्येति तन्न नैवम् अभिभवोपपत्तेः, तीव्रो भेरीशब्दो मन्दं तन्त्रीशब्दमभिभवति न मन्दः, न च शब्दग्रहणमभिभावकं शब्दस्य न भिद्यते शब्दे तु भिद्यमाने युक्तोऽभिभवः तस्मादुत्पद्यते शब्दो नाभिव्यज्यत इति, अभिभवानुपपत्तिश्च व्यञ्जकसमानदेशस्याभिव्यक्तौ प्राप्त्यभावात् व्यञ्जकेन समानदेशोऽभिव्यज्यते शब्द इत्येतस्मिन् पक्षे नोपपद्यतेऽभिभवः, न हि भेरीशब्देन तन्त्रीस्वनः प्राप्त इति, अप्राप्ते अभिभव इति चेत् शब्दमात्राभिभवप्रसङ्गः। अथ मन्येताऽसत्यां प्राप्तावभिभवो भवति इति। एवं सति यथा भेरीशब्दः कञ्चित्तन्त्रीस्वनमभिभवति। एवमन्तिकस्योपादानमिव दवीयस्योपादानमपि तन्त्रीस्वनं नाभिभवेत् अप्राप्तेरविशेषात् तत्र कञ्चिदेव भेर्य्यां प्रणादितायां सर्वलोकेषु समानकालास्तन्त्रीस्वना न श्रूयेरन् इति। नानाभूतेषु शब्दसन्तानेषु सत्सु श्रोत्रप्रत्यासत्तिभावेन कस्यचिच्छब्दस्य तीव्रेण मन्दस्याभिभवो युक्त इति। कः पुनरयमभिभवो नाम ? ग्राह्यसमानजातीयग्रहणमभिभवः। यथोक्तप्रकाशस्य ग्रहणार्हस्यादित्यप्रकाशेनेति ॥ २४ ॥

अत आह—ऐन्द्रियकत्वादिति। सामान्यवत्त्वे सति बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः, परे तु ऐन्द्रियकत्वं लौकिकप्रत्यक्षविशेष्यत्वं सामान्यसमवाययोस्तु न तथात्वं इति जातित्वादिना विशेष्यत्वसम्भवेऽपि जातित्वादेरप्रत्यक्षत्वान्न व्यभिचारः मनस इन्द्रियत्वाभावाच्च नात्मनि व्यभिचार आत्मन ऐन्द्रियकत्वाभावादित्याहुः अप्रयोजकत्वमाशङ्क्याह—कृतकेति। कृतके घटादौ यथा उपचारो ज्ञानं तथैव कार्यत्वप्रकारकप्रत्यक्षविषयत्वादित्यर्थः तथाच कार्यत्वेनानाद्यार्यसार्वलौकिक-

न घटाभावसामान्यनित्यत्वात् नित्येष्वप्य-नित्यवदुपचाराच्च ॥ १५ ॥

न खलु आदिमत्त्वादनित्यः शब्दः, कस्मात्? व्यभिचारात्। आदिमतः खलु घटाभावस्य दृष्टं नित्यत्वं, कथमादिमान् कारणविभागेभ्यो हि घटो न भवति कथमस्य नित्यत्वं योऽसौ कारणविभागेभ्यो न भवति न तस्याभावो भावेन कदाचि-न्निवर्त्तत इति, यदप्यैन्द्रियकत्वात् तदपि व्यभिचरति। ऐन्द्रिय-कञ्च सामान्यं नित्यञ्चेति, यदपि कृतकवदुपचारादिति तदपि व्यभिचरति नित्येष्वनित्यवदुपचारो दृष्टः यथाहि भवति वृक्षस्य प्रदेशः, कम्बलस्य प्रदेशः, एवमाकाशस्य प्रदेशः, आत्मनः प्रदेश इति भवतीति ॥ १५ ॥

तत्त्वभावतयोर्नानात्वविभागादव्यभिचारः ॥ १६ ॥

नित्यमित्यत्र किं तावत्तत्त्वम्। आत्मान्तरस्यानुत्पत्ति-धर्मकस्यात्महानानुपपत्तिर्नित्यत्वम्। तत्त्वाभावे नोपपद्यते, भावं तु भवति यत् तत्त्वात्मा न महानासीत् यद्भूत्वा न भवति न जातु तत् पुनर्भवति तत्रानित्य इव नित्यो घटाभावो इत्यर्थः

प्रत्यक्षबलादनित्यत्वमेव सिध्यति, केचित्तु उपचाराविनाभित्वात् कृतकवत् इति दृष्टान्त इति परे तु कृतकवदुपचारात् कृतकसुखदुःखादिवद्व्यवहारात्, यथाहि सुखादौ तीव्रमन्दादिव्यवहारः शब्देऽप्येवं न तु नित्ये तथेत्याहुः ॥ १५ ॥

यथा श्रुतेः हेतूनां व्यभिचारमाशङ्क्य ते। नीत्वा हेतवः घटाभावस्य घटध्वंसस्य नित्यत्वादविनाभित्वादादिमत्त्वं व्यभिचारि ऐन्द्रियकत्वं सामान्ये व्यभिचारि-नित्येष्वनित्यवदुपचारात् यथा घटाकाशसुत्पन्नम् अहं सुखी जात इत्यादि ॥ १५ ॥

प्रथमे व्यभिचारं परिहरति।—तत्त्वस्य पारमार्थिकस्य भावस्य च भावात्मस्य भेदस्य विभागात् विवेकात्र व्यभिचारः ध्वंसेऽपि उत्पत्तिमत्त्वलक्षणम् आदिमत्त्वं

इति, तत्र यथाजातीयकः शब्दो न तथाजातीयकं कार्यं किञ्चिन्नित्यं दृश्यत इत्यव्यभिचारः। यदपि सामान्यनित्यत्वादिति इन्द्रियप्रत्यासत्तिग्राह्यमैन्द्रियकमिति ॥ १६ ॥

सन्तानानुमानविशेषणात् ॥ १७ ॥

नित्ये व्यभिचार इति प्रकृतम्। नैन्द्रियग्रहणसामर्थ्याच्छब्दस्यानित्यत्वं किं तर्हीन्द्रियप्रत्यासत्तिग्राह्यत्वात् सन्तानानुमानं तेनानित्यत्वमिति यदपि नित्येष्वप्यनित्यत्ववदुपचारादिति न ॥ १७ ॥

कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वप्यव्यभिचार इति ॥ १८ ॥

एवमाकाशप्रदेश आत्मप्रदेश इति नात्राकाशात्मनोः कारणद्रव्यमभिधायते यथा कृतकस्य, कथं ह्यविद्यमानमभिधीयते अविद्यमानता च प्रमाणतोऽनुपलब्धेः, किं तर्हि, तत्राभिधीयते संयोगस्याव्याप्यवृत्तित्वं परिच्छिन्नेन द्रव्येणाकाशस्य संयोगो नाकाशं व्याप्नोति अव्याप्य वर्त्तत इति, तदस्य कृतकेन द्रव्येण सामान्यं न ह्यामलकयोः संयोग आश्रयं व्याप्नोति सामान्यकृता च भक्तिराकाशस्य प्रदेश इति। अनेनात्मप्रदेशो व्याख्यातः संयोगवच्च शब्दबुद्ध्यादीनामव्याप्य-

---

नैकालिकत्वरूपनित्यत्वाभावरूपस्यानित्यत्वस्यैव वाधिनाश्रित्वानित्यत्वमौपचारिकमतो न व्यभिचारः आदिमत्त्वं प्रागभावावच्छिन्नसत्त्वं न चैतदभावे इति वार्थः ॥ १६ ॥

द्वितीये व्यभिचारमुद्धरति।—सन्तानस्यानुमानेऽनुमितिकरणे लिङ्गे विशेषणात् सन्तानः सन्तन्यमानः एकधर्मावच्छिन्नत्वेन ज्ञायमानः तेन सामान्यवत्त्वे सतीति विशेषणीयमिति ॥ १७ ॥

तृतीये व्यभिचारं वारयति।—आकाशे हेतुर्वास्त्येव आकाशे प्रादेशिक-

इत्तिरिति। परीक्षिता च तीव्रमन्दता शब्दतत्त्वं न भिनक्तीति। कस्मात्? पुनः सूत्रकारस्यात्मनश्चैवं सूत्रं न श्रूयत इति, शीलमिदं भगवतः सूत्रकारस्य बहुष्वधिकरणेषु हौ पक्षौ न व्यवस्थापयति तत्र शास्त्रसिद्धान्तात् तत्त्वावधारणं प्रतिपत्तुमर्हतीति मन्यते शास्त्रसिद्धान्तस्तु न्यायसमाख्यातमनुमतं बहुशास्त्रमनुमानमिति। अथापि खल्विदमस्ति इदं नास्तीति कुत एतत् प्रतिपत्तव्यमिति प्रमाणत उपलब्धेरनुपलब्धेश्चेति। अविद्यमानस्तर्हि शब्दः॥ १८॥

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च॥ १९॥

प्रागुच्चारणान्नास्ति शब्दः। कस्मात्? अनुपलब्धेः सतोऽनुपलब्धिरावरणादिभ्य एतन्नोपपद्यते, कस्मात्? आवरणादीनामनुपलब्धिकारणानामग्रहणात्। अनेनाहृतः शब्दो नोपलभ्यते असन्निकृष्टस्येन्द्रियव्यवधानादित्येवमादि अनुपलब्धिकारणं न गृह्यत इति सोऽयमनुच्चारितो नास्तीति, उच्चारणमस्य व्यञ्जकं तदभावात् प्रागुच्चारणादनुपलब्धिरिति। किमिदमुच्चारणं नामेति? विवक्षाजनितेन प्रयत्नेन कोष्ठ्यस्य वायोः प्रेरितस्य कण्ठताल्वादिप्रतिघातः। यथास्थानं प्रतिघातादर्णाभिव्यक्तिरिति। संयोगविशेषो वै प्रतिघातः प्रतिघिद्यश्च संयोगस्य व्यञ्जकत्वम्। तस्मान्न व्यञ्जकाभावादग्रहणम्

व्यवहारस्तु गौणः, प्रदीपशब्देन कारणद्रव्यस्य कारणवती द्रव्यस्याभिधानान्न चाकार्यं तादृशं तादृशत्वं वा साध्यमस्त्वान्न व्यभिचारः, एवं सुखी जात इत्यादौ सुखाद्युत्पत्तिरेव विषय इति भावः॥ १८॥

न चोच्चारितत्वनामप्रयोजकत्वं विपक्षबाधकसत्त्वादित्याह।—शब्दो यदि नित्यः स्यादुच्चारणात् प्रागप्युपलभ्येत श्रोत्रसन्निकर्षसत्त्वान्न चाव प्रतिबन्धकमस्तीत्याह—

अपि त्वभावादेवेति सोऽयमुच्चार्यमाणः श्रूयते श्रूयमाणश्च भूत्वा भवतीति अनुभीयते जहीं चोच्चारणाच्छ्रूयते स भूत्वा न भवतीति अभावाच्च श्रूयत इति कथम् आवरणाद्यनुपलब्धेरित्युक्तं तस्मादुत्पत्तितिरोभावधर्मकः शब्द इति ॥ १८ ॥

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः॥२०॥

एवञ्च मति तत्त्वं पांशुभिरिवावाकिरन्निदमाह—यद्यनुपलम्भादावरणं नास्ति आवरणानुपलब्धिरपि तर्ह्यनुपलम्भान्नास्तीति तस्या अभावादप्रतिषिद्धमावरणमिति कथं पुनर्जानीतेऽभावान्नावरणानुपलब्धिरुपलभ्यत इति किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वात् समानम्। अयं खल्वावरणमनुपलभमानः प्रत्यात्ममेव संवेदयते नावरणमुपलभ्य इति यथाकुड्ये नाहतस्यावरणमुपलभमानः प्रत्यात्ममेव संवेदयति सेयमावरणोपलब्धिवदावरणानुपलब्धिरपि संवेद्येवेति एवञ्च सत्यपहतविषयमुत्तरवाक्यमस्तीति अभ्यनुज्ञावादेनतूच्यते जातिवादिना ॥ २० ॥

अनुपलम्भात्प्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भात् ॥ २१ ॥

आवरणेति।—आवरणादेः प्रतिबन्धकस्यानुपलब्ध्या अभावनिर्णयात् देशान्तरगमनस्तु शब्दस्यामूर्त्तत्वान्न सम्भाव्यते अतीन्द्रियानल्पप्रतिबन्धकत्वकल्पनामपेक्ष्य शब्दानित्यत्वकल्पनैव लघीयसीति भावः ॥ १९ ॥

भाष्यस्य पूर्वपक्षपरं सूत्रद्वयम्। यथा त्वया आवरणस्यानुपलब्ध्या अभाव इत्युच्यते तथा आवरणानुपलब्धेरनुपलम्भात्तदभाव आवरणोपलब्धिरेव स्यात्, यदि वा आवरणानुपलब्धेरनुपलम्भेऽपि नावरणानुपलब्धेरभावस्तदा आवरणस्यानुपलम्भादपि नावरणस्यानुपपत्तिरित्यर्थः ॥ २० ॥ २१ ॥

यथानुपलभ्यमानाऽप्यावरणानुपलब्धिरस्ति एवमनुपलभ्यमानमप्यावरणमस्तीति यद्यभ्यनुजानाति भवाननुपलभ्यमानाप्यावरणानुपलब्धिरस्ति एवमनुपलभ्यमानमप्यावरणमस्तीति। यद्यभ्यनुजानाति न चानुपलभ्यमाना नावरणानुपलब्धिरस्तीति अभ्यनुज्ञाय च वदति नास्त्यावरणमनुपलब्धादिति। एतस्मिन्नप्यभ्यनुज्ञावादे प्रतिपत्तिनियमो नोपपद्यत इति ॥ २१ ॥

अनुपलभ्यात्मकत्वादनुपलब्धेरहेतुः ॥ २२ ॥

यदुपलभ्यते तदस्ति यन्नोपलभ्यते तन्नास्तीति अनुपलभ्यात्मकमसदिति व्यवस्थितम् उपलब्ध्यभावस्यानुपलब्धिरिति सेयमभावत्वान्नोपलभ्यते सच्च खल्वावरणं तस्योपलब्ध्या भवितव्यम्। न चोपलभ्यते तस्मान्नास्तीति। तच्च यदुक्तं नावरणानुपपत्तिरनुपलब्धादित्ययुक्तमिति ॥ २२ ॥

अस्पर्शत्वात् ॥ २३ ॥

अथ शब्दस्य नित्यत्वं प्रतिजानानः कस्मादेवं प्रतिजानीते, अस्पर्शमाकाशं नित्यं दृष्टमिति तथा च शब्द इति साऽदमुभयतः सव्यभिचारः स्पर्शवांस्त्वाणुर्नित्यः अस्पर्शश्च कर्माऽनित्यं दृष्टम् अस्पर्शत्वादित्येतस्य साध्यसाधर्म्येणोदाहरणम् ॥ २३ ॥

न कर्मानित्यत्वात् ॥ २४ ॥

साध्यवैधर्म्येणोदाहरणम् ॥ २४ ॥

सिद्धान्तसूत्रम्।—आवरणानुपलब्धेरनुपलब्धादावरणोपलब्धिरिति ज्ञात्युत्तरम् अहेतुः न सम्यक्प्रतिषेधसाधनम् अनुपलब्धेरावरणानुपलब्धेरनुपलब्ध्यात्मकत्वादनुपलब्ध्याभावात्मकत्वात्तस्य च सत्त्वेव सुग्रहत्वात्तदनुपलब्धिरसिद्धेति भावः ॥ २२ ॥

सम्प्रतिपत्तसाधकते।—शब्दो नित्यः अस्पर्शत्वाद्गगनवदिति भावः ॥ २३ ॥

नाणुनित्यत्वात् ॥ २५ ॥

उभयस्मिन्नुदाहरणे व्यभिचाराच्च हेतुः ॥ २५ ॥

सम्प्रदानात् ॥ २६ ॥

अयं तर्हि हेतुः । सम्प्रदीयमानमवस्थितं दृष्टं, सम्प्रदीयते च शब्द आचार्येणान्तेवासिने तस्मादवस्थित इति ॥ २६ ॥

तदन्तरालानुपलब्धेरहेतुः ॥ २७ ॥

येन सम्प्रदीयते यस्मै च तयोरन्तरालेऽवस्थानमस्य केन लिङ्गेनोपलभ्यते सम्प्रदीयमानो ह्यवस्थितः सम्प्रदातुरपैति सम्प्रदानस्य प्राप्नोतीत्यवर्जनीयमेतत् ॥ २७ ॥

अध्यापनादप्रतिषेधः ॥ २८ ॥

अध्यापनं लिङ्गम् असति सम्प्रदानेऽध्यापनं न स्यादिति ॥ २८ ॥

न सत्प्रतिपक्षत्वदीयहेतोरनैकान्तिकत्वादित्याह ।—अस्मदर्थत्वं न शब्दनित्यत्वसाधकं कर्मणि व्यभिचारात् ॥ २४ ॥

अनैकान्तिकमपि साधकं स्यादत्राह ।—अनैकान्तिकस्य साधकत्वेऽणोः परमाणोर्नित्यत्वं न स्यादूष्मवत्त्वादिना तत्रानित्यत्वानुमानापत्तेरित्यर्थः ॥ २५ ॥

शङ्कते ।—गुरवो शिष्याय विद्यायाः सम्प्रदानात् तथा च शब्दस्य प्राक् सत्त्वसिद्धं तथा च "तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति" इति न्यायान्नित्यत्वमर्थसिद्धमिति भावः ॥ २६ ॥

सिद्धान्तसूत्रम् ।—शिष्ये उपसन्ने गुरुरध्यापयति यदि च शब्दो नित्यः स्यात्तदा शिष्यागमनानन्तरमध्यापनात् पूर्वमपि शब्द उपलब्धेत्यनुपलम्भाच्च नास्ति शब्द इत्यतस्त्वदुक्तो न हेतुः ॥ २७ ॥

पूर्वपक्षसूत्रम् ।—मदीयहेतोः प्रतिषेधो न युक्तः, कुतः ? अध्यापनात् । यदि

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः॥२९॥

समानमध्यापनमुभयोः पक्षयोः संशयानतिवृत्तेः किमाचार्यस्यः शब्दोऽन्तेवासिनमापद्यते तदध्यापनम्। आहोस्विन्नृत्योपदेशवदृष्टहीतस्यानुकरणमध्यापनमिति। एवमध्यापनमलिङ्गं सम्प्रदानस्येति ॥ २९ ॥

अभ्यासात् ॥ ३० ॥

अयं तर्हि हेतुः। अभ्यस्यमानमवस्थितं दृष्टं पञ्चकृत्वः पश्यतीति, रूपमवस्थितं पुनः पुनर्दृश्यते, भवति च शब्देऽभ्यासः, दशकृत्वोऽधीतोऽनुवाको विंशतिकृत्वोऽधीत इति, तस्मादवस्थितस्य पुनः पुनरुच्चारणमभ्यास इति ॥ ३० ॥

नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ ३१ ॥

अनवस्थानेऽप्यभ्यासस्याभिधानं भवति। हिर्नृत्यतु भवान्

अन्तरालकाले शब्दो न स्यात् कथमध्यापनं घटेत? अनुपलब्धिस्तु शब्दस्य क्षणिकत्वाद्याभिघातरूपव्यङ्गकाभावादुपपद्यत इति भावः। आचार्यास्तु मूलसूत्रमेवं प्रचक्षते—विभक्तिव्यत्यासादहेतोस्तदन्तरालानुपलब्धिरर्थवत्ता च हेतोः स्वतस्त्वाभावात्तदन्तरालस्य स्वत्वध्वंसस्यानुपलब्धिरतो न दानमित्यर्थः। प्रतिषेधो न युक्तः न हि दानं ममाभिप्रेतं किन्त्वध्यापनं तच्च विद्यमानस्य शब्दस्यैवेति भावः॥ २८॥

सिद्धान्तसूत्रम्।—अन्यतरस्य पक्षस्यानित्यत्वसाधकस्याध्यापनात्यः प्रतिषेधः स न सम्भवति उभयोः पक्षयोरध्यापनस्य समानत्वादिति शेषः, अध्यापनं हि गुरुच्चारणानुच्चारणं शिष्योच्चारणानुकूलोच्चारणं वा तच्च स्थैर्यास्थैर्यपक्षयोस्तुल्यं न शब्दनित्यतायाः साधकं बाधकं वा, न चाध्यापनं दानं येन स्वत्वध्वंसपरस्वत्वापादनार्थं तस्य स्थैर्यमाश्रयेत् न वा दानं सम्भवति बहूनामेकदा स्वत्वविरोधात् परस्वदानासम्भवाच्च अपि तु मृत्याध्यापनादाविवोपदेशमात्रमिति भावः॥ २९॥

पूर्वपक्षसूत्रम्।—यद्धि स्थिरं तदभ्यस्यमानं दृष्टं, यथा दशकृत्वो रूपं पश्यति, एवं शतकृत्वोऽनुवाकमधीत इत्यभ्यासात् स्थैर्यं शब्दस्येति भावः॥ ३०॥

विर्नृत्यतु भवानिति, द्विरनृत्यत् चिरनृत्यत् द्विरग्निहोत्रं जुहोति द्विर्भुङ्क्ते एवं व्यभिचारात् प्रतिषिद्धहेतावन्यशब्दस्य प्रयोगः प्रतिषिध्यते ॥ ३१ ॥

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताऽभावः॥३२॥

यदिदमन्यदिति मन्यसे तत् स्वार्थेनानन्यत्वादन्यच्च भवति। एवमन्यताया अभावः, तत्र यदुक्तमन्यत्वेऽप्यभ्यासोपचारादित्येतदयुक्तमिति शब्दप्रयोगं प्रतिषेधतः शब्दान्तरप्रयोगः प्रतिषिध्यते ॥ ३२ ॥

तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ॥ ३३ ॥

अन्यस्मादन्यतामुपपादयति भवान् उपपाद्य चान्यत् प्रत्याचष्टे अनन्यदिति च शब्दमनुजानाति प्रयुङ्क्ते चानन्यदिति। एतत् ममासपदमन्यशब्दोऽयं प्रतिषेधेन सह समस्यते यदि चात्रोत्तरं पदं नास्ति कस्यायं प्रतिषेधेन सह समासः, तस्मात् तयोरनन्यान्यशब्दयोरितरोऽनन्यशब्दः इतरमन्यशब्दमपेक्षमाणः सिध्यतीति तत्र यदुक्तमन्यताया अभाव इत्येतदयुक्तमिति, अस्तु तर्हीदानीं शब्दस्य नित्यत्वम् ॥ ३३ ॥

उच्यते।—पूर्वपक्षो न युक्तः कुतः अन्यत्वे भेदेऽपि शब्दानाम् अध्ययनाभ्यासस्य उपचारात् सभ्यवात् न अभ्यासः स्थैर्यं साधयति द्विर्जुहोति चिर्नृत्यतीत्यादौ भेदेऽप्यभ्यासदर्शनादिति भावः ॥ ३१ ॥

अन्यतैव जगति नास्तीति कथमन्यत्वेऽप्यभ्यासोपपत्तिरिति तटस्थ आशङ्कते।—यदन्यस्मादन्यदुच्यते तत् स्वस्मादनन्यादभिन्नं तत्कथमन्यशब्देदाभेदयोर्विरोधादिति भावः स्वाभेदस्यावश्यकत्वमिति हृदयम् ॥ ३२ ॥

समाधत्ते।—तदभावेऽन्यत्वस्वाभावेऽनन्यतापि नास्ति तयोर्भेदाभेदयोः सिद्धेः

विनाशकारणानुपलब्धेः ॥ ३४ ॥

यदनित्यं तस्य विनाशः कारणाद्भवति, यथा लोष्टस्य कारणद्रव्यविभागात्, शब्दश्चेदनित्यस्तस्य विनाशो यस्मात् कारणाद्भवति तदुपलभ्येत न चोपलभ्यते तस्मान्नित्य इति ॥३४॥

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥३५॥

यथा विनाशकारणानुपलब्धेरविनाशप्रसङ्गः। एवमश्रवणकारणानुपलब्धेः सततं श्रवणप्रसङ्गः। व्यञ्जकाभावादश्रवणमिति चेत् प्रतिषिद्धं व्यञ्जकम्। अथाविद्यमानस्य निर्निमित्तं श्रवणमिति विद्यमानस्य निर्निमित्तो विनाश इति समानश्च दृष्टविरोधो निमित्तमन्तरेण विनाशे चाश्रवणे चेति ॥ ३५ ॥

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः॥३६॥

अनुमानाच्चोपलभ्यमाने शब्दस्य विनाशकारणे विनाशकारणानुपलब्धेरसत्त्वादित्यनपदेशः। यस्माद्विषाणी तस्मादश्व इति किमनुमानमिति चेत् सन्तानोपपत्तिः उपपादितः शब्दसन्तानः संयोगविभागजाच्छब्दाच्छब्दान्तरं ततोऽप्यन्यत् ततोऽप्यन्यदिति तत्र कार्यः शब्दः कारणशब्दं निरुणद्धि प्रति-

---

परस्यरूपापेक्षत्वात्, वस्तुतस्तु तयोर्भेद्य इतरस्य एकतरस्य अनश्यत्वस्य इतरापेक्षसिद्धेः इतरत्वस्य भेदस्य ज्ञानापेक्षामिद्धिर्यस्य तादृशत्वादित्यर्थः ॥ ३३ ॥

अनुते।—शब्दो नित्य इत्यादिः ॥ ३४ ॥

अनुपलब्धिरप्रत्यक्षमज्ञानं वा। आद्ये प्रतिबन्धिमाह।—यद्यप्रत्यक्षत्वादभावसिद्धिस्तदा श्रवणकारणस्याप्रत्यक्षत्वादश्रवणं न स्यादिति सततश्रवणप्रसङ्ग इत्यर्थः ॥ ३५ ॥

द्वितीये त्वाह।—अनुमानादिना उपलभ्यमाने विनाशकारणे अनुपलब्धेः

घातिद्रव्यसंयोगस्त्वन्यस्य शब्दस्य निरोधकः । दृष्टं हि तिरः-प्रतिकुड्यमन्तिकस्थेनाप्यश्रवणं शब्दस्य श्रवणं दूरस्थेनाप्यमति व्यवधान इति । घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदाद्वानाशब्दसन्तानोऽविच्छेदेन श्रूयते तत्र नित्ये शब्दे, घण्टास्थमन्यगतं वाऽवस्थितं सन्ताननिवृत्तिरभिव्यक्तिकारणं वाच्यं येन श्रुतिसन्तानो भवतीति शब्दभेदाभावात्तिश्रुतिभेद उपपादयितव्य इति । अनित्ये तु शब्दे घण्टाख्यं सन्तानवृत्तिसंयोगसहकारिनिमित्तान्तरं संस्कारभूतं पटुमन्दमिति वर्त्तते तस्यानुवृत्त्या शब्दसन्तानानुवृत्तिः । पटुमन्दभावाच्च तीव्रमन्दता शब्दस्य, तत्कृतश्च श्रुतिभेद इति न वै निर्निमित्तान्तरं संस्कार उपलभ्यते अनुपलब्धेर्नास्तीति ॥ ३६ ॥

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः॥ ३७॥

पाणिकर्मणा पाणिघण्टाप्रश्लेषो भवति, तस्मिंश्च सति शब्दसन्तानो नोपलभ्यते अतः श्रवणानुपपत्तिः । तत्र प्रतिघातिद्रव्यसंयोगः शब्दस्य निमित्तान्तरं संस्कारभूतं निरुणद्धीत्यनुमीयते । तस्य च निरोधाच्छब्दसन्तानो नोत्पद्यते अनुत्पत्तौ श्रुतिविच्छेदः । यथा प्रतिघातिद्रव्यसंयोगादिषोः

अभावात् त्वदीयो हेतुरनुपदेशः असाधकः असिद्धत्वात् अन्यभावबलेन विनाशकल्पनमिति भावः ॥ ३६ ॥

सिद्धान्तिनः सूत्रान्तरम् ।—शब्दायमाने कांस्यादौ पाणिकर्मनिमित्तस्य प्रश्लेषात् संयोगाच्छब्दाभावे उपलभ्यमाने शब्दाभावकारणस्य नानुपलब्धिरिति यथा श्रुतानुयायिनः परं तु पाणिकर्मनिमित्तस्य प्रश्लेषः सम्बन्धो यत्र स पाणिजः शब्दः अर्थात् उत्तरशब्दः ततः शब्दाभावे शब्दध्वंसे सति न विनाशकारणानुपलब्धिरित्यर्थ इत्याहुः, अन्ये तु पूर्वसूत्रे शब्दस्य तावद्देशात्मकः संस्कारविशेषो हेतुत्वेन

क्रियाहेतौ संस्कारे निरुद्धे गमनाभाव इति कम्पसन्तानस्य स्पर्शनेन्द्रियग्राह्यस्य चोपरमः कांस्यपात्रादिषु पाणिसंश्लेषो लिङ्गं संस्कारसन्तानस्येति, तस्मान्निमित्तान्तरस्य संस्कारभूतस्य नानुपलब्धिरिति ॥ ३७ ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्व-प्रसङ्गः ॥ ३८ ॥

यदि यस्य विनाशकारणं नोपलभ्यते तदवतिष्ठते अवस्थानाच्च तस्य नित्यत्वं प्रसज्यते। एवं यानि खल्विमानि शब्दश्रवणानि शब्दाभिव्यक्तय इति मतं न तेषां विनाशकारणं भवतोपपाद्यते अनुपपादनादनवस्थानमनवस्थानात् तेषां नित्यत्वं प्रसज्यत इति। अथ मैवन्तर्हि विनाशकारणानुपलब्धेः शब्दस्यावस्थानान्नित्यत्वमिति। कम्पसमानाश्रयस्य च नादस्य पाणिप्रश्लेषात् कम्पवत् कारणोपरमादभावः वैयधिकरण्ये हि प्रतिघातिद्रव्यप्रश्लेषात् समानाधिकरणस्यैवोपरमः स्यादिति ॥ ३८ ॥

अनित्यत्वादप्रतिषेधः ॥ ३९ ॥

यदिदमाकाशगुणः शब्द इति प्रतिषिध्यते अयमनुपपन्नः प्रतिषेधः अनित्यत्वाच्छब्दाश्रयस्य रूपादिसमानदेशस्याग्रहणं

तीव्रतीव्रतरमन्दमन्दतरत्वाच्छब्दोऽपि तादृशः तत्र चोत्तरोत्तरशब्दानां पूर्वपूर्वशब्दाश्रयकत्वं कल्पात इत्यर्थः। ननु तादृशसंस्कार एव नास्तीत्याह—पाणीति।—नानुपलब्धिः संस्कारस्येति शेषः पाणेर्निमित्तस्य प्रश्लेषात् घण्टादिसंयोगात् संस्काररूपकारणाभावद्वारा शब्दाभावे शब्दानुत्पत्तौ नानुपलब्धः संस्कारस्येत्यर्थ इत्याहुः॥ ३७ ॥ ३८॥

ननु घण्टादिपाणिसंयोगस्य शब्दनिर्वर्तकत्वे घण्टाद्याश्रय एव शब्दः स्यादित्या-

शब्दसन्तानोपपत्तेरस्पर्शव्यापिद्रव्याश्रयः शब्द इति ज्ञायते न च कम्पसमानाश्रय इति ॥ ३९ ॥

विभक्त्यन्तरोपपत्तेश्च समासे ॥ ४० ॥

प्रतिद्रव्यं रूपादिभिः सह सन्निविष्टः शब्दसमानदेशो व्यज्यत इति नोपपद्यते कथम् ? सन्तानोपपत्तेरिति चार्थः, तद्ग्राख्यातम् । यदि रूपादयः शब्दाश्च प्रतिद्रव्यं समस्ताः समुदितास्तस्मिन् समुदाये यो यथाजातीयकः सन्निविष्टस्तस्य तथाजातीयस्यैव ग्रहणेन भवितव्यं शब्दे रूपादिवत् तत्र योऽयं विभाग एकद्रव्ये नानारूपा भिन्नश्रुतयो विधर्माणः शब्दा अभिव्यज्यमानाः श्रूयन्ते । यच्च विभागान्तरं सरूपाः समानश्रुतयः सधर्माणः शब्दास्तीव्रमन्दधर्मतया भिन्नाः श्रूयन्ते तदुभयं नोपपद्यते नानाभूतानामुत्पद्यमानानामयं धर्मो नैकस्य व्यज्यमानस्येति । अस्ति चायं विभागो विभागान्तरञ्च तेन विभागोपपत्तेर्मन्यामहे न प्रतिद्रव्यं रूपादिभिः सह शब्दः सन्निविष्टो व्यज्यत इति ॥ ४० ॥

विकारादेशोपदेशात् संशयः ॥ ४१ ॥

द्विविधश्चायं शब्दो वर्णात्मको ध्वनिमात्रश्च, तत्र वर्णात्मनि

शङ्कायामाह ।—उक्तः प्रतिषेधो न सम्भवति अस्पर्शत्वात् शब्दाश्रयस्येति शेषः शब्दो हि न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावबदकारकं गुणपूर्वककार्यत्वादित्याशयः ॥ ३९ ॥

एतदेव व्युत्पादयितुमाह ।—समासे स्पर्शादिसमुदाये साहित्येन शब्दो वर्तत इति न युक्तं विभक्त्यन्तरस्य विभागान्तरस्य तारमन्दादिरूपपत्तेः अयमर्थः एकस्मिन्नेव शङ्खादौ तारमन्दादिनानाशब्दा जायन्ते गन्धादयस्तु विनाग्निसंयोगं न परावर्तन्त इति भावः ॥ ४० ॥

समाप्तं शब्दानित्यत्वप्रकरणम् ॥ १० ॥

तावत्—दध्यत्रेति। केचिदिकार इत्वं हित्वा यत्वमापद्यते इति विकारं मन्यन्ते। केचिदिकारस्य प्रयोगे विषयज्ञते यदिकारः स्थानं जहाति तत्र यकारस्य प्रयोगं ब्रुवते। संहितायां विषये इकारो न प्रयुज्यते तस्य स्थाने यकारः प्रयुज्यते स आदेश इति। उभयमिदमुपदिश्यते तच्च न ज्ञायते किं तत्त्वमिति। आदेशोपदेशस्तत्त्वम्। विकारोपदेशे ह्यन्वयस्याग्रहणाद्विकारानुमानं सत्यन्वये किञ्चिन्निवर्त्तते किञ्चिदुपजायत इति शक्येत विकारोऽनुमातुं, न चान्वयो गृह्यते, तस्माद्विकारो नास्तीति, भिन्नकरणयोश्च वर्णयोरप्रयोगे प्रयोगोपपत्तिः। विवृत्तकरण इकारः ईषत्स्पृष्टकरणो यकारः। तावितौ पृथक् करणाख्येन प्रयत्नेनोच्चारणीयौ तयोरेकस्याप्रयोगेऽन्यतरस्य प्रयोग उपपन्न इति अविकारे चाविशेषः। यत्रेमाविकारयकारौ न विकारभूतौ यतते यच्छति प्रायंस्त इति। इकार इदमिति। यत्र च विकारभूतौ इदं व्याहरति उभयत्र प्रयोक्तुरविशेषो यत्नः, श्रोतुश्च श्रुतिरित्यादेशोपपत्तिः। प्रयुज्यमानाग्रहणाच्च न खल्विकारः प्रयुज्यमानो यकारतामापद्यमानो गृह्यते। किं तर्हि इकारस्य प्रयोगे यकारः प्रयुज्यते तस्मादविकार इति। अविकारे च न शब्दान्वाख्यानलोपः। न विक्रियन्ते वर्णा इति न चैतस्मिन् पक्षे शब्दान्वाख्यानस्यासम्भवो येन वर्णविकारं प्रतिपद्येमहीति न खलु वर्णस्य वर्णान्तरं कार्यं नहीकाराद् यकार उत्पद्यते

प्रसङ्गाच्छब्दपरिणामवादं दूषयितुं संशयं प्रदर्शयति।—इको यणचीत्यादिना इकारादेर्विकारो यकारादिरिति केचित् सारं वा व्याचक्षते, परे तु इकारे प्रयोक्तव्ये यकारः प्रयोक्तव्य इत्यादेशमादिशन्ति अतश्च वर्णा विकारिणो न वेति संशयः विकारश्च स्वरूपस्य विनाशेऽविनाशे वा द्रव्यान्तरारम्भकत्वं यथा दुग्धादेर्दध्यारम्भ-

यकारादिकारः । पृथक्स्थानप्रयत्नोत्पाद्या ह्येते वर्णास्तेषामन्योन्यस्य स्थाने प्रयुज्यत इति युक्तम् । एतावच्चैतत् परिणामो विकारः स्यात् कार्य्यकारणभावो वा उभयञ्च नास्ति तस्माच्च सन्ति वर्णविकारा वर्णसमुदायविकारानुपपत्तिवच्च वर्णविकारानुपपत्तिः "अस्तेर्भूः" "ब्रुवो वचिः" इति यथा वर्णसमुदायस्य धातुलक्षणस्य क्वचिद्विषये वर्णान्तरसमुदायो न परिणामो नाकार्य्यं शब्दान्तरस्य स्थाने शब्दान्तरं प्रयुज्यते तथा वर्णस्य वर्णान्तरमिति इतश्च न सन्ति वर्णविकाराः ॥ ४१ ॥

प्रकृतिविवृद्धौ विकारविवृद्धेः ॥ ४२ ॥

प्रकृत्यनुविधानं विकारेषु दृष्टम् । यकारे ह्रस्वदीर्घानुविधानं नास्ति येन विकारत्वमनुमीयत इति ॥ ४२ ॥

न्यूनसमाधिक्योपलब्धेर्विकाराणामहेतुः ॥४३॥

द्रव्यविकारा न्यूनाः समा अधिकाश्च दृश्यन्ते तद्वयं विकारो न्यूनः स्यादिति द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः । अत्र नोदाहरणसाधर्म्यादहेतुरस्ति न वैधर्म्यात्

कत्वं बीजादेर्ह्यारभ्यकत्वञ्च सुवर्णादेरपि लौहाघातजन्यावयवसंयोगनाश्यात् अवयविनो नाशे सत्येव कुण्डलारभ्यकत्वं कपालादेश्च स्वरूपाविनाशेन घटारभ्यकत्वम् ॥ ४१ ॥

तत्र विकारनिराकरणाय सूत्रम् ।—न वर्णा विकारिणस्तथा सति तत्प्रकृतेरुपादानत्वाभिमतस्य विवृद्ध्या विकारस्यापि विवृद्ध्यापत्तेः महदल्पावयवारभ्यावयविनो महदल्पवत् ह्रस्वैकारारभ्यकारापेक्षया दीर्घैकारारभ्यकारस्य विवृद्धिः स्यादित्यर्थः, तस्मादादेश्यपक्षः श्रेयानिति भावः ॥ ४२ ॥

आक्षिपति ।—उक्तो हेतुर्न युक्तः विकाराणां प्रकृत्यपेक्षया न्यूनत्वस्य समत्वस्याधिकत्वस्य चोपपत्तेर्दर्शनात् यथा तूलकपरिमाणापेक्षया तद्विकारकुतूलपरि-

अनुपसंहृतश्च हेतुना दृष्टान्तो न साधक इति प्रतिदृष्टान्ते चानियमः प्रसज्येत। यथाऽनड्वुहस्थाने ऽश्वो वोढुं नियुक्तो न तद्विकारो भवति, एवमिवर्णस्य स्थाने यकारः प्रयुक्तो न विकार इति, न चात्र नियमहेतुरस्ति दृष्टान्तः साधको न प्रतिदृष्टान्त इति, द्रव्यविकारोदाहरणञ्च ॥ ४३ ॥

नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४४ ॥

अतुल्यानां द्रव्याणां प्रकृतिभावो विकल्पते विकारश्च प्रकृतेरनुविधीयते, न तु [illegible]इवर्णमनुविधीयते यकारः, तस्मादनुदाहरणं द्रव्यविकार इति ॥ ४४ ॥

द्रव्यविकारे वैषम्यवद्वर्णविकारविकल्पः ॥ ४५ ॥

यथा द्रव्यभावेन तुल्यायाः प्रकृतेर्विकारवैषम्यम्, एवं वर्णभावेन तुल्यायाः प्रकृतेर्विकारविकल्प इति ॥ ४५ ॥

न विकारधर्मानुपपत्तेः ॥ ४६ ॥

अयं विकारधर्मो द्रव्यसामान्ये, यदात्मकं द्रव्यं मृद्वा सुवर्णं

माणः; यथा वा न्यग्रोधबीजादुत्कृष्टेन नारिकेलीबीजेन न्यग्रोधादल्पो नारिकेलीतरुर्जन्यते कनकादिसमपरिमाणं कटकादि च यथा वा न्यूनाधिकनारिकेलीबीजाभ्यां समौ वृक्षौ न्यूनपरिमाणाच्च बटबीजात् महान् बटतरुरिति ॥ ४३ ॥

समाधत्ते।—नोक्तं समाधानं युक्तम् अतुल्यप्रकृतीनां भिन्नप्रकृतीना हि विकाराणां विकल्पः वैलक्षण्यं मयाभिहितं न हि बीजाद्विल्वाम्रवृक्षादिना वृक्षादेः क्रासवृद्धादिकं प्रकान्तमट्टकवैलक्षण्यन्तु तत्राप्यस्ति तथा च तदुक्तमुपचारवक्त्रमिति भावः ॥ ४४ ॥

शङ्कते।—द्रव्यत्वेन न्यग्रोधादिप्रकृतीनां तुल्यत्वेऽपि विकारवैषम्यं यथा एवमेव वर्णत्वेनातुल्ययोरपि ह्रस्वदीर्घयोर्यो विकारो यकारस्तस्य अविकल्प एकरूपः नानुपपन्नमित्यर्थः ॥ ४५ ॥

वा तस्यात्मनोऽन्वये पूर्वो व्यूहो निवर्त्तते, व्यूहान्तरञ्चोपजायते तं विकारमाचक्षते । न वर्णसामान्ये कश्चिच्छब्दात्मान्वयो य इत्वं जहाति यत्वञ्चापद्यते तत्र यथा सति द्रव्यभावे विकारवैषम्ये नाऽनडुहोऽस्त्रो विकारो विकारधर्मानुपपत्तेः, एवमिवर्णस्य न यकारो विकारो विकारधर्मानुपपत्तेरिति ॥ ४६ ॥

विकारप्राप्तानामपुनरावृत्तेः ॥ ४७ ॥

इतश्च न सन्ति वर्णविकाराः, अनुपपन्ना पुनरापत्तिः । कथम् ? पुनरापत्तेरननुमानादिति । इकारो यकारत्वमापन्नः पुनरिकारो भवति न पुनरिकारस्य स्थाने यकारस्य प्रयोगोऽप्रयोगश्चेत्यत्रानुमानं नास्ति ॥ ४७ ॥

सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४८ ॥

अननुमानादिति न इदं ह्यनुमानं, सुवर्णं कुण्डलत्वं हित्वा रुचकत्वमापद्यते रुचकत्वं हित्वा पुनः कुण्डलत्वमापद्यते, एवमिकारोऽपि यकारत्वमापन्नः पुनरिकारो भवतीति व्यभिचारादननुमानं, यथा पयो दधिभावमापन्नं पुनः पयो भवति किम् ? एवं वर्णानां न पुनरापत्तिः ॥ ४८ ॥

समाधत्ते ।—नाव द्रव्यविकारतुल्यता विकाराणां हि अयं धर्मो प्रकृत्यनुविधानं तद्धर्मे भेद इति प्रकृते तदनुपपत्तिः ह्रस्वत्वदीर्घत्वादिना प्रकृतिभेदेऽपि कार्य्यभेदाभावात् ॥ ४६ ॥

इतश्च न विकार इत्याह ।—विकारप्राप्तस्य न पुनः प्रकृतिरूपता दृष्टा न खलु दधि क्षीरतां पुनरापद्यते इकारस्तु यकारतां प्राप्तः पुनरिकारतामापद्यते दध्यत्रेत्युक्ता पुनरपि दधि अत्रेत्युच्यत एवेति भावः ॥ ४७ ॥

आक्षिपति ।—उक्तो हेतुर्न युक्तः सुवर्णादिकं हि कटकौभावं विहाय कुण्डलतामापन्नं पुनः कटकतामापद्यत एवेति भावः ॥ ४८ ॥

तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ ४९ ॥

अथ सुवर्णवत्पुनरापत्तिरिति सुवर्णोदाहरणोपपत्तिश्च न । अवस्थितं सुवर्णं हीयमानेनोपजायमानेन धर्मेण धर्मि भवति नैवं कश्चिच्छब्दात्मा हीयमानेनेत्वेनोपजायमानेन यत्वेन धर्मी गच्छति । तस्मात् सुवर्णोदाहरणं नोपपद्यत इति ॥ ४९ ॥

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः॥ ५० ॥

वर्णविकारा अपि वर्णत्वं न व्यभिचरन्ति । यथा सुवर्णविकारः सुवर्णत्वमिति ॥ ५० ॥

सामान्यवतो धर्मयोगो न सामान्यस्य॥ ५१ ॥

कुण्डलरुचकौ सुवर्णस्य धर्मौ न सुवर्णत्वस्य, एवमिकारयकारौ कस्य वर्णात्मनो धर्मौ वर्णत्वं सामान्यं न तस्येमौ वर्णौ भवितुमर्हतः । न च निवर्त्तमानो धर्म उपजायमानस्य प्रकृतिः । तच्च निवर्त्तमान इकारो न यकारस्योपजायमानस्य प्रकृतिरिति ॥ ५१ ॥

नित्यत्वेऽविकाराद्नित्यत्वे चानवस्थानात् ॥ ५२ ॥

इतश्च वर्णविकारानुपपत्तिः । नित्या वर्णा इत्येतस्मिन् पक्षे इकारयकारौ वर्णौ इत्युभयोर्नित्यत्वादविकारानुपपत्तिः । अनित्यत्वे विनाशित्वात् कः कस्य विकार इति । अथानित्या वर्णा

निराकरोति ।—सुवर्णविकारस्थले हि सुवर्णत्वादिना प्रकृतिता न तु कटकत्वादिना तत्रोभयमपि सुवर्णभावं न जहाति यदि हि सुवर्णतामपहाय कटकतामापन्नं पुनः सुवर्णता तदा व्यभिचारः शङ्क्येत न चैवं प्रकृते तु इकारतां हित्वा यकारतां प्राप्तस्यापीकारतापत्तिरस्त्येवेति दोषा दुर्व्यरिहर इति भावः ॥ ४९—५१ ॥

इति पक्षः एवमप्यनवस्थानं वर्णानां, किमिदमनवस्थानं वर्णानाम् उत्पद्य निरोधः । उत्पद्य निरुद्धे इकारे यकार उत्पद्यते यकारे चोत्पद्य निरुद्धे इकार उत्पद्यते इति कः कस्य विकारः तदेतदवगच्छन् सन्धाने सन्धाय चावयवे वेदितव्यमिति ॥ ५२ ॥

नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ ५३ ॥

नित्यपक्षे तु तावत्समाधिः । नित्या वर्णा न विक्रियन्त इति विप्रतिषेधः यथा नित्यत्वे सति किञ्चिदतीन्द्रियं किञ्चिदिन्द्रियग्राह्यमिन्द्रियग्राह्याश्च वर्णा एवं नित्यत्वे सति किञ्चिन्न विक्रियते वर्णास्तु विक्रियन्त इति विरोधादहेत्वाभासत्वम् । तद्धर्मविकल्पः, नित्यं नोपजायते नापैति अनुपजनापायप्रतिषेधम्, अनित्यं पुनरुपजनापाययुक्तं, न चान्तरेणोपजनापायौ विकारः सम्भवति, तद्यदि वर्णा विक्रियन्ते नित्यत्वमेषां निवर्त्तते । अथ नित्या विकारधर्मत्वमेषां निवर्त्तते सोऽयं विरुद्धो हेत्वाभासो धर्मविकल्प इति ॥ ५३ ॥

अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥ ५४ ॥

अविकारे मतयुक्तिमाह । —वर्णानां नित्यत्वे विकाराभ्युपगमादनित्यत्वे चाविरुद्धेनैकारप्रयत्नानन्तरमिकारनाशादिकारानुपपत्तिरित्यर्थः ॥ ५२ ॥

अथ विकारवादी नित्यत्वमतमाशङ्क्य परिहरति । —विकाराणां प्रतिषेधो न युक्तः नित्यानां धर्मविकल्पाद्धर्मस्य नानाविधत्वादतीन्द्रियत्वं चकारेणेन्द्रियकत्वं समुच्चीयते यथा हि नित्यानामाकाशादीनामतीन्द्रियत्वम् इन्द्रियकत्वेऽपि गोत्वादीनां नित्यत्वमेवमत्रेषां नित्यानामविकारित्वेऽपि वर्णानां विकारित्वं स्यादिति ॥ ५३ ॥

अनित्यपक्षे समाधिः। यथाऽनवस्थायिनां वर्णानां श्रवणं भवति एवमेषां विकारो भवतीति असम्बन्धादसमर्था अर्थप्रतिपादिका वर्णोपलब्धिर्न विकारेण सम्बन्धादसमर्था या गृह्यमाणा वर्णविकारमनुपपादयेदिति। तत्र यादृगिदं गन्धगुणा पृथिवी एवं शब्दसुखादिगुणापीति तादृगेतन्नवतीति। नच वर्णोपलब्धिर्वर्णनिवृत्तौ वर्णान्तरप्रयोगस्य निवर्त्तिका योऽयमिवर्णनिवृत्तौ यकारस्य प्रयोगो यद्ययं वर्णोपलब्ध्या निवर्त्तते तदा तत्रोपलभमान इवर्णो यत्वमापद्यत इति गृह्यते। तस्माद्वर्णोपलब्धिरहेतुर्वर्णविकारस्येति ॥ ५४ ॥

विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ५५ ॥

तद्धर्मविकल्पादिति न युक्तः प्रतिषेधः, न खलु विकारधर्मकं किञ्चित् नित्यमुपलभ्यत इति वर्णोपलब्धिवदिति न युक्तः प्रतिषेधः अवग्रहे हि दधि अत्रेति प्रयुज्य चिरं स्थित्वा ततः संहितायां प्रयुङ्क्ते दध्यत्रेति, चिरनिवृत्ते चायमिवर्णे यकारः प्रयुज्यमानः कस्य विकार इति प्रतीयते कारणाभावात् कार्य्याभाव इत्यनुयोगः प्रसज्यत इति ॥ ५५ ॥

अनित्यत्वमालम्ब्य स आह।—अनवस्थायिनोऽपि वर्णानां यथाश्रवणं भवत्येवं विकारोऽपि स्यादिति भावः ॥ ५४ ॥

उभयतोरयति।—उक्तः प्रतिषेधो न युक्तः विकारधर्मित्वे नित्यत्वासम्भवात् विकारो ह्यत्र स्वरूपपरित्यागेन रूपान्तरापत्तिः तथात्वे च नित्यत्वविरोधात्। न हि घटादेः कपालाद्युपादेयत्ववत् प्रकृते सम्भवति यकारकाले इकारानुपलब्धेः अनित्यत्वपक्षेऽपि प्रतिषेधो न युक्तः प्रत्यक्षं हि वर्णस्य द्वितीयक्षणे युज्यते विकारस्तु

प्रकृत्यनियमाद्वर्णविकाराणाम् ॥ ५६ ॥

इतश्च वर्णविकारानुपपत्तिः, इकारस्थाने यकारः श्रूयते यकारस्थाने खल्विकारो विधीयते, विध्यति, तद् यदि स्यात् प्रकृतिविकारभावो वर्णानां तस्य प्रकृतिनियमः स्यात् दृष्टो विकारधर्मित्वे प्रकृतिनियम इति ॥ ५६ ॥

अनियमे नियमान्नानियमः ॥ ५७ ॥

योऽयं प्रकृतेरनियम उक्तः स नियतो यथाविषयं व्यवस्थितः, नियतत्वान्नियम इति भवति, एवं सत्यनियमो नास्ति तत्र यदुक्तं प्रकृत्यनियमादित्येतदयुक्तमिति ॥ ५७ ॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥ ५८ ॥

नियम इत्यत्रार्थाभ्यनुज्ञा, अनियम इति तस्य प्रतिषेधः। अनुज्ञातनिषिद्धयोश्च व्याघातादनर्थान्तरत्वं न भवति। अनियमस्य नियतत्वान्नियमो न भवतीति नात्रार्थस्य तथाभावः प्रतिषिध्यते किं तर्हि तथाभूतस्यार्थस्य नियमशब्देनाभिधीय-

---

कालान्तरो यो न युज्यते दधीति शब्दानन्तरमेवेत्यादि शब्देन तस्य नाशादिति भावः ॥ ५५ ॥

इतश्च विकारानुपपत्तिरित्याह।—विकाराणां हि प्रकृतिनियमो यथा चीवदन्नोः प्रकृतिविकारभावो न तु वैपरीत्यं प्रकृते तु दध्यत्रेत्यादौ इकारः यकारप्रकृतिः, विध्यतीत्यादौ तु यकार इकारप्रकृतिरिति भावः ॥ ५६ ॥

अत्र कश्चवादी शङ्कते।—अनियमो य उक्तः स न युक्तः कुतः अनियतत्वस्य नियमादित्यर्थः ॥ ५७ ॥

समाधत्ते।—अनियमे नियमात् यच्चयाऽनियमप्रतिषेधः कृतः सयु न युक्तः।

मानस्य नियतत्वान्नियमशब्द एवोपपद्यते सोऽयं नियमादनियमे प्रतिषेधो न भवतीति, न चेयं वर्णविकारोपपत्तिः परिणामात् कार्यिकारणभावाद्वा ॥ ५८ ॥

गुणान्तरोपजन्त्युपमर्दह्रासवृद्धिश्लेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकारः ॥५९॥

किं तर्हि ? स्थान्यादेशभावादप्रयोगी प्रयोगो विकारशब्दार्थः स भिद्यते गुणान्तरापत्तिः उदात्तस्यानुदात्तभाव इत्येवमादिः। उपमर्दो नाम एकरूपनिवृत्तौ रूपान्तरोपजनः। ह्रासो दीर्घस्य ह्रस्वः, वृद्धिर्ह्रस्वस्य दीर्घः, तयोर्वा प्लुतः। लेशो लाघवं स्तै इत्यस्तेर्विकारः। श्लेष आगमः प्रकृतेः प्रत्ययस्य वा। एत एव विशेषा विकारा इति। एत एवादेशा एते चेद्विकारा उपपद्यन्ते तर्हि वर्णविकारा इति ॥ ५९ ॥

त्रै विभक्त्यन्ताः पदम् ॥ ६० ॥

यथादर्शनं विकृता वर्णा विभक्त्यन्ताः पदसंज्ञा भवन्ति।

कुतः ? नियमादियमार्थविरोधात्। अनियमो हि नियमाभावलक्षणः सति नियमासम्भवादिति भावः ॥ ५८ ॥

तदेवं वर्णानां प्रकृतिविकारभावं निरस्य स्वपक्षे विकारव्यवहारमुपपादयति।—तुशब्दः पूर्वपक्षं व्यावर्तयति। पूर्वस्मिन् पक्षे एतेभ्यः पूर्ववर्णविकारोपपत्तेर्वर्णविकारस्य एकवर्णप्रयोगे वर्णान्तरप्रयोगस्य उपपत्तेर्वर्णविकार इति व्यवह्रियते, तानेवाह—गुणान्तरेति। गुणान्तरापत्तिर्वर्णिनि सत्येव धर्मान्तरापत्तिः, यथोदात्तस्यानुदात्तत्वम्, उपमर्दो धर्मिनिवृत्तौ धर्मान्तरप्रयोगः, यथाऽलम्; ह्रासो दीर्घस्य ह्रस्वत्वं वृद्धिः ह्रस्वस्य दीर्घत्वं लेशः अल्पत्वं यथाऽस्तेरकारलोपः श्लेष आगमः, एतैः कारणैर्विकारव्यवहार इति ॥ ५९ ॥

समाप्तं शब्दपरिणामप्रकरणम् ॥ २२ ॥

शाब्दबोधे पदजन्यपदार्थोपस्थितेर्हेतुत्वात् तदुपपादनाय पदार्थं निरूपयितुं

विभक्तिर्द्वयी नामिक्याख्यातिकी च, ब्राह्मणः पचतीत्युदाहरणम्, उपसर्गनिपातास्तर्हि न पदसंज्ञाः लक्षणान्तरं वाच्यमिति, शिष्यते च खलु नामिक्या विभक्तेरव्ययाल्लोपः तयोः पदसंज्ञार्थमिति पदेनार्थसम्प्रत्यय इति प्रयोजनं नामपदस्याधिकृत्य परीक्षा गौरिति पदं खल्विदमुदाहरणम् ॥ ६० ॥

तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥ ६१ ॥

अविनाभाववृत्तिः सन्निधिः अविनाभावेन वर्त्तमानासु व्यक्त्याकृतिजातिषु गौरिति प्रयुज्यते तत्र न ज्ञायते किमन्यतमः पदार्थः उत सर्व इति । शब्दस्य प्रयोगसामर्थ्यात् पदार्थावधारणं तस्मात् ॥ ६१ ॥

या शब्दममूर्त्यागपरिग्रहसंख्याह्रासोपचयवर्णक्रमानुबन्धानां व्यक्तावुपचाराद्वाक्तिः॥६२॥

पदसंज्ञी निरूपयति ।—ये वर्णा विभक्त्यन्ताः पदं बहुत्वमविवक्षितं विभक्त्यर्थ सत्त्वमनपेक्षितं विभक्त्यर्थ सन्निकृष्टा वस्तुतस्तु नेदं पदं शाब्दबोधोपयोगि किन्तु इदमाकाङ्क्षास्वरूपमथवा विभक्तिर्वृत्तिरन्तःसत्त्वधर्मेण वृत्तिमत्त्वं पदत्वमिति इत्यस्य पदं निरूप्य तदर्थनिरूपणं सङ्गच्छते, यत्तु प्रसङ्गात् पदार्थनिरूपणमिति तन्न, पदनिरूपणस्याङ्गतत्वापत्तेः एकसूत्रस्य प्रकरणत्वाभावाच्च ॥ ६० ॥

तत्र पदं निरूपितं तदाश्रयत्वं पदार्थत्वं निरूपितं तत्रापि धात्वार्थस्य निर्विवादत्वाद्धात्वादिपदार्थं निरूपयितुमाह ।—व्यक्तिर्गवादिः कृतिः गोत्वादिः आकृतिरवयवसंस्थानविशेषः तेषां सन्निधिः सामीप्यं मिलनं तत्र सति उपचारात् ज्ञानात् तथा च त्रयाणाम् युगपत्प्रत्ययात् किमेतेषां प्रत्येकं पदार्थ उत समस्त इति संशय इत्यर्थः इदं भाष्यमिति कैश्चित् वस्तुतस्तु दुर्बोधात्स्वरसात् सूत्रमेव तदर्थं इत्यंशस्तु भाष्यकृतः पूरणमिति प्रतिभाति ॥ ६१ ॥

धारणात् तुलया धृतं चन्दनं तुलाचन्दनमिति, सामीप्यात् गङ्गायां गावश्चरन्तीति देशोऽभिधीयते सन्निकृष्टः, योगात् कृष्णेन रागेण युक्तः शाटकः कृष्ण इत्यभिधीयते, साधनात् अन्नं प्राणा इति। आधिपत्यात् अयं पुरुषः कुलम् अयं गोत्रमिति तत्रायं सहचरणाद्योगाद्वा जातिशब्दो व्यक्तौ प्रयुज्यत इति यदि गौरित्यस्य पदस्य न व्यक्तिरर्थोऽस्तु तर्हि ॥६४॥

आकृतिस्तदपेक्षत्वात् सत्त्व-व्यवस्थानसिद्धेः॥६५॥

आकृतिः पदार्थः, कस्मात्? तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः। सत्त्वावयवानां तदवयवानाञ्च नियतो व्यूह आकृतिः तस्यां गृह्यमाणायां सत्त्वव्यवस्थानं सिध्यति अयं गौरयमश्व इति नागृह्यमाणायां, यस्य ग्रहणात् सत्त्वव्यवस्थानं सिध्यति तं शब्दोऽभिधातुमर्हति सोऽस्यार्थ इति नैतदुपपद्यते यस्य जात्या योगस्तदत्र जातिविशिष्टमभिधीयते गौरिति। न चावयवव्यूहस्य जात्या योगः, कस्य तर्हि नियतावयवव्यूहस्य द्रव्यस्य तस्मान्नाकृतिः पदार्थः। अस्तु तर्हि जातिः पदार्थः॥६५॥

धृतं चन्दनं तुलाचन्दनमिति, सामीप्याद्गङ्गायां गावश्चरन्तीति, कृष्णद्रव्ययोगात् कृष्णः शाटक इत्युदाहरणीयं, प्राणसाधनादन्नं प्राणा इति, आधिपत्याद्राजैवास्य कुलमिति कुलाधिपतिः प्रतीयते, तथा च यथा गङ्गादिपदाद्गङ्गातीरत्वादिना बोधस्तथा गोपदादिनो गोत्वविशिष्टस्य व्यक्तौ लक्षणया बोधः, एतेन युगपदुभयशक्तिग्रहविरोधः, एकपदार्थयोः परस्परानन्वयस्य प्रत्युक्तः। गोत्वत्वे न रूपेण शक्तिग्रहात् तथैवोपस्थितिरतो निष्प्रकारकपदार्थोपस्थितिरपि नास्तीति मन्तव्यम् ॥ ६४ ॥

आकृतिरेव शक्येति मतमुपन्यस्यति।—आकृतिः पदार्थः, कुत? सत्त्वस्य प्राणिनो गवादेर्व्यवस्थानसिद्धेर्व्यवस्थितत्वसिद्धेस्तदपेक्षत्वादाकृतपेक्षत्वादयमर्थो गौरयमित्यादिव्यवहारस्याकृत्यपेक्षत्वादाकृतिरेव शक्येत्यर्थः ॥ ६५ ॥

व्यक्ताकृतियुक्तेऽप्यप्रसङ्गात्प्रोक्षणादीनां मृद्ग-वके जातिः ॥ ६६ ॥

जातिः पदार्थः, कस्मात् ? व्यक्ताकृतियुक्तेऽपि मृद्गवके प्रोक्षणादीनामप्रसङ्गादिति । गां प्रोक्षय, गामानय, गां देहीति नैतानि मृद्गवके प्रयुज्यन्ते, कस्मात् ? जातेरभावात् । अस्ति हि तत्र व्यक्तिरस्त्याकृतिः यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति ॥ ६६ ॥

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६७ ॥

जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते नाग्रह्यमाणायामाकृतौ व्यक्तौ जातिमात्रं गृह्यं गृह्यते तस्मान्न जातिः पदार्थः इति । न वै पदार्थेन भवितुं शक्यं कः खल्विदानीं पदार्थ इति ॥ ६७ ॥

व्यक्ताकृतिजातयस्तु पदार्थः ॥ ६८ ॥

तुशब्दो विशेषणार्थः । किं विशिष्यते प्रधानाङ्गभावस्या-

फलतस्तद् दूषयति ।—मृद्गवके व्यक्त्याकृतियुक्तेऽपि प्रोक्षणादीनामप्रसङ्गाज्जातिः पदार्थ इतरथा मृद्गवकस्यापि व्यक्तित्वाकृतिसत्त्वाच्च वैधप्रोक्षणादिप्रसङ्गादिति भावः ॥ ६६ ॥

केवलव्यक्त्याकृतिपक्षं निराकृत्य केवलजातिपक्षं निराकरोति ।—न जातिमात्रं पदार्थः जात्यभिव्यक्तौ जातिशब्दबोधस्य आकृतिव्यक्त्यपेक्षत्वादाकृतिव्यक्तिविषयकत्वनियमात् तयोरपि वाच्यत्वमावश्यकं अन्यथा विना तज्ज्ञानासम्भवात्, न च गोत्वप्रकारकताद्दशाकृतिविशिष्टशाब्दत्वस्य कार्यतावच्छेदकत्वात्तज्ज्ञानमिति वाच्यं, तथा सति गवादिपदस्य घटत्वादावपि शक्तिप्रसङ्गात्तत्तत्पदं स्ववाच्यमेवोपस्थापयति ॥ ६७ ॥

इत्थञ्च त्रयाणामपि वाच्यत्वं सिद्धमित्याह ।—तुशब्देनैकैकमात्रपदार्थत्वव्यव-

नियमेन पदार्थत्वमिति। यदा हि भेदविवक्षा विशेषगतिस्तदा व्यक्तिः प्रधानमङ्गन्तु जात्याकृती। यदा तु भेदोऽविवक्षितः सामान्यगतिस्तदा जातिः प्रधानमङ्गन्तु व्यक्त्याकृती स्वीकृते तदेतद्बहुलं प्रयोगेष्वाकृतेस्तु प्रधानभावः उत्प्रेक्षितव्यः। कथं पुनर्ज्ञायते नानाव्यक्त्याकृतिजातय इति लक्षणभेदात् तत्र तावत् ॥ ६८ ॥

व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः ॥ ६९ ॥

व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति न सर्वं द्रव्यं व्यक्तिः। यो गुणविशेषाणां स्पर्शान्तानां गुरुत्वघनत्वद्रवत्वसंस्काराणामव्यापिनः परिमाणस्याश्रयो यत्रासम्भवं तद्द्रव्यम्, मूर्त्तिः मूर्च्छितावयवत्वादिति ॥ ६९ ॥

आकृतिर्जातिलिङ्गाख्या ॥ ७० ॥

यथा जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं

च्छेदः पदार्थः इत्येकवचनन्तु तिसृष्वप्यर्केव शक्तिरिति सूचनाय विभिन्नशक्तौ कदाचित् कस्यचिदप्रसिद्धिः स्यात् शक्तेस्तुल्यत्वेऽपि व्यक्तेर्विशेष्यत्वात् प्राधान्यं तथैव शक्तियत्वात्। न चाकृत्यादिसाधारणशक्यनावच्छेदकाभावान्न शक्यैकमिति वाच्यं, तत्रा नियमे मानाभावात्, इदं गवादिपदमभिप्रेत्य तेन पश्वादिपदस्य जात्यवाचकत्वेऽपि न क्षतिः, जातिपदं वा धर्मपरं तथैव लक्षणस्य वक्ष्यमाणत्वात् ॥ ६८ ॥

तत्र के व्यक्त्यादय इत्याकाङ्क्षायामाह।--यद्यपि जात्याद्यैरपि व्यक्तित्वात् प्रमेयत्वमेव व्यक्तित्वं तथापि जात्याकृतिशक्तिविषयत्वेनार्के रिदं लक्षणं, तथाच गुणविशेषो जात्याकृतिसमानाधिकरणो गुणः संख्यादिभिन्नस्तदाश्रयः मूर्त्तिर्व्यक्तिरिति समानार्थकमित्यर्थः, परे तु गुणा रूपादयः विशेषाविशेषकाः उत्क्षेपणादयस्तै सहित आश्रयो द्रव्यं तेन जात्याश्रयो व्यक्तिरित्याशयः विशेषलक्षणमाह--मूर्त्तिरिति। मूर्त्तिसंज्ञानविशेषस्तदानित्याहुः, अत्र च मध्यपदलोपी समास इत्याशयः। अन्यत् व्यक्तेर्लक्षणं मूर्त्तिरिति सैव केत्याह—गुणविशेषाश्रय इति। गुणविशेषस्यावच्छिन्नपरिमाणस्याश्रय इत्यर्थ इत्याहुः ॥ ६९ ॥

विद्यात् । सा च नानासत्त्वानां तदवयवानाञ्च नियता-दृष्टादिति नियतावयवव्यूहाः खलु सत्त्वावयवा जातिलिङ्गं शिरसा पादेन गामनुमिन्वन्ति । नियतेच सत्त्वावयवानां व्यूहे सति गोत्वं प्रख्यायत इति । अनाकृतिव्यख्यायां जातौ मृत्सुवर्णं रजतमित्येवमादिष्वाकृतिर्निवर्त्तते जहाति पदार्थ-त्वमिति ॥ ७० ॥

समानप्रसवात्मिका जातिः ॥ ७१ ॥

या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु यया बहूनीत-रेतरतो न व्यावर्त्तन्ते योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम् । यश्च केषाञ्चिद्भेदं कुतश्चिद्भेदं करोति तत् सामान्यविशेषो जातिरिति ॥ ७१ ॥

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्य

द्वितीयमाह्निकम् ।

समाप्तश्चायं द्वितीयोऽध्यायः ।

आकृतिं लक्षयति ।—जातिलिङ्गमित्याख्या यस्याजातेर्गोत्वादेर्हि साक्षादि संस्थानविशेषो लिङ्गं तस्य च परम्परया द्रव्यवृत्तित्वं. जातिर्द्रव्यसमवायिकारणता-वच्छेदिका लिङ्गं धर्मो यस्याः सैत्यर्थ इति क्वचित् ॥ ७० ॥

जातिं लक्षयति ।—समानाकारकः प्रसवो बुद्धिजननम् यस्याः सा तथा च समानाकारबुद्धिजननयोग्यत्वमर्थः, समानाकारबुद्धिजननयोग्यधर्म-विशेषो नित्यानेकसमवेतरूपार्थ इत्यपि वदन्ति इदन्तु बोध्यम् एवं सत्याकृत्यविष-यको गवादिपदात् न शाब्दबोधः अनुभववलेन तथैव कार्यकारणभावकल्पना-दत्यलाघवाच्चोपदस्य गोत्वविशिष्टे शक्तिरेव स्यादिति ॥ ७१ ॥

समाप्तं शब्दशक्तिपरीक्षाप्रकरणम् ॥ २२ ॥

द्वितीयाध्यायस्य द्वितीयमाह्निकञ्च ॥ २ ॥

इति श्रीविश्वनाथभट्टाचार्यकृता न्यायसूत्रवृत्तौ विभागपरीक्षाद्वारकसाङ्ग-प्रमाणपरीक्षणं नाम द्वितीयाध्यायवृत्तिः समाप्ता ॥ २ ॥

तृतीयाध्यायस्य

प्रथमाह्निकम्।

परीक्षितानि प्रमाणानि, प्रमेयमिदानीं परीक्ष्यते तच्चात्मादीत्यात्मा विविच्यते। किं देहेन्द्रियमनोबुद्धिवेदनासङ्घातमात्रमात्मा आहोस्वित्तद्व्यतिरिक्त इति, कुतः संशयः व्यपदेशस्योभयथासिद्धेः क्रियाकरणयोः कर्त्रा सम्बन्धस्याभिधानं व्यपदेशः, स द्विविधः अवयवेन समुदायस्य मूलैर्वृक्षस्तिष्ठति स्तम्भैः प्रासादो ध्रियत इति। अन्येनान्यस्य व्यपदेशः परशुना वृश्चति, प्रदीपेन पश्यति। अस्ति चायं व्यपदेशः चक्षुषा पश्यति, मनसा विजानाति, बुद्ध्या विचारयति, शरीरेण सुखदुःखमनुभवतीति तत्र नावधार्य्यते किमवयवेन समुदायस्य देहादिसङ्घातस्य अथान्येनान्यस्य तद्व्यतिरिक्तस्य वेति अन्येनायमन्यस्य व्यपदेशः, कस्मात् ?

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ १ ॥

दर्शनेन कश्चिदर्थो गृहीतः स्पर्शनेनापि सोऽर्थो गृह्यते यमहमद्राक्षं चक्षुषा तं स्पर्शनेनापि स्पृशामीति यञ्चास्पार्क्षं स्पर्शनेन तं चक्षुषा पश्यामीति, एकविषयाविमौ प्रत्ययावेककर्त्तृकौ प्रतिसन्धीयेते नच सङ्घातकर्त्तृकौ नेन्द्रियैरेककर्त्तृकौ

तरुप्रभृतितुल्यता भवति यत्कृपासम्भरा
यदीयकरुणाकणान्तरति मोहजान्धं जनः।
विधाय हृदयाम्बुजे रुचिरवाक्प्रचाराय तां
नमामि परदेवतां सततमेव वाणीमहम्॥

अथावसरतः प्रमेयेषु परीक्षणीयेषु प्रथमोद्दिष्टमात्मादिषट्कं तृतीये परीक्षणीयं तेनात्मादिषट्कपरीक्षैवाध्यायार्थः तत्रात्मादिचतुष्कपरीक्षा प्रथमाह्निकार्थः

कर्तृको। तद्योऽसौ चक्षुषा त्वगिन्द्रियेण चैकार्थस्य सङ्गृहीता भिन्ननिमित्तावनन्यकर्तृको प्रत्ययौ समानविषयौ प्रतिसन्दधाति सोऽर्थान्तरभूत आत्मा। कथं पुनर्नेन्द्रियैकैककर्तृको इन्द्रियं खलु स्वं स्वं विषयग्रहणमनन्यकर्तृकं प्रतिसन्धातुमर्हति नेन्द्रियान्तरस्य विषयान्तरग्रहणमिति। कथं न सङ्घातकर्तृक एकः खल्वयं भिन्ननिमित्तो स्वात्मकर्तृकौ प्रत्ययौ प्रतिसंहितौ वेदयते न सङ्घातः, कस्मात् ? अनिष्टत्तं हि सङ्घाते प्रत्येकं विषयान्तरग्रहणस्याप्रतिसन्धानमिन्द्रियान्तरेणेति ॥ १ ॥

न विषयव्यवस्थानात् ॥ २ ॥

न देवादिसङ्घातादन्यश्चेतनः, कस्मात् ? विषयव्यवस्थानात्। व्यवस्थितविषयाणीन्द्रियाणि चक्षुष्यसति रूपं न गृह्णाति सति च गृह्णाति। यच्च यस्मिन्नसति न भवति सति भवति तस्य तदिति विज्ञायते। तस्माद्विषयग्रहणं चक्षुषः चक्षू रूपं पश्यति एवं घ्राणादिष्वपीति तानीन्द्रियाणीमानि स्वस्वविषयग्रहणाच्चेतनानि इन्द्रियाणां भावाभावयोर्विषयग्रहणस्य तथाभावात्, एवं सति किमन्येन चेतनेन सन्दिग्धत्वादहेतुः योऽयमिन्द्रियाणां भावाभावयोर्विषयग्रहणस्य तथाभावः स किं चेतन-

---

तत्र च नवप्रकरणानि तत्रादावि न्द्रियभेदप्रकरणं ततेन्द्रियं ज्ञानवन्नवेति संशये करणत्वेन सिद्धानामिन्द्रियाणां चैतन्यमस्त् लाघवात् तथा चात्मशब्दस्य नानार्थत्वादिन्द्रियाणामपीति कृत्वाह्ना न मात्रर्थेभिलौन्द्रियचैतन्यवादिनस्तन्निराकरणाय सूत्रम्: एकस्यैव दर्शनस्पर्शनाभ्यामर्थस्य ग्रहणात् दर्शनस्पर्शने ज्ञानविशेषौ (तृतीया च प्रकारे) तेन चाक्षुषस्पार्शनोभयत्वेनैकस्य धर्मिणः प्रतिसन्धानादित्यर्थः तथाच योऽहं घटमद्राक्षं सोऽहं स्पृशामीत्यनुभवादात्मेन्द्रियव्यतिरिक्त एक इति ॥ १ ॥

त्वादाहोस्विच्चेतनोपकरणानां ग्रहणनिमित्तत्वादिति सन्दिह्यते, चेतनोपकरणत्वेऽपीन्द्रियाणां ग्रहणनिमित्तत्वान्नावितुमर्हति यच्चोक्तं विषयव्यवस्थानादिति ॥ २ ॥

तदव्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥ ३ ॥

यदि खल्वेकमिन्द्रियमव्यवस्थितविषयं सर्वज्ञं सर्वविषयग्राहि चेतनं स्यात्, कस्ततोऽन्यत् चेतनमनुमातुं शक्नुयात् ? यस्मात्तु व्यवस्थितविषयाण्येतानीन्द्रियाणि तस्मात्तेभ्योऽन्यश्चेतनः सर्वज्ञः सर्वविषयग्राही विषयव्यवस्थितितोऽनुमीयते। तत्रेदमभिज्ञानमप्याख्येयं चेतनहेतुमुद्धारयिष्यते रूपदर्शी खल्वयं रसं गन्धं वा पूर्वगृहीतमनुमिनोति। गन्धप्रतिसंवेदी च रूपरसावनुमिनोति। एवं विषयशेषेऽपि वाच्यम्। रूपं दृष्ट्वा गन्धं जिघ्रति घ्रात्वा च गन्धं रूपं पश्यति। तदेवमनियतपर्य्यायं सर्वविषयग्रहणमेकचेतनाधिकरणमनन्यकर्त्तृकं प्रतिसन्धत्ते प्रत्यक्षानुमानागमसंशयप्रत्ययांश्च नानाविषयान् स्वात्मकर्त्तृकान् प्रतिसन्धाय वेदयते सर्वार्थविषयञ्च शास्त्रं प्रतिपद्यते। अर्थमविषयभूतं श्रोत्रस्य क्रमभाविनो वर्णान् श्रुत्वा पदवाक्यभावं प्रतिसन्धाय शब्दार्थव्यवस्थाञ्च बुध्यमानोऽनेकविषयमर्थजातग्रहणायैकैकेनेन्द्रियेण गृह्णाति। सेयं सर्वज्ञस्य ज्ञेया व्यवस्थाऽनुपदं न शक्या परिक्रमितुम्। आकृति-

---

अत्र शङ्कते।—चक्षुस्त्वादीनां रूपस्पर्शादिनियतविषयत्वाच्चक्षुरादेश्चापि रूपादिसमवायित्वमित्यस्मादेव प्रत्ययो भवति इति भावः ॥ २ ॥

समाधत्ते :—उक्तप्रतिषेधो न युक्तः उक्तविषयव्यवस्थानादेवात्मसद्भावादिति रिक्तात्मकत्वादित्यर्थः, अयं भावः तत्तदिन्द्रियाणां तत्तद्विषयकप्रत्यक्षं प्रति समवायिवं वाच्यं, न तु प्रत्यक्षत्वावच्छिन्नं प्रति, अनुमित्यादि जनकत्वे तु विनिगमकाभावः, तेन ज्ञानत्वावच्छिन्नजनकतावच्छेदकमात्मत्वं चक्षुरादेरनित्यत्वा-

मात्रन्तूदाहृतम् । तच्च यदुक्तमिन्द्रियचैतन्ये सति किमन्येन चेतनेन तदयुक्तं भवति ? इतश्च देहादिव्यतिरिक्त आत्मा न देहादिसङ्घातमात्रम् ॥ ३ ॥

शरीरदाहे पातकाभावात् ॥ ४ ॥

शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासङ्घातः प्राणिभूतो गृह्यते प्राणिभूतं शरीरं दहतः प्राणिहिंसाकृतं पापं पातकमित्युच्यते तस्याभावः तत्फलेन कर्त्तुरसम्बन्धात् अकर्त्तुश्च सम्बन्धात् शरीरेन्द्रियबुद्धिवेदनाप्रबन्धे कश्चन्यः सङ्घात उत्पद्यतेऽन्यो निरुध्यते उत्पादनिरोधसन्ततीभूतः प्रबन्धो नान्यत्वं बाधते, देहादिसङ्घातस्यान्यत्वाधिष्ठानत्वात् । अन्यत्वाधिष्ठानो ह्यमौ प्रख्यायत इति, एवं सति यो देहादिसङ्घातः प्राणिभूतो हिंसां करोति नासौ हिंसाफलेन सम्बध्यते, यश्च सम्बध्यते न तेन हिंसा कृता, तदेवं सत्त्वभेदे कृतनाशमकृताभ्यागमः प्रसज्यते, सति तु सत्त्वोत्पादे सत्त्वनिरोधे चाकर्म्मनिमित्तं सत्त्वसर्गं प्राप्नोति । तत्र मुक्त्यर्थो ब्रह्मचर्य्यवासो न स्यात् । तदयदि देहादिसङ्घातमात्रं स्यात् शरीरदाहे पातकं न भवेत् अनिष्टञ्चैतत् तस्माद्देहादिसङ्घातव्यतिरिक्त आत्मा नित्य इति ॥ ४ ॥

दात्मनश्च नित्यतायां वक्ष्यमाणत्वाच्चक्षुरादिनाशेऽपि स्मरणाच्चक्षुरहमित्याद्यप्रतीतेश्च नेन्द्रियात्मवादौ युज्यत इति ॥ ३ ॥

समाप्तमिन्द्रियभेदप्रकरणम् ॥ २४ ॥

ननु गौरोऽहं जानामीत्यादि प्रतीतेरस्तु शरीरमात्मेत्याशङ्क्य दूषयति।— पातकाभावात् पातकादेरभावप्रसङ्गात् तथा चोत्तरकालिकं दुःखादिकं न स्यादिति, यदा दाहो नाशः, तथा च शरीरनाशे कृते कर्त्तरि शरीरे विनष्टे पातकं

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥५॥

यस्यापि नित्येनात्मना सात्मकं शरीरं दह्यते तस्यापि शरीरदाहे पातकं न भवेद्दग्धुः, कस्मात्? नित्यत्वादात्मनः, न जातु कश्चिन्नित्यं हिंसितुमर्हति, अथ हिंस्यते नित्यत्वमस्य न भवति, सेयमेकस्मिन् पक्षे हिंसा निष्फला अन्यस्मिंस्वनुपपन्नेति ॥ ५ ॥

न कार्य्याश्रयकर्तृबधात् ॥ ६ ॥

न नूमो नित्यस्य सत्त्वस्य बधो हिंसा, अपित्वनुच्छित्तिधर्मकस्य सत्त्वस्य कार्य्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्तॄणामुपघातः पीड़ा वैकल्यलक्षणः प्रबन्धोच्छेदो वा प्रमापणलक्षणो वा बधो हिंसेति. कार्य्यन्तु सुखदुःखसंवेदनं तस्यायतनमधिष्ठानमाश्रयः शरीरम्। कार्य्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्तॄणामिन्द्रियाणां बधो हिंसा न नित्यस्यात्मनः। तत्र यदुक्तं तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वादित्येतदयुक्तम्, यस्य सत्त्वोच्छेदो हिंसा तस्य कृतहानमकृताभ्यागमश्च दोषः। एतावच्चैतत् स्यात्। सत्त्वो-

न स्यादित्यर्थः। यद्यपि भूतचैतन्यवादिना पातकादिकं नाप्यते तथापि तस्य प्रसाध्याङ्गकत्वादिकदैक्षिनः पूर्वपक्षित्वाद्वा न दोष इति भावः ॥ ४ ॥

तदापि तुल्यदोष इत्याशङ्क्याह।—तदभावः पातकाभावः सात्मकशरीरस्य प्रदाहेऽपि प्रसक्तः तन्नित्यत्वात् तस्य आत्मनो नित्यत्वात् नित्यत्वेन निर्विकारत्वं तेन जन्यधर्मानाश्रयत्वमभिप्रेतमिति केचित्, तन्नित्यत्वात् शरीरनाशे शरीरविशिष्टात्मनाशस्य नियतत्वादित्यपि कश्चित्. किञ्च सात्मकशरीरनाशेऽपि हन्तुः पातकाभावः स्यात् तस्यात्मनो नित्यत्वेन तन्नाशकत्वाभावात् ॥ ५ ॥

परिहरति।—कार्य्याश्रयस्य चेष्टाश्रयस्य कर्तुः कृतस्वच्छेदकस्य शरीरस्यैव नाशो न त्वात्मन इति न पातकाभावः, यद्वा न हन्तुः पातकाभावः कार्य्याश्र-

च्छेदो वा हिंसा अनुच्छित्तिधर्मकस्य सत्त्वस्य कार्य्याश्रय कर्त्तृबधो वा न कल्पान्तरमन्यदस्ति सत्त्वोच्छेदश्च प्रतिषिद्धः तत्र किमन्यच्छेषं यथाभूतमिति। अथवा कार्य्याश्रय कर्त्तृबधादिति कार्य्याश्रया देहेन्द्रियबुद्धिसङ्घातो नित्यस्यात्मनस्तत्र सुखदुःखप्रतिसंवेदनं तस्याधिष्ठानमाश्रयस्तदायतनं तद्भवति न ततोऽन्यदिति स एव कर्त्ता तन्निमित्ताहि सुखदुःखसंवेदनस्य निर्वृतिः न तमन्तरेणेति तस्य बध उपघातः पीड़ा प्रमापणं वा हिंसा न नित्यत्वेनात्मोच्छेदः। तत्र यदुक्तं तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वादेतन्नेति। दृष्टश्च देहादिव्यतिरिक्त आत्मा ॥ ६ ॥

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥

पूर्वापरयोर्विज्ञानयोरेकविषये प्रतिसन्धिज्ञानं प्रत्यभिज्ञानम्। तमेवैतर्हि पश्यामि यमद्राक्षमिषं स एवायमर्थ इति। सव्येन चक्षुषा दृष्टमर्थेतरेणापि चक्षुषा प्रत्यभिज्ञानात्। यमद्राक्षं तमेवैतर्हि पश्यामीति इन्द्रियचैतन्ये तु नान्यदृष्टमन्यः प्रत्यभिजानातीति प्रत्यभिज्ञानुपपत्तिः अस्ति त्विदं प्रत्यभिज्ञानं तस्मादिन्द्रियव्यतिरिक्तश्चेतनः ॥ ७ ॥

कर्त्तृबधात् शरीरस्य नाशात् ब्राह्मणत्वादेः शरीरवृत्तित्वात्तन्नाशादेव पापोत्पत्तिरिति भावः, वस्तुतस्तु अपूर्वशरीरावच्छिन्नप्राणसंयोगात्मकोत्पत्तिवत् शरीरावच्छिन्नप्राणसंयोगध्वंसविशेषात्मक-मरणमप्यात्मनः सम्भवति अन्यथा शरीराविनाशिनो बन्धनमुक्तिनिरोधादेर्हिंसात्वं न स्यात् पातकानभ्युपगन्तृचार्वाकादिमते शरीरभेदसाधनन्तु वक्ष्यमाणयुक्तिभिरिति ध्येयम् ॥ ६ ॥

समाप्तं देहभेदप्रकरणम् ॥ २५ ॥

प्रसङ्गाच्चक्षुरद्वैतप्रकरणमारभते।—वामेन चक्षुषा दृष्टस्य दक्षिणेन चक्षुषा प्रत्यभिज्ञानात् स्थिरात्मसिद्धिरिति कैश्चिदुक्तं तन्निराकरणायैतदुपन्यासः ॥ ७ ॥

नैकस्मिन्नासास्थित्यवस्थिते द्वित्वाभिमानात् ॥८॥

एकमिदं चक्षुर्मध्ये नासास्थित्यवस्थितं तस्यान्तौ गृह्यमाणौ द्वित्वाभिमानं प्रयोजयतः मध्यव्यवस्थितस्य दीर्घस्येव ॥ ८ ॥

एकविनाशे द्वितीयाविनाशान्नैकत्वम्॥ ९ ॥

एकस्मिन्नुपहते चोद्धते वा चक्षुषि द्वितीयमवतिष्ठते चक्षुर्विषयग्रहणलिङ्गं तस्मादेकस्य व्यवधानानुपपत्तिः ॥ ९ ॥

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥ १० ॥

एकविनाशे द्वितीयाविनाशादित्यहेतुः, कस्मात्? दृश्यस्य हि कासुचिच्छाखासु छिन्नासूपलभ्यत एव वृक्षः ॥ १० ॥

दृष्टान्तविरोधाद्प्रतिषेधः ॥ ११ ॥

न कारणद्रव्यस्य विभागे कार्यद्रव्यमवतिष्ठते नित्यत्वप्रसङ्गात् बहुष्ववयवेषु यस्य कारणानि विभक्तानि तस्य विनाशः। येषां कारणान्यविभक्तानि तान्यवतिष्ठन्ते अथवा दृश्यमानार्थविरोधो दृष्टान्तविरोधः, मृतस्य हि शिरःकपाले

एतदुदाहरति।—मध्यस्थसेतुना तडागस्येव नासास्थित्यवस्थितगोलकान्तरावच्छिन्नतया द्वैतप्रत्ययो भवत्यर्थः ॥ ८ ॥

आक्षिपति।—चक्षुरेकं एकचक्षुषोऽपीत्वं स्यादिति भावः ॥ ९ ॥

अवैकदेशी परिहरति।—अवयवस्य शाखादेर्नाशेऽप्य यविनो वृक्षस्य प्रत्यभिज्ञानान्नावयवनाशे सर्ववावयविनाशनियमस्तथा चैकनाशेऽपि नान्यत्वमिति ॥ १० ॥

एकदेशिमतस्य पूर्वोक्तदोषस्य च समाधानाय सिद्धान्तिनः सूत्रम्।—उक्तप्रतिषेधो न युक्तः दृष्टान्तस्य विरोधादयुक्तत्वात्, नहि शाखाच्छेदे वृक्षनिवृत्तिस्तथा सति वृक्षस्यानाश्रयप्रसङ्गादनाश्रितावयवेक्षच खण्डवृक्षोपलब्धेरेकदेशिमतं

द्वावयवौ नासाक्षिव्यवहितौ चक्षुषः स्थाने भेदेन गृह्येते न चैतदेकस्मिन्नासाक्षिव्यवहिते सम्भवति अथवैकविनाशस्यानियमाद्विनावयवौ तौ च पृथगावरणोपघातौ अनुमीयेते विभिन्नाविति अवपीड़नाच्चैकस्य चक्षुषो रश्मिविषयसन्निकर्षस्य भेदाद् दृश्यभेद इव गृह्यते तच्चैकत्वे विरुद्ध्यते अवपीड़ननिवृत्तौ चाभिन्नप्रतिसन्धानमिति तस्मादेकस्य व्यवधानानुपपत्तिः अनुमीयते चायं देहादिसङ्घातव्यतिरिक्तश्चेतन इति ॥ ११ ॥

इन्द्रियान्तरविकारात् ॥ १२ ॥

कस्यचिदम्लफलस्य गृहीतसाहचर्य्ये रूपे गन्धे वा केनचिदिन्द्रियेण गृह्यमाणे रसनस्येन्द्रियान्तरस्य विकारः रसानुस्मृतौ रसगर्द्धिप्रवर्त्तितो दन्तोदकसम्भवभूतो गृह्यते तस्येन्द्रियचैतन्येऽनुपपत्तिः, नान्यदृष्टमन्यः स्मरति ॥ १२ ॥

न स्मृतेः स्मर्त्तव्यविषयत्वात् ॥ १३ ॥

स्मृतिर्नाम धर्मो निमित्तादुत्पद्यते तस्याः स्मर्त्तव्यो विषयः तत्कृत इन्द्रियान्तरविकारो नात्मकृत इति ॥ १३ ॥

युक्तम्. एतेनैकनाशे द्वितीया विनाशाद्भेदसाधनमपि प्रयुक्तं, चक्षुर्नाशेऽपि गोलकान्तरावच्छिन्नावयवैः खण्डचक्षुः सम्भवात् इत्यत्र लाघवात्खण्डरहितमिति टीकास्वरससिद्धम्। परे तु चक्षुर्द्वैतमेव सूत्रार्थं मन्यमाना व्याचक्षते सिद्धान्तिनः सूत्रं सङ्गच्छते, श्रद्धते नैकस्मिन्निति, समाधत्ते एकेति, श्रद्धते अवयवेति, निराकरोति दृष्टान्तेति, शाखानाशे वृक्षनाशावश्यकत्वात् दृष्टान्तो न युक्तः, यदा दृष्टान्तस्य गोलकभेदस्य विरोधादन्यथाऽनुपपन्नत्वादद्वैतं हि सतस्य चक्षुरधिष्ठानगोलकद्वयं भेदेनोपलभ्यत इति वदन्ति ॥ ११ ॥

आत्मन इन्द्रियभेदे युक्त्यन्तरमाह।—चिरविस्मृतार्थस्मर्त्तव्ये दृष्टे तद्रसस्मरणाद्दन्तोदकसम्भवरूपरसनेन्द्रियविकारादिन्द्रियव्यतिरिक्त आत्मा सिध्यति ॥ १२ ॥

आक्षिपति।—स्मृतिर्हि स्मर्त्तव्यविषयिणीति नियमलक्षणं दर्शनादिना

तदात्मगुणसद्भावादप्रतिषेधः ॥ १४ ॥

तस्या आत्मगुणत्वे सति सद्भावादप्रतिषेधः, आत्मनः यदि स्मृतिरात्मगुणः, एवं सति स्मृतिरुपपद्यते नान्यदृष्टमन्यः स्मरतीति, इन्द्रियचैतन्ये तु नानाकर्त्तृकाणां विषयग्रहणानामप्रतिसन्धानम्। अप्रतिसन्धाने वा विषयव्यवस्थानुपपत्तिः, एकस्तु चेतनोऽनेकार्थदर्शी भिन्ननिमित्तः पूर्वदृष्टमर्थं स्मरतीति एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानात् स्मृतेरात्मगुणत्वे सति सद्भावः विपर्य्यये चानुपपत्तिः। स्मृत्याश्रयाः प्राणभृतां सर्वे व्यवहाराः आत्मलिङ्गमुदाहरणमात्रमिन्द्रियान्तरविकार इति ॥ १४ ॥

अपरिसङ्ख्यानाच्च स्मृतिविषयस्य ॥ १५ ॥

अपरिसङ्ख्याय च स्मृतिविषयमिदमुच्यते न स्मृतेः स्मर्त्तव्यविषयत्वादिति येयं स्मृतिरगृह्यमाणेऽर्थे अज्ञासिषमहमसुमर्थमिति। एतस्याज्ञातज्ञानविशिष्टः पूर्वज्ञातोऽर्थो विषयो नार्थमात्रं ज्ञातवानहमसुमर्थमसावर्थो मया ज्ञातः ज्ञातमस्मिन्नर्थे मम ज्ञानमभूदिति चतुर्विधमेतद्वाक्यं स्मृतिविषयज्ञापकं समानार्थम् सर्वत्र खलु ज्ञाता ज्ञानं ज्ञेयं च गृह्यते, अथ प्रत्यक्षेऽर्थे या स्मृतिस्तया तीणि ज्ञानान्येकस्मिन्नर्थे प्रति-

---

मानाधिकरण्ये मानाभावात् अस्तु वा विषयतयैव सामानाधिकरण्यमिति भावः॥ १३ ॥

समाधत्ते।—उक्तप्रतिषेधो न युक्तः धर्मिग्राहकमानेन स्मृतेरात्मगुणत्वात्परिशेषात्मगुणत्वसिद्धेरहं अरामीत्यनुभवात्, विषयनिष्ठकार्य्यकारणभावे चैतस्य ज्ञानान्नैवस्य स्मरणापत्तेरिति भावः॥ १४ ॥

विषयाणां स्मर्त्तव्यानां स्मृतिसमवायित्वं स्यादित्याशङ्क्य समाधत्ते।—अपरि

सन्धीयन्ते समानकर्तृकाणि न नानाकर्तृकाणि नाकर्तृकाणि किं तर्हि एककर्तृकाणि अद्राक्षमसुमर्थं यमेवैतर्हि पश्यामि अद्राक्षमिति दर्शनं दर्शनसंविच्च, न खल्वसंविदिते खे दर्शने स्यादेतदद्राक्षमिति, ते खल्वेते द्वे ज्ञाने यमेवैतर्हि पश्यामीति दृतीयं ज्ञानमेवमेकोऽर्थस्त्रिभिर्ज्ञानैर्युज्यमानो नाकर्तृको न नानाकर्तृकः किं तर्हि एककर्तृक इति, सोऽयं स्मृतिविषयोऽपरिसङ्ख्यायमानो विद्यमानः प्रज्ञातोऽर्थः प्रतिषिध्यते नास्त्यात्मा स्मृतेः स्मर्त्तव्यविषयत्वादिति, न चेदं स्मृतिमात्रं स्मर्त्तव्यमात्रविषयं वा इदं खलु ज्ञानप्रतिसन्धानवत् स्मृतिप्रतिसन्धानमेकस्य सर्वविषयत्वात् एकोऽयं ज्ञाता सर्वविषयः स्वानि ज्ञानानि प्रतिसन्धत्ते असुमर्थं ज्ञास्याम्यसुमर्थं विज्ञास्याम्यसुमर्थमज्ञासिषमसुमर्थं जिज्ञासमानश्चिरमज्ञात्वाऽध्यवस्यत्यज्ञासिषमिति एवं स्मृतिमपि त्रिकालविशिष्टां सुखार्थाविशिष्टाञ्च प्रतिसन्धत्ते संस्कारसन्ततिमात्रे तु सत्त्वे उत्पद्योत्पद्य संस्कारास्तिरोभवन्ति स नास्त्येकोऽपि संस्कारो यस्त्रिकालविशिष्टं ज्ञानं स्मृतिञ्चानुभवेत्। नचानुभवम् अन्तरेण ज्ञानस्य स्मृतेश्च प्रतिसन्धानमहं ममेति घोत्पद्यते देहान्तरवत् अतोऽनुमीयते अस्त्येकः सर्वविषयः प्रतिदेहं स्वज्ञानप्रबन्धं स्मृतिप्रबन्धञ्च प्रतिसन्धत्ते इति यस्य देहान्तरेषु दृत्तेरभावान्न प्रतिसन्धानं भवतीति ॥ १५ ॥

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ १६ ॥

सङ्घातात् ज्ञानवत्वात् तथा च लाघवादतिरिक्तात्मसिद्धिः इदं न सूत्रं किन्तु भाष्यमिति केचित् ॥ १५ ॥

समाप्तं चतुरध्येतप्रकरणम् ॥ २८ ॥

न देहादिसङ्घातव्यतिरिक्त आत्मा, कस्मात्? आत्मप्रतिपत्तिहेतूनां मनसि सम्भवात्। दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनामात्मप्रतिपादकानां हेतूनां मनसि सम्भवो यतः मनो हि सर्वविषयमिति तस्मान्न शरीरेन्द्रियमनोबुद्धिसङ्घातव्यतिरिक्त आत्मेति ॥ १६ ॥

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥१७॥

ज्ञातुः खलु ज्ञानसाधनान्युपपद्यन्ते, चक्षुषा पश्यति, घ्राणेन जिघ्रति, स्पर्शनेन स्पृशति, एवमन्तुः सर्वविषयस्य मतिसाधनमन्तःकरणभूतं सर्वविषयं विद्यते येनायं मन्वत इति। एवंमति ज्ञातर्यात्मसंज्ञा न कृष्यते मनःसंज्ञाऽभ्यनुज्ञायते मनसि च मनःसंज्ञा न कृष्यते मतिसाधनं त्वभ्यनुज्ञायते तदिदं संज्ञाभेदमात्रं नार्थे विवाद इति प्रत्याख्याने वा सर्वेन्द्रियविलोपप्रसङ्गः, अथ मन्तुः सर्वविषयस्य मतिसाधनं सर्वविषयं प्रत्याख्यायते नास्तीति। एवं रूपादिविषयग्रहणसाधनान्यपि न सन्तीति सर्वेन्द्रियविलोपः प्रसज्यत इति ॥ १७ ॥

नियमश्च निरनुमानः ॥ १८ ॥

योऽयं नियम इष्यते रूपादिग्रहणसाधनान्यस्य सन्ति मतिसाधनं सर्वविषयं नास्तीति, अयं निरनुमानो नावानु-

---

ननु मनसो नित्यत्वाद्व्यासज्यवृत्तित्वाच्च।—नातिरिक्त आत्मा आक्षसाधकमानानां मनसार्थान्तरत्वमिति भावः ॥ १६ ॥

समाधत्ते।—यदि मनसो ज्ञातृत्वं तदा व्यासज्यवृत्तित्वोपपादनाय करणान्तरमवश्यं वाच्यं तथा चैको ज्ञाता ज्ञानसाधनं चैको सिद्धं, मन आत्मेति संज्ञामात्रं, किञ्च व्यासज्यवृत्तितया मनसोऽणुत्वं सिद्धमात्मनश्च प्रत्यक्षोपपादकतया महत्त्वमिति भेद आवश्यक इति भावः ॥ १७ ॥

मानमस्ति येन नियमं प्रतिपद्यामह इति। रूपादिभ्यश्च विषयान्तरं सुखाद्यग्रहणादुपलब्धौ करणान्तरसद्भावः, यथा चक्षुषा गन्धो न गृह्यत इति करणान्तरं घ्राणम्, एवञ्चक्षुर्घ्राणाभ्यां रसो न गृह्यत इति करणान्तरं रसनम्. एवं शेषेषु तथा चक्षुरादिभिः सुखादयो न गृह्यन्त इति करणान्तरेण भवितव्यम्, तच्च ज्ञानायौगपद्यलिङ्गम्। यच्च सुखाद्युपलब्धौ करणं तच्च ज्ञानायौगपद्यलिङ्गं तस्येन्द्रियमिन्द्रियं प्रति सन्निधेरसन्निधेर्न युगपज्ज्ञानान्युत्पद्यन्ते तच्च यदुक्तमात्मप्रतिपत्तिहेतूनां मनसि सन्निवादिति तदयुक्तम्, किं पुनरयं देहादिसङ्घातादन्यो नित्य उतानित्य इति, कुतः संशयः ? उभयथा दृष्टत्वात् संशयः। विद्यमानमुभयथा भवति ;नित्यमनित्यञ्च प्रतिपादिते चात्मसद्भावे संशयानिवृत्तेरिति आत्मसद्भावे हेतुभिरेवास्य प्राग् देहभेदादवस्थानं सिद्धम् अर्वागपि देहभेदादवतिष्ठते कुतः ॥ १८ ॥

पूर्वाभ्यस्तस्मृत्यनुबन्धात् जातस्य हर्षभयशोकसम्प्रतिपत्तेः ॥ १९ ॥

जातः खल्वयं कुमारकोऽस्मिन् जन्मन्यगृहीतेषु हर्षभयशोकहेतुषु हर्षभयशोकान् प्रतिपद्यते लिङ्गानुमेयान् ते च स्मृत्यनुबन्धादुत्पद्यन्ते नान्यथा स्मृत्यनुबन्धश्च पूर्वाभ्यासम्

ननु रूपादिप्रत्यक्षं सकरणकमस्तु नतु सुखादिप्रत्यक्षम् एवं परमाण्वन्तरस्यातीन्द्रियत्वेऽपि मनसः प्रत्यक्षं स्यादत्राह।—उक्तो नियमविशेषो निरनुमानः निष्प्रमाणकः; गौरवादिपरीत्यं च विनिगमकाभावाच्चेति भावः ॥ १८ ॥

समाप्तं मनोभेदप्रकरणम् ॥ २७ ॥

अत्र शरीरेऽपि देहादिभिन्ने आत्मनि, विना तन्नित्यतां न परलोकार्थिनः

अन्तरेण न भवति पूर्वाभ्यासश्च पूर्वजन्मनि सति नान्यथेति सिध्यत्येतत्, अवतिष्ठतेऽयमूर्ध्वं शरीरभेदादिति ॥ १९ ॥

पद्मादिषु प्रबोधसम्मीलनविकारवत्तद्विकारः॥ २० ॥

यथा पद्मादिष्वनित्येषु प्रबोधसम्मीलनं विकारो भवति एवमनित्यस्यात्मनो हर्षभयशोकसम्प्रतिपत्तिर्विकारः स्यात् हेत्वभावादयुक्तम् अनेन हेतुना पद्मादिषु प्रबोधसम्मीलनविकारवदनित्यस्यात्मनो हर्षादिसम्प्रतिपत्तिरिति, नात्रोदाहरणसाधर्म्यात् साध्यसाधनहेतुर्न वैधर्म्यादस्ति हेत्वभावात् असम्बद्धार्थकमपार्थकमुच्यत इति। दृष्टान्ताच्च हर्षादिनिमित्तस्यानिवृत्तिः या चेयमासेवितेषु विषयेषु हर्षादिसम्प्रतिपत्तिः स्मृत्यनुबन्धकृता प्रत्यात्मं गृह्यते सेयं पद्मादिसम्मीलनदृष्टान्तेन न निवर्त्तते यथा चेयं न निवर्त्तते तथा जातस्यापि, क्रियाजातस्य पर्णविभागः संयोगप्रबोधः, सम्मीलने क्रियाहेतुस्वानुमेयः। एवञ्च सति किं दृष्टान्तेन प्रतिषिध्यते? अथ निर्निमित्तः पद्मादिषु प्रबोधसम्मीलनविकार इति मतम्, एवमात्मनोऽपि हर्षादिसम्प्रतिपत्तिरिति तच्च ॥ २० ॥

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ॥ २१ ॥

प्रवृत्तिरत आत्मनित्यतासाधनाय नवम। जातस्य बालस्य एतज्जन्माननुभूतेष्वपि हर्षादिहेतुषु सत्सु हर्षादीनां सम्प्रतिपत्तिः उत्पत्तिमत्त्वाः पूर्वपूर्वानुभवाधीनस्मृतिसम्बन्धादेव सम्भवात् इत्थं चैतन्योन्मत्तस्यात्मनः पूर्वपूर्वसिद्धौ तस्यानादित्वमनादेश्च भावस्य न नाश इति नित्यत्वसिद्धिरिति भावः ॥ १९ ॥

अत्र शङ्कते।—बालस्य हर्षादयो मुखविकासादनुमेया न च तत्कारणवत्पद्मादीनां प्रबोधादिवददृष्टविशेषाधीनक्रियावत्त्वादेव तदुपपत्तेरिति भावः ॥ २० ॥

उष्णादिषु सत्सु भावात् असत्सुभावात् तन्निमित्ताः पञ्चभूतानुग्रहेण निर्वृत्तानां पद्मादीनां प्रबोधसम्मीलनविकारा निमित्तान्तरवितुमर्हन्ति न निमित्तमन्तरेण, न चान्यत् पूर्वाभ्यस्तस्मृत्यनुबन्धात् निमित्तमस्तीति। न चोत्पत्तिनिरोधकारणानुमानमात्मनो दृष्टान्तात् न हर्षादीनां निमित्तमन्तरेणोत्पत्तिः नोष्णादिवन्निमित्तान्तरोपादानं हर्षादानं तस्माद्युक्तमेतत् ॥ २१ ॥

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ॥२२॥

इतश्च नित्य आत्मा, जातमात्रस्य वत्सस्य प्रवृत्तिलिङ्गः स्तन्याभिलाषो दृश्यते न च नान्तरेणाहाराभ्यासम्। कथा युक्तम्? दृश्यते हि शरीरिणां क्षुधापीड्यमानानामाहाराभ्यासकृतात् स्मरणानुबन्धादाहाराभिलाषः, न च पूर्वशरीरमन्तरेणामी जातमात्रस्योपपद्यते, तेनानुमीयते भूतपूर्वं शरीरं यत्रानेनाहारोऽभ्यस्त इति। न खल्वयमात्मा पूर्वशरीरात् प्रेत्य शरीरान्तरमापन्नः क्षुत्पीडितः पूर्वाभ्यस्तमाहारमनुस्मरन् स्तन्यमभिलषति तस्मान्न देहभेदादात्मा भिद्यते भवत्येवोक्तं देहभेदादिति ॥ २२ ॥

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥२३॥

निदर्शनमुक्तम्।—उक्तं न युक्तं खलु पञ्चात्मकानां पाञ्चभौतिकानां पद्मादीनां ये विकाराभिमताः उष्णकालादिनिमित्तत्वात् मनुष्यादीनान्तु हर्षादिनिमित्तका सुखविकासादय इति न सन्त्यनेति भावः ॥ २१ ॥

आत्मनित्यत्वे हेत्वन्तरमाह। प्रेत्य सत्वा जातमात्रस्य यः स्तन्याभिलाषः स तावदाहाराभ्यासजनितः जन्मान्तरीयाहारेष्टसाधनताधीजन्यजीवनाद्दृष्टोद्बोधितसंस्काराधीनेष्टसाधनतास्मरणेन हि बालाः स्तनपाने प्रवर्तन्त इत्यादिस्वमिति ॥ २२ ॥

यथा खलु अयोऽभ्यासमन्तरेणायस्कान्तमुपसर्पति, एवम् आहाराभ्यासमन्तरेण बालः स्तन्यमभिलषति, किमिदमयसोऽयस्कान्ताभिसर्पणं निर्निमित्तमथ निमित्तादिति निर्निमित्तं तावत् ॥ २३ ॥

नान्यत्र प्रवृत्त्यभावात् ॥ २४ ॥

यदि निर्निमित्तं लोष्टादयोऽप्ययस्कान्तमुपसर्पेयुर्न जातु नियमे कारणमस्तीति, अथ निमित्तात् तत्क्लेनोपलभ्यत इति क्रियालिङ्गः क्रियाहेतुः क्रियानियमलिङ्गश्च क्रियाहेतुनियमः तेनान्यत्र प्रवृत्त्यभावः बालस्यापि नियतमुपसर्पणं क्रियोपलभ्यते नच स्तन्याभिलाषलिङ्गमन्यदाहाराभ्यासकृतात् स्मरणानुबन्धात्। निमित्तं दृष्टान्तेनोपपाद्यते न चामति निमित्ते कस्यचिदुत्पत्तिः, न च दृष्टान्तो दृष्टमभिलाषहेतुं बाधते, तस्मादयसोऽयस्कान्ताभिगमनमदृष्टान्त इति, अयमः खल्वपि नान्यत्र प्रवृत्तिर्भवति न जात्वयो लोष्टमुपसर्पति किं कृतोऽस्यानियम इति यदि कारणनियमाः सर्वक्रियाः नियमलिङ्गः एवं बालस्यापि नियतविषयोऽभिलाषः कारणनियमाङ्गवितुमर्हति तच्च कारणमभ्यस्तस्मरणमन्यदेति दृष्टेन विशिष्यते दृष्टो हि प्रयोरिणामभ्यस्तस्मरणादाहाराभिलाष इति ॥ २४ ॥

वीतरागजन्मादर्शनात् ॥ २५ ॥

अनुवादः।—यथायस्कान्तसन्निहितस्यायसोऽयस्कान्ताभिमुखतयागमनं तथैव बालस्यापि स्तनोपसर्पणं न लिङ्गसाधनताज्ञानाधीनप्रवृत्तिजन्यचेष्टेयमित्यर्थः ॥ २३ ॥

समाधत्ते।—स्तनपान एव बालः प्रवर्तते न स्तन्यमेति नियमः कथं स्यात ? वस्तुतस्तु अन्यत्र अयसि प्रवृत्त्यभावात्, प्रवृत्तिर्हि चेष्टानुमिता लिङ्गं न तु क्रियामात्रमतो न व्यभिचार इति भावः ॥ २४ ॥

इतश्च नित्य आत्मा, कस्मात् ? स रागी जायत इत्यर्थादापद्यते अयं जायमानो रागानुबद्धो जायते रागस्य पूर्वानुभूतविषयानुचिन्तनं योनिः पूर्वानुभवश्च विषयाणामन्यस्मिन् जन्मनि शरीरमन्तरेण नोपपद्यते, सोऽयमात्मा पूर्वशरीरानुभूतान् विषयाननुस्मरन् तेषु तेषु रज्यते तथा चायं द्वयोर्जन्मनोः प्रतिसन्धिः, एवं पूर्वशरीरस्य पूर्वतरेण पूर्वतरस्य पूर्वतमेनेत्यादिनाऽनादिश्चेतनस्य शरीरयोगः अनादिश्च रागानुबन्ध इति सिद्धं नित्यत्वमिति । कथं पुनर्ज्ञायते पूर्वविषयानुचिन्तनजनितो जातस्य रागो न पुनः ॥ २५ ॥

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ॥ २६ ॥

यथोत्पत्तिधर्मकस्य द्रव्यस्य गुणाः कारणत उत्पद्यन्ते तथोत्पत्तिधर्मकस्यात्मनो रागः कुतश्चिदुत्पद्यते, अचायमुदितानुवादो निदर्शनार्थः ॥ २६ ॥

न सङ्कल्पनिमित्तत्वाद्रागादीनाम् ॥ २७ ॥

न खलु सगुणद्रव्योत्पत्तिवदुत्पत्तिरात्मनो रागस्य च, कस्मात् ? सङ्कल्पनिमित्तत्वाद्रागादीनाम् । अयं खलु प्राणिनां विषयानाभिवमानानां सङ्कल्पजनितो रागो गृह्यते सङ्कल्पश्च

हेत्वन्तरमाह ।—वीतरागो रागयुक्तत्वावस्थोत्पद्यतेऽपि तु सरागस्तत्र च जन्मान्तरीयेष्टसाधनता ज्ञानाधीनस्मरणं हेतुरिति पूर्वं स्वयाभिलाष उक्तः, सम्प्रति तु पतगादीनां कणादिभक्षणाभिलाषसाधारणं रागमात्रमित्यपौनरुक्त्यम् ॥ २५ ॥

शङ्कते ।—द्रव्यस्य घटादेर्यथा सगुणस्य रूपादिविशिष्टस्योत्पत्तिर्यथा घटादिः स्वत एव रूपादिमान् भवति तथैवात्मापि स्वत एव सरागी भवतीत्यप्रयोजकत्वं त्वदीयहेतूनामिति भावः ॥ २६ ॥

समाधत्ते ।—सङ्कल्पो ज्ञानमिष्टसाधनताज्ञानम् इति यावत् तन्निमित्तका हि

पूर्वानुभूतविषयानुचिन्तनयोनिः, तेनानुमीयते जातस्यापि पूर्वानुभूतार्थचिन्तनकृतो राग इति। आत्मोत्पादाधिकरणात् रागोत्पत्तिर्भवन्ती सङ्कल्पादन्यस्मिन् रागकारणे सति वाच्या कार्यद्रव्यगुणवत् न चात्मोत्पादः सिद्धो नापि सङ्कल्पादन्यद्रागकारणमस्ति। तस्मादयुक्तं सगुणद्रव्योत्पत्तिवत्तयोरुत्पत्तिरिति, अथापि सङ्कल्पादन्यद्रागकारणं धर्माधर्मलक्षणमदृष्टमुपादीयते तथापि पूर्वशरीरयोगोऽप्रत्याख्येयः। तत्र हि तस्य निर्वृत्तिः नास्मिन् जन्मनि तन्मयत्वाद्राग इति विषयाभ्यासः खल्वयं भावनाहेतुः तन्मयत्वमुच्यत इति जातिविशेषाच्च रागविशेष इति, कर्म खल्विदं जातिविशेषनिर्वर्त्तकं नादर्थान्तराच्छब्दं विज्ञायते, तस्मादनुपपन्नं सङ्कल्पादन्यद्रागकारणमिति. अनादिश्चेतनस्य शरीरयोग इत्युक्तं. स्वकृतकर्मनिमित्तं चास्य शरीरं सुखदुःखाधिष्ठानं तत् परीक्ष्यते किं प्राणादिवदेकप्रकृतिकम् उत नानाप्रकृतीति. कुतः संशयः ? विप्रतिपत्तेः संशयः, पृथिव्यादीनि भूतानि सङ्घाविकल्पेन शरीरप्रकृतिरिति प्रतिजानीत इति किं तत्र तत्त्वम् ॥ २७ ॥

पार्थिवं गुणान्तरोपलब्धेः ॥ २८ ॥

तत्र मानुषं शरीरं पार्थिवम्। कस्मात् ? गुणान्तरोपलब्धेः, गन्धवती पृथिवी गन्धवच्छरीरम् अबादीनामगन्धत्वात् तत्प्रकृत्यगन्धं स्यात् न त्विदमबादिभिरसंसृष्टया पृथिव्यारब्धं

रागादयस्तथा चेष्टसाधनताज्ञानलक्षणेच्छादिना कार्यकारणभावात् प्रवर्त्तिकेन चेष्टादिना च कार्यकारणभावान्नाप्रयोजकत्वमिति भावः ॥ २७ ॥

समाप्तमनादिनिधनप्रकरणम् ॥ २८ ॥

क्रमप्राप्ते शरीरपरीक्षणे मानुषादिशरीरं पाञ्चभौतिकमित्येके तत्र सिद्धान्त-

चेष्टेन्द्रियार्थाश्रयभावेन कल्पत इत्यतः पञ्चानां भूतानां संयोगे सति शरीरं भवति भूतसंयोगो हि मिथः पञ्चानां न निषिद्ध इति, आप्यतैजसवायव्यानि लोकान्तरे शरीराणि, तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र इति स्थाल्यादिद्रव्यनिष्पत्तावपि निःसंशयो नावादिसंयोगमन्तरेण निष्पत्तिरिति। पार्थिवाप्यतैजसं तद्गुणोपलब्धेः, निश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकं, गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकं, त इमे सन्दिग्धा हेतव इत्युपेक्षितवान् सूत्रकारः, कथं सान्दिग्धाः सति च प्रज्ञातभावे भूतानां धर्मोपलब्धिरसति च संयोगाप्रतिषेधात् सन्निधितानामिति। यथा स्थाल्यामुदकतेजोवायुाकाशानामिति तदिदमनेकभूतप्रकृतिशरीरमगन्धमरसमरूपमस्पर्शं च प्रकृत्यनुविधानात् स्यात् नात्वदमित्थं भूतं तस्मात् पार्थिवगुणान्तरोपलब्धः ॥ २८ ॥

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥ २८ ॥ क ॥

निश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥२८॥ख॥

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥ २८ ॥ ग ॥

सत्यम्। मानुषादिशरीरं पार्थिवं पृथिवीधर्मसाधर्म्यकारणकं गुणान्तरस्य गन्धनीलादिरूपकाठिन्यादेरुपलब्धेरिति ॥ २८ ॥

मतान्तराभिधानाय विमृशति। —तद्गुणानां पृथिव्यप्तेजोगुणानां गन्धक्लेदोष्णस्पर्शानामुपलब्धेः एतावता त्रिभौतिकत्वे सिद्धे निश्वासादितश्चातुर्भौतिकत्वं निश्वासोच्छ्वासौ प्राणवायोर्व्यापारविशेषौ क्लेदो जलविशेषो जलविशिष्टपृथिवी वेत्यभयथापि जलसाधर्म्यकं भुक्तान्नादिजठरानलैः पाकस्य तेजःसंयोगाधीनत्वात्तेजः सिद्धिर्व्यूहो निश्वासादिः अवकाशदानं छिद्रम् एतानि मतानि सूत्रकृता तुच्छत्वान्न दूषितानि।

श्रुतिप्रामाण्याच्च ॥ २९ ॥

"सूर्य्यस्ते चक्षुर्गच्छतात्" इत्यत्र मन्त्रे पृथिवीस्ते शरीरमिति श्रूयते तदिदं प्रकृतौ विकारस्य प्रलयाभिधानमिति "सूर्य्यं ते चक्षुः सृणोमि" इत्यत्र मन्त्रान्तरे पृथिवीस्ते शरीरमिति श्रूयते सेयं कारणादिकारस्य स्मृतिरभिधीयत इति, स्थाल्यादिषु च तुल्यजातीयानामेककार्य्यारम्भदर्शनाद्भिन्नजातीयानामेककार्य्यारम्भानुपपत्तेः। अथेदानीमिन्द्रियाणि प्रमेयक्रमेण विचार्य्यन्ते किमाप्यैकिकान्याहोस्विद्भौतिकानीति कुतः संशयः ॥ २९ ॥

कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात् संशयः ॥ ३० ॥

कृष्णसारं भौतिकं तस्मिन्ननुपहते रूपोपलब्धिः उपहते

तथाहि एकस्मिन् शरीरे पृथिवीत्वादिनानाजातेः सङ्करापत्तेरसम्भवात्, नवा नानोपादानकत्वं विजातीयानामसारम्भकत्वात् तथात्वे वा जलाद्यारब्धस्य न पृथिवीत्वं व्यभिचारात् नवाचिवद्रूपं गन्धवत्त्वविरोधात् गन्धादीनामाश्रयनाशेन नाशाच्च पार्थिवत्वमित्युक्तप्रायं यद्वा पार्थिवत्वं कथं जलादिद्रव्यस्य इत्याशङ्क्याह जलादिनिमित्तवशाच्चौतिकत्वादित्यपदेश इत्याशयेन विसूत्री।

इति वृत्तिसङ्कलितानि अधिकसूत्राणि ॥ २८ ॥ क ॥ ख ॥ ग ॥

पार्थिवत्वे युक्त्यन्तरमाह।—सूर्य्यस्ते चक्षुः सृणोमीति मन्त्रान्ते पृथिवी ते शरीरमित्यभिधानादेवं प्रकृतौ विकारस्य लयाभिधानं सूर्य्यस्ते चक्षुर्गच्छतादितिमन्त्रान्ते पृथिवी ते शरीरमिति इमां चतुःसूत्रीं कश्चन भाष्यतया वर्णयन्ति, तन्न, तथा सत्येकसूत्रस्य प्रकरणत्वानुपपत्तेः, अतएव चतुर्थं सूत्रमेवेत्यपरे अन्ये तृक्थेवानुपपन्ना आप्यतैजसवायव्यानि लोकान्तरशरीराणि तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र इति भाष्यं सूत्रतया वर्णयन्ति, तदर्थस्तु आप्यादीनि लोकान्तरेषु वरुणलोकादिषु प्रसिद्धानि शरीराणि, जलादिरूपत्वं कथमुपभोगक्षमतेत्यत्र तेष्वपीति भूतसंयोगः पृथिव्युपलक्षः पुरुषार्थतन्त्र उपभोगसम्पादकः ॥ २९ ॥

समाप्तं शरीरपरीक्षाप्रकरणम् ॥ २९ ॥

चानुपलब्धिरिति व्यतिरिच्य ज्ञानसारमवस्थितस्य विषयस्योपालम्भो न ज्ञानसारग्राहस्य, न चाप्राप्यकारित्वमिन्द्रियाणां तदिदमभौतिकत्वे विभुत्वात् सम्भवति, एवमुभयधर्मोपलब्धेः संशयः, अभौतिकानि इत्याह, कस्मात् ? ॥ ३० ॥

महदणुग्रहणात् ॥ ३१ ॥

महदिति महत्तरं महत्तमं चोपलभ्यते, यथा न्यग्रोधपर्वतादि, अक्ष्यित्वणुतरमणुतमञ्च गृह्यते न्यग्रोधधानादि, तदुभयमुपलभ्यमानं चक्षुषो भौतिकत्वं बाधते भौतिकं हि यावत् तावदेव व्याप्नोति अभौतिकन्तु विभुत्वात् सर्वव्यापकमिति न महदणुग्रहणमात्रादभौतिकत्वं विभुत्वञ्चेन्द्रियाणां शक्यं प्रतिपत्तुम् इदं खलु ॥ ३१ ॥

रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम् ॥ ३२ ॥

तयोर्महदणोर्ग्रहणं चक्षूरश्मेरर्थस्य च सन्निकर्षविशेषाद् भवति, यथा प्रदीपरश्मेरर्थस्य चेति रश्म्यर्थसन्निकर्षस्यावरण-

---

अथेन्द्रियं परीक्षणीयं तत्र लक्षणसूत्रोक्त-भौतिकत्वमिन्द्रियाणां परीक्षितुं संशयमाह ।—ज्ञानसारे चक्षुर्गोलके सति घटाद्युपलम्भाद्गोलकस्येन्द्रियत्वमिति सौत्राः व्यतिरिच्य विषयं प्राप्य उपलम्भात् उपलम्भजनकाद्गोलकातिरिक्तानीत्यपरे तत्र इन्द्रियाणि गोलकातिरिक्तानि नवेति संशयो, गोलकातिरिक्तानीति नैयायिकादयः, तत्राप्यभौतिकान्याहङ्कारिकाणीति साङ्ख्याः, भौतिकानीत्यपरे ॥ ३० ॥

तत्र साङ्ख्यमतेन बौद्धमतमुदस्यन्नाह ।—गोलकं नेन्द्रियम् अप्राप्यकारित्वेऽतिप्रसङ्गात् इत्यत्र गोलकातिरिक्तं भौतिकमिति वाक्यं, तदप्यसङ्गतं चक्षुषा हि स्वल्पपरिमाणं महत्परिमाणञ्च गृह्यते नच स्वल्पेन महतो व्यापनं सम्भवति, नच अव्याप्य ग्रहणतोऽभौतिकानीन्द्रियाण्याहङ्कारिकाणीति ॥ ३१ ॥

साङ्ख्यं निरस्यति ।—रश्मिर्गोलकावच्छिन्नं तेजः तेनार्थस्य घटादेर्यः सन्निकर्षविशेषः संयोगविशेषस्तस्मात् तयोर्महदणोर्ग्रहणमुपपद्यते, भौतिकेऽपि प्रदीपादौ

लिङ्गः, चाक्षुषो हि रश्मिः कुड्यादिभिराहतमर्थं न प्रकाशयति, यथा प्रदीपरश्मिरिति आवरणानुमेयत्वे सतीदमाह ॥ २२ ॥

तदनुपलब्धेरहेतुः ॥ २३ ॥

रूपस्पर्शवद्धि तेजो महत्त्वादनेकद्रव्यवत्त्वाच्चोपलब्धिरिति प्रदीपवत् प्रत्यक्षत उपलभ्येत चक्षुषो रश्मिर्यदि स्यादिति ॥ २३ ॥

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥ २४ ॥

सन्निकर्षप्रतिषेधार्थेनावरणेन लिङ्गेनानुमीयमानस्य रश्मेर्या प्रत्यक्षतोऽनुपलब्धिर्नासावभावं प्रतिपादयति । यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्य ॥ २४ ॥

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ २५ ॥

भिन्नः खल्वयं द्रव्यधर्मो गुणधर्मश्च महदनेकद्रव्यवच्च विभ-ज्ञावयवमाप्यं द्रव्यं प्रत्यक्षतो नोपलभ्यते स्पर्शस्तु शीतो गृह्यते तस्य द्रव्यस्यानुबन्धात् हैमन्तशैशिरौ कल्प्येते । तथाविध-मेव च तैजसं द्रव्यमनुद्भूतरूपं सह रूपेण नोपलभ्यते स्पर्श-स्वस्योष्ण उपलभ्यते तस्य द्रव्यस्यानुबन्धात् ग्रैष्मवसन्तौ कल्प्येते यत्र त्वेषा भवति ॥ २५ ॥

महदनुप्रकाशकत्वं दृष्टम्, अभौतिकत्वे तु पुरः पश्चाद्वर्त्तिनां सर्वेषामेव ग्रहः स्यात् ॥ २२ ॥

तेजसि चक्षुष्यनुपलब्धिबाधं बौद्धः शङ्कते ।—रश्म्यर्थसन्निकर्षो न हेतुर्गोलकाति-रिक्तस्य रश्मेरनुपलब्धेः ॥ २३ ॥

समाधत्ते ।—रूपोपलब्धेः सकरणकत्वादिनानुमीयमानस्य चक्षुषः प्रत्यक्षतोऽनुप-लब्धिर्नाभावनिर्णायिकेत्यर्थः ॥ २४ ॥

कथं तर्हि नोपलभ्य इत्यत आह ।—द्रव्यस्य धर्मभेदो महत्त्वादिर्गुणस्य धर्म-भेदः उद्भूतत्वं तदधीनत्वात् प्रत्यक्षस्य द्रव्यमात्रे उपलब्धिर्न नियमः अधीभूतरूपं महत्त्वादिर्वा तस्य प्रत्यक्षं तदभावाच्चतुरादेरप्रत्यक्षम् ॥ २५ ॥

अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः॥३६॥

यत्र रूपञ्च द्रव्यञ्च तदाश्रयः प्रत्यक्षत उपलभ्यते रूपविशेषस्तु यत्नावात् क्वचिद्रूपोपलब्धिः यत्नभावाच्च द्रव्यस्य क्वचिदनुपलब्धिः स रूपधर्मोऽयमुद्भवसमाख्यात इति, अनुद्भूतरूपवायं नायनो रश्मिः, तथाचक्षुषोऽपि नोपलभ्यत इति दृष्टत्व तेजसो धर्मभेदः उद्भूतरूपसंज्ञं प्रत्यक्षं तेजो यथादित्यरश्मयः, उद्भूतरूपमनुद्भूतसंज्ञं प्रत्यक्षम् यथा प्रदीपरश्मयः। उद्भूतसंज्ञमनुद्भूतरूपसंज्ञप्रत्यक्षम् यथावादिसंयुक्तं तेजः। अनुद्भूतरूपसंज्ञोऽप्रत्यक्षश्चाक्षुषो रश्मिरिति॥ ३६॥

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः॥३७॥

यथा चेतनस्यार्थो विषयोपलब्धिभूतः सुखदुःखोपलब्धिभूतश्च कल्पते तथेन्द्रियाणि व्यूहानि विषयप्राप्त्यर्थश्च रश्मेश्चक्षुषश्च व्यूहः, रूपसंज्ञानाभिव्यक्तिश्च व्यवहारप्रकृत्यर्था द्रव्यविशेषे च प्रतीघाताद्यावरणोपपत्तिर्व्यवहारार्था सर्वद्रव्याणां विश्वरूपो व्यूह इन्द्रियवत्कर्मकारितः पुरुषार्थतन्त्रः। कर्म तु धर्माधर्मभूतं चेतनस्योपभोगार्थमिति॥ ३७॥

अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः॥ ३८॥

यद्यावरणोपलब्ध्यादिन्द्रियस्य द्रव्यविशेषे प्रतीघातः स भौतिकधर्मो न भूतानि व्यभिचरति नाभौतिकं प्रतिघातधर्मकं दृष्टमिति। अप्रतिघातस्तु व्यभिचारो भौतिकाभौति-

---

चक्षुरादावुद्भूतरूपमेव न कुत इत्याशङ्कायां भाष्यम्।—अदृष्टविशेषादीन इन्द्रियाणां व्यूहो रश्म्यादिवीव उपभोगसाधनमिति सूत्रभेदमिति केचित्॥ ३७॥

'क्रयोः समानत्वादिति। यद्यपि मन्यते प्रतिघाताद्दीप्तिमत्त्वाच्च दीप्तिरादौ प्रतिघाताद्दीप्तिकालीति प्राप्तम् दृष्टत्वात्प्रतिघातः काचाभ्रपटस्फटिकान्तरितोपलब्धेः तत्र युक्तम्, कस्मात्? यस्माद्दीप्तिमत्त्वमपि न प्रतिहन्यते काचाभ्रपटस्फटिकान्तरितप्रकाशात् प्रदीपरत्नसोमां, प्रकाशादिषु पाचकत्व तेजसोऽप्रतिघातः प्रत्यक्षते चानुपलब्धिः कारणभेदात् ॥ ३८ ॥

मध्यन्दिनोल्काप्रकाशानुपलब्धिवच्चक्षुरनुपलब्धिः॥३९॥

यथाऽनेकद्रव्यत्वसमवायाद्रूपविशेषवत्त्वाच्चोपलब्धिरिति सत्युपलब्धिकारणे मध्यन्दिनोल्काप्रकाशो नोपलभ्यते आदित्यप्रकाशेनाभिभूतः, एवं महत्त्वेऽनेकद्रव्यवत्त्वाद्रूपविशेषवत्त्वाच्चोपलब्धिरिति, सत्युपलब्धिकारणे चाक्षुषो रश्मिर्नोपलभ्यते निमित्तान्तरतः, तत्र व्याख्यातमनुद्भूतरूपस्पर्शद्रव्यस्य प्रत्यक्षतोऽनुपलब्धिरिति, अत्यन्तानुपलब्धिरभावकारणम्, यो हि ब्रवीति नोष्णप्रकाशो मध्यन्दिने आदित्यप्रकाशाभिभवान्नोपलभ्यत इति तस्यैतत् स्यात् ॥ ३९ ॥

न रात्रावप्यनुपलब्धेः ॥ ४० ॥

अप्यनुमानतोऽनुपलब्धिरिति एवमत्यन्तानुपलब्धेर्नोष्णप्रकाशो नास्ति, नत्वेवं चक्षुषो रश्मिरिति उपपत्तिरूपा चेयम् ॥ ४० ॥

महतो रूपवतोऽनुपलब्धौ दृष्टान्तमाह।—महतो रूपवतश्चोल्काप्रकाशस्य सौरालोकेनाभिभवान्मध्यन्दिनेऽनुपलब्धिवदनुद्भूतरूपवत्त्वाच्चक्षुषोऽप्यनुपलब्धः सम्भवतीति भावः ॥ ३९ ॥

नन्वेवं घटादेरपि रश्मिः स्यात् सौरालोकेनाभिभवात् पुनरपह इत्यवाह।—नेत्यस्य घटादौ रश्मिरिति शेषः ॥ ४० ॥

वाह्यप्रकाशानुग्रहादिविषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४१ ॥

वाह्येन प्रकाशेनानुगृहीतं चक्षुर्विषयग्राहकम्, तदभावेऽनुपलब्धिः, सति च प्रकाशानुग्रहे श्रोतस्यर्थोपलब्धौ च सत्यां तदाश्रयस्य द्रव्यस्य चक्षुषाऽग्रहणम् रूपस्यानुद्भूतत्वात् सेयं रूपानभिव्यक्तितो रूपाश्रयस्य द्रव्यस्यानुपलब्धिर्दृष्टा तत्र यदुक्तं तदनुपलब्धेरहेतुरित्येतदयुक्तम् ॥ ४१ ॥

अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥

कस्मात् ? पुनरभिभवोऽनुपलब्धिकारणम् चाक्षुषस्य रश्मेर्नोच्यत इति । वाह्यप्रकाशानुग्रहनिरपेक्षतायाश्चेति चार्थः. यद्रूपमभिव्यक्तमनुद्भूतं वाह्यप्रकाशानुग्रहं च नापेक्षते तद्विषयोऽभिभवो विपर्ययेऽभिभवाभावात् अनुद्भूतरूपत्वाच्चानुपलभ्यमानं वाह्यप्रकाशानुग्रहाच्चोपलभ्यमानं नाभिभूयत इति एवमुपपन्नम् अस्ति चाक्षुषो रश्मिरिति ॥ ४२ ॥

नन्वनुद्भूतरूपवत्त्वाच्चक्षुषोऽनुपलब्धिर्न त्वभिभवादित्यत्र किं विनिगमकमिति तटस्थाशङ्कायामाह ।—अनभिव्यक्तितोऽनुद्भूतरूपवत्त्वाच्चक्षुषोऽनुपलब्धिः, कुतः ? वाह्यप्रकाशानुग्रहात् । सौरालोकादित्वादित्यादिविषयोपलब्धः तस्योद्भूतरूपवत्त्वे वाह्यप्रकाशापेक्षा न स्यात्, अभिभूतत्वे च तत्सादित्येनापि प्रत्यक्षजननं न स्यात्, अभिभूतस्य कार्य्याजनकत्वादिति भावः ॥ ४१ ॥

ननु चक्षुषो नाभिभवः किन्तु तद्रूपस्य, तस्यैव प्रत्यक्षजनकत्वे नागाभावः किञ्चाभिभवात्तस्य न प्रत्यक्षनियतप्रत्यक्षजननेन विरोधाभाव इत्याशङ्कायामाह ।—रूपस्य अभिव्यक्तौ प्रत्यक्षे उद्भूतत्व इति यावत् उद्भूतरूपस्य प्रत्यक्षाभावे चाभिभवकल्पना नलेवं प्रकृते सुवर्णादिवत् सर्वदाभिभावकद्रव्यान्तरकल्पने च गौरवमिति भावः ॥ ४२ ॥

नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४३ ॥

दृश्यन्ते हि नक्तं नयनरश्मयो नक्तञ्चराणां वृषदंशप्रभृतीनाम्, तेन शेषस्यानुमानमिति, जातिभेदवदिन्द्रियभेद इति चेत् धर्ममात्रं चानुपपन्नम् आवरणस्य प्राप्तिप्रतिषेधार्थस्य दर्शनादिति ॥ ४३ ॥

अप्राप्यग्रहणम् काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥ ४४ ॥

इन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वानुपपत्तेः। कस्मात्? तृणादिसर्वद्रव्यं काचेऽभ्रपटले वा प्रतिहतं दृष्टमव्यवहितेन सन्निकृष्यते व्यवहन्यते वै प्राप्तिर्व्यवधानेनेति यदि च रश्मार्थसन्निकर्षो ग्रहणहेतुः स्यात् न व्यवहितस्य सन्निकर्ष इत्यग्रहणं स्यात् अस्ति चेयं काचाभ्रपटलस्फटिकान्तरितोपलब्धिः सा ज्ञापयत्यप्राप्यकारीणि इन्द्रियाणि अतएवाभौतिकानि प्राप्यकारित्वं हि भौतिकधर्म इति ॥ ४४ ॥

न कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥

अप्राप्यकारित्वे मतीन्द्रियाणां कुड्यान्तरितस्यानुपलब्धिर्न

चक्षुषि प्रमाणान्तरमाह।—नक्तञ्चराणां वृषदंशादीनां गोलके रश्मिदर्शनात् तद्दृष्टान्तेन परेषामपि रश्म्यनुमानमिति भावः, अन्यथा तस्मिन् तस्य प्रत्यक्षं न स्यादिति हृदयम् ॥ ४३ ॥

अप्राप्यकारित्वं चक्षुषः स्यादित्याशङ्क्य ॥ ४४ ॥

समाधत्ते।—परन्तु उक्तसूत्रस्य पूर्वपक्षपरत्वं मन्यमानस्य भाष्यकारस्यावतरणिका अप्राप्यग्रहणमिति, वस्तुतः सिद्धान्तसूत्रमिदं तत्प्रदर्शितदृष्टान्तेन काचाभ्रपट

स्यात् प्राप्यकारित्वेऽपि तु काचाभ्रपटलस्फटिकान्तरितोप लब्धिर्न स्यात् ॥ ४५ ॥

अप्रतिघातात् सन्निकर्षोपपत्तिः ॥ ४६ ॥

न च काचाभ्रपटलं वा नयनरश्मिं विष्टभ्नाति सोऽप्रतिहन्यमानः सन्निकृष्यत इति, यच्च मन्यते न भौतिकस्याप्रतीघात इति तच्च ॥ ४६ ॥

आदित्यरश्मेः स्फटिकान्तरेऽपि दाह्येऽविघातात् ॥ ४७ ॥

आदित्यरश्मेरविघातात् स्फटिकान्तरितेऽप्यविघातात् दाह्येऽविघातात् अविघातादिति च पदाभिसम्बन्धभेदादाख्यभेद इति, यथा वाक्यं चार्थभेद इति, प्रतिवाक्यं वाक्यार्थभेदः आदित्यरश्मिः कुड्यादिषु न प्रतिहन्यते अविघातात् कुड्यस्यमुदकं तपति प्राप्तौ हि द्रव्यान्तरगुणस्य उष्णस्पर्शस्य ग्रहणम् तेन च शीतस्पर्शाभिभव इति, स्फटिकान्तरितेऽपि प्रकाशनीये प्रदीपरश्मीनामप्रतिघातः अप्रतिघातात् प्राप्तस्य ग्रहणमिति भर्जनकपालादिस्थञ्च द्रव्यमाग्नेयेन तेजसा दह्यते तत्राविघातात् प्राप्तिः प्राप्तौ तु दाहो नाप्राप्यकारि तेज इति

रितप्रकाशकत्वेन तैजसत्वं सिध्यतीति नन्वप्राप्यकारित्वं किं न स्यादत्राह—कुड्या दि । उक्तस्य तैजसत्वस्य प्रतिषेधो गौणकाशकत्वं न सुभणतीति कुड्यान्तरितस्यानुपलब्धेरित्याहुः ॥ ४५ ॥

ननु कुड्यान्तरित इव काचान्तरितेऽपि सन्निकर्षो न सम्भवतीति कथं प्राप्यकारित्वमित्याशङ्क्याहाह ।—काचादिना स्वच्छद्रव्येणाप्रतिघातादप्रतिबन्धात् सन्निकर्षोपपत्तेरिति भावः ॥ ४६ ॥

अविघातादिति च केवलं पदमुपादीयते कोऽयमविघातो नाम अव्यूह्यमानावयवेन व्यवधायकेन द्रव्येणासर्वतो द्रव्यस्याविष्टम्भः क्रियाहेतोरप्रतिबन्धः प्राप्तेरप्रतिषेध इति, दृष्टं हि कक्षगतनिषक्तानामपां वहिः शीतस्पर्शस्य ग्रहणम्, न च इन्द्रियेणासन्निकृष्टस्य द्रव्यस्य स्पर्शोपलब्धिः दृष्टौ च प्रस्यन्दपरिस्रवौ तत्र काचाभ्रपटलादिभिर्नयनरश्मेरप्रतिघातादिभिरर्थेन सह सन्निकर्षादुपपन्नं ग्रहणमिति ॥ ४७ ॥

नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥

काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघातः कुड्यादिवद्वा काचाभ्रपटलादिभिः प्रतिघात इति नियमे कारणं वाच्यमिति ॥ ४८ ॥

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ॥ ४९ ॥

आदर्शोदकयोः प्रसादो रूपविशेषः स्वो धर्मो नियमदर्शनात् प्रसादस्य वा स्वो धर्मो रूपोपलब्धनम् यथादर्शप्रतिहतस्य पराहृत्तस्य नयनरश्मेः स्वेन मुखेन सन्निकर्षे सति स्वमुखोपलब्धनं प्रतिविम्बग्रहणाख्यमादर्शरूपानुग्रहात्तन्निमित्तं भवति

तत्र दृष्टान्तमाह।—दार्ष्ट इति वस्तुमात्रोपलक्षणं परेतु दार्ष्टे कथाभादौ वस्त्वादेरविघातपरं तदित्याहुः ॥ ४७ ॥

आक्षिपति।—अप्रतिघाती न युक्त इतरस्य स्फटिकादेरितरस्य कुड्यादेर्यो धर्मः प्रतिघातकत्वं तत्प्रसङ्गात् स्फटिकादिकमपि कुड्यादिवत्प्रतिबन्धकं भवेदिति भावः ॥ ४८ ॥

समाधत्ते।—आदर्शे उदके च प्रसादस्वाभाव्यात् स्वच्छस्वभावत्वात् सुखादिरूपोपलब्धिर्न तु भित्त्यादावेवं स्फटिकाद्यन्तरितस्योपलब्धिर्नतु कुड्याद्यन्तरितस्येति

आदर्शरूपोपघाते तदभावात् कुड्यादिषु च प्रतिविम्बग्रहणं न भवति एवं काचाभ्रपटलादिभिरविघातस्वच्छरूपैः कुड्यादिभिश्च प्रतिघातो द्रव्यभावनियमादिति ॥ ४८ ॥

दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥

प्रमाणस्य तत्त्वविषयत्वात् न खलु भोः परोक्षमाणेन दृष्टानुमिता अर्थाः शक्या नियोक्तुमेवं भवतेति, नापि प्रतिषेद्धुमेवं स भवतेति नन्वीदमुपपद्यते रूपवद्गन्धोऽपि चाक्षुषो भवत्विति गन्धवद्वा रूपस्याक्षुषं मा भूदिति अग्निप्रतिपत्तिवद्धूमेनोदकप्रतिपत्तिरपि भवत्विति उदकाप्रतिपत्तिवद्वा धूमेनाग्निप्रतिपत्तिरपि मा भूदिति किं कारणम् यथा खल्वर्था भवन्ति य एषां स्वोभावः स्वोधर्म इति तथाभूताः प्रमाणेन प्रतिपद्यन्त इति तथाभूतविषयकं हि प्रमाणमिति इमौ खलु नियोगप्रतिषेधौ भवतादेशिनौ काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघातो भवतु कुड्यादिवद्वा काचाभ्रपटलादिभिरप्रतिघातो मा भूदिति न दृष्टानुमिताः खल्विमे द्रव्यधर्माः प्रतिघाताप्रतिघातयोर्ह्युपलब्ध्यनुपलब्धी व्यवस्थापिके व्यवहितानुपलब्ध्याऽनुमीयते कुड्यादिभिः प्रतिघातः, व्यवहितोपलब्ध्याऽनुमीयते काचाभ्रपटलादिभिरप्रतिघात इति अथापि खल्वेकमिदमिन्द्रियं बह्वीन्द्रियाणि वा कुतः संशयः ॥ ५० ॥

स्वाभाव्यान्न दोषः एवेन वज्रादेर्घटादिनाऽप्रतिघातवच्चक्षुषोऽपि प्रतिघातो न स्यादिति प्रयुक्तं वज्रादेरप्रतिघन्येऽपि दीपालोकादेः प्रतिबन्धसम्भवादिति भावः ॥ ४८ ॥

चक्षुषश्चाद्भुतत्वकथने किं मानमित्याह ।—हि यस्मात् दृष्टानामनुमितानां वा पदार्थानां दृष्टेनानुमितानामिति वार्थः तेषामेवं भवितेति नियोग एवं मा भवितेति प्रतिषेधो वा नोपपद्यते युक्त्यनुसारिणी हि कल्पनेति भावः ॥ ५० ॥

समाप्तमिन्द्रियपरीक्षाप्रकरणम् ॥ ३० ॥

स्थानान्यत्वे नानात्वादवयविनानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५१ ॥

बहूनि द्रव्याणि नानास्थानानि दृश्यन्ते नानास्थानस्य सत्रैकोऽवयवी चेति तेनेन्द्रियेषु भिन्नस्थानेषु संशय इति एकमिन्द्रियम् ॥ ५१ ॥

त्वगव्यतिरेकात् ॥ ५२ ॥

त्वगेकमिन्द्रियमित्याह, कस्मात् ? अव्यतिरेकात्, न त्वचा किञ्चिदिन्द्रियाधिष्ठानं न घ्राणं न चासत्यां त्वचि किञ्चिद्विषयग्रहणं भवति यया सर्वेन्द्रियस्थानानि व्याप्तानि यस्याञ्च सत्यां विषयग्रहणं भवति सा त्वगेकमिन्द्रियमिति ॥ ५२ ॥

नेन्द्रियान्तरार्थानुपलब्धेः ॥ ५३ ॥

स्पर्शोपलब्धिलक्षणायां सत्यां त्वचि गृह्यमाणे त्वगिन्द्रियेण स्पर्शेन्द्रियान्तरार्था रूपादयो न गृह्यन्ते अक्ष्यादिभिः न स्पर्शग्राहकादिन्द्रियान्तरमस्तीति स्पर्शवदक्ष्यादिभिर्गृह्येरन् रूपादयो न च गृह्यन्ते तस्मान्नैकमिन्द्रियं त्वगिति ॥ ५३ ॥

त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः ॥५४॥

यथा त्वचोऽवयवविशेषः कश्चिच्चक्षुषि सन्निकृष्टो धूमस्पर्शं

दर्शनस्पर्शनाभ्यामित्यादिकमिन्द्रियनानात्वे युक्त्यन्तरं दर्शयितुं पूर्वपक्षमाह।—स्थानान्यत्वे स्थानभेदे घटपटादीनां नानात्वदर्शनान्नानावयवस्थितस्यावयविन एकत्वदर्शनाच्च इन्द्रियाणां नानात्वमेकत्वं वेति संशयः ॥ ५१ ॥

पूर्वपक्षसूत्रम्।—सर्वेन्द्रियप्रदेशेष्वव्यतिरेकात् सत्यात्वमेवैकमिन्द्रियस्य ॥५२॥

गृह्णाति गान्धः एवं त्वचोऽवयवविशेषो रूपादिग्राहकस्तेषा-मुपघातादन्धादिभिर्न गृह्यन्ते रूपादय इति ॥ ५४ ॥

आहतत्वादहेतुः ॥ ५५ ॥

त्वगव्यतिरेकादेकमिन्द्रियमित्युक्तं। त्वगवयवविशेषेण धूमोपलब्धिवद्रूपोपलब्धिरित्युच्यते एवं च सति नानाभूतानि विषयग्राहकाणि विषयव्यवस्थानात् तन्नाशे विषयग्रहणस्य भावात् तदुपघाते चाभावात् तथा च पूर्ववाद उत्तरेण वादेन व्याहन्यत इति, सन्दिग्धत्वाच्चातिरेकः पृथिव्यादिभिरपि भूतै-रिन्द्रियाधिष्ठानानि व्याप्तानि नच तेष्वसत्सु विषयग्रहणं भव-तीति तस्मान्न त्वगव्यदा सर्वविषयकमेकमिन्द्रियमिति ॥ ५५ ॥

न युगपदर्थानुपलब्धेः ॥ ५६ ॥

आत्मा मनसा सम्बध्यते मन इन्द्रियेण इन्द्रियं सर्वार्थैः सन्निकृष्टमिति आत्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो युगपद्ग्रह-णानि स्युः, न च युगपद्रूपादयो गृह्यन्ते, तस्मान्नैकमिन्द्रियं सर्वविषयमस्तीति अप्राप्तचर्याच्च विषयग्रहणानां नैकमिन्द्रियं सर्वविषयकं. साप्तचर्ये हि विषयग्रहणानामन्धाद्यनुपपत्ति-रिति ॥ ५६ ॥

विप्रतिषेधाच्च न त्वगेका ॥ ५७ ॥

न खलु त्वगेकमिन्द्रियं व्याघातात् त्वचा रूपाग्राह्यग्राहीणि

उत्तरयति।—युगपत् एकदा अर्थानां सम्बन्धाभावात् अनुपलब्धेर्न त्वगे-वैकमिन्द्रियम् अन्यथा तस्य व्यापकत्वाद्व्यवहितादीनामपि ग्राह्यग्राहकत्वं स्यादिति भावः ॥ ५६ ॥

गृह्यन्त इति अप्राप्यकारित्वे स्पर्शादिविषयेवं प्रसङ्गः, स्पर्शादीनाञ्च प्राप्तानां ग्रहणादूपादीनामप्राप्तानामग्रहणमिति प्राप्तं, प्राप्याप्राप्यकारित्वमिति चेत् आवरणानुपपत्तेर्विषयमात्रस्य ग्रहणम्, अथापि मन्येत प्राप्ताः स्पर्शादयस्त्वचा गृह्यन्ते रूपादि त्वप्राप्तानीति, एवं सति नास्त्यावरणम् आवरणानुपपत्तेश्च रूपमात्रस्य ग्रहणं व्यवहितस्य चाव्यवहितस्य चेति। दूरान्तिकानुविधानं च रूपोपलब्ध्यनुपलब्ध्योर्न स्यात् अप्राप्तं त्वचा गृह्यते रूपमिति दूरे रूपस्याग्रहणमन्तिके च ग्रहणमित्येतन्न स्यादिति एकत्वप्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते ॥ ५७ ॥

इन्द्रियार्थपञ्चत्वात् ॥ ५८ ॥

अर्थः प्रयोजनं तत् पञ्चविधमिन्द्रियाणां, स्पर्शनेनेन्द्रियेण स्पर्शग्रहणे सति न तेनैव रूपं गृह्यत इति, रूपग्रहणप्रयोजनं चक्षुरनुमीयते, स्पर्शरूपग्रहणे च ताभ्यामेव गन्धो न गृह्यत इति गन्धग्रहणप्रयोजनं घ्राणमनुमीयते, त्रयाणां ग्रहणे न तैरेव रसो गृह्यत इति रसग्रहणप्रयोजनं रसनमनुमीयते, न चतुर्णां ग्रहणे तैरेव शब्दः श्रूयत इति शब्दग्रहणप्रयोजनं श्रोत्रमनुमीयते, एवमिन्द्रियप्रयोजनस्यानितरैतरसाधनमाश्रित्वात् पञ्चैवेन्द्रियाणि ॥ ५८ ॥

न तदर्थबहुत्वात् ॥ ५९ ॥

इन्द्रियाणां नानात्वे कार्यभेदमानमाह।—इन्द्रियार्थानामिन्द्रियग्राह्याणां रूपादीनां पञ्चत्वात् पञ्चविधत्वात् रूपादीनां हि चक्षुरादयैकैकेन्द्रियमात्रग्राह्यत्वाल्लक्षणम्; तच्चैकेन्द्रियपक्षे न सम्भवति अन्यादीनां रूपाद्युपलब्धिप्रसङ्गइति भावः ॥ ५८ ॥

न खल्विन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति सिध्यति, कस्मात् ? तेषामर्थानां बहुत्वात्, बहवः खल्विमे इन्द्रियार्थाः, स्पर्शस्तावच्छीतोष्णानुष्णशीता इति, रूपाणि शुक्लहरितादीनि, गन्धा इष्टानिष्टोपेक्षणीयाः रसाः कटुकादयः शब्दाः, वर्णात्मानो ध्वनिमात्राश्च भिन्नाः, तत्र चेन्द्रियाणि तत्रेन्द्रियार्थबहुत्वाद्बहूनीन्द्रियाणि प्रसज्येयन्त इति ॥ ५९ ॥

गन्धत्वाद्यव्यतिरेकात् गन्धादीनामप्रतिषेधः॥६०॥

गन्धत्वादिभिः स्वसामान्यैः ज्ञातव्यवस्थानां गन्धादीनां यानि गन्धादिग्रहणानि तान्यसमानसाधनसाध्यत्वादग्राहकान्तराणि न प्रयोजयन्ति, अर्थसमूहोऽनुमानमुक्तो नार्थैकदेशः अर्थैकदेशश्चाश्रित्य विषयपञ्चत्वमात्रं भवान् प्रतिषेधति, तस्मादयुक्तोऽयं प्रतिषेध इति । कथं पुनर्गन्धत्वादिभिः स्वसामान्यैः ज्ञातव्यवस्था गन्धादय इति । स्पर्शः खल्वयं त्रिविधः, शीत उष्णोऽनुष्णशीतश्च स्पर्शत्वेन स्वसामान्येन संगृहीतः गृह्यमाणे च शीतस्पर्शे नोष्णस्यानुष्णशीतस्य वा ग्रहणम् ग्राहकान्तरं प्रयोजयति, स्पर्शभेदानामेकसाधनसाध्यत्वात् । येनैव शीतस्पर्शो गृह्यते तेनैवेतरावपीति । एवं गन्धत्वेन गन्धानां रूपत्वेन रूपाणां रसत्वेन रसानां शब्दत्वेन शब्दानामिति, गन्धादिग्रहणानि पुनरसमानसाधनसाध्यत्वादग्राहकान्तराणां प्रयोजकानि, तस्मादुपपन्नमिन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति, यदि सामान्यं संग्राहकं प्राप्तमिन्द्रियाणाम् ॥६०॥

ग्रहणे ।—इन्द्रियार्थानां नीलपीतादीनां बहुत्वादिन्द्रियाणां बहुत्वप्रसङ्गः-दिन्द्रियार्थपञ्चत्वादिन्द्रियभेदो न युक्तः ॥ ५९ ॥

साधने ।—उक्तप्रतिषेधो न गन्धादीनां सौरभादीनां गन्धत्वाद्यव्यतिरेकाद्

विषयत्वाभ्यतिरेकादेकत्वम् ॥ ६१ ॥

विषयत्वेन हि सामान्येन गन्धादयः संगृहीता इति ॥ ६१ ॥

न बुद्धिलक्षणाधिष्ठान-गत्याकृति-जातिपञ्च-त्वेभ्यः ॥ ६२ ॥

न खलु विषयत्वेन सामान्येन कृतव्यवस्था विषया ग्राह्कान्तरनिरपेक्षा एकसाधनग्राह्या अनुमीयन्ते, अनुमीयन्ते च पञ्च गन्धादयो गन्धत्वादिभिः स्वसामान्यैः कृत-व्यवस्था इन्द्रियान्तरग्राह्याश्चास्मादसमञ्जसमेतत्। अयमेव चार्थोऽभिप्रेतो बुद्धिलक्षणपञ्चत्वादिति, बुद्धय एव लक्षणानि विषयग्रहण-लिङ्गत्वादिन्द्रियाणाम्, तदेतदिन्द्रियार्थपञ्चत्वादित्येतस्मिन् सूत्रे कृतभाष्यमिति, तस्माद्बुद्धिलक्षणपञ्चत्वात् पञ्चेन्द्रियाणि, अधिष्ठानान्यपि खलु पञ्चेन्द्रियाणाम् सर्वशरीराधिष्ठानं स्पर्शनं स्पर्शग्रहणलिङ्गम्, कृष्णसाराधिष्ठानं चक्षुर्वर्हिर्निःसृतं रूपग्रहणलिङ्गम्, नासाधिष्ठानं घ्राणम्, जिह्वाधिष्ठानं रसनम्, कर्णच्छिद्राधिष्ठानं श्रोत्रम्, गन्धरसरूपस्पर्शशब्दग्रहणलिङ्गत्वा-दिति। गतिभेदादपीन्द्रियभेदः, कृष्णसारोपनिबद्धं चक्षुर्वहि-र्निःसृत्य रूपाधिकरणानि द्रव्याणि प्राप्नोति, स्पर्शनादीनि

गन्धत्वादिसत्त्वात् तथा च गुणविभागकगन्धत्वावच्छिन्नग्राहकत्वमभिप्रेतं नत्वसाधारण धर्मावच्छिन्नग्राहकत्वमिति भावः ॥ ६० ॥

यदि गन्धत्वादिना सुरभ्यादीनामेकं तदा विषयत्वेन गन्धरसादीनामप्येकादि-न्द्रियैकं स्यादिति यजते।

विषयत्वाभ्यतिरेकादविषयत्वेनैक्यात् ॥ ६१ ॥

उत्तरयति।—इन्द्रियाणामेकं न हीत्यादि—बुद्धीत्यादि। बुद्धेश्चाक्षुषादीयं लक्षण चाक्षुषत्वादि तत्पञ्चत्वेन तद्व्यवच्छिन्नकारणानां पञ्चत्वम् एवमधिष्ठानं कृष्णादि

त्विन्द्रियाणि विषया एवाश्रयोपसर्पणात् प्रत्यासीदन्ति, सन्तानहत्त्या शब्दस्य श्रोत्रप्रत्यासत्तिरिति आकृतिः खलु परिमाणमियत्ता सा पञ्चधा स्वस्थानमात्राणि घ्राणरसनस्पर्शनानि विषयग्रहणेनानुमेयानि, चक्षुः कृष्णसाराश्रयं वह्निर्निःसृतं विषयव्यापि, श्रोत्रं नान्यदाकाशात्, तच्च विभु शब्दमात्रानुभवानुमेयं पुरुषसंस्कारोपग्रहाच्चाधिष्ठाननियमेन शब्दस्य व्यञ्जकमिति। जातिरिति योनिं प्रचक्षते पञ्च खल्विन्द्रिययोनयः पृथिव्यादीनि भूतानि, तस्मात् प्रकृतिपञ्चत्वादपि पञ्चेन्द्रियाणीति सिद्धम् ॥ ६२ ॥

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६३ ॥

कथं पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति। दृष्टो हि वायुादीनां भूतानां गुणविशेषाभिव्यक्तिनियमः, वायुः स्पर्शव्यञ्जकः, आपो रसव्यञ्जिकाः, तेजो रूपव्यञ्जकं, पार्थिवं किञ्चिद्द्रव्यं कस्यचिद्द्रव्यस्य गन्धव्यञ्जकम्। अस्ति चायमिन्द्रियाणां भूतगुणविशेषोपलब्धिनियमः, तेन भूतगुणविशेषोपलब्धेर्मन्यामहे भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति, गन्धादयः पृथिव्यादिगुणा इत्युपदिष्टम् उद्देशश्च पृथिव्यादीनामेकगुणत्वे समान इत्यत आह ॥ ६३ ॥

विषयसत्यत्वात् गतिः दूरादौ गमनम् इदं चक्षुरधिकृत्य, यद्वा गतिः प्रकारस्तस्य च प्रकाराणां पञ्चत्वात् चक्षुर्हि गत्वा गच्छति स्वदेहावच्छेदेन श्रोत्रं कर्णावच्छेदेनेत्यादिप्रकारभेदात् आकृतिर्गोत्वादीनां संस्थानविशेषः जातिः पृथिवीत्वादि वस्तुतो जातिः धर्मरूपेण श्रोत्रत्वसंग्रहः ॥ ६२ ॥

घ्राणादेः पृथिवीत्वादिसत्त्वे मानमाह।—भूतानां पृथिव्यादीनां ये गुणविशेषा गन्धादयस्तदुपलब्धकत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतादिदृष्टान्तेन पृथिवीत्वादि साधनमिति भावः ॥ ६३ ॥

समानमिन्द्रियमनात्मकारणम् ॥ ३१ ॥

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्य्यन्ताः पृथिव्याः अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥ ६४ ॥

स्पर्शपर्य्यन्तानामिति विभक्तिविपरिणामः, आकाशस्योत्तरं शब्दः स्पर्शपर्य्यन्तेभ्य इति, कथं तन्निर्देशः ? स्वतन्त्रविनियोगसामर्थ्यात्, तेनोत्तरशब्दस्य परार्थाभिधानं विज्ञायते, उद्देशसूत्रे हि स्पर्शपर्य्यन्तेभ्यः परशब्द इति तन्त्रं वा स्पर्शस्य विवक्षितत्वात् स्पर्शपर्य्यन्तेषु नियुक्तेषु योऽन्यस्तदुत्तरः शब्द इति ॥ ६४ ॥

न सर्वगुणानुपलब्धेः ॥ ६५ ॥

नायं गुणनियोगः साधुः, कस्मात् ? यस्य भूतस्य ये गुणा न तै तदात्मकेनेन्द्रियेण सर्वे उपलभ्यन्ते पार्थिवेन हि घ्राणेन स्पर्शपर्य्यन्ता न गृह्यन्ते गन्ध एवैको गृह्यते एवं शेषेष्वपीति ॥ ६५ ॥

एकैकस्यैवोत्तरो गुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥ ६६ ॥

कथं तर्हीमे गुणाः विनियोक्तव्या इति,—गन्धादीनामेकैको यथाक्रमं पृथिव्यादीनामेकैकस्य गुणः, अतस्तदनुपलब्धिः तेषां

क्रमप्राप्तार्थपरीक्षणाय सिद्धान्तमुक्तवम्।—स्पर्शपर्य्यन्तेषु मध्ये पूर्वपूर्व त्यक्त्वा अप्तेजोवायूनां गुणा ज्ञातव्याः उत्तरः शब्द आकाशस्य गुणः तथा च स्पर्शान्ता पृथिव्या रसरूपस्पर्शा जलस्य रूपस्पर्शौ तेजसः स्पर्शो वायोः शब्द आकाशस्य ॥ ६४ ॥

आक्षिपति।—उक्तो गुणनियमो न युक्तः पृथिव्यादेर्गुणत्वाभिमतानां सर्वेषां ग्राह्यादिग्राह्यत्वाभावान्न पार्थिवत्वादिकं घ्राणेन पृथिव्या रसाद्यग्रहणात् यहि रिन्द्रियाणां स्वप्रकृतिव्यतिरिक्तयोग्यार्थविशेषगुणग्राहकत्वनियमो भवतीति भावः ॥ ६५ ॥

तयोस्तस्य चानुपलब्धिः, घ्राणेन रसरूपस्पर्शानां रसेन रूपस्पर्शयोः, चक्षुषा स्पर्शस्येति ॥ ६६ ॥

संसर्गाच्चानेकगुणग्रहणम् ॥ ६७ ॥

कथं तर्ह्यनेकगुणानि भूतानि गृह्यन्त इति ।—अबादिसंसर्गाच्च पृथिव्यां रसादयो गृह्यन्ते एवं शेषेष्वपीति नियमस्तर्हि न प्राप्नोति संसर्गस्यानियमाच्चतुर्गुणा पृथिवी, त्रिगुणा आपो, द्विगुणं तेजः, एकगुणो वायुरिति ॥ ६७ ॥

विष्टं ह्यपरम्परेण ॥ ६८ ॥

नियमश्चोपपद्यते कथम् ? पृथिव्यादीनां पूर्वं पूर्वमुत्तरेणोत्तरेण विष्टमतः संसर्गानियम इति तच्चेतद्भूतसृष्टौ वेदितव्यमेतर्हीति ॥ ६८ ॥

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ६९ ॥

नेति त्रिसूत्रीं प्रत्याचष्टे, कस्मात् ? पार्थिवस्य द्रव्यस्याप्यस्य च प्रत्यक्षत्वात्, महत्त्वानेकद्रव्यत्वाद्रूपाच्चोपलब्धिरिति तैजसमेव द्रव्यं प्रत्यक्षं स्यात् न पार्थिवमाप्यं वा रूपाभावात् तेजोवत्तु पार्थिवाप्ययोः प्रत्यक्षत्वात् न संसर्गादनेकगुणग्रहणं भूतानामिति । भूतान्तररूपकृतस्तश्च पार्थिवाप्ययोः प्रत्यक्षत्वं ब्रुवतः प्रत्यक्षो वायुः प्रसज्यते नियमे वा कारणमुच्यताम्

इत्यत्र पृथिव्यादावुपलभ्यमानानां रसादीनां का गतिरित्यत्र स्वमतमाह ।—उत्तरोत्तराणाम् अबादीनाम् एकैकस्यैव एकैकक्रमेण तदुत्तरोत्तरगुणसद्भावात् रसादिगुणसद्भावात् तदनुपलब्धिर्जलादीनां रसादीनां घ्राणादिनानुपलब्धिरित्यर्थः ॥ ६६ ॥

तर्हि कथं पृथिव्यादौ रसादियहणं तत्राह ।—अपरं पृथिव्यादिपरेण जलादिना, हि यस्मात् विष्टं सम्बद्धं तथा च पृथिव्याद्यवच्छिन्नजलादिना रसनासंयोगाद्रसादियह इति भावः ॥ ६७ ॥ ६८ ॥

इति, रसयोर्वा पार्थिवाप्ययोः प्रत्यक्षत्वात् पार्थिवो रसः षड्विधः, आप्यो मधुर एव न चैतत् संसर्गाद्विवेतुमर्हति, रूपयोर्वा पार्थिवाप्ययोः प्रत्यक्षत्वात् तैजसरूपानुगृह्णीतयोः संसर्गे हि व्यञ्जकमेव रूपं न व्यङ्ग्यमस्तीति एकानेकविधत्वे च पार्थिवाप्ययोः प्रत्यक्षत्वात् रूपयोः, पार्थिवं हरितलोहितपीतादनेकविधं रूपम्, आप्यन्तु शुक्लमप्रकाशम्। न चैतदेकगुणानां संसर्गे मत्युपलभ्यत इति। उदाहरणमाचष्टेतत्, अतः परं प्रपञ्चः, स्पर्शयोर्वा पार्थिवतैजसयोः प्रत्यक्षत्वात् पार्थिवोऽनुष्णाशीतः स्पर्शः, उष्णस्तैजसः प्रत्यक्षो, न चैतदेकगुणानामनुष्णाशीतस्पर्शेन वायुना संसर्गणोपपद्यत इति, अथवा पार्थिवाप्ययोर्द्रव्ययोर्व्यवस्थितगुणयोः प्रत्यक्षत्वात् चतुर्गुणं पार्थिवं द्रव्यं त्रिगुणमाप्यं प्रत्यक्षं तेन तत्कारणमनुमीयते, तथाभूतमिति तस्य कार्यं लिङ्गं कारणभावादि कार्यभाव इति, एवं तैजसवायव्ययोर्द्रव्ययोः प्रत्यक्षत्वाद् गुणव्यवस्थायास्तत्कारणे द्रव्ये व्यवस्थानुमानमिति। दृष्टश्च विवेकः पार्थिवाप्ययोः प्रत्यक्षत्वात् पार्थिवं द्रव्यमवादिभिर्वियुक्तं प्रत्यक्षतो गृह्यते आप्यञ्च पराभ्यां तैजसञ्च वायुना न चैकैकगुणं गृह्यत इति निरनुमानन्तु विष्टं ह्यपरं परेणाव्याप्तादिति नात्रलिङ्गमनुमापकं गृह्यत इति येनैतदेवं प्रतिपद्येमहि यच्चोक्तं विष्टं ह्यपरं परेणेति भूतसृष्टौ वेदितव्यं न मामतमिति नियमकारणाभावादयुक्तं दृष्टञ्च मामतमपरम्परेण विष्टमिति वायुना च विष्टं तेज इति। विष्टत्वं संयोगः स च द्वयोः समानो वायुना च विष्टत्वात् स्पर्शवत्तेजो न तु तेजसा-

---

सिद्धान्तसूत्रम्।—उक्तो गुणनियमो न युक्तः, कुतः? पार्थिवस्यापि च द्रव्यस्य

विष्टत्वाद्रूपवान् वायुरिति नियमकारणं नास्तीति। दृष्टश्च तैजसेन स्पर्शेन वायव्यस्पर्शस्याभिभवाद्ग्रहणमिति नच तेनैव तस्याभिभव इति ॥ ६९ ॥

पूर्वं पूर्वं गुणोत्कर्षात्तत्तत्प्रधानम् ॥ ७० ॥

तदेवं न्यायविरुद्धं प्रवादं प्रतिषिध्यन् सर्वगुणानुपलब्धेरिति चोदितं समाधीयते। तस्माच्च सर्वगुणोपलब्धिः घ्राणादीनां पूर्वं पूर्वं गन्धादेर्गुणस्योत्कर्षात् तत्तत्प्रधानं, का प्रधानता विषयग्राहकत्वं, को गुणोत्कर्षः अभिव्यक्तौ समर्थत्वं, यथा वाह्यानां पार्थिवाप्यतैजसानां द्रव्याणां चतुर्गुणत्रिगुणद्विगुणानां न सर्वगुणव्यञ्जकत्वं, गन्धरसरूपोत्कर्षात् तु यथाक्रमं गन्धरसरूपव्यञ्जकत्वम्, एवं घ्राणरसनचक्षुषां चतुर्गुणत्रिगुणद्विगुणानां सर्वगुणग्राहकत्वम्। गन्धरसरूपोत्कर्षात्तु यथाक्रमं गन्धरसरूपग्राहकत्वं तस्मात् घ्राणादिभिन्ने सर्वेषां गुणानामुपलब्धिरिति। यस्तु प्रतिजानीते गन्धगुणत्वाद्घ्राणं गन्धग्राहकम् एवं रसनादिष्वपीति तस्य यथागुणयोगं घ्राणादिभिर्गुणग्रहणं प्रसज्यत इति किं कृतं पुनर्व्यवस्थानं किञ्चित् पार्थिवमिन्द्रियं न सर्वाणि कानिचिदाप्यतैजसवायव्यानीन्द्रियाणि न सर्वाणीति ॥ ७० ॥

तद्व्यवस्थानन्तु भूयस्त्वात् ॥ ७१ ॥

अर्थनिर्वर्तनसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितं भूयस्त्वम्, दृष्टो हि प्रकर्षे भूयस्त्वशब्दः

त्यत्वाद्रूपस्पर्शविशेषस्य रूपस्पर्शगुणत्वे चक्षुषा त्वचा च ग्रहणं न स्याद्रूपादेश्च क्वचित्साक्षात्सम्बन्धेन क्वचिच्च परम्परया हेतुत्वे गौरवमिति भावः ॥ ६९ ॥

रसादेः पृथिव्यादिगुणत्वे घ्राणादिनापि तद्ग्रहणप्रसङ्ग इत्यत्र नियामकमाह ।— पूर्वं पूर्वं घ्राणादिस्तत्तद्गन्धादिप्रधानं प्राधान्ये बीजमाह गुणोत्कर्षाद्धि तस्य

प्रकृष्टो यथा विषयो भूयानित्युच्यते । यथा पृथगर्थक्रियासमर्थानि पुरुषसंस्कारवशाद्दिषौषधिमणिप्रभृतीनि द्रव्याणि निर्वर्त्स्यन्ते, न सर्वं सर्वार्थम् एवं पृथग्विषयग्रहणसमर्थानि घ्राणादीनि निर्वर्त्स्यन्ते न सर्वविषयग्रहणसमर्थानीति ॥ ७१ ॥

सगुणानामिन्द्रियभावात् ॥ ७२ ॥

स्वगुणान्नोपलभन्ते इन्द्रियाणि कस्मादिति चेत्, स्वान् गन्धादीन्नोपलभन्ते घ्राणादीनि केन कारणेनेति चेत् स्वगुणैः सह घ्राणादीनामिन्द्रियभावात् घ्राणं स्वेन गन्धेन समानार्थकारिणा सह बाह्यं गन्धं गृह्णाति तस्य स्वगन्धग्रहणं सहकारिवैकल्यात् न भवति, एवं शेषाणामपि यदि पुनर्गन्धः सहकारी च स्यात् घ्राणस्य ग्राह्यश्चेत्तत आह ॥ ७२ ॥

तेनैव तस्याग्रहणाच्च ॥ ७३ ॥

न गुणोपलब्धिर्विन्द्रियाणाम् । यो ह्यनेन यथा बाह्यद्रव्यं चक्षुषा गृह्यते तथा तेनैव चक्षुषा तदेव चक्षुर्गुणानामपि नादृगिदं तुल्यो ह्युभयत्र प्रतिपत्तिहेतुभाव इति ॥ ७३ ॥

गन्धादिकस्योपलब्धावप्यकरणत्वात् तथा च सति [illegible] सहकारित्वं घ्राणादेर्नास्तीति ॥ ७१ ॥

ननु इन्द्रियत्वस्यापि गन्धग्रहणत्वात् किमिन्द्रियं किमिन्द्रियार्थ इत्यत्र संशयात् ज्ञानायविशिष्टबुद्धिव्यापारत्वात् [illegible] घ्राणादीन्द्रियत्वसंशयेति ॥ ७२ ॥

घ्राणादीनां गन्धादिगुणत्वे सति [illegible] सह । गन्धादिभिश्च न घ्राणादीनामिन्द्रियभावात् गन्धादिव्यञ्जकत्वेन [illegible] पृथुत्वगन्धादिमत्त्वेन दर्शनात् ॥ ७२ ॥

इत्यस्य गन्धादिनिमित्तावग्रहत्वात्तदुत्तरज्ञानानामपि [illegible] इन्द्रियं तस्य सगुणस्येन्द्रियत्वाग्रहणादनुपसंहारमिति ॥ ७३ ॥

न शब्दगुणोपलब्धेः ॥ ७४ ॥

स्वगुणाश्रोपलभन्ते इन्द्रियाणीत्येतत् न भवति उपलभ्यते हि स्वगुणः शब्दः श्रोत्रेणेति ॥ ७४ ॥

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७५ ॥

न शब्देन गुणेन सगुणमाकाशमिन्द्रियं भवति न शब्दः शब्दस्य व्यञ्जकः न च घ्राणादीनां स्वगुणग्रहणं प्रत्यक्षं नाप्यनुमीयते, अनुमीयते तु श्रोत्रेणाकाशेन शब्दस्य ग्रहणं शब्दगुणत्वञ्चाकाशस्येति, परिशेषस्यानुमानं वेदितव्यम्, आत्मा तावत् श्रोता न करणं मनसः श्रोत्रत्वे बधिरत्वाभावः पृथिव्यादीनां घ्राणादिभावे सामर्थ्यं श्रोत्रभावे चासामर्थ्यम् अस्ति चेदं श्रोत्रमाकाशञ्च शिष्यते परिशेषादाकाशं श्रोत्रमिति ॥ ७५ ॥

इति वात्स्यायनीये न्यायभाष्ये तृतीयाध्यायस्याद्यमाह्निकम् ।

अतोऽन्यत् श्रवणेन्द्रियं स्वगुणाग्राहकत्वे सति बाह्येन्द्रियत्वात् —चक्षुरिन्द्रियवत् न अत्र शब्दस्य स्वगुणग्राहकत्वं प्रसज्यते ॥ ७४ ॥

न खलु श्रवणेन्द्रियस्य स्वगुणग्राहकत्वं परस्य वैधर्म्यात् तस्मादुपलब्धिरिति भावः ॥ ७५ ॥

तृतीयस्याद्यमाह्निकम् ॥ ७२ ॥

इति श्रीवाचस्पतिमिश्रविरचितायामाह्निकस आत्मादिप्रमेयतत्त्वावलोकव्याख्यायां तात्पर्यटीकायां

तृतीयाध्यायस्य

द्वितीयाह्निकम् ।

परीक्षितानीन्द्रियाण्यर्थाश्च बुद्धेरिदानीं परीक्षाक्रमः सा किमनित्या नित्या वेति कुतः संशयः ?

कर्माकाशसाधर्म्यात् संशयः ॥ १ ॥

अस्यर्शवत्त्वं ताभ्यां समानो धर्म उपलभ्यते । बुद्धौ विशेषवोपजनापायधर्मवत्त्वं विपर्ययश्च यथास्वमनित्ययोस्ताभ्यां बुद्धौ नोपलभ्यते तेन संशयः । अनुपपन्नरूपः खल्वयं संशयः, सर्वशरीरिणां हि प्रत्यात्मवेदनीयाऽनित्या बुद्धिः सुखादिवत्, भवति च संवित्तिर्ज्ञास्यामि जानामि अज्ञासिषमिति न चोपजनापायौ अन्तरेण त्रैकाल्यव्यक्तिः, ततश्च त्रैकाल्यव्यक्तेरनित्या बुद्धिरित्येतत् सिद्धम्, प्रमाणसिद्धश्चेदम् शास्त्रेऽप्युक्तम् इन्द्रियार्थसन्निकर्षोत्पन्नं युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्येवमादि, तस्मात् संशयप्रक्रियानुपपत्तिरिति । दृष्टिप्रवादोपालम्भार्थन्तु प्रकरणम् । एवं हि पश्यन्तः प्रवदन्ति मा ङ्गाः पुरुषस्यान्तःकरणभूता नित्या बुद्धिरिति साधनं प्रचक्षते ॥ १ ॥

अथ क्रमप्राप्ततया बुद्धेर्मनसश्च परीक्षा समभिः प्रकरणैस्तत्परीक्षैव चाह्निकाभ्यां परैः तु शरीरावच्छेदव्याप्यभोगानुकूलसम्बन्धवत्परीक्षा शरीरान्तर्वर्त्तिप्रमेयपरीक्षेति वाह्निकार्थ इति तदसत्, इन्द्रियपरीक्षायामतिव्याप्तेः तस्य च बुद्धिपरीक्षा पञ्चभिरध्यायैः, तत्रादौ बुद्धेरनित्यताप्रकरणं तत्र संशयदर्शनाय सूत्रम् । कर्म्मणः आकाशस्य च साधर्म्यान्निरस्यत्वादबुद्धिपदार्थे निरवयवसंशयः, बुद्धिवद् नित्यत्व न वेति संशय पक्षवसन्नः ॥ १ ॥

विषयप्रत्यभिज्ञानात् ॥ २ ॥

किं पुनरिदं प्रत्यभिज्ञानं यं पूर्वमज्ञाविषयमर्थं तमिमं जानामीति ज्ञानयोः समानेऽर्थे प्रतिसन्धिज्ञानं प्रत्यभिज्ञानम् एतच्चावस्थितायां बुद्धेरुपपन्नम्, नानात्वे तु बुद्धिभेदेषूत्पन्नापवर्गिषु प्रत्यभिज्ञानानुपपत्तिः नान्यज्ञातमन्यः प्रत्यभिजानातीति ॥ २ ॥

साध्यसमत्वादहेतुः ॥ ३ ॥

यथा खलु नित्यत्वं बुद्धेः साध्यमेवं प्रत्यभिज्ञानमपीति किं कारणं चेतनधर्मस्य करणेऽनुपपत्तिः पुरुषधर्मः खल्वयं ज्ञानं दर्शनमुपलब्धिर्बोधः प्रत्ययोऽध्यवसाय इति, चेतनो हि पूर्वज्ञातमर्थं प्रत्यभिजानातीति तस्यैतस्माद्धेतोर्नित्यत्वं युक्तमिति. करणचैतन्याभ्युपगमे तु चेतनस्वरूपं वचनीयं नानिर्दिष्टस्वरूपमात्मान्तरं ग्रक्ष्यमस्तीति प्रतिपत्तुम्. ज्ञानञ्चेदबुद्धेरन्तः करणस्याभ्युपगम्यते, चेतनस्यदानीं किंस्वरूपं को धर्मः किं तत्त्वम् ज्ञानेन च बुद्धौ वर्त्तमानेनायं चेतनः किं करोतीति. चेतयत इति चेन्न ज्ञानादर्थान्तरवचनम्। पुरुषश्चेतयते बुद्धिर्जानातीति नेदं ज्ञानादर्थान्तरमुच्यते चेतयते जानीते बुध्यते पश्यत्युपलभ्यत इत्येकोऽयमर्थ इति, बुद्धिर्ज्ञापयतीति चेत् अथा जानाति पुरुषो बुद्धिर्ज्ञापयतीति सत्यमेतत् एवञ्चाभ्युपगमे ज्ञानं पुरुषस्येति सिद्धं भवति न बुद्धेरन्तःकरणस्य

तच्च बुद्धेर्नित्यत्वं साध्यं साधयति।—बुद्धिर्नित्येति शेषः योऽयं घटमहमात्मा योऽयं घटं व्यजानामीति प्रत्यभिज्ञानमेकं क्षणिकत्वं विषयीकरोति. न चात्मा तस्य तस्य ज्ञेयधर्मानधिकरणस्य कूटस्थत्वात् तस्माद् क्षणिकत्वे बुद्धिरेव. क्षणिकत्वे तस्या परिणामः बुद्धेरप्याविर्भावतिरोभावावेव न तस्याः विनाशादिति ॥ २ ॥

इति प्रतिपुरुषञ्च शब्दान्तरव्यवस्था प्रतिज्ञाने प्रतिषेधहेतुवचनम्। यञ्च प्रतिजानीते कश्चित् पुरुषश्चेतयते कश्चिद्बुध्यते कश्चिदुपलभते कश्चित् पश्यतीति पुरुषान्तराणि खल्विमानि चेतनो बोधोपलब्ध्या द्रष्टेति नैकस्येते धर्मा इति, अत्र कः प्रतिषेधहेतुरिति, अर्थस्याभेद इति चेत् समानमभिन्नार्था एते शब्दा इति तत्र व्यवस्थानुपपत्तिरित्येवं चेन्मन्यसे समानं भवति पुरुषश्चेतयते बुद्धिर्जानीते इत्यत्राप्यर्थो न भिद्यते तत्रोभयोश्चेतनत्वादन्यतरलोप इति यदि पुनर्बुध्यतेऽनयेति बोधनं बुद्धिर्मन एवोच्यते तच्च नित्यम् अस्त्वेतदेवं न तु मनसो विषयप्रत्यभिज्ञानान्नित्यत्वात्। दृष्टं हि करणभेदे ज्ञातुरेकत्वात् प्रत्यभिज्ञानं सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति चक्षुर्वत् प्रदीपवच्च प्रदीपान्तरदृष्टस्य प्रदीपान्तरेण प्रत्यभिज्ञानमिति तस्माज्ज्ञातुरयं नित्यत्वे हेतुरिति। यच्च मन्यते बुद्धेरवस्थिताया यथाविषयं वृत्तयो ज्ञानानि निश्चरन्ति वृत्तिश्च वृत्तिमतो नान्येति ॥ ३ ॥

न युगपद्ग्रहणात् ॥ ४ ॥

वृत्तिवृत्तिमतोरनन्यत्वे वृत्तिमतोऽवस्थानाद् वृत्तीनामवस्थानमिति यानीमानि विषयग्रहणानि तान्यवतिष्ठन्त इति युगपद्विषयाणां ग्रहणं प्रसज्यत इति ॥ ४ ॥

परिहरति।—साध्यसमत्वात् अनित्यत्वात् प्रतिसन्धातृत्वं न हेतुः अहं ज्ञानामीत्यादिना आत्मन एव प्रतिसन्धातृप्रत्ययात् अनादिनिधनत्वमेव तस्य कौटस्थ्यम् अन्यादृशं त्वत्सिद्धमिति भावः ॥ ३ ॥

बुद्धेरेव स्थायिन्या यथाविषयं ज्ञानात्मिका वृत्तयो वृत्तिमदभिन्ना वह्नेरिव स्फुलिङ्गा निःसरन्तीति साङ्ख्यमतं निरस्यति। वृत्तिवृत्तिमतोरभेदे वृत्तिमदवस्थित्या

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ ५ ॥

अतीते च प्रत्यभिज्ञाने वृत्तिमानप्यतीत इत्यन्तःकरणस्य विनाशः प्रसज्यते विपर्य्यये च नानात्वमिति । अविभुः चैकं मनः पर्य्यायेणेन्द्रियैः संयुज्यत इति ॥ ५ ॥

क्रमवृत्तित्वाद्युगपद्ग्रहणम् ॥ ६ ॥

इन्द्रियार्थानां वृत्तिवृत्तिमतोर्नानात्वमिति, एकत्वे च प्रादुर्भावतिरोभावयोरभाव इति ॥ ६ ॥

अप्रत्यभिज्ञानञ्च विषयान्तरव्यासङ्गात् ॥७॥

अप्रत्यभिज्ञानमनुपलब्धिः, अनुपलब्धिश्च कस्यचिदर्थस्य विषयान्तरव्यासङ्गे मनस्युपपद्यते वृत्तिवृत्तिमतोर्नानात्वात् एकत्वे ह्यनर्थको व्यासङ्गः इति । विभुत्वे चात्मःकरणस्य पर्य्यायेणेन्द्रियैः संयोगः ॥ ७ ॥

न गत्यभावात् ॥ ८ ॥

प्राप्तानीन्द्रियाण्यन्तःकरणेनेति प्राप्यर्थस्य गमनस्य

न्तरव्यवस्थितिर्वाच्या तथा च सर्वपदार्थग्रहणं युगपत् स्यात् न चैवं तस्मान्नामेदं इति ॥ ४ ॥

अथ वृत्तीनामनवस्थायित्वमुच्यते तत्राह ।— अप्रत्यभिज्ञाने प्रत्यभिज्ञानस्य अभावे विनाशे वृत्तिमतोऽपि विनाशः स्यादतो न द्वयोरैक्यम् ॥ ५ ॥

अयुगपद्ग्रहणं स्वमते व्युत्पादयति मनस इत्यादि ।—मनसोऽणुत्वादिन्द्रियैः सह क्रमेण सम्बन्धात् ज्ञानानां क्रमिकत्वं तथाच "अविभु चैकं मनः पर्य्यायेण सर्वेन्द्रियैः सम्बध्यते" इत्यवतारभाष्यं तत्तदिन्द्रियमनःसंयोगे सति ज्ञानमुपपद्यते ॥ ६ ॥

तद्व्यतिरेके ज्ञानाभावमुपपादयति ।—अप्रत्यभिज्ञानं तत्तदिन्द्रियजज्ञानाभावः विषयान्तरेण इन्द्रियान्तरेण मनसः सम्बन्धादित्यर्थः ॥ ७ ॥

अभावः। तच्च क्रमवृत्तित्वाभावादयुगपद्ग्रहणानुपपत्तिरिति गत्यभावाच्च प्रतिषिद्धं विभुनोऽन्तःकरणस्यायुगपद्ग्रहणं न लिङ्गान्तरेणानुमीयते। यथा चक्षुषो गतिः प्रतिषिद्धा सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणात् प्राप्तिचन्द्रमसोर्व्यवधानप्रतीघातेनानुमीयत इति सोऽयं नान्तःकरणे विवादो न तस्य नित्यत्वे सिद्धं हि मनोऽन्तःकरणं नित्यञ्चेति, क्व तर्हि विवादस्तस्य विभुत्वे तच्च प्रमाणतोऽनुपलब्धेः, प्रतिषिद्धमिति एकञ्चान्तःकरणं नाना चेता ज्ञानात्मिका वृत्तयः चक्षुर्विज्ञानं घ्राणविज्ञानं रूपविज्ञानं गन्धविज्ञानमेतच्च वृत्तिमतोरैकत्वेऽनुपपन्नमिति। एतेन विषयान्तरव्यासङ्गः प्रत्युक्तः। विषयान्तरग्रहणलक्षणो विषयान्तरव्यासङ्गः पुरुषस्य नान्तःकरणस्येति केनचिदिन्द्रियेण सन्निधिः केनाचिदसन्निधिरिति। अयं तु व्यासङ्गोऽनुज्ञायते मनस इति। एवमन्तःकरणं नाना वृत्तय इति सत्यभेदे वृत्तेरिदमुच्यते ॥ ८ ॥

स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥९॥

तस्यां वृत्तौ नानात्वाभिमानः, यथा—द्रव्यान्तरोपहिते स्फटिके अन्यत्वाभिमानो नीलो लोहित इति। एवं विषयान्तरोपधानादिति ॥ ९ ॥

त्वन्यते चेदन्नोपपद्यत इत्याह।—त्वन्यते मनसः क्रमेणेन्द्रियसम्बन्धो न मनसो विभुत्वेन गत्यभावात् परे तु मकारो न सूत्रान्तर्गतः किन्तु विभुत्वे चान्तःकरणस्य पश्चादेकेनेन्द्रियेण संयोगो नेति भाष्यावतरणिकायाम् इत्याहुः ॥ ८।

वृत्तिवृत्तिमतोरभेदेऽपि भेदप्रत्ययप्रतिपादनाय ग्रहणं।—यथा जवाकुसुमादिसन्निधानादेकस्यापि स्फटिकस्य तत्तद्रूपाभिमानस्तथा वृत्तिमदभिन्नापि वृत्तिस्तत्तद्विषयसन्निकर्षवशात्तानेव प्रतिभासत इति ॥ ९ ।

न हेत्वभावात् ॥ १० ॥

स्फटिकान्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमानो गौणो न पुनर्गन्धान्यत्वाभिमानवदिति हेतुर्नास्ति हेत्वभावादनुपपन्न इति, समानो हेत्वभाव इति चेत् न, ज्ञानानां क्रमेणोपजननापायदर्शनात्, क्रमेण ह्रीन्द्रियार्थेषु ज्ञानान्युपजायन्ते चापयन्ति चेति दृश्यते तस्माद्गन्धान्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमान इति ॥ १० ॥

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्ज्ञानीनामहेतुः ॥ ११ ॥

स्फटिकान्यत्वाभिमानवदित्येतदसूयमानः क्षणिकवाद्याह—स्फटिकस्याभेदेनावस्थितस्योपधानभेदाज्ज्ञानानात्वाभिमान इत्ययमविद्यमानहेतुः पक्षः, कस्मात् ? स्फटिकेऽप्यपरापरोत्पत्तेः, स्फटिकेऽप्यन्या व्यक्तय उत्पद्यन्ते अन्या निरुध्यन्त इति, कथं क्षणिकत्वाद्ज्ञानीनां, क्षणद्वाल्पीयान् कालः, क्षणस्थितिकाः क्षणिकाः कथं पुनर्गम्यते क्षणिका व्यक्तय इति, उपचयापचयप्रबन्धदर्शनाच्छरीरादिषु पक्त्रिनिर्वृत्तस्याहाररसस्य शरीररुधिरादिभावेनोपचयोऽपचयश्च प्रबन्धेन प्रवर्त्तते उपचयाद्ज्ञानीना-

---

दूषयति।—धर्मत्वे साधकाभावान्नेदं युक्तमित्यर्थः, क्षेचित्तु न हेत्वभावादिति भाष्यमिति टीकादर्शनान्नेदं सूत्रं किन्तु तुच्छतया सूत्रतादूषणाद्भूयसतादूषणपरिहाराय भाष्यकृता तदुक्तमिति मन्यन्ते ॥ १० ॥

सतामसं बुद्ध्यनित्यतासाधकत्वम् ॥ ११ ॥

स्फटिके इव नानात्वभ्रम इत्यसदयमानः सौगतः शङ्कते।—स्फटिकान्यत्वाभिमानवदित्यहेतुः, कुतः ? स्फटिकेऽप्यपरापरोत्पत्तेः विद्यमानविद्यमानस्फटिकोत्पत्तेः

सुत्पादः अपचयाद्यानिरोधः, एवं च सत्यवयवपरिणाम-भेदेन वृद्धिः शरीरस्य कालान्तरे दृष्टेति सोऽयं व्यक्तिमात्रे वेदितव्य इति ॥ ११ ॥

नियमहेत्वभावादृयथादर्शनमभ्यनुज्ञा॥१२॥

पदार्थानां सर्वासु व्यक्तिषूपचयापचयप्रबन्धः शरीरवदिति नायं नियमः, कस्मात् ? हेत्वभावात्, नात्र प्रत्यक्षमनुमानं वा प्रतिपादकमस्तीति, तस्माद्यथादर्शनमभ्यनुज्ञा यत्र यत्रोपचयापचयप्रबन्धो दृश्यते तत्र तत्र व्यक्तीनामपरापरोत्पत्तिरुपचयापचयप्रबन्धदर्शनेनाभ्यनुज्ञायते यथा शरीरादिषु, यत्र यत्र न दृश्यते तत्र तत्र प्रत्याख्यायते, यथा यावप्रभृतिषु, स्फटिकेऽप्युपचयापचयप्रबन्धो न दृश्यते तस्मादयुक्तं स्फटिकेऽप्यपरापरोत्पत्तिरिति, यथा चार्कस्य कटुकिरश्मा सर्वद्रव्याणां कटुकिमानमापादयेत्, तादृगेतदिति। यस्यापि क्षणिकाधिनाशपूर्वोत्पादान्वयं द्रव्यसन्ताने क्षणिकानां मन्यते तस्यैतत् ॥ १२ ॥

नोत्पत्तिविनाशकारणोपलब्धेः ॥ १३ ॥

उत्पत्तिकारणं तावदुपलभ्यते अवयवोपचयो बल्मीकादीनां,

तत्र मानमाह व्यक्तीनां भावानां क्षणिकत्वात् तत्साधनाय भाष्यम् "उपचयापचयप्रबन्धदर्शनाच्छरीरेषु" प्रतिक्षणं शरीरेष्वपचयापचयदर्शनाज्ञानात्वं न त्वेकस्मिन्नवयविनि परिमाणवद्द्रव्यसमावेश इति भावः इदं सूत्रमेवेति केचित् ॥ ११ ॥

सिद्धान्तसूत्रम्।—पदार्थानां विनाशसामग्रीवैशिष्ट्यनियमे मानाभावात अभ्युपेत्याह—यथादर्शनमिति, यदि कस्यचिद्विनाशसामग्रीवैशिष्ट्यं मानं स्यात्तदा क्षणिकत्वं तस्याभ्यनुज्ञायत एव यथाऽन्यशब्द इति ॥ १२ ॥

युक्त्यन्तरमाह।—न स्फटिकादेः क्षणिकत्वं यत उत्पत्तिविनाशकारणान्युप

विनाशकारणञ्चोपलभ्यते घटादीनामवयवविभागः । यस्य त्वनपचितावयवं निरुध्यते अनुपचितावयवञ्चोत्पद्यते तस्याशेषनिरोधे निरन्वये वा पूर्वोत्पादे न कारणमुभयत्राप्युपलभ्यत इति ॥ १३ ॥

क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्तिः ॥ १४ ॥

यथानुपलभ्यमानं क्षीरविनाशकारणं दध्युत्पत्तिकारणञ्चाभ्यनुज्ञायते तथा स्फटिकेऽपरापरासु व्यक्तिषु विनाशकारणमुत्पत्तिकारणं चाभ्यनुज्ञेयमिति ॥ १४ ॥

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १५ ॥

क्षीरविनाशलिङ्गं क्षीरविनाशकारणं दध्युत्पत्तिलिङ्गं दध्युत्पत्तिकारणञ्च गृह्यतेऽतो नानुपलब्धिः । विपर्ययस्तु स्फटिकादिषु द्रव्येषु अपरापरोत्पत्तौ व्यक्तीनां न लिङ्गमस्तीत्यनुवृत्तिरेवेति, अत्र कश्चित् परिहारमाह ॥ १५ ॥

न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ १६ ॥

पयसः परिणामो न विनाश इत्येक आह । परिणाम-

लब्ध्या निर्णीतान्यवयवोपचयापचयादीनि, नच स्फटिके विनाशकारणमुपलभ्यते येन पूर्वविनाशेऽपरोत्पत्तिरिष्येत स्यादिति भावः ॥ १३ ॥

आक्षिपति ।—दध्युत्पत्तिवद्दध्युत्पत्तिकारणानुपलब्धिवत् तदुपपत्तिः पूर्वस्फटिकविनाशकारणानुपलब्धेरुत्तरस्फटिकोत्पत्तिकारणानुपलब्धेश्चोपपत्तिः स्यादिति भावः ॥१४॥

सिद्धान्तसूत्रम् ।—दध्नः क्षीरविनाशस्य च प्रत्यक्षसिद्धत्वात्तत्कारणं कल्प्यते, न त्वेवं स्फटिकविनाशोत्पादावुपलभ्येते येन तत्कारणकल्पनम् ॥ १५ ॥

वावस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिरिति। गुणान्तरप्रादुर्भाव इत्यपर आह गुणान्तरप्रादुर्भावश्च सतो द्रव्यस्य पूर्वगुणनिवृत्तौ गुणान्तरमुत्पद्यत इति स खल्वेकपक्षाभाव इव, अत्र तु प्रतिषेधः ॥ १६ ॥

व्यूहान्तराद्द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १७ ॥

समूर्च्छनलक्षणादवयवव्यूहाद् द्रव्यान्तरे दध्नुत्पद्यमाने पूर्वं पयोद्रव्यमवयवविभागेभ्यो निवर्त्तमित्यनुमीयते यथा मृदवयवानां व्यूहान्तराद्द्रव्यान्तरे स्थाल्यामुत्पद्यायां पूर्वं मृत्पिण्डद्रव्यं मृदवयवविभागेभ्यो निवर्त्तत इति। पयोदध्नोर्नीशेषनिरोधे निरन्वयो द्रव्यान्तरोत्पादो घटत इति अभ्यनुज्ञाय च निष्कारणं क्षीरविनाशं दध्युत्पादञ्च प्रतिषेध उच्यत इति ॥ १७ ॥

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनैकान्तः ॥ १८ ॥

क्षीरदधिवन्निष्कारणो विनाशोत्पादो स्फटिकादिद्रव्याणामिति नायमेकान्त इति, कस्मात्? हेत्वभावात्, नाप्य हेतुरस्ति अकारणो विनाशोत्पादो स्फटिकादिद्रव्याणां ज्ञाव-

---

सौगतमते साक्षाद्द्रव्यमुपपद्यते।—न क्षीरस्य नाशो दध्युत्पत्तिः किन्तु क्षीरस्य परिणामः परिणामश्चार्थी गुणान्तरप्रादुर्भावः विद्यमानस्य क्षीरस्य पूर्वरसतिरोभावोऽम्लरसात्मकगुणान्तरस्याविर्भावादित्यर्थः ॥ १६ ॥

एतन्निराकरोति सूत्रकारः।—व्यूहान्तराद्द्रव्यान्तरात् पूर्वावयवसंयोगनाशाद्द्रव्यान्तरोत्पादस्यानुभविक इति भावः ॥ १७ ॥

दधिवत् न पुनर्विनाशकारणाभावात् कुम्भस्य विनाशः उत्पत्तिकारणाभावाच्चोत्पत्तिः एवं स्फटिकादिव्यक्तीनां विनाशोत्पत्तिकारणाभावाद्विनाशोत्पत्तिभाव इति निरधिष्ठानस्य दृष्टान्तवचनं गृह्यमाणयोर्विनाशोत्पादयोः स्फटिकादिषु स्वादयमाश्रयवान् दृष्टान्तः क्षीरविनाशकारणानुपलब्धिवद्ध्युपलब्धिवच्चेति नौ तु न गृह्येते तस्माद्विरधिष्ठानोऽयं दृष्टान्त इति, अभ्यनुज्ञाय च स्फटिकस्योत्पादविनाशौ योऽत्र साधकस्तस्याभ्यनुज्ञानादप्रतिषेधः । कुम्भवन्न निष्कारणा विनाशोत्पादौ स्फटिकादीनामित्यभ्यनुज्ञेयोऽयं दृष्टान्तः प्रतिषेद्धुमशक्यत्वात् क्षीरदधिवत्तु निष्कारणौ विनाशोत्पादाविति शक्योऽयं प्रतिषेद्धुं कारणतो विनाशोत्पत्तिदर्शनात् क्षीरदध्नोर्विनाशोत्पत्तौ पश्यता तत्कारणमनुमेयम्, कार्यलिङ्गं हि कारणमित्युपपन्नमनित्यः [illegible] इदन्तु चिन्त्यते कस्यायं बुद्धिः आत्मेन्द्रियमर्थोऽथ [illegible] गुण इति प्रसिद्धोऽपि च खल्वयमर्थः परीक्षाऽयं प्रवर्त्तयामीति प्रक्रियते सोऽयं बुद्धौ सन्दिग्धत्वात्तत्त्वतः संशयः विशेषस्यायवणादिति ॥ १८ ॥

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥ १९ ॥

तत्रायं विशेषः, नेन्द्रियाणामर्थानां वा गुणो ज्ञानं तेषां विनाशे ज्ञानस्य भावात्, भवति खल्विदमिन्द्रियेऽर्थे च विनष्टे

[illegible] विनाशोत्पादौ [illegible] विनाशोत्पादयोर्विशेषाभावात्, यस्तु क्षीरदध्नोर्विशेषः स परमाणुभिस्तु [illegible] कारणकृतौ क्षीरविनाशदध्युत्पादाविति ॥ १८

[illegible] ॥ २४ ॥

ज्ञानमद्राक्षमिति न च ज्ञातरि विनष्टे ज्ञानं भवितुमर्हति अन्यत् खलु चैतदिन्द्रियार्थसन्निकर्षजं ज्ञानं यद्दिन्द्रियार्थविनाशे न भवति, इदमन्यदात्ममनःसन्निकर्षजं तस्य युक्तो भाव इति, स्मृतिः खल्वियमद्राक्षमिति पूर्वदृष्टविषया न च विज्ञातरि नष्टे पूर्वोपलब्धेः स्मरणं युक्तम्, न चान्यदृष्टमन्यः स्मरति, न च मनसि ज्ञातर्यभ्युपगम्यमाने शक्यमिन्द्रियार्थयोर्ग्राह्यत्वं प्रतिपादयितुम्, अस्तु तर्हि मनोगुणो ज्ञानम्" १९॥

युगपज्ज्ञेयानुपलब्धेश्च न मनसः॥ २०॥

युगपज्ज्ञेयानुपलब्धिरन्तःकरणस्य लिङ्गम्, तत्र युगपज्ज्ञेयानुपलब्ध्यानुमीयते अन्तःकरणं, न तस्य गुणो ज्ञानम्, कस्य तर्हि अस्य वशित्वात्, वशी ज्ञाता, वश्यं करणं, ज्ञानगुणत्वे च करणभावनिवृत्तिः घ्राणादिसाधनस्य च ज्ञातुर्गन्धादिज्ञानाभावादनुमीयते अन्तःकरणसाधनस्य सुखादिज्ञानं स्मृतिश्चेति तत्र यज्ज्ञानगुणं स आत्मा, यत्तु सुखाद्युपलब्धिसाधनमन्तःकरणं मनस्तदिति मन्त्रभेदमात्रवचनार्थभेद इति युगपज्ज्ञेयानुपलब्धेश्चायोगिन इति चार्थः, योगी खलु ऋद्धौ प्रादुर्भूतायां विकरणधर्मान् निर्माय सेन्द्रियाणि शरीरान्तराणि तेषु तेषु युगपज्ज्ञेयानुपलभते, तच्चैतद्विभौ ज्ञातर्युपपद्यते नाणौ मनसीति, विभुत्वे वा मनसो ज्ञानस्य नात्मगुणत्वप्रतिषेधः,

---

बुद्धेरात्मगुणत्वं यद्यप्यात्मपरीक्षाप्रकरणे ऽस्य विस्तरार्थं तथापि विशिष्य व्युत्पादनार्थं बुद्ध्यात्मगुणत्वप्रकरणं तत्र चेन्द्रियार्थसन्निकर्षोपाधिजत्वादिन्द्रियादिनिरूपणमेवास्तु मैवम् मैत्र्याकाशसंयोगाधीनशब्दस्यापि [illegible] इति पृथिव्यादि किञ्चिदिन्द्रियम बुद्धिर्नेन्द्रियस्य न चार्थस्य गुणत्वान्नापि ज्ञानस्य करणस्यावश्यत्वात् कथमत्र न ज्ञानमविद्यरभावे करणमुपपद्यतेऽतिप्रसङ्गादिति भावः॥ १९॥

विभु मनस्तदन्तःकरणभूतमिति तस्य सर्वेन्द्रियैर्युगपत् संयोगा-
द्युगपज्ज्ञानान्युत्पद्येरन्निति ॥ २० ॥

तदात्मगुणत्वेऽपि तुल्यम् ॥ २१ ॥

विभुरात्मा सर्वेन्द्रियैः संयुक्त इति युगपज्ज्ञानोत्पत्ति-
प्रसङ्ग इति ॥ २१ ॥

इन्द्रियैर्मनसः सन्निकर्षाभावान्न तदनुत्पत्तिः ॥ २२ ॥

गन्धाद्युपलब्धेरिन्द्रियार्थसन्निकर्षवदिन्द्रियमनःसन्निकर्षोऽपि
कारणं तस्य चायोगपद्यमणुत्वात् मनसः, अयौगपद्यादनु-
त्पत्तिर्युगपज्ज्ञानानामात्मगुणत्वेऽपीति । यदि पुनरात्मेन्द्रियार्थ-
सन्निकर्षमात्रादगन्धादिज्ञानमुत्पद्येत ॥ २२ ॥

नोत्पत्तिकारणानपदेशात् ॥ २३ ॥

आत्मेन्द्रियसन्निकर्षमात्रान्नगन्धादिज्ञानमुत्पद्यत इति ज्ञानो-
त्पत्तिकारणमपदिश्यते येनेतत् प्रतिपद्यमहीति ॥ २३ ॥

मनोगुणत्वं निरस्यति ।—युगपज्ज्ञेयानुपलब्धेर्नोः सिद्धेश्च मनसो न कारणत्वं. प्रतिनियतक्रमादेव कारणत्वेनैव सिद्धेः वस्तुतो युगपज्ज्ञेयानुपलब्धेरित्यनेन मनसो ऽणुत्वं सूचितं, तथा च तद्गतसुखाद्यप्रत्यक्षता स्यात् एवं कार्यस्यैव तत्सहेतावच्छेदेन ज्ञानादिकं न स्यादिति ॥ २० ॥

शङ्कते ।—तस्या बुद्धेरात्मगुणत्वेऽपि ज्ञानयौगपद्यं तुल्यम् आत्मनः सर्वेन्द्रिय-संयोगात् तथाच सदोषत्वादवस्थ एवायं कथं तया युक्ता मनःसिद्धिरिति भावः ॥ २१ ॥

उत्तरयति ।—युगपज्ज्ञानेन्द्रियैः सह मनसः सन्निकर्षाभावान्न युगपज्ज्ञानाविषयोय-मभिधिरिति भावः ॥ २२ ॥

आक्षिपति ।—बुद्ध्युत्पत्तौ कारणस्यानपदेशात् अकथनात् ज्ञानगुणो बुद्धि आत्मनःसंयोगस्य कारणत्वे ज्ञानस्य सार्वदिकत्वप्रसङ्ग इति भावः ॥ २३ ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्व-प्रसङ्गः ॥ २४ ॥

तदात्मगुणत्वेऽपि तुल्यमित्येतदनेन समुच्चीयते। द्विविधो हि गुणनाशहेतुः, गुणानामाश्रयाभावो विरोधी च गुणः. नित्यत्वादात्मनोऽनुपपन्नः विरोधी च बुद्धेर्गुणो न गृह्यते तस्मादात्मगुणत्वे मति बुद्धेर्नित्यत्वप्रसङ्गः ॥ २४ ॥

अनित्यत्वग्रहाद्बुद्धेर्बुद्ध्यन्तरादिनाशः शब्दवत्॥२५॥

अनित्या बुद्धिरिति सर्वशरीरिणां प्रत्यात्मवेदनीयमेतत् गृह्यते च बुद्धिमत्सन्ताने बुद्धेर्बुद्ध्यन्तरं विरोधी गुण इत्यनुमीयते, यथा शब्दसन्ताने शब्दः शब्दान्तरविरोधीति, असंख्येयेषु ज्ञानकारिनेषु संस्कारेषु स्मृतिहेतुष्वात्ममनसोश्च सन्निकर्षे समाने स्मृतिहेतौ सति न कारणस्यायौगपद्यमस्तीति युगपत् स्मृतयः प्रादुर्भवेयुः यदि बुद्धिरात्मगुणः स्यादिति ॥ २५ ॥

ज्ञानसमवेतात्मप्रदेशमनसिकर्षान्मनसः क्रमशस्तदुत्पत्तेर्न युगपदुत्पत्तिः ॥ २६ ॥

तत्र कश्चित् सन्निकर्षस्यायौगपद्यमुपपादयिष्यन्नाह।—

बुद्धेरात्मगुणत्वे दोषमाह।—बुद्धेरात्मत्वस्थाने विनाशकारणस्याश्रयनाशादनुपलब्धेश्चावस्थाने बुद्धेर्नित्यता-प्रसङ्गः ॥ २४ ॥

उत्तरयति।—बुद्धेरनित्यत्वस्य गृहणात् तस्यादनाश्रयीभूतविकल्पात् तत्कारणे कल्पनीये आत्ममनोयोगादिरूपात्कलमनन्तरोत्पन्नबुद्धेः संस्कारादेर्वा नाशकत्व कल्प्यते चरमबुद्धेस्तु अदृष्टनाशात् कालाद्वा नाशः बुद्धेर्बुद्ध्यन्तरनाश्यत्वं दृष्टान्तमाह—शब्दवदिति। शब्दस्य यथा शब्दान्तरारम्भकचरमशब्दस्य निमित्तनाश्य नाश्यत्वं तथा प्रकृतेऽपीति भावः ॥ २५ ॥

ज्ञानसाधनः संस्कारो ज्ञानमित्युच्यते ज्ञानसंस्कृतैरात्मप्रदेशैः पर्य्यायेण मनः सन्निकृष्यते आत्ममनःसन्निकर्षात् स्मृतयोऽपि पर्य्यायेण भवन्तीति ॥ २६ ॥

नान्तःशरीरवृत्तित्वान्मनसः ॥ २७ ॥

सदेहस्यात्मनो मनसा संयोगो विपच्यमानकर्माशय-सहितो जीवनमिष्यते। तत्रास्य प्राक् प्रायणादन्तःशरीरे वर्त्तमानस्य मनसः शरीराद्बहिर्ज्ञानसंस्कृतैरात्मप्रदेशैः संयोगो नोपपद्यत इति ॥ २७ ॥

साध्यत्वाद्धेतुः ॥ २८ ॥

विपच्यमानकर्माशयमात्रं जीवनम्, एवञ्च सति साध्य-मन्तःशरीरवृत्तित्वं मनस इति ॥ २८ ॥

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥ २९ ॥

सुसूर्षया खल्वयं मनः प्रणिदधानः चिरादपि कञ्चिदर्थं स्मरति स्मरतश्च शरीरधारणं दृश्यते आत्ममनःसन्निकर्षजञ्च

ननु बहेरात्मगुणत्वे संस्कारात्ममनोयोगयोः सत्त्वात् स्मृतीनां यौगपद्यं स्यादतैकदेशिनः परिहारमाशङ्क्य ।—ज्ञानं संस्कारकारणं समवेतं यदवच्छेदेन तदवच्छेदेन मनःसन्निकर्षस्य स्मृत्युत्पादकत्वात् तस्य च क्रमिकत्वान्न स्मृतीनामपद्य-मित्यर्थः ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानपदं संस्कारपरमित्यन्ये ॥ २६ ॥

तन्मतं दूषयति ।—उक्तं न युक्तं मनसः अन्तःशरीरवृत्तित्वात् अन्तःशरीरं वृत्तिर्ज्ञानजनकीभूतो व्यापारो यस्य तत्त्वात् शरीरातिरिक्तावच्छेदेनात्ममनोयोगस्य ज्ञानाहेतुत्वाच्छरीरावच्छिन्नस्य हेतुत्वे तद्दोषतादवस्थ्यमिति भावः ॥ २७ ॥

एकदेशी भङ्क्ते ।—शरीरावच्छिन्नात्ममनोयोगो न हेतुः साध्यत्वात् सन्दिग्धत्वात्, मानाभावादिति भावः ॥ २८ ॥

प्रयत्नो द्विविधो धारकः प्रेरकश्च, निःसृते च शरीराद्बहिर्मनसि धारकस्य प्रयत्नस्याभावाद् गुरुत्वात्पतनं स्यात् शरीरस्य स्मरत इति ॥ २९ ॥

न तदाशुगतित्वान्मनसः ॥ ३० ॥

आशुगति मनस्तस्य बहिः शरीरादात्मप्रदेशेन ज्ञानसंस्कृतेन सन्निकर्षः प्रत्यागतस्य च प्रयत्नोत्पादनमुभयं युज्यत इति, उत्पाद्य वा धारकं प्रयत्नं शरीराच्चिःसरणं मनसोऽतस्तच्चोपपन्नं धारणमिति ॥ ३० ॥

न स्मरणकालानियमात् ॥ ३१ ॥

किञ्चित् क्षिप्रं स्मर्य्यते किञ्चिच्चिरेण। यदा चिरेण तदा सुस्मूर्षया मनसि धार्य्यमाणे चिन्ताप्रबन्धे सति कस्यचिदर्थस्य लिङ्गभूतस्य चिन्तनमाराधितं स्मृतिहेतुर्भवति तत्रैतच्चिरनिःसरिते मनसि नोपपद्यते इति, शरीरसंयोगानपेक्षत्वात्मनः संयोगो न स्मृतिहेतुः शरीरस्य भोगायतनत्वात् उपभोगायतनं पुरुषस्य ज्ञातुः शरीरं न ततो निःसरितस्य मनस आत्मसंयोगमात्रं ज्ञानसुखादीनामुत्पत्तौ कल्प्यते, क्लृप्तौ वा शरीरवैयर्थ्यमिति ॥ ३१ ॥

सिद्धान्तसूत्रम्।—उक्तप्रतिषेधो न युक्तः स्मरतः शरीरधारणरूपाया उपपत्तेर्हेत्वन्तरत्वात् मनसो बहिर्भावे शरीरावच्छिन्नात्ममनोयोगाभावेन प्रयत्नाभावे शरीरधारणं न स्यादिति भावः ॥ २९ ॥

पुनः शङ्कते।—शरीराधारणं न मनसः आशुगतित्वाच्छीघ्रमेव शरीरं परावृत्तेः ॥ ३० ॥

दूषयति।—मनसः शीघ्रमागमनं न युक्तं स्मर्ये कालनियमाभावात् कदाचिच्छीघ्रं स्मर्यते कदाचित् प्रतिबन्धात् विलम्बेनापीति न च प्रतिघातं शरीरात्मनः-

आत्मप्रेरणयेच्छाकृतिभिश्च न संयोगविशेषः ॥ ३२ ॥

आत्मप्रेरणेन वा मनसो बहिः शरीरात् संयोगविशेषः स्यात्, यदृच्छया वाकस्मिकतया, कृतया वा मनसः सर्वथा चानुपपत्तिः, कथं स्मर्त्तव्यत्वादिच्छातः स्मरणज्ञानासम्भवाच्च, यदि तावदात्माऽमुष्यार्थस्य स्मृतिहेतुः संस्कारः अमुष्मिन्नात्मप्रदेशे समवेतस्तेन मनः संयुज्यतामिति मनः प्रेरयति तदा स्मृत एवासावर्थो भवति न स्मर्त्तव्यः । न चात्मप्रत्यक्षे आत्मप्रदेशः संस्कारो वा तत्रानुपपन्नात्मप्रत्यक्षेण संवित्तिरिति, सूक्ष्मधिया चायं मनः प्रणिदधानश्चिरादपि कञ्चिदर्थं स्मरति नाकस्मात्, कृतश्च मनसो नास्ति ज्ञानप्रतिषेधादिति ॥ ३२ ॥

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३३ ॥

एतच्च यदा खल्वयं व्यासक्तमनाः क्वचिद्देशे प्रकरया कण्टकेन वा पादव्यथनमाप्नोति तदात्ममनःसंयोगविशेष एषितव्यः, दृष्टं हि दुःखं दुःखवेदनश्चेति तत्रायं समानः प्रतिषेधः,

---

स्थितमनसस्तु एव बहिर्निर्गमस्तु स्मरणान्यवहितपूर्वमेवेति वाच्यं बहिर्निर्गमानन्तरप्रवेशानुकूलक्रियाविभागादिकालव्यवधानं यावच्छरीरधारणं न स्यादिति भावः ॥ ३१ ॥

एकदेशिमतमन्य एकदेशी दूषयति ।—बहिः प्रदेशविशेषे मनःसंयोगविशेषो न सम्भवति स हि न कृत्यर्थमात्मप्रेरणेन तस्य स्मरणीयज्ञानपूर्वकतया प्राप्तेर्व कृत्यापत्तेः नापि यदृच्छया चाकस्मात् चाकस्मिकत्वस्य निषेधात् नापि मनसो कृतयाऽऽदृतया मनसो आदृतत्वाभ्युपगमात् प्रेरयदृच्छाकृताभिः प्रयत्नेच्छाज्ञानैरित्यर्थः इति कश्चित्, तन्न. प्रयत्नेनैव चरितार्थत्वापत्तेः ॥ ३२ ॥

यदृच्छया तु विशेषो नाकस्मिको क्रिया, नाकस्मिकः संयोगः इति, कर्मादृष्टसुपभोगार्थं क्रियाहेतुरिति चेत् समानं, कर्मादृष्टं पुरुषस्थं पुरुषोपभोगार्थं मनसि क्रियाहेतुरेवं दुःखं दुःखसंवेदनञ्च सिध्यतीत्येवञ्चेन्मन्यसे समानं स्मृतिहेतावपि संयोगविशेषो भवितुमर्हति। तत्र यदुक्तमात्मप्रेरणयदृच्छाभूताभिश्च न संयोगविशेष इत्ययमप्रतिषेध इति पूर्वस्तु प्रतिषेधो नात्मशरीरवृत्तित्वान्मनस इति कः खल्विदानीं स्मरणयोगपद्यसद्भावे युगपदस्मरणस्य हेतुरिति ॥ ३३ ॥

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद्-युगपदस्मरणम् ॥ ३४ ॥

यथा खल्वात्ममनसोः संनिकर्षः संस्कारश्च स्मृतिहेतुरेवं प्रणिधानं लिङ्गादिज्ञानानि तानि च न युगपद्भवन्ति तत्कृता स्मृतीनां युगपदनुत्पत्तिरिति ॥ ३४ ॥

प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते योग-पद्यप्रसङ्गः ॥ ३५ ॥

एतन्निराकरोति।—सुप्तादिकं पश्यतः खल्वकादिना पादन्यसनेन तदवच्छेदेन मनःसंयोगो यथा जायते तथैतदपीति भावः इतरथा तत्र मनःसंयोगेऽप्युक्तदोषाः स्युः। यदृष्टविशेषाधीनकर्मवशादसाविति चेत् तुल्यं प्रकृतेऽपीति भावः ॥ ३३ ॥

अस्मरणाधीनपदं स्वयमुपपादयति।—प्रणिधानं चित्तैकाग्र्यं सुषुप्तेति यावत् लिङ्गज्ञानम् उद्बोधकम् उद्बोधकाभावस्यादादिपदं ज्ञानान्तरतो बोधनीयं तस्य ज्ञानात् अस्मरणम्, यदि च युगपदुद्बोधकानि, तदा तावद्विषयकस्मरणमित्यत एव यथा पदज्ञानादाविति मन्तव्यम् ॥ ३४ ॥

यत् खल्विदं प्रातिभमिव ज्ञानं प्रणिधानाद्यनपेक्षं स्मार्त्तमुत्पद्यते कदाचित् तस्य युगपदुत्पत्तिप्रसङ्गो हेत्वभावात् सतः स्मृतिहेतोरसंवेदनात् प्रातिभेन समानाभिमानः, बह्वर्थविषये वै चिन्ताप्रबन्धे कश्चिदेवार्थः कस्यचित् स्मृतिहेतुः तस्यानुचिन्तनात् तस्य स्मृतिर्भवति, न चायं स्मर्त्ता सर्वं स्मृतिहेतुं संवेदयते, एवं मे स्मृतिरुत्पन्नेत्यसंवेदनात्, प्रातिभमिव ज्ञानमिदं स्मार्त्तमिति। प्रातिभे कथमिति चेत् पुरुषकर्मविशेषादुपभोगवच्चियमः। प्रातिभमिदानीं ज्ञानं युगपत् कस्मात् नोत्पद्यते यथोपभोगार्थं कर्म युगपदुपभोगं न करोति। एवं पुरुषकर्मविशेषः प्रतिभाहेतुर्न युगपदनेकं प्रातिभं ज्ञानमुत्पादयति, हेत्वभावादयुक्तमेतदिति चेन्न करणस्य प्रत्ययपर्य्याये सामर्थ्यात् उपभोगवच्चियम इत्यस्ति दृष्टान्तः, हेतुर्नास्तीति चेन्मन्यसे न करणस्य प्रत्ययपर्य्याये सामर्थ्यात् नैकस्मिन् ज्ञेये युगपदनेकं ज्ञानमुत्पद्यते, न चानेकस्मिंस्तदिदं दृष्टेन प्रत्ययपर्य्यायेणानुमेयं करणसामर्थ्यमित्यद्भूतमिति न ज्ञातुर्विकरणधर्मिणो देहनानात्वे प्रत्ययायौगपद्यादिति, अयञ्च द्वितीयः प्रतिषेधः अवस्थितशरीरस्य चानेकज्ञानसमवायादेकप्रदेशे युगपदनेकार्थस्मरणं स्यात् क्वचिदेवावस्थितशरीरस्य ज्ञातुरिन्द्रियार्थप्रबन्धेन ज्ञानमनेकमेकस्मिन्नात्मप्रदेशे समवैति तेन यदा मनः संयुज्यते तदा ज्ञातपूर्वस्यानेकस्य युगपत् स्मरणं प्रसज्यते प्रदेशस्य संयोगपर्य्यायाभावादिति आत्मप्रदेशानामद्रव्यान्तरत्वादेकार्थसमवायस्याविशेषे स्मृतियौगपद्यप्रतिषेधानुपपत्तिः, शब्दसन्ताने तु श्रोत्राधिष्ठानप्रत्यासत्त्या शब्दश्रवणवत् संस्कारप्रत्यासत्त्या मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिप्रसङ्गः, पूर्व एव तु प्रतिषेधो नानेकज्ञानसम-

वायादेकप्रदेशे युगपत् स्मृतिप्रसङ्ग इति यत् पुरुषधर्मो ज्ञानमस्तःकरणस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्मा इति कस्यचिद्दर्शनं तत् प्रतिषिध्यते ॥ ३५ ॥

तस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्तेः ॥३६॥

अयं खलु जानीते तावत् इदं मे सुखसाधनमिदं मे दुःखसाधनमिति, ज्ञातं सुखसाधनमाप्तुमिच्छति दुःखसाधनं हातुमिच्छति, प्राप्तुम् इच्छाप्रयुक्तस्यास्य सुखसाधनावाप्तये समीहाविशेष आरम्भः, जिहासाप्रयुक्तस्य दुःखसाधनपरिवर्जनं निवृत्तिरेव ज्ञानेच्छाप्रयत्नसुखदुःखानामेकेनाभिसम्बन्धः एककर्तृकत्वं ज्ञानेच्छाप्रवृत्तीनां समानाश्रयत्वञ्च, तस्माज्ज्ञस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्माः नाचेतनस्येति, आरम्भनिवृत्तेश्च प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानं वेदितव्यमिति ॥ ३६ ॥

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः॥३७॥

अत्र भूतचैतनिक आह—आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति यस्यारम्भनिवृत्तौ तस्येच्छाद्वेषौ तस्य ज्ञानमिति प्राप्तं

नन्विच्छादीनां मनोधर्मत्वात्तेषां ज्ञानजन्यत्वात् सामानाधिकरण्येन च तव कार्यकारणभावात् कथं ज्ञानस्यात्मगुणत्वमित्याशङ्क्याह सिद्धान्तसूत्रम्। तस्य ज्ञानवत आत्मन इच्छादयः, हेतुमाह—आरम्भनिवृत्त्योरिच्छाद्वेषनिमित्तत्वादिति. प्रवृत्तिनिवृत्त्योरिच्छाद्वेषजन्यत्वात् तव सामानाधिकरण्येन ज्ञानस्य हेतुत्वमिति भावः, यद्वा यस्य ज्ञानवतो याविच्छाद्वेषौ तन्निमित्तत्वादित्यर्थः तथाच ज्ञानेच्छाप्रयत्नानां सामानाधिकरण्यं नासिद्धम् ॥ ३६ ॥

नन्वस्तु तेषां सामानाधिकरण्यं परन्तु तेषामधिकरणं कायाकारः पार्थि-

पार्थिवाप्यतेजसवायवीयानां शरीरारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानेर्योग इति चैतन्यम् ॥ ३७ ॥

परशुवादिष्वारम्भनिवृत्तिदर्शनात् ॥ ३८ ॥

शरीरे चैतन्यनिवृत्तिरारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानेर्योग इति प्राप्तं परश्वादेः कारणस्यारम्भनिवृत्तिदर्शनाच्चैतन्यमिति । अथ शरीरस्येच्छादिभिर्योगः परश्वादेस्तु कारणस्यारम्भनिवृत्तौ व्यभिचरतः न तर्ह्युभयं हेतुः पार्थिवाप्यतेजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानेर्योग इति । अयं तर्ह्यन्योऽर्थः तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः पृथिव्यादीनां भूतानामारम्भस्तावत् त्रसरेणुस्थावरशरीरेषु तदवयवव्यूहलिङ्गः प्रवृत्तिविशेषः, लोष्टादिषु च लिङ्गाभावात् प्रवृत्तिविशेषाभावो निवृत्तिः आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति पार्थिवाप्येष्वणुषु तद्दर्शनादिच्छाद्वेषयोस्तद्योगाज्ज्ञानयोग इति सिद्धं भूतचैतन्यमिति ॥ ३८ ॥

कुम्भादिष्वनुपलब्धेरहेतुः ॥ ३९ ॥

कुम्भादिषूदवयवानां व्यूहलिङ्गः प्रवृत्तिविशेष आरम्भः, सिकतादिषु प्रवृत्तिविशेषाभावो निवृत्तिः, न च मृत्सिकताना-

---

वादिपरमाणुषूक्त एवेति चार्वाकः मन्यते । पार्थिवाद्येषु देहेषु ज्ञानादेर्न प्रतिषेधः । कुतः ? इच्छाद्वेषयोर्लिङ्गित्वादारम्भनिवृत्तिलिङ्गकत्वाभ्यां चेष्टाविशेषलिङ्गकत्वाच्चेष्टायाश्च शरीरे प्रत्यक्षसिद्धत्वादिति भावः ॥ ३७ ॥

समाधित्सुः प्रतिबध्नीमाह ।—आरम्भनिवृत्त्यनुमापकक्रियाविशेषदर्शनात् परश्वादिषु ज्ञानादिसिद्धिप्रसङ्गः, तस्मात् क्रियाविशेषाणां प्रयत्नादिजन्यत्वं सम्बन्धान्तरेण न तु समवायेन व्यभिचारादिति भावः ॥ ३८ ॥

मारभ्यनिवृत्तिदर्शनादिच्छाद्वेषप्रयत्नज्ञानैर्योगः तस्मात् तल्लिङ्ग-त्वादिच्छाद्वेषयोरित्यहेतुरिति ॥ ३९ ॥

नियमानियमौ तु तद्विशेषकौ ॥ ४० ॥

तयोरिच्छाद्वेषयोर्नियमानियमौ विशेषकौ भेदकौ ज्ञस्येच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्तौ न स्वाश्रये किं तर्हि प्रयोज्याश्रये, तत्र प्रयुज्यमानेषु भूतेषु प्रवृत्तिनिवृत्तौ स्तः न सर्वेषु इत्यनियमोपपत्तिः। यस्य तु ज्ञानाद्भूतानामिच्छा-द्वेषनिमित्ते आरम्भनिवृत्तौ स्वाश्रये तस्य नियमः स्यात्। यथा भूतानां गुणान्तरनिमित्ता प्रवृत्तिर्गुणप्रतिबन्धाच्च निवृत्ति-र्भूतमात्रे भवति नियमेन एवं भूतमात्रे ज्ञानेच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती स्वाश्रये स्याताम्। तस्मात् प्रयोजकाश्रिता-ज्ञानेच्छाद्वेषप्रयत्नाः प्रयोज्याश्रये तु प्रवृत्तिनिवृत्तौ इति सिद्धम्। एकशरीरे तु ज्ञातृबहुत्वं निरनुमानम्। भूतचैत-निकपदार्थस्यैकशरीरे बह्वनि भूतानि ज्ञानेच्छाद्वेषप्रयत्नगुणा-नीति ज्ञातृबहुत्वं प्राप्तम्, आमिति ब्रुवतः प्रमाणं नास्ति। यथा नाना शरीरेषु नाना ज्ञातारो बुद्ध्यादिगुणव्यवस्थानात्, एव-मेकशरीरेऽपि बुद्ध्यादिव्यवस्थानुमानं स्यात् ज्ञातृबहुत्वस्येति दृष्टस्यान्यगुणनिमित्तः प्रवृत्तिविशेषो भूतानां सोऽनुमान-मन्यत्रापि दृष्टः करणलक्षणेषु भूतेषु परशवादिषूपादानलक्षणेषु च मृत्प्रभृतिष्वन्यगुणनिमित्तः प्रवृत्तिविशेषः सोऽनुमानम् अन्यत्रापि च। त्रसरेणुस्थावरशरीरेषु तदवयवव्यूहलिङ्गः

स्वमते व्युत्पादयति।—तद्विशेषकौ तयोश्चेतनाचेतनयोर्विशेषकौ इतरव्याव-र्तकौ नियमानियमौ समवायेन अन्यतानियमतद्भावौ समवायेन ज्ञानेच्छादीनां

प्रवृत्तिविशेषो भूतानामन्यगुणनिमित्त इति, स च गुणः प्रयत्नसमानाश्रयः संस्कारो धर्माधर्मसमाख्यातः सर्वार्थः पुरुषार्थाराधनाय प्रयोजकोभूतानां प्रयत्नवदिति। आत्मास्तित्वहेतुभिरात्मनित्यत्वहेतुभिश्च भूतचैतन्यप्रतिषेधः कृतो वेदितव्यः, नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानादिति च समानः प्रतिषेध इति, क्रियामात्रं क्रियोपरममात्रञ्च प्रवृत्तिनिवृत्ती इत्यभिप्रेत्याक्षं तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः, अन्यथा त्विमे आरब्धनिवृत्तौ आख्याते न च तथाविधे पृथिव्यादिषु दृश्येते, तस्मादयुक्तं तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेध इति। भूतेन्द्रियमनसां समानः प्रतिषेधो मनस्तूदाहरणमात्रम् ॥ ४० ॥

यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ४१ ॥

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमित्यतः प्रभृति यथोक्तं संगच्छते तेन भूतेन्द्रियमनसाञ्चैतन्यप्रतिषेधः। पारतन्त्र्यात् परतन्त्राणि भूतेन्द्रियमनांसि धारणप्रेरणव्यूहनक्रियासु प्रयत्नवशात् प्रवर्त्तन्ते चेतन्ये पुनः स्वतन्त्राणि स्युरिति। अकृताभ्यागमाच्च प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति चैतन्ये भूतेन्द्रियमनसां परकृतं कर्म पुरुषेण भुज्यत इति स्यात्

नत्वनधर्मत्वादवच्छेदकतया च शरीरे तेषां जन्यजनकभावः परमाद्यौ यत्नविषयतया क्रिया एवतस्य चैष्टैव परमाद्यभिघातजनिका यत्नादेरदृष्टहेतुत्वे मानाभावः ॥ ४० ॥

इच्छादीनां मनोगुणत्वाभावे युक्त्यन्तरमाह।—इच्छादय इति शेषः यथोक्त-

अचेतन्ये तु तत्साधनस्य स्वकृतकर्मफलोपभोगः पुरुषस्येत्युपपद्यत इति ॥ ४१ ॥

परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४२ ॥

अथायं सिद्धोपसंग्रहः,—आत्मगुणो ज्ञानमिति प्रकृतम्, परिशेषो नाम प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः, भूतेन्द्रियमनसां प्रतिषेधे द्रव्यान्तरं न प्रसज्यते शिष्यते चात्मा तस्य गुणो ज्ञानमिति ज्ञायते, यथोक्तहेतूपपत्तेश्चेति दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनामात्मप्रतिपत्तिहेतूनामप्रतिषेधादिति परिशेषज्ञापनार्थं प्रकृतस्थापनादिज्ञानार्थश्च यथोक्तहेतूपपत्तिवचनमिति। अथवोपपत्तेश्चेति हेत्वन्तरमेवेदं नित्यः खल्वयमात्मा यस्मादेकस्मिन् शरीरे धर्मं चरित्वा कायहेतुत्वात् ज्ञानेच्छादीनां सामानाधिकरण्येन कार्यकारणभावात् पारतन्त्र्यात् मनसश्चेतन सहकारित्वादिच्छादयो न तद्गुणाः, वस्तुतस्तु इच्छादीनां पारतन्त्र्यात् परावलीनविषयताशालित्वात् इच्छादीनां हि समानाधिकरणस्वजनकज्ञानविषयतैव विषयता ज्ञानस्यधिकरणे च तन्न स्यादिति भावः. स्वकृतात् स्वयंकृतात् कर्मणः अभ्यागमो भोगः स मनसो यत्नादिमत्त्वे न स्यान्नह्यस्वकृतात्कर्मणो भोगः, नवा भोगोऽपि मनसः भोक्तृत्वस्मीत्यादिभासिन एवात्मत्वात् तद्भिन्ने आत्मनि मानाभावात्. आत्मनः सुखादिसाक्षात्कारानुरोधान्महत्त्वं मनसश्च धर्मिग्राहकमानादणुत्वं मतोऽपि नैकं न च मनसः परमाणुत्वान्नावयवाश्च नित्यत्वं तन्मतं तथा चात्ममनसोर्नित्यत्वात् सदाज्ञानादिप्रसङ्गान्नित्यमोक्षः स्यादतोऽन्तःकरणस्यानित्यत्वं तन्नाशश्च मोक्ष इति वाच्यम्, अदृष्टाद्यभावेन नित्ययोरपि बन्ध्योरिव फलाजनकत्वात्। न च ज्ञानादिकं प्रकृत्य इत्येतत्सूत्रं मन एवेति श्रुतेर्मनस एव ज्ञानादिकमभेदसूत्रेणोपादानोपादेयभावकथनादिति वाच्यम्, अन्नं वै प्राणा इत्यादौ निमित्तेऽपि अभेदोल्लेखदर्शनात् कारणत्वभावे तात्पर्यादिति तत्त्वम् ॥ ४१ ॥

आत्मगुणत्वमुपसंहरति।—इच्छादिकमात्मगुण इत्यादि हेतुमाह—परिशेषात्

भेदात् स्वर्गे देवेषूपपद्यते अधर्मचरित्वा देहभेदान्नरकेषूपपद्यत इति उपपत्तिः शरीरान्तरप्राप्तिलक्षणा, सा सति सत्ये नित्ये चाश्रयवती बुद्धिप्रबन्धमात्रे तु निरात्मके निराश्रया नोपपद्यत इति। एकसन्ताधिष्ठानश्चानेकशरीरयोगः संसार उपपद्यते। शरीरप्रबन्धोच्छेदश्चापवर्गो मुक्तिरित्युपपद्यते, बुद्धिसन्ततिमात्रे त्वेकसन्तानुपपत्तेर्न कश्चिद्दीर्घमध्वानं सम्भावति न कश्चिच्छरीरप्रबन्धाद्विमुच्यत इति संसारापवर्गानुपपत्तिरिति बुद्धिसन्ततिमात्रे च सत्त्वभेदात् सर्वमिदं प्राणिव्यवहारजातमप्रतिसंहितमव्याहृतमपरिनिष्ठञ्च स्यात्, ततः स्मरणाभावान्नान्यदृष्टमन्यः स्मरतीति, स्मरणञ्च खलु पूर्वज्ञातस्य समानेन ज्ञात्रा ग्रहणम् अज्ञासिषमसमुमर्थं ज्ञेयमिति, सोऽयमेको ज्ञाता पूर्वज्ञातमर्थं गृह्णाति तच्चास्य ग्रहणं स्मरणमिति, तदबुद्धिप्रबन्धमात्रे निरात्मके नोपपद्यते ॥ ४२ ॥

स्मरणत्वात्मनो ज्ञस्वाभाव्यात् ॥ ४३ ॥

उपपद्यत इति, आत्मन एव स्मरणं न बुद्धिसन्ततिमात्रस्येति। तृशब्दोऽवधारणे, कथं ज्ञस्वभावत्वात् ज्ञ इत्यस्य स्वभावः स्वो धर्मः। अयं खलु ज्ञास्यति जानाति अज्ञासीदिति त्रिकालविषयेणानेकेन ज्ञानेन सम्बध्यते तच्चास्य त्रिकालविषयं ज्ञानं प्रत्यात्मवेदनीयं ज्ञास्यामि जानामि

शरीरादिहेतुनिरासात् यथोक्तहेतुना दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्यादीनां उपपत्तेः उपपन्नत्वात् ॥ ४२ ॥

स्मृतेरात्मगुणत्वमर्थसिद्धमपि शिष्यबुद्धिवैशद्याय पृथगभ्युपादधाति।—तुरप्यर्थे, ज्ञस्वाभाव्यात् ज्ञानवत्स्वाभाव्यात् ज्ञानत्वावच्छिन्नवत्त्वं ज्ञात्मनः स्वभावः स्मृतेश्च ज्ञानत्वावच्छिन्नत्वात्तद्धर्मत्वमर्थात् सिद्धम्, यद्वा ज्ञस्वाभाव्यात् स्मृतिहेतुज्ञानस्वात्म-

अन्नाशिषमिति वर्त्तते तच्चायं श्लो धर्मस्तस्य स्मरणं न बुद्धि-प्रबन्धमात्रस्य निरात्मकस्येति। स्मृतिहेतूनामयोगपद्याद्युग-पदस्मरणमित्युक्तम् ॥ ४३ ॥

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरि-ग्रहाश्रयाश्रितसम्बन्धानन्तर्य्यवियोगैककार्य्यविरो-धातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थि-त्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥ ४४ ॥

अथ केभ्यः स्मृतिरुत्पद्यते इति,—स्मृतिः खलु सुस्मूर्षया मनसो धारणं, प्रणिधानं सुस्मूर्षितलिङ्गचिन्तनञ्चार्थस्मृति-कारणम्, निबन्धः खल्वेकग्रन्थोपयमोऽर्थानाम् एक ग्रन्था-पयताः खल्वयो अन्योन्यस्मृतिहेतव आनुपूर्व्येतरथा वा भव-न्तीति। धारणाच्चलक्षतो वा, प्रज्ञातेषु वस्तुषु स्मर्त्तव्यानाम-पनिधेयो निबन्ध इति, अभ्यासस्तु समाने विषये ज्ञाना-नामभ्यावृत्तिरभ्यासजनितः संस्कार आत्मगुणोऽभ्यासशब्दे-नोच्यते, स च स्मृतिहेतुः समान इति, लिङ्गं पुनः संयोगिसम-वाय्येकार्थसमवायिविरोधि चेति, संयोगो यथा—धूमोऽग्नेः, गोविषाणं, पाणिः पादस्य, रूपं स्पर्शस्य, अभूतं भूतस्येति।

प्रतिनि मित्रः स्मृतेरात्मवृत्तित्वमपि मित्रं, परं तु ज्ञानस्यावश्यविनाशित्वात्कथं स्मृति हेतुरित्यत्राह—स्मरणमित्यादि ज्ञानवतः स्वभावः संस्कारः तस्मादित्यर्थः इत्याहुः ॥ ४३ ॥

स्मृतेर्योगपद्यसमाधानाय प्रणिधानादीनामुद्बोधकानां क्रमो हेतुरुक्तस्तत्र प्रणिधानादीनि दर्शयति।—स्मरणमित्यनुवर्त्तते निमित्तशब्दस्य इन्द्रार्थं युतस्य प्रत्येकमभिदेनान्वयः। प्रणिधानं मनसो विषयान्तरसञ्चारवारणं निबन्ध एकग्रन्थोप-

लक्षणं प्रत्यवयवत्वं गोत्वस्य स्मृतिहेतुः विदानामिदं गर्गाणामिदमिति, सादृश्यं चित्रगतं प्रतिरूपकं देवदत्तस्येत्येवमादि, परिग्रहात् स्वेन वा स्वामी स्वामिना वा स्वं स्मर्यते, आश्रयात् ग्रामस्था तदधीनं स्मरति । आश्रितात् तदधीनेन ग्रामस्थमिति, सम्बन्धात् अन्तेवासिना गुरुं स्मरति ऋत्विजा याज्यमिति, आनन्तर्यात् इति करणीयेष्वर्थेषु, वियोगात् येन विप्रयुज्यते तद्वियोगप्रतिसंवेदी शुभं स्मरति, एककार्यात् कर्मान्तरदर्शनात् कर्मान्तरे स्मृतिः, विरोधात् विजिगीषमाणयोरन्यतरदर्शनादन्यतरः स्मर्यते, अतिशयात् येनातिशय उत्पादितः, प्राप्तेः यतो येन किञ्चित् प्राप्तमाप्तव्यं वा भवति तमभीक्ष्णं स्मरति, व्यवधानात् कोशादिभिरसिप्रभृतीनि स्मर्यन्ते, सुखदुःखाभ्यां तद्धेतुः स्मर्यते, इच्छाद्वेषाभ्यां यमिच्छति यञ्च द्वेष्टि तं स्मरति, भयात् यतो बिभेति, अर्थित्वात् येनार्थी भोजनेनाच्छादनेन वा, क्रियायाः रथेन रथकारं स्मरति, रागात् यस्यां स्त्रियां रक्तो भवति तामभीक्ष्णं स्मरति, धर्मात् जात्यन्तरस्मरणमिह चाधीतश्रुतावधारणमिति, अधर्मात् प्राग्नुभूतदुःखसाधनं स्मरति, न चैतेषु निमित्तेषु युगपत्संवेदनानि भवन्तीति युगपदस्मरणमिति. निदर्शनञ्चेदं स्मृतिहेतूनां न परिसङ्ख्यानमिति, अनित्यायाश्च बुद्धावुत्पन्नापवर्गित्वात् कालान-

---

निबन्धनं यथा प्रमाणेन प्रमेयादिस्मरणम् अभ्यासः संस्कारजागरूकम् एतस्य यद्यपि बोधकत्वं तथापि तादृशे शीघ्रप्रबोधकसमवधानं स्वादिव्याश्रयेण तदुपन्यासः अभ्यासो दृढतरसंस्कार उद्बोधकत्वेनोक्त इति केचित् लिङ्गं व्याप्यं व्यापकस्य स्मारकं, लक्षणं यथा कपिध्वजादि अर्जुनादेः, सादृश्यं देवदत्तादेः, परिग्रहः स्वीकारस्तस्य स्वस्वामिभावोऽर्थः, तदेकतरेणान्यतरस्मरणम्, आश्रयाश्रिती राजादितत्परिजनौ

न्तरावस्थानान्नित्यानां संशयः। किमुत्पन्नापवर्गिणी बुद्धिः शब्दवत् आहोस्वित् कालान्तरावस्थायिनी कुम्भवदिति ॥४४॥

कर्मानवस्थायित्वग्रहणात् ॥ ४५ ॥

उत्पन्नापवर्गिणीति पक्षः परिगृह्यते। कस्मात्? कर्मणोऽनवस्थायिनो ग्रहणादिति क्षिप्तस्येषोरापतनात् क्रियासन्तानो गृह्यते प्रत्यर्थनियमाच्च बुद्धीनां क्रियासन्तानवद्बुद्धिसन्तानोपपत्तिरिति अवस्थितग्रहणे च व्यवधीयमानस्य प्रत्यक्षनिवृत्तेः अवस्थिते च कुम्भे गृह्यमाणेन सन्तानेनेव बुद्धिर्वर्त्तते प्राग्व्यवधानात् तेन व्यवहिते प्रत्यक्षं ज्ञानं निवर्त्तते कालान्तरावस्थाने तु बुद्धेर्दृश्यव्यवधानेऽपि प्रत्यक्षमवतिष्ठतेति, स्मृतिचालिङ्गं बुद्ध्यवस्थाने संस्कारस्य बुद्धिजन्यस्य स्मृतिहेतुत्वात् यच्च मन्येतावतिष्ठते बुद्धिः दृष्टाहि बुद्धिविषये स्मृतिः सा च बुद्धावनित्यायां

परस्परारकौ, सम्बन्धी गवाश्वित्थभावादिः गोदर्शनाद्यात् पृथग्गृह्यः आनन्तर्यं प्रीक्षणावघातादेः, वियोगो यथा दारादेः, एककार्य्या अग्नेर्वायुप्रभृतयः परस्परारकाः, विरोधादहिनकुलादेरन्यतरेणापरारणम् अतिशयः संस्कार उपनयनादिराधार्य्यादिसारकः, प्राप्तिर्धनादेर्दातारं आरयति, व्यवधानमावरणं यथा खड्गादेः क्रोधादि सुखदुःखयोरन्यतरेणापरस्य ताभ्यां तत्प्रयोजकस्य वा आरणं इच्छादेर्वा यद्विषयकतया गृहीतो तस्य आरकौ भयं मरणादेर्भयहेतोर्वा आरकम् अर्थित्वादातुः क्रिया शास्त्रादेः वायुादेः रागात् प्रीतेः पुत्रादेः आरणं धर्माधर्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूतसुखादेश्च आरणमिति। उक्तेषु च किञ्चित्स्वरूपं संक्षिप्तञ्च ज्ञातमुद्बोधकं शिष्यव्युत्पादनाय चायं प्रपञ्चः ॥ ४४ ॥

समाप्तं बुद्ध्यात्मगुणत्वप्रकरणम् ॥ १५ ॥

बुद्धेर्बुद्ध्यन्तराविनाश उक्तः, स च तृतीयक्षणवर्त्तिध्वंसप्रतियोगित्वसिद्धौ स्यादतो बुद्धेरुत्पन्नापवर्गित्वं व्युत्पादनीयं तच्च सिद्धान्तसूत्रम्। शरीरादिकर्म-

कारणाभावाच्च स्यादिति, तदिदमसिद्धं कस्मात् बुद्धिजो हि संस्कारो गुणान्तरं स्मृतिहेतुर्न बुद्धिरिति ॥ ४५ ॥

बुद्ध्यवस्थानात् प्रत्यक्षत्वे स्मृत्यभावः ॥४६॥

हेत्वभावादयुक्तमिति चेत् यावदवतिष्ठते बुद्धिस्तावदसौ बोद्धव्योऽर्थः प्रत्यक्षः, प्रत्यक्षे च स्मृतिरनुपपन्नेति ॥ ४६ ॥

अव्यक्तग्रहणमनवस्थायित्वात् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् ॥ ४७ ॥

यद्युत्पत्त्यापवर्गिणी बुद्धिः प्राप्तमव्यक्तं बोद्धव्यस्य ग्रहणं, यथा विद्युत्सम्पाते वैद्युतस्य प्रकाशस्यानवस्थानादव्यक्तं रूपग्रहणमिति व्यक्तं तद्ग्रहणं तस्मादयुक्तमेतदिति ॥४७॥

हेतूपादानात् प्रतिषेधव्याभ्यनुज्ञा ॥ ४८ ॥

उत्पत्त्यापवर्गिणी बुद्धिरिति प्रतिषेधव्यन्तदेवाभ्यनुज्ञायते विद्युत्सम्पाते रूपाव्यक्तग्रहणवदिति यत्राव्यक्तं ग्रहणं तत्रोत्पत्त्यापवर्गिणी बुद्धिरिति ग्रहणहेतुविकल्पाद्ग्रहणविकल्पो न बुद्धिविकल्पात्, यदिदं क्वचिदव्यक्तं ग्रहणमयं विकल्पो ग्रहणहेतुविकल्पात्, यत्रानवस्थितो ग्रहणहेतुस्तत्राव्यक्तं ग्रहणं

धारायां अनवस्थायिन्यां प्रत्यक्षधारापि वाच्या न चाद्यबुद्धेरुत्तरोत्तरयाहकत्वं विरम्य व्यापाराभावात् पूर्वपूर्वस्य च परपरतोऽननुभवादिनाप्रसिद्धावाश्रयनाशादिरभावादिरोधिगुणस्येव नाशकत्वमिति कर्मवद्धेरनवस्थायित्वयहणादिति वार्थः ॥ ४५ ॥

अनुवृत्तेः।—बुद्धिर्यद्यात्मविनाशिनी स्वाधीन्यात्मविशेषविशेषधर्मविशिष्ट धर्मिग्राहिणी न स्यादियुत्सम्पातकालीनवस्तुग्रहणवत् न चैवं तस्मान्न तथेत्यर्थः ॥ ४६ ॥ ४७ ॥

यथावस्थितस्तत्र व्यक्तं न तु बुद्धेरस्थानानवस्थानाभ्यामिति, कस्मात्? अर्थग्रहणं हि बुद्धिः यत्तदर्थग्रहणमव्यक्तं व्यक्तं वा बुद्धिः सेति विशेषाग्रहणे च सामान्यग्रहणमात्रमव्यक्तग्रहणं तत्र विषयान्तरे बुद्ध्यन्तरानुत्पत्तिर्निमित्ताभावात्, यत्र समानधर्मयुक्तश्च धर्मो गृह्यते विशेषधर्मयुक्तश्च तद्व्यक्तं ग्रहणं, यत्र तु विशेषेऽगृह्यमाणे सामान्यग्रहणमात्रं तदव्यक्तं ग्रहणं, समानधर्मायोगाच्च विशिष्टधर्मयोगो विषयान्तरं तत्र यद्ग्रहणं न भवति तद्ग्रहणनिमित्ताभावात् न बुद्धेरनवस्थानादिति यथाविषयञ्च ग्रहणं व्यक्तमेव प्रत्यर्थनियतत्वाच्च बुद्धीनां सामान्यविषयञ्च ग्रहणं स्वविषयं प्रत्यव्यक्तं विशेषविषयञ्च ग्रहणं स्वविषयं प्रत्यव्यक्तं विशेषविषयञ्च ग्रहणं स्वविषयं प्रति व्यक्तम्, प्रत्यर्थनियता हि बुद्धयः, तदिदमव्यक्तग्रहणं देशितं च विषये बुद्ध्यनवस्थानकारितं स्यादिति धर्मिभेदे बुद्धिनानात्वस्य भावाभावाभ्यां तदुपपत्तिः धर्मिणः खल्वर्थस्य समानाश्च धर्माविशिष्टाश्च तेषु प्रत्यर्थनियता नानाबुद्धयस्ता उभयो यदा धर्मिणि वर्त्तन्ते तदा व्यक्तं ग्रहणं धर्मिणमभिप्रेत्य यदा तु सामान्यग्रहणमात्रं तदाऽव्यक्तं ग्रहणमिति, एवं धर्मिणमभिप्रेत्य व्यक्ताव्यक्तयोर्ग्रहणयोरुपपत्तिरिति, न वेदमव्यक्तं ग्रहणं बुद्धेर्बोद्धव्यस्य वाऽनवस्थायित्वादुपपद्यत इति ॥४८॥

प्रदीपार्च्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥४९॥

उत्तरयति।—प्रतिषेद्धव्यस्य बुद्धेरागमिनाशित्वस्याभ्युपायेन तथा कृतया विद्युद्व्यातदृष्टान्तरूपस्य हेतोः साधकत्वोपादानात् तथा चोभयतो बाध इति भावः॥ ४८॥

इदं हि न, अनवस्थायित्वेऽपि बुद्धेस्तेषां द्रव्याणां प्रतिपत्तव्यम्, कथं प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत् प्रदीपार्चिषां सन्तत्या वर्त्तमानानां ग्रहणानवस्थानं ग्राह्यानवस्थानञ्च प्रत्यर्थनियतत्वात् बुद्धीनां यावन्ति प्रदीपार्चींषि तावन्त्यो बुद्धय इति दृश्यते चाग्न्यं प्रदीपार्चिषां ग्रहणमिति, चेतना शरीरगुणः सति शरीरे भावादसति चाभावादिति ॥ ४८ ॥

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ५० ॥

सांशयिक इति भावः । स्वगुणोऽपि द्रवत्वमुपलभ्यते परगुणशैत्यता, तेनायं संशयः किं शरीरगुणश्चेतना शरीरे गृह्यते अथ द्रव्यान्तरगुण इति ॥ ५० ॥

यावच्छरीरभावित्वाद्रूपादीनाम् ॥ ५१ ॥

न शरीरगुणश्चेतना, कस्मात् ? न रूपादिहीनं शरीरं गृह्यते चेतनाहीनन्तु गृह्यते । यथोष्णताहीना आपः, तस्मान्न शरीरगुणश्चेतनेति, संस्कारवदिति चेन्न कारणानुच्छेदात् यथाविधे द्रव्ये संस्कारस्तथाविधे एवोपरमो न तत्र कारणोच्छेदात्

यस्तु यद्धि तद्ग्रहणेनाभासां बुद्धीनामनवस्थायित्वमित्याह ।—यथा प्रदीपार्चिषां सन्तन्यमानानामनवस्थायित्वेऽप्यभिव्यक्तग्रहणं तथान्यत्रापि स्यात् विद्युत्सन्ततेर्यो वा बुद्धिरुत्पन्ना सा स्वविषये व्यक्तैवेति भावः ॥ ४८ ॥

समाप्तं बुद्धेरुत्पत्तापवर्गित्वप्रकरणम् ॥ २६ ॥

अथ बुद्धेः शरीरगुणत्वाभावप्रकरणं न च प्राग्येव तल्लिङ्गैरनारभ्यमेतत् गौरोऽहं ज्ञानाश्रयोऽहमित्यनुभवेन तद्बाधकज्ञानाभासीकरणादतो विशिष्य तदुत्पादनाय संशययोजनाह ।—द्रव्ये चन्दनादौ स्वगुणस्य रूपादेः परगुणस्य शैत्यादेश्च यद्वादेवं शरीरे रूपादेरीक्षणाच्च यद्वाद् बुद्ध्यादिः शरीरगुणो न वेति संशयः ॥ ५० ॥

तत्र सिद्धान्तसूत्रम् ।—"न शरीरगुणश्चेतना" इति यादौ भाष्यतः पूर्वं न

अत्यन्तं संस्कारानुपपत्तिर्भवति यथाविधे शरीरे चेतना दृश्यते तथाविध एवात्यन्तोपरमश्चेतनाया दृश्यते, तस्मात् संस्कारवदित्यसमः समाधिः, अथापि शरीरस्यचेतनोत्पत्तिकारणं स्यात् द्रव्यान्तरस्थं वोभयस्थं वा, तत्र नियमहेत्वभावात् शरीरस्थेन कदाचिच्चेतनोत्पद्यते कदाचिन्नेति नियमहेतुर्नास्तीति द्रव्यान्तरस्थेन शरीर एव चेतनोत्पद्यते न लोष्टादिषु इत्यत्र न नियमहेतुरस्तीति उभयस्थ निमित्तत्वे शरीरसमानजातीये द्रव्ये चेतना नोत्पद्यते शरीर एव चोत्पद्यत इति नियमहेतुर्नास्तीति, यच्च मन्येत सति श्यामादिगुणे द्रव्ये श्यामाद्युपरमो दृष्टः एवं चेतनोपरमः स्यादिति ॥ ५१ ॥

न पाकजगुणान्तरोत्पत्तेः ॥ ५२ ॥

नात्यन्तं रूपोपरमो द्रव्यस्य श्यामे रूपे निवृत्ते पाकजं गुणान्तरं रक्तं रूपमुत्पद्यते शरीरे तु चेतनामात्रोपरमाऽत्यन्तमिति ॥ ५२ ॥

प्रतिषिद्धिसिद्धेः पाकजानामप्रतिषेधः ॥ ५३ ॥

शरीरविशेषगुण इत्यर्थः। अयं तर्काकारः बुद्ध्यादिकं शरीरविशेषगुणः स्वाधारशरीरभावि स्यात् रूपादिवत् तत्पश्चिकार्थं चानुभानं बुद्ध्यादिकं न शरीरविशेषगुणः अयावद्द्रव्यभावित्वात् शब्दवत् व्यतिरेकि रूपवद्वा अयावद्द्रव्यभावित्वञ्च आश्रयत्वाभिमतकालीनत्वप्रतियोगित्वम् ॥ ५१ ॥

पिठरपाकमते व्यभिचारमाशङ्क्य।—शरीरे पाकाधीनरूपादिना व्यभिचारात्रोक्तं साधनं युक्तमित्यर्थः परे तु सिद्धान्तसूत्रमेवेदं तथा हि पाकजरूपे न व्यभिचारः शङ्कनीयः, पाकजगुणान्तरस्य रूपान्तरस्योत्पत्तेः। तथा च स्वसमानाधिकरणस्वसमानजातीय-समानकालीनत्वं पूर्वोक्तहेतौ वाच्यप्रतियोगित्वे विशेषणीयमित्यर्थ इत्याहुः ॥ ५२ ॥

अथापि यावत्सु दृश्येषु पूर्वगुणप्रतिद्वन्द्विसिद्धिस्तावत्सु पाकजोत्पत्तिर्दृश्यते पूर्वगुणैः सह पाकजानामवस्थानस्याग्रहणात्, न च शरीरे चेतनाप्रतिद्वन्द्विसिद्धौ सहानवस्थायिगुणान्तरं गृह्यते येनानुमीयेत तेन चेतनाया विरोधः, तस्मादप्रतिषिद्धा चेतना यावच्छरीरं वर्त्तेत न तु वर्त्तते तस्माच्च शरीरगुणश्चेतना इति ॥ ५३ ॥

शरीरव्यापित्वात् ॥ ५४ ॥

इतश्च न शरीरगुणश्चेतना, शरीरं शरीरावयवाश्च सर्वे चेतनोपलभ्या व्याप्ता इति न क्वचिदनुपलब्धिश्चेतनायाः, शरीरवच्छरीरावयवाश्चेतना इति प्राप्तं चेतनबहुत्वम्, तत्र यथा प्रतिशरीरं चेतनबहुत्वे सुखदुःखज्ञानानां व्यवस्थालिङ्गमेवमेकशरीरेऽपि स्यात् न तु भवति तस्माच्च शरीरगुणश्चेतनेति ॥ ५४ ॥

न केशनखादिष्वनुपलब्धेः ॥ ५५ ॥

यदुक्तं न क्वचिच्छरीरावयवे चेतनाया अनुत्पत्तिरिति सा

सिद्धान्तसूत्रम् ।—पाकजानां प्रतिद्वन्द्विनि पूर्वशरीरप्रतिरूपके शरीरान्तरे सिद्धेः घटादौ पाकजरूपसम्भवेऽपि शरीरे न तत्सम्भवः शरीरावयवानाश्रमादीनामग्निसंयोगविशेषेण नाशावश्यकत्वात्, परे तु पाकजानां प्रतिद्वन्द्विनोऽग्निसंयोगात् सिद्धेः तथा च तादृशाग्निसंयोगासमानाधिकरणत्वमर्थः, तेनाग्निसंयोगनाश्येऽग्निसंयोगजन्ये च न व्यभिचार इत्याहुः अन्ये तु शरीरगुणत्वाभावे हेत्वन्तरमाह—प्रतिद्वन्द्वीति । पाकजानां पूर्वरूपादिकं प्रतिद्वन्द्विविरोधि एकस्मिन् रूपे विद्यमाने रूपान्तराभावात् प्रकृते त्वेकस्मिन् ज्ञाने सत्यपि द्वितीयक्षणे ज्ञानान्तरोत्पत्तेर्ज्ञानादिकं न शरीरविशेषगुण इत्यर्थ इत्याहुः ॥ ५३ ॥

हेत्वन्तरमाह ।—शरीरविशेषगुणानामिति शेषः ज्ञानसुखादिकन्तु न, शरीरव्यापकं हृदयाद्यवच्छेदेन तदानुभविकत्वादिति भावः ॥ ५४ ॥

न, केशेषु नखादिषु चानुत्पत्तिश्चेतनाया इति। अनुपपन्नं शरीरव्यापित्वमिति ॥ ५५ ॥

त्वक्पर्य्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः॥५६॥

इन्द्रियाश्रयत्वं शरीरलक्षणं त्वक्पर्य्यन्तं जीवमनःसुखदुःखसंविच्चायतनभूतं शरीरम्, तस्माच्च केशादिषु चेतनोत्पद्यते। अर्थकारितस्तु शरीरोपनिबन्धः केशादीनामिति ॥ ५६ ॥

शरीरगुणवैधर्म्यात् ॥ ५७ ॥

इतश्च न शरीरगुणश्चेतना, द्विविधश्च शरीरगुणः अप्रत्यक्षश्च गुरुत्वम् इन्द्रियग्राह्यश्च रूपादि विधान्तरन्तु चेतना प्रत्यक्षा संवेद्यत्वात् नेन्द्रियग्राह्या मनोविषयत्वात्, तस्मात् द्रव्यान्तरगुण इति ॥ ५७ ॥

न रूपादीनामितरेतरवैधर्म्यात् ॥ ५८ ॥

यथेतरेतरविधर्माणो रूपादयो न शरीरगुणत्वं जहति एवं रूपादिवैधर्म्याच्चेतना शरीरगुणत्वं न हास्यतीति ॥ ५८ ॥

देशयति।—शरीररूपादेराश्रयव्यापकत्वं न शरीरस्य मौरूपस्यशब्दादेः केशनखादावनुपलब्धेरित्यर्थः ॥ ५५ ॥

दूषयति।—स्पष्टम्। अन्ये तु चेतना न शरीरगुणः शरीरव्यापित्वात् शरीरतदवयवेषु सर्वेष्वेकेन सम्बन्धेन सत्त्वात् शरीरगुणस्तु न स्वावयववृत्तिः शङ्कते—न केशेति। चैतन्यस्यानुपलब्धेः, समाधत्ते त्वगितीत्याहुः ॥ ५६ ॥

इतरमाह।—बुद्धिर्न शरीरगुणः शरीरगुणवैधर्म्यात् बहिरिन्द्रियावेद्यत्वे सति मनसा वेद्यत्वात् ॥ ५७ ॥

आक्षिपति।—नोक्तं युक्तं रूपादीनां परस्परवैधर्म्यात् तथाच तादृश्याः स्पर्शादीनां शरीरगुणत्वं न स्यादचाक्षुषत्वात् तथाचोक्तमप्रयोजकमिति भावः ॥ ५८ ॥

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥ ५९ ॥

अप्रत्यक्षत्वाच्चेति । यथेतरेतरविधर्माणो रूपादयो न त्वेविध्यमतिवर्त्तन्ते यदि शरीरगुणः स्यादिति, अतिवर्त्तन्ते तु तस्माच्च शरीरगुण इति । भूतेन्द्रियमनसां ज्ञानप्रतिषेधात् सिद्धे सत्यारम्भो विशेषज्ञापनार्थं बहुधा परीक्ष्यमाणं तत्त्वं सुनिश्चिततरं भवतीति परीक्षिता बुद्धिः ॥ ५९ ॥

ज्ञानायौगपद्यादेकं मनः ॥ ६० ॥

मनस इदानीं परीक्षाक्रमः, तत् किं प्रतिशरीरमेकमनेकमिति विचारे । अस्ति खलु वै ज्ञानायौगपद्यमेकैकस्येन्द्रियस्य यथाविषयं करणस्यैकप्रत्ययनिर्वृत्तौ सामर्थ्यात्र तदेकत्वे मनसो लिङ्गं, यत्तु खल्विदमिन्द्रियान्तराणां विषयान्तरेषु ज्ञानायौगपद्यमिति तल्लिङ्गं कस्मात् सम्भवति खलु वै बहुषु मनःसु इन्द्रियमनःसंयोगयौगपद्यमिति ज्ञानयौगपद्यं स्यात् न तु भवति तस्मादविषये प्रत्ययपर्य्यायादेकं मनः ॥ ६० ॥

न युगपदनेकक्रियोपलब्धेः ॥ ६१ ॥

समाधत्ते :— रूपादीना न शरीरगुणत्वप्रतिषेधः, कुतः ? ऐन्द्रियकत्वात् । तत्तदिन्द्रियाग्राह्यत्वलक्षणतत्सङ्कर्षवैधर्म्येऽपि शरीरगुणत्वावच्छिन्नवैधर्म्यस्य बहिरिन्द्रियग्राह्यत्व इति याच्ञाव्यभावात् बुद्धौ च तत्सत्त्वादिति भावः ॥ ५९ ॥

तस्मात् बुद्धेः शरीरगुणभेदप्रकरणम् ॥ ६० ॥

अथ क्रमप्राप्तो मनःपरीक्षा, तच्च प्रतिशरीरमेकं मनश्चतुरादिसहकारितया अनेकमिति संशये मनःपदैकवचनेन तत्र तेन च प्रत्यक्षं सकलमनःसम्बन्धासम्बन्धाभ्यां व्यासङ्गयौगपद्ये उपपद्येते इति पूर्वपक्षे सिद्धान्तसूत्रम् । प्रतिशरीरं मनो नानात्वे व्यासङ्गस्यैकेऽपि योगपद्यं स्यादतो न मनोनानात्वमिति भावः ॥ ६० ॥

अयं खल्वध्यापकोऽधीते व्रजति क्रमशस्तनुं धास्यति पन्थानं पश्यति मृगोत्तरण्यजान् शब्दान् बिभ्यत् व्याललिङ्गानि बुभुत्सते, स्मरति च गन्तव्यं स्थानीयमिति क्रमस्याग्रहणाद् युगपदेताः क्रियाः इति प्रायं मनसो बहुत्वमिति ॥६१॥

अलातचक्रदर्शनवत्तदुपलब्धिरायुसंस्कारात् ॥६२॥

आयुसंस्कारादलातस्य संभ्रमतो विद्यमानः क्रमो न गृह्यते क्रमस्याग्रहणादविच्छेदबुद्ध्या चक्रवद्बुद्धिर्भवतीति तथा बुद्धीनां क्रियाणामायुवृत्तित्वाद्विद्यमानः क्रमो न गृह्यते क्रमस्याग्रहणाद् युगपत् क्रिया भवन्तीत्यभिमानो भवति। किं पुनः क्रमस्याग्रहणाद् युगपत् क्रियाभिमानः अथ युगपद्भावादेव युगपदनेकक्रियोपलब्धिरिति अत्र विशेषप्रतिपत्तेः कारणमुच्यते इति उक्तमिन्द्रियान्तराणां विषयान्तरेषु पर्य्यायेण बुद्धयो भवन्तीति तच्चाप्रत्याख्येयमात्मप्रत्यक्षत्वात्। अथापि दृष्टश्रुतानर्थांश्चिन्तयतः क्रमेण बुद्धयो वर्त्तन्ते न युगपदनेनानुमातव्यमिति वर्णपदवाक्यबुद्धीनां तदर्थबुद्धीनाञ्चायुवृत्तित्वात् क्रमस्याग्रहणं कथं वाक्यस्थेषु खलु वर्णेष्वन्त्यम् प्रतिवर्णं तावत् श्रवणं भवति श्रुतं वर्णमेकमनेकं वा पदभावेन स प्रतिसन्धत्ते प्रतिसन्धाय पदं व्यवस्यति पदव्यवसायेन स्मृत्वा पदार्थं प्रतिपद्यते पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति सम्बद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते

दीर्घायुष्कृतीभवनादौ ज्ञानयोगस्याप्रमाणत्वं स्यादित्याशङ्क्याह।—न एकं मनः अनेकक्रियाणाम् अनेकज्ञानानामनुपपत्तेरित्यर्थः॥ ६१॥

समाधत्ते।—क्रमिकेऽपि तदुपलब्धिर्योगपद्योपलब्धिरायुसंस्कारात् शीघ्रतया

न चासां क्रमेण वर्त्तमानानां बुद्धीनामाशुवृत्तित्वात् क्रमो गृह्यते तदेतदनुमानमतन्त्रं बुद्धिक्रियायायौगपद्याभिमानस्येति न चास्ति मुख्यसंशया युगपदुत्पत्तिर्बुद्धीनां, यया मनसां बहुत्वमेकशरीरेऽनुमीयत इति ॥ ६२ ॥

यथोक्तहेतुत्वाच्चाणु ॥ ६३ ॥

अणु मन एकञ्चेति धर्मसमुच्चयो ज्ञानायौगपद्यात् महत्त्वे मनसः सर्वेन्द्रियसंयोगाद् युगपद्विषयग्रहणं स्यादिति मनसः खलु भोः सेन्द्रियस्य शरीरे वृत्तिलाभो नान्यत्र शरीरात् ज्ञातुश्च पुरुषस्य शरीरायतना बुद्ध्यादयो विषयोपभोगो जिज्ञासितज्ञानमोक्षितावाप्तिश्च सर्वे च शरीराश्रया व्यवहाराः, तत्र खलु विप्रतिपत्तेः संशयः किमयं पुरुषकर्मनिमित्तः शरीरसर्गः आहोस्वित् भूतमात्रादकर्मनिमित्त इति श्रूयते खल्वत्र विप्रतिपत्तिरिति ॥ ६३ ॥

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६४ ॥

तत्रेदं तत्त्वम् । पूर्वशरीरे या प्रवृत्तिर्वाग्बुद्धिशरीरारम्भलक्षणा तत् पूर्वकृतं कर्मोक्तं तस्य फलं तज्जनितौ धर्माधर्मौ तत्फलस्यानुबन्धः आत्मसमवेतस्यावस्थानं तेन प्रयुक्तेभ्यो भूतेभ्यस्तस्योत्पत्तिः शरीरस्य न स्वतन्त्रेभ्य इति यदधिष्ठानोऽयमात्मा

रात्मकदोषात् यथा अलातचक्रे वेगातिशयेन भास्यमाणे क्रियासन्तानस्य भेदानुपलब्धिरिति ॥ ६२ ॥

ननु यौगपद्योपपादकतया मनसो वैभवं स्यादत आह ।—मन इति शेषः, यथोक्तस्य ज्ञानायौगपद्यस्य हेतुत्वान्मनोऽणुत्वसाधकत्वादित्यर्थः ॥ ६३ ॥

समाप्तं मन.परीक्षाप्रकरणम् ॥ २८ ॥

यमहमिति मन्यमानो यत्राभियुक्तो यत्रोपभोगतृष्णया विषयानुपलभमानो धर्माधर्मौ संस्करोति तदस्य, शरीरं, तेन संस्कारेण धर्माधर्मलक्षणेन भूतसहितेन पतितेऽस्मिन् शरीरे उत्तरं निष्पाद्यते निष्पन्नस्य चास्य पूर्वशरीरवत् पुरुषार्थक्रिया पुरुषस्य च पूर्वशरीरवत् प्रवृत्तिरिति कर्मापेक्षेभ्यो भूतेभ्यः शरीरसर्गे सत्येतदुपपद्यत इति। दृष्टा च पुरुषगुणेन प्रयत्नेन प्रयुक्तेभ्यो भूतेभ्यः पुरुषार्थक्रियासमर्थानां द्रव्याणां रथप्रभृतीनामुत्पत्तिः तथानुमातव्यं शरीरमपि पुरुषार्थक्रियासमर्थमुत्पद्यमानं पुरुषस्य गुणान्तरापेक्षेभ्यो भूतेभ्य उत्पद्यत इति ॥ ६४ ॥

भूतेभ्यो मूर्त्युपादानवच्च तदुपादानम् ॥ ६५ ॥

अत्र नास्तिक आह। [illegible] भूतेभ्यो निर्वृत्ता मूर्तयः सिकताप्रकरपाषाणगैरिकाञ्जनप्रभृतयः पुरुषार्थकारित्वादुपादीयन्ते तथा कर्मनिरपेक्षेभ्यो भूतेभ्यः शरीरमुत्पन्नं पुरुषार्थकारित्वादुपादीयत इति ॥ ६५ ॥

न माध्यसमत्वात् ॥ ६६ ॥

यथा शरीरोत्पत्तिरकर्मनिमित्ता माध्या तथा सिकता-

अथ प्रमङ्गात्करोत्यस्य तत्त्वं कृपाहृदनिष्पाद्यतापकरणम्, अथवा एकमेव शरीरं मनसः संयोगाभिः सह संयोगात् सर्वत्रैव मनसा भोगं जन्यताम् अतश्चादृष्टजन्यतां प्रतिपादनप्रकरणम्, तत्र शरीरं तत्त्वं कृपसमवेताहृष्टानभिमतं सर्वत्रेति विप्रतिपत्तौ निषेधकोटिर्विधा अहृष्टाभावात्, तत्र शरीरहेतुत्वाभावात् अहृष्टस्य आत्मासमवायाभावाद्वा तत्वादं पक्षं निरस्यति। -पूर्वकृतस्य यागदानहिंसादेः फलस्य धर्मा धर्मरूपस्य अनुबन्धात् सङ्कारिभावात् तस्य शरीरस्योत्पत्तिः ॥ ६४ ॥

शर्करापाषाणगैरिकाञ्जनप्रभृतीनामप्यकर्मनिमित्तः सर्गः साध्यः साध्यसमत्वादसाधनमिति । भूतेभ्यो मूर्त्युपादानवत् तदिति चानेन साध्यम् ॥ ६६ ॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६७ ॥

विषमन्यायसमुपन्यासः कस्मात् निर्बीजा इमा मूर्त्तय उत्पद्यन्ते बीजपूर्विका तु शरीरोत्पत्तिः, मातापित्रशब्देन लोहितरेतसी बीजभूते गृह्येते, तत्र सत्त्वस्य गर्भवासानुभवनीयं कर्म पित्रोश्च पुत्रफलानुभवनीये कर्मणो मातुर्गर्भाशये शरीरोत्पत्तिं भूतेभ्यः प्रयोजयन्तीत्युपपन्नं बीजानुविधानमिति ॥ ६७ ॥

तथाहारस्य ॥ ६८ ॥

उत्पत्तिनिमित्तत्वादिति प्रकृतं, भुक्तं पीतमाहारस्तस्य पक्तिनिर्वृत्तं रसद्रव्यं मातृशरीरे चोपचीयते बीजे गर्भाशयस्थे बीजसमानयाकं मात्रया चोपचयो बीजे यावद्गर्भ-

---

त्पत्तिः ।—भूतेभ्य इति भावधारणं तथाचादृष्टनिरपेक्षेभ्यो भूतेभ्यः परमाणुभ्यो मूर्त्तेर्महादेरुपादानमारब्धो यथा तथैव तस्य शरीरस्य उपादानमारब्धः परमाणुभ्योऽदृष्टनिरपेक्षेभ्य इत्यर्थः ॥ ६५ ॥

समाधत्ते ।—नेदं युक्तं दृष्टान्तस्य साध्यसमत्वात् पक्षसमत्वात् महादेरप्यदृष्टसापेक्षपरमाणुभ्य एवोत्पत्तेरुपगमात्तदजन्यत्वस्य तवासिद्धेरिति भावः ॥ ६६ ॥

न महादिसाम्यमित्याह सूत्राभ्याम् ।—शरीरे न महादिसाम्यं मातापित्रोः कर्मणः शरीरोत्पत्तिनिमित्तत्वात् पुत्रदर्शनादिजन्यसुखानुभवकादृष्टस्य दैवाद्धनादिजन्यस्य पुत्रादिनिमित्तत्वात् एवं मातापित्रोराहारस्य शरीरोत्पत्तिनिमित्तत्वादृष्टसहकारिणाहारस्य शुक्रशोणितादिद्वारा कललादिजनकत्वात् आहारस्य पितामहपित्रभोजनादेरदृष्टद्वारा पुत्रजनकत्वादित्यर्थं इत्यन्ये ॥ ६७ ॥ ६८ ॥

समर्थः सञ्चय इति सञ्चितं चार्वुदमांसपेश्योकललकण्डरा-शिरःपाणिपादादिना च व्यूहेनेन्द्रियाधिष्ठानभेदेन व्यूह्यते, व्यूढे च गर्भेनाद्यावतारितं रसद्रव्यमुपचीयते यावत्प्रसवसमर्थ-मिति, न चायमन्नपानस्य स्वाद्यादिगतस्य कस्यात् इति एत-स्मात् कारणात् कर्मनिमित्तत्वं शरीरस्य विज्ञायत इति ॥६८॥

प्राप्तौ चानियमात् ॥ ६९ ॥

न सर्वो दम्पत्योः संयोगो गर्भाधानहेतुर्दृश्यते, तत्रासति कर्मणि न भवति, सति च भवतीत्यनुपपन्नो नियमाभाव इति, कर्मनिरपेक्षेषु भूतेषु शरीरोत्पत्तिहेतुषु अनियमः स्यात् न त्वत्र कारणाभाव इति ॥ ६९ ॥

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ॥ ७० ॥

अथापि। यथा खल्विदं शरीरं धातुप्राणसंवाहिनोनां नाड़ीनां शुक्रान्तानां धातूनाञ्च स्नायुस्थिशिरापेश्योकललकण्ड-राणाञ्च शिरोबाह्वदराणां शक्थ्नाञ्च कोष्ठगानां वातपित्तकफा-नाञ्च मुखकण्ठहृदयामाशयपक्वाशयाधःस्नातसाञ्च परमदुःख-सम्पादनायेन सांघातिकेन व्यूहनमशक्यं पृथिव्यादिभिः कर्म-निरपेक्षैरुत्पादयितुमिति कर्मनिमित्ता शरीरोत्पत्तिरिति विज्ञायते, एवञ्च प्रत्यात्मनियतस्य निमित्तस्याभावाच्चिरतिश्चयः

आहारस्याहृष्टसहकारित्वे विपर्ये बाधकमाह।—प्राप्तौ दम्पत्योः सम्प्रयोगे तु गर्भधारणस्य यतो न नियमस्ततोऽदृष्टस्य सहकारित्वमावश्यकमिति भावः॥ ६९॥

नन्वदृष्टनिरपेक्षेरेव भूतैः कैश्चित् स्वभावविशेषाच्छरीरं जन्यतां स्वभावानभ्यु-

आत्मभिः सम्बन्धात् सर्वात्मनाञ्च समानैः पृथिव्यादिभिरुत्पादितं शरीरं पृथिव्यादिगतञ्च न नियमहेतोरभावात् सर्वात्मनां सुखदुःखसंविज्ञायतनं समानं प्राप्तं, यत्तु प्रत्यात्मं व्यवतिष्ठते तत्र शरीरोत्पत्तिनिमित्तं कर्म व्यवस्थाहेतुरिति विज्ञायते परिपच्यमानो हि प्रत्यात्मनियतः कर्माशयो यस्मिन्नात्मनि वर्त्तते तस्यैवोपभोगायतनं शरीरमुत्पाद्य व्यवस्थापयति। तदेवं शरीरोत्पत्तिनिमित्तवत् संयोगनिमित्तं कर्मेति विज्ञायते। प्रत्यात्मव्यवस्थानन्तु शरीरस्यात्मना संयोगं प्रचक्षते इति ॥ ७० ॥

एतेनानियमः प्रत्युक्तः ॥ ७१ ॥

योऽयमकर्मनिमित्ते शरीरसर्गे सत्यनियम इत्युच्यते अयं शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्मेत्यनेन प्रत्युक्तः, कस्तावदयं नियमः यथैकस्यात्मनः शरीरं तथा सर्वेषामिति नियमः, अन्यस्याऽन्यथेत्यनियमो भेदो व्यावृत्तिविशेष इति। दृष्टञ्च जन्मव्यावृत्तिरुच्चाभिजनो निकृष्टाभिजनः इति, प्रशस्तं निन्दितमिति, व्याधिबहुलमरोगमिति, समग्रं विकलमिति, पीडाबहुलं सुखबहुलमिति, पुरुषातिशयलक्षणोपपन्नं विपरीतमिति, प्रशस्तलक्षणं निन्दितलक्षणमिति, पटुन्द्रियं

गमे च शरीरस्य सर्वात्मसंयुक्तत्वात् साधारण्यापत्तिरत आह।—अयमर्थः शरीरस्य सर्वात्मसंयुक्तत्वेऽपि संयोगविशेषोऽवच्छेदकतालक्षणो येनात्मना सह तदीयं तच्छरीरं संयोगविशेष एव, कुतः ? इत्यत आह—संयोगेति। संयोगविशेषोत्पत्तौ कर्म अदृष्टविशेषो निमित्तं, यथा शरीरोत्पत्तावदृष्टविशेषो निमित्तमिति संयोगविशेषस्तदात्मप्रज्ञानजननियामको जातिविशेष एव। संयोगः शरीरावयवसंस्थानविशेष इति कश्चित् ॥ ७० ॥

ज्ञानेन्द्रियमिति, सूक्ष्मश्च भेदोऽपरिमेयः। सोऽयं जन्मभेदः प्रत्यात्मनियतात् कर्मभेदादुपपद्यते, असति कर्मभेदे प्रत्यात्मनियतात् कर्मभेदादुपपद्यते, असति कर्मभेदे प्रत्यात्मनियते निरतिशयित्वादात्मनां समानत्वाच्च पृथिव्यादीनां पृथिव्यादिगतस्य नियमहेतोरभावात् सर्वं सर्वात्मनां प्रसज्येत, तच्चेदमित्थंभूतं जन्म तस्मात् कर्मनिमित्ता शरीरोत्पत्तिरिति ॥७१॥

उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ॥ ७२ ॥

कर्मनिमित्ते शरीरसर्गे तेन शरीरेणात्मनो वियोगः उपपन्नः, कस्मात्? कर्मक्षयोपपत्तेः, उपपद्यते खलु कर्मक्षयः सम्यग्दर्शनात् प्रक्षीणे मोहे वीतरागः पुनर्भवहेतुकर्मकायवाङ्मनोभिर्न करोति इत्युत्तरस्यानुपचयः पूर्वोपचितस्य विपाकप्रतिसंवेदनात् प्रक्षयः। एवं प्रसवहेतोरभावाद् यतिरस्मिन् शरीरे पुनः शरीरान्तरानुपपत्तेरप्रतिसन्धिः अकर्मनिमित्ते तु शरीरसर्गे भूतक्षयानुपपत्तेस्तद्वियोगानुपपत्तिरिति ॥ ७२ ॥

तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे॥७३॥

अथ शरीरं नादृष्टजन्यं प्रकृतेरारब्धस्वभावत्वादेव तदुपपत्तेः, प्रतिबन्धकपूर्वशरीरापगमस्वदृष्टाधीनः अलब्ध निजानुसरणस्वभावस्येव तस्यापगमाधीनत्वम् इति द्वितीयपक्षं सांख्यसम्मतं निरस्यति।—एतेन अदृष्टहेतुकत्वव्यवस्थापनेन अनियमस्तु आत्मनः कदाचिन्मानुषशरीरसम्बन्धः कदाचिदन्यादृशः किञ्चित् शरीरं सकलावयवं किञ्चित् विकलावयवमित्यादि अदृष्टहेतुत्वानभ्युपगमे त्वयमनिवार्यो, न लक्ष्यते, किन्त्वदृष्टनिरपेक्षप्रकृतिमात्रारब्धत्वे सर्वात्मसाधारणं शरीरस्य स्यात् इति भावः, अन्ये तु अदृष्टस्यानियतं स्यादित्यदोषाद—एतेनेति। तस्मादृष्टाकारणादित्यादिरयमेवेति भाव इत्याहुः ॥ ७१ ॥ ७२ ॥

अदर्शनं खलु अदृष्टमित्युच्यते अदृष्टकारिता भूतेभ्यः शरीरोत्पत्तिः, न जात्वनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्यं पश्यति, तच्चाद्य दृश्यं द्विविधं विषयश्च नानात्वाच्चाध्यात्मनोऽर्थः शरीरसर्गः तस्मिन्नवसिते चरितार्थानि भूतानि न शरीरमुत्पादयन्तीत्युपपन्नः शरीरवियोग इति। एवं चेन्मन्यसे पुनरस्यासङ्गोऽपवर्गे पुनः शरीरोत्पत्तिः प्रसज्यत इति, या चानुत्पन्ने शरीरे दर्शनानुत्पत्तिरदर्शनाभिमता या चापवर्गे शरीरनिवृत्तौ दर्शनानुत्पत्तिरदर्शनभूता नैतयोरदर्शनयोः कश्चिद्विशेष इत्यदर्शनस्यानिवृत्तेरपवर्गे पुनः शरीरोत्पत्तिप्रसङ्ग इति ॥ ७३ ॥

न कारणाकारणयोरारम्भदर्शनात् ॥ ७४ ॥

चरितार्थाविशेष इति चेत्, चरितार्थानि भूतानि दर्शनावसानान्न शरीरान्तरमारभन्त इत्ययं विशेष एवं चेदुच्यते कारणाकारणयोरारम्भदर्शनात् चरितार्थानां भूतानां विषयोपलब्धिकरणात् पुनः पुनः शरीरारम्भो दृश्यते प्रकृतिपुरुषयोर्नानात्वदर्शनस्याकारणान्निरर्थकः शरीरारम्भः पुनः पुनर्दृश्यते। तस्मादकर्मनिमित्तायां भूतसृष्टौ न दर्शनार्था शरीरोत्पत्तिर्युक्ता, युक्ता तु कर्मनिमित्ते सर्गे दर्शनार्था शरीरोत्पत्तिः। कर्म-

---

आर्हतास्तु मनःपरमाणुगुणमदृष्टं मन्यन्ते, तथा हि पार्थिवाः परमाणवः सहिताः स्वादृष्टवशाच्छरीरमारभन्ते मनश्च स्वादृष्टप्रयुक्तं शरीरमाविशति, तच्चादृष्टं स्वभावादेव पुद्गलस्य सुखदुःखे साधयतीति तदोत्तरमाह। तत्तदात्मादृष्टोपयहं विनैव तत्तदात्मोपभोगाय परमाणवश्चेच्छरीरमारभन्ते मुक्तोऽपि तदात्मनि तद्भोगाय शरीरमारभेरन्। अपवर्ग इत्युपलक्षणं संसारिणामपि नर-करि-तुरगादिशरीरोपयहे विनिगमकं न स्यादिति भावः ॥ ७३ ॥

विपाकसम्वेदनं दर्शनमिति तददृष्टकारितमिति चेत् कस्यचिद्दर्शनमदृष्टं नाम परमाणूनां गुणविशेषः क्रियाहेतुस्तेन प्रेरिताः परमाणवः समूर्च्छिताः शरीरमुत्पादयन्तीति, तच्चानः समाविशति स्वगुणेनादृष्टेन प्रेरिते समनस्के शरीरे द्रष्टुरुपलब्धिर्भवतीति एतस्मिन् वै दर्शने गुणानुच्छेदात् पुनस्तत्प्रसङ्गोऽपवर्गे अपवर्गे शरीरोत्पत्तिः परमाणुगुणत्वादृष्टस्यानुच्छेद्यत्वादिति ॥ ७४ ॥

मनःकर्मनिमित्तत्वाच्च संयोगानुच्छेदः ॥ ७५ ॥

मनोगुणेनादृष्टेन समावेश्यिते मनसि संयोगस्युच्छेदो न स्यात् तच्च किं कृतं शरीरादपसर्पणं मनस इति। कर्माशयक्षये तु कर्माशयान्तराद्दीप्यमानादपसर्पणोपपत्तिरिति। अदृष्टादेवापसर्पणमिति चेत् यो दृष्टः शरीरोपसर्पणहेतुः स एवापसर्पणहेतुरपीति नैकस्य जीवनप्रायणहेतुत्वानुपपत्तेः, एवं च सति एकमदृष्टं जीवनप्रायणयोर्हेतुरिति प्राप्तं नैतदुपपद्यते ॥ ७५ ॥

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ७६ ॥

विपाकसम्वेदनात् कर्माशयक्षये शरीरघातः प्रायणम्, कर्माशयान्तराच्च पुनर्जन्म। भूतमात्रात्तु कर्मनिरपेक्षात्

अदृष्टस्य मनोगुणत्वमपि दूषयति।—संयोगस्य शरीरारम्भकस्य ज्ञानादिजनकस्य च उच्छेदो न स्यात्, कुतः ? मनसो यत् कर्म अदृष्टं तन्निमित्तत्वात्, तस्य नित्यत्वात् तादृशसंयोगधारा नोच्छिद्येत तस्यानित्यत्वेऽपि व्यधिकरणभोगस्य अवश्यम्भावेनातिप्रसङ्ग इति भावः ॥ ७४ । ७५ ॥

शरीरोत्पत्तौ कस्य चयात् शरीरपातः प्रायणमिति । प्राय-णानुपपत्तेः खलु वै नित्यत्वप्रसङ्गं विद्मः यादृच्छिके तु प्रायणे प्रायणभेदानुपपत्तिरिति ॥ ७६ ॥

अणुश्यामतानित्यत्ववदेतत् स्यात् ॥ ७७ ॥

पुनस्तत्प्रसङ्गोऽपवर्गे इत्येतत् समाधिमुराह ।—यथाऽणोः श्यामता नित्या चाग्निसंयोगेन च प्रतिविद्धा न पुनरुत्पद्यत एवमदृष्टकारितं शरीरमपवर्गे पुनर्नोत्पद्यत इति ॥ ७७ ॥

नाकृताभ्यागमप्रसङ्गात् ॥ ७८ ॥

नायमस्ति दृष्टान्तः, कस्मात् ? अकृताभ्यागमप्रसङ्गात् । अकृतं प्रमाणतोऽनुपपन्नं तस्याभ्यागमोऽभ्युपपत्तिर्व्यवसायः एतच्चेदधानेन प्रमाणतोऽनुपपन्नं मन्तव्यं, तस्मान्नायं दृष्टान्तो न प्रत्यक्षं न चानुमानं किञ्चिदुच्यत इति । तदिदं दृष्टान्तस्य साध्यसमत्वमभिधीयत इति । अथवा नाकृताभ्यागमप्रसङ्गात् अणुश्यामतादृष्टान्तेनाकर्मनिमित्तां शरीरोत्पत्तिं समादधान-स्याकृताभ्यागमप्रसङ्गः अकृते सुखदुःखहेतौ कर्मणि पुरुषस्य सुखं दुःखमभ्यागच्छतीति प्रसज्येत, ओमिति ब्रुवतः प्रत्यक्षानु-

---

संयोगानुच्छेदे का चोदितत्व चाह ।—तथा सति प्रायणस्य मरणस्यानुपपत्तः शरीरादेर्नित्यत्वस्याविनाशित्वस्य च प्रसङ्गः ॥ ७६ ॥

अभिप्रैति ।—यथा परमाणोः श्यामता नित्यापि निवर्त्तते तथा शरीरादिक-मपि निवर्त्तते, तदेव परमाणुनिष्ठं नित्यमप्यदृष्टं निवर्त्तते तदभावश्च नाम तस्य शरीरमिति ॥ ७७ ॥

सिद्धान्तमुत्थाप्य ।—अकृतस्य प्रत्यक्षादिविषयस्य चाभ्यागमः स्वीकारस्तत्प्रसङ्गात्

मानागमविरोधः प्रत्यक्षविरोधस्तावत् भिन्नमिदं सुखदुःखं प्रत्यात्मवेदनीयत्वात् प्रत्यक्षं सर्वशरीराणां को भेदः तीव्रं मन्दश्चिरमाशु नानाप्रकारमेकप्रकारमिति एवमादिर्विशेषः, न चास्ति प्रत्यात्मनियतः सुखदुःखहेतुविशेषः न चासति हेतुविशेषे फलविशेषो दृश्यते कर्मनिमित्ते तु सुखदुःखयोगे कर्मणां तीव्रमन्दतोपपत्तेः कर्मसञ्चयानाञ्चोत्कर्षापकर्षभावाज्ञानाविधैकविधभावाच्च कर्मणां सुखदुःखभेदोपपत्तिः। सोऽयं हेतुभेदाभावात् दृष्टः सुखदुःखभेदो न स्यादिति प्रत्यक्षविरोधः। तथानुमानविरोधः दृष्टं हि पुरुषगुणव्यवस्थानात् सुखदुःखव्यवस्थानम्, यः खलु चेतनावान् साधननिर्वर्त्तनीयं सुखं बुद्ध्वा तदीप्सन् तदाप्तिसाधनावाप्तये प्रयतते स सुखेन युज्यते न विपरीतः यश्च साधननिर्वर्त्तनीयं दुःखं बुद्ध्वा तज्जिहासुः साधनपरिवर्जनाय यतते स दुःखेन परित्यज्यते न विपरीतः अस्ति चेदं यत्नमन्तरेण चेतनानां सुखदुःखव्यवस्थानं, तेनापि चेतनगुणान्तरव्यवस्थानकृतेन भवितव्यमित्यनुमानम्। तदेतदकर्मनिमित्ते सुखदुःखयोगे विरुध्यत इति, तच्च गुणान्तरमसम्बेद्यत्वाददृष्टविपाककालानियमाच्चाव्यवस्थितं, बुद्ध्यादयस्तु सम्बेद्यास्तापवर्गिणश्चेति। अथागमविरोधः। बहु खल्विदमार्षमृषीणामुपदेशजातमनुष्ठानपरिवर्जनाश्रयमुपदेशफलञ्च शरीरिणां वर्णाश्रमविभागेनानुष्ठानलक्षणा प्रवृत्तिः परिवर्जनलक्षणा निवृत्तिः, तच्चाभयमेतस्यां

त्यर्थः, न हि परमाणुनिष्ठादृष्टस्य कारणस्य सत्त्वे शरीरोच्छेदः स्यादेवमणुश्यामतानित्यत्वस्यापि प्रमाणागोचरस्य स्वीकारः स्यात् तथा च दृष्टान्तासिद्धिः, न वाऽनादेर्भावस्य नाशः सम्भवति जन्यभावत्वेन तद्धेतुत्वात्, यद्वा नित्यादृष्टाच्छरीरसम्बन्धोप-

दृष्टौ नास्ति कर्म सुचरितं दुश्चरितं वा, कर्मनिमित्तः पुरुषाणां सुखदुःखयोग इति विरुध्यते, सेयं पापिष्ठानां मिथ्यादृष्टिरकर्मविनिमित्ता शरीरसृष्टिरकर्मनिमित्तः सुखदुःखयोग इति ॥ ७८ ॥

इति वात्स्यायनीये न्यायभाष्ये तृतीयाध्यायस्य द्वितीयमाह्निकम् ।

समाप्तश्चायं तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थाध्यायस्य

प्रथमाह्निकम् ।

मनसोऽनन्तरं प्रवृत्तिः परीक्षितव्या, तत्र खलु यावद्धर्माधर्माश्रयशरीरादि परीक्षितं पूर्वा सा प्रवृत्तेः परीक्षा इत्याह—

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ १ ॥

गमे चक्रतात् स्वयमजनितात् कर्मणोऽध्यागमः फलसम्बन्धः स्यात् तथा च स्वाकृतिस्वाविशेषात् किं शरीरं कस्य भविष्यतीत्यत्र नियामकाभाव इति भावः ॥ ७८ ॥

समाप्तं शरीरव्याहृतनिष्पाद्यताप्रकरणम् ॥ ३९ ॥

समाप्तश्च तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

इति श्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूचवृत्तौ तृतीयमध्यायवृत्तिः ॥

सत्कोटिविजयि प्रभाभरं श्रीगिरीशमचलं परं महः ।

श्यामलं शिखरि यत्र कालवं कालकोटि-कमनीयमाश्रये ॥

तृतीये तावदात्मादिप्रमेयषट्कं कारणत्वेन परीक्षितम् तत्र कार्यत्वं प्रवृत्त्यादिप्रमेयषट्कसमवसरे हेतुहेतुमद्भावेन च परीक्षणीयं तथापि प्रथमाह्निके षट्कं परीक्षणीयं द्वितीयाह्निके तु तत्त्वज्ञानं तथापि तस्यापवर्गहेतुत्वादुद्देशावेक्षं च परीक्ष

तथा परीक्षितेति प्रवृत्त्यनन्तरास्तर्हि दोषाः परीक्ष्यन्ता-मित्यत आह ॥ १ ॥

तथा दोषाः ॥ २ ॥

परीक्षिता इति।—बुद्धिसमानाश्रयत्वादात्मगुणाः, प्रवृत्ति-हेतुत्वात् पुनर्भवप्रतिसन्धानसामर्थ्याच्च संसारहेतवः, संसार-स्थानादित्वादनादिना प्रबन्धेन प्रवर्त्तन्ते, मिथ्याज्ञाननिवृत्ति-स्तत्त्वज्ञानात् तन्निवृत्तौ रागद्वेषप्रबन्धोच्छेदेऽपवर्ग इति प्रादु-र्भावनिरोधधर्मका इत्येवमाद्युक्तं दोषाणामिति प्रवर्त्तना-लक्षणा दोषा इत्युक्तं तथा चेमे मानेर्ष्यासूयाविचिकित्सा मत्सरादयः। ते कस्मान्नोपसङ्ख्यायन्त इत्यत आह ॥ २ ॥

र्गीयत्वादपवर्गे रोजालःपातितया षट्कपरीक्षेवाभ्यायार्थः. तत्र चोद्दिष्टधर्मतया षट्कपरीक्षा प्रथमाह्निकार्थः। तत्र प्रथमाह्निके चत्वारि प्रकरणानि। तत्र चोक्तरूप-तया प्रवृत्तिदोषयोः परीक्षा प्रथमप्रकरणार्थः न चार्थभेदात् प्रकरणभेदः, यथा तथेति परस्परमाकाङ्क्षाभ्यामवयवाभ्यामुक्तरूपवत्त्वलक्षणैकार्थवत्त्वकथनात् प्रवृत्ति परीक्षायामाकाङ्क्षितायां सत्यम्। अत्र तथेति शेषं पूरयित्वा तदयुक्तं तया सत्यैव यथा शब्दस्याकाङ्क्षायामवयविसमूहस्य तथाशब्देऽपि यथाशब्दाकाङ्क्षस्य पूरणोपपत्तया प्रकरणभेदापत्तेरसम्भवादवयविसमूहस्य तथाशब्देनान्वयो युक्तः, प्रवृत्तिर्यथा उक्तलक्षणवती तथा दोषा अप्युक्तलक्षणवन्त इत्यवयविसमूहसम्बन्धितोऽर्थः। प्रवृत्तिर्बुद्धिगरोवाग्भ इत्युक्तलक्षणसत्त्वात् सिद्धं लक्षणमिति भावः. प्रवृत्तिस्तु द्वयी कारण रूपा कार्यरूपा च हे अध्यात्ममभवेति. तत्राद्या कस्यचिदविशिष्टा. विशिष्टा च यत्नजातिनती मानसप्रयत्नसिद्धा. द्वितीया तु धर्माधर्मरूपा यागादेरसाधारणादेश्च चिरध्वंसस्य व्यापारतया कर्मणामाशुविनाशस्वभावादेः प्रायश्चित्तादेश्च नाश्यतया सिध्यतीति ॥ १ ॥

दोषपरीक्षायां प्रारभमाणः.—तथा दोषा अपि प्रवृत्तेना लक्षणा इत्युक्त लक्षणवन्त एवेति नामिद्विरिति भावः ॥ २ ॥

समाप्तं प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥ ४० ॥

तत्त्वैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥३॥

तेषां दोषाणां त्रयो राशयस्त्रयः पक्षाः, रागपक्षाः—कामो मत्सरः स्पृहा तृष्णा लोभ इति, द्वेषपक्षाः—क्रोधः ईर्ष्याऽसूया द्रोहोऽमर्ष इति, मोहपक्षाः—मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति त्रैराश्याद्वोपसङ्ख्यायन्त इति, लक्षणस्य तद्भेदात् त्रित्वमनुपपन्नं, नानुपपन्नं रागद्वेषमोहार्थान्तरभावात् आसक्तिलक्षणो रागः, अमर्षलक्षणो द्वेषः, मिथ्याप्रतिपत्तिलक्षणो मोह इति, एतत् प्रत्यात्मवेदनीयं सर्वशरीरिणां, विजानात्ययं शरीरी रागमुत्पन्नम्, अस्ति मेऽध्यात्मं रागधर्म इति, विरागश्च विजानाति नास्ति मेऽध्यात्मं रागधर्म इति। एवमितरयोरपीति। मानेर्ष्याऽसूयाप्रभृतयस्तु त्रैराश्यमनुपतिता इति नोपसङ्ख्यायन्ते ॥ ३ ॥

अथ त्रैराश्येन विशेषेण दोषपरीक्षणाय तत् त्रैराश्यप्रकरणं, तत्र सिद्धान्तमुक्त्वम्।—तेषां दोषाणां त्रयो राशयः त्रयः पक्षा न तु रागद्वेषमोहानामेकैकत्वं तेषामर्थान्तरभावात् अवान्तरभेदवत्त्वात् तथा च भयशोकमानादीनामेषां भावान्न विभागन्यूनत्वम् इच्छात्वद्वेषत्वमिथ्याज्ञानत्वरूपविरुद्धधर्मवत्त्वान्न विभागाधिक्यम् इच्छात्वादिकन्तु रागादावनुभवसिद्धं तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भ इति। कामो विरंसा रतिश्च विजातीयः संयोगः नारीगताभिलाष इति तु न युक्तं स्त्रियाः कामेऽन्यतः, मत्सरः स्वप्रयोजनप्रतिसन्धानं विना परावमतनिवारणेच्छा, यथा राजकीयादुदपानाद्दीदृक् पेयम् इत्यादि, एवं परगुणनिवारणेच्छाऽपि, स्पृहा धर्मविरोधेन प्राप्तीच्छा, तृष्णा इदं मे न क्षीयतामितीच्छा, उचितव्ययाकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि तृष्णाभेद एव, धर्मविरोधेन परद्रव्येच्छा लोभः, परवञ्चनेच्छा माया कपटेन धार्मिकत्वादिना, स्वोत्कर्षख्यापनेच्छा दम्भः। द्वेषपक्षः क्रोध ईर्ष्याऽसूया द्रोहोऽमर्षोऽभिमान इति क्रोधो नेत्रलोहित्यादिहेतुर्द्वेषविशेषः, ईर्ष्या साधारणे वस्तुनि परस्वत्वात्तदग्रहीतरि

नैकप्रत्यनीकभावात् ॥ ४ ॥

नार्थान्तरं रागादयः, कस्मात्? एकप्रत्यनीकभावात्, तत्त्वज्ञानं सम्यग्मतिरार्षप्रज्ञा सम्बोध इत्येकमिदं प्रत्यनीकं भयाणामिति ॥ ४ ॥

व्यभिचारादहेतुः ॥ ५ ॥

एकप्रत्यनीकाः पृथिव्यां श्यामादयोऽग्निसंयोगेनैकेन, एकयोनयश्च पाकजा इति, सति चार्थान्तरभावे ॥ ५ ॥

तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ॥ ६ ॥

मोहः पापः पापतरो वा द्वाभ्यामिप्रेत्योक्तं, कस्मात्? नामूढस्येतरोत्पत्तेः। अमूढस्य रागद्वेषौ नोत्पद्येते मूढस्य तु यथासङ्कल्पमुत्पत्तिः, विषयेषु रञ्जनीयाः सङ्कल्पाः रागहेतवः, कोप-

---

द्वेषः, यथा दुरुत्तदायादानाम्, असूया परगुणादौ द्वेषः, द्रोहो नाशाय द्वेषः, हिंसा तु द्रोहजन्या परे तु तन्द्रोहं मन्यन्ते, अमर्षः कृतापराधे असमर्थस्य द्वेषः, अभिमानोऽपकारिण्यकिञ्चित्करत्वात्मनि द्वेषः। मोहपक्षः विपर्ययसंशयतर्कमानप्रमादभयशोकाः विपर्ययो मिथ्याज्ञानमतत्त्वपर्यायोऽयथार्थनिश्चयः एकधर्मिकविरुद्धभावाभावज्ञानं संशयः, स एव विचिकित्सेत्युच्यते, व्याघातोपाद्यापकप्रसङ्गस्तर्कः, आत्मन्यविद्यमानगुणारोपेणोत्कर्षधीर्मानः गुणवति निर्गुणत्वधीरवज्ञायोऽपि मानेऽल्पत्वं भवति, प्रमादः पूर्वकर्तव्यतया निश्चितेऽप्यकर्तव्यताधीः, एवं विपरीतेऽपि भयमनिष्टहेतुमनिष्पाते तत्परित्यागानर्हता ज्ञानं, शोक इष्टवियोगे तल्लाभानर्हता ज्ञानम् ॥ ३ ॥

शङ्कते।—रागादीनां भेदो न एकप्रत्यनीकभावात्, एकस्मिन् प्रत्यनीकभावो विरोधित्वं यस्य तत् तथा तेनैकनाश्यत्वादित्यर्थः, एकं हि तत्त्वज्ञानमेषां विरोधि ॥४॥

समाधत्ते।—एकविरोधित्वं भेदनिषेधे न हेतुः व्यभिचारात् एकाग्निसंयोगजन्येऽपि रूपादीनां भेदात् ॥ ५ ॥

नोयाः सङ्ख्या द्वेषहेतवः, उभये च सङ्ख्या न मिथ्याप्रतिपत्तिलक्षणत्वान्मोहादन्ये तावित्यौ मोहयोनी रागद्वेषाविति तत्त्वज्ञानाच्च मोहनिवृत्तौ रागद्वेषानुत्पत्तिरित्येकप्रत्यनीकभावोपपत्तिः । एवञ्च ज्ञात्वा तत्त्वज्ञानाद् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति व्याख्यातमिति ॥ ६ ॥

प्राप्तस्तर्हि निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥ ७ ॥

अन्यहि निमित्तमन्यच्च नैमित्तिकमिति दोषनिमित्तत्वाददोषो मोह इति ॥ ७ ॥

न दोषलक्षणावरोधात् (सत्त्वात्) मोहस्य ॥८॥

प्रवर्त्तनालक्षणा दोषा इत्यनेन दोषलक्षणेनावरुध्यते दोषेषु मोह इति ॥ ८ ॥

किञ्च नैषामेकनिवर्त्यत्वं तत्त्वज्ञानस्य मोहनिवर्त्तकत्वात् तन्निवृत्त्या रागादिनिवृत्तेरित्याशयेनाह ।—यद्यपि बहूनां निर्द्धारणे इष्ठन् तमपोर्विधानात् पापिष्ठः पापतम इति वा युक्तं तथापि द्वौ द्वावधिकृत्य निर्धारणे द्वयोर्निर्धारणे ईयसुनो विधानात् तेन रागमोहयोर्द्वेषमोहयोर्वा मोहः पापीयानतनर्थमूलं बलवद्द्वेष्य इति यावत् हेतुमाह—नामूढस्येति मोहशून्यस्य रागद्वेषयोरभावादित्यर्थः, न च तत्त्वज्ञानिनोऽपि हिताहितगोचरप्रवृत्तिनिवृत्ती रागद्वेषाधीने इति तत्र व्यभिचार इति वाच्यं, धर्माधर्मप्रयोजकरागद्वेषयोर्दोषत्वेन विवक्षितत्वात्, एतदभिप्रायकमेवासक्तो विषये सुखं इत्यादिकमपीति भावः ॥ ६ ॥

शङ्कते :—दोषनिमित्तत्वान्मोहस्य दोषभिन्नत्वं स्यादभेदेन कार्य्यकारणभावाभावात् दोषेभ्य इत्यार्षगणिकभेदाद्वचनं प्राप्तस्तर्हीत्यंशस्तु न सूत्रं किन्तु भाष्यतः पूरणमित्यपि वदन्ति ॥ ७ ॥

निराकरोति ।—मोहस्य दोषलक्षणसत्त्वाद्दोषत्वं, व्यक्तिभेदाच्च हेतुहेतुमद्भावो न विरुध्यत इति भावः ॥ ८ ॥

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीया-नामप्रतिषेधः ॥ ९ ॥

द्रव्याणां गुणानां वाऽनेकविधविकल्पो निमित्तनैमित्तिकभावे तुल्यजातीयानां दृष्ट इति। दोषान्तरं प्रेत्यभावस्यासिद्धिः आत्मनो नित्यत्वात्, न खलु नित्यं किञ्चिज्जायते म्रियते वा इति जन्ममरणयोर्नित्यत्वादात्मनोऽनुपपत्तिः उभयञ्च प्रेत्यभाव इति तत्रायं सिद्धानुवादः ॥ ९ ॥

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥

नित्योऽयमात्मा प्रेति पूर्वशरीरं जहाति म्रियते इति। प्रेत्य च पूर्वशरीरं हित्वा भवति जायते शरीरान्तरमुपादत्ते इति। तच्चैतदुभयं पुनरुत्पत्तिः प्रेत्यभाव इत्यवोचाम पूर्वशरीरं हित्वा शरीरान्तरोपादानं प्रेत्यभाव इति तच्चैतन्नित्यत्वे सम्भवतीति यस्य तु सत्त्वोत्पादः सत्त्वनिरोधः प्रेत्यभावस्तस्य ज्ञात-

---

अप्रयोजकत्वमुक्ताऽनैकान्तिकत्वमप्याह।—एकजातीययोरपि द्रव्ययोर्गुणयोश्च निमित्तनैमित्तिकापपत्तेः हेतुहेतुमद्भावस्वीकारात् तुल्यजातीयत्वप्रतिषेधो न युक्त इति ॥ ९ ॥

समाप्तं दोषपरीक्षाप्रकरणम् ॥ ४१ ॥

क्रमप्राप्ततया प्रेत्यभावे परीक्षणीये प्रेत्यभावः शरीरस्य वह्नेरात्मनो वेति संशये पुनरुत्पत्तिः प्रेत्यभाव इति लक्षणसूत्रादिनष्टस्योत्पादः प्रतीयते न चासौ नित्यस्यात्मनः सम्भवतीति शरीरादेः स्यात्, न च मृतस्य शरीरादेरुत्पत्तिर्विरोधाद्रेदं युक्तमिति वाच्यं, प्रेत्यभाव इत्यस्य सुखं व्यादाय स्वपितीतिवत् व्यत्ययेन भूत्वा प्रायश्चित्यर्थादेव सिद्धान्तसूत्रम्। आत्मनः पूर्वोक्तयुक्त्या नित्यत्वे प्रेत्यभावस्य

ज्ञानमज्ञताभ्यागमश्च दोषः । उच्छेदहेतुवादि ऋष्युपदेशानामनर्थका इति, कथमुत्पत्तिरिति चेत् ॥ १० ॥

व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥

केन प्रकारेण किंधर्मकात् कारणाद्व्यक्तं शरीराद्युत्पद्यत इति, व्यक्ताद् भूतसमाख्यातात् पृथिव्यादितः परमसूक्ष्मादिलक्षणाद्व्यक्तं शरीरेन्द्रियविषयोपकरणाधारं प्रज्ञातं द्रव्यमुत्पद्यते । व्यक्तञ्च खल्विन्द्रियग्राह्यं तत्सामान्यात् कारणमपि व्यक्तं, किं सामान्यं रूपादिगुणयोगः, रूपादिगुणयुक्तेभ्यः पृथिव्यादिभ्यो नित्येभ्यो रूपादिगुणयुक्तं शरीराद्युत्पद्यते प्रत्यक्षप्रामाण्यात् । दृष्टो हि रूपादिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः, तेन चादृष्टस्यानुमानमिति, रूपादीनामन्वयदर्शनात् प्रकृतिविकारयोः पृथिव्यादीनामतीन्द्रियाणां कारणभावोऽनुमीयते इति ॥ ११ ॥

न घटाद्घटानिष्पत्तेः ॥ १२ ॥

सिध्यति एकजातीयशरीराद्यसम्बन्ध-चरमसम्बन्धनाशयोरुत्पादप्रायणयोरात्मनः सम्बन्धत्वच्छेदावच्छेदकभावलक्षणः स च स्वरूपसम्बन्धविशेषोऽतिरिक्तो वेत्यवहितत्, लक्षणसूत्रे पुनरुत्पत्तिरित्यत्र पुनःपदस्य प्रेत्यभावप्रवाहस्यानादित्वज्ञापनाय तज्ज्ञानस्य वैराग्य उपयुज्यत इति ॥ १० ॥

ननु प्रेत्यभाव उत्पत्तिनिरूप्यः सा च न सजातीयाद्विजातीयाद्वा सम्भवति आद्यपृथिव्यादौ व्यभिचारात् तन्नित्यत्वे मानाभावादतः प्रेत्यभावोऽसिद्ध इत्युपोद्घातात् प्रसङ्गादुत्पत्तिप्रकारं दर्शयति ।—व्यक्तादिति शेषः व्यक्ताद्व्यक्तजातीयात् पृथिव्यादितः व्यक्तानां व्यक्तजातीयानां अन्त्यपृथिव्यादीनामुत्पत्तिः प्रत्यक्षञ्च पृथिव्यादेः पृथिव्यादितो रूपवदादितश्च रूपवदादीनामुत्पत्तेः प्रत्यक्षसिद्धत्वात्परमाण्वादिरपि कल्प्यते तत्परेणीरपकृष्टमहत्त्वेन सावयवावयवत्वलिङ्गेनास्य साधयान्नित्यत्वमिति भावः ॥ ११ ॥

इदमपि प्रत्यक्षं न खलु व्यक्ताद्घटाद्यात्मो घट उत्पद्यमानो दृश्यत इति व्यक्ताद्व्यक्तस्योत्पत्तिदर्शनाच्च व्यक्तं कारणमिति ॥ १२ ॥

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥

न ब्रूमः सर्वं सर्वस्य कारणमिति किन्तु यदुत्पद्यते व्यक्तं दृश्यं तत् तथाभूतादेवोत्पद्यत इति। व्यक्तञ्च तन्मृद्द्रव्यं कपालसंज्ञकं यतो घट उत्पद्यते न चैतन्निह्नुवानः क्वचिदभ्यनुज्ञां लब्धुमर्हतीति। तदेतत् तत्त्वम्, अतःपरं प्रावादुकानां दृष्टयः प्रदर्श्यन्ते ॥ १३ ॥

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावादुत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥ १४ ॥

असतः सदुत्पद्यते इत्ययं पक्षः, कस्मात्? उपमृद्य बीजमङ्कुर उत्पद्यते नानुपमृद्य न चेद्बीजोपमर्दोऽङ्कुरोत्पत्तिः स्यादिति, अत्राभिधीयते ॥ १४ ॥

व्याघातादप्रयोगः ॥ १५ ॥

यदुक्तं यद्भवति।—विशेषकार्यकारणभावाभावे सामान्यतोऽपि न तथेति भावः ॥ १२ ॥

विशेषतो व्यभिचारी न विरोधी सामान्यतस्तु नास्ति वेत्याशयवान् समाधत्ते।—सजातीयात् सजातीयोत्पत्तेर्न प्रतिषेधः पृथिवीजातीयात् कपालादिनी घटादिनिष्पत्तेरुक्तापादनं चाप्रयोजकमिति भावः ॥ १३ ॥

समाप्तं प्रेत्यभावपरीक्षाप्रकरणम् ॥ ४२ ॥

अथाष्टौ प्रकरणानि, प्रस्तुताद्व्यक्तादित्यत्तिर्द्वारार्थसूचीद्वारेण तत्रादौ मृत्पत्तिपादानप्रकरणं, तत्र पूर्वपक्षसूत्रम्। असदकरणादुपादानात् कार्यस्य भावात्-मृत्पत्तिर्यतोऽङ्कुरादेर्बीजादिकमनुपमृद्य न प्रादुर्भावाभावः, तथा च बीजादिविनाशोऽङ्कुरायुपादानमिति ॥ १४ ॥

उपमृद्य प्रादुर्भावादित्ययुक्तः प्रयोगो व्याघातात् यदुपमृद्नाति न तदुपमृद्य प्रादुर्भवितुमर्हति विद्यमानत्वात्, यच्च प्रादुर्भवति न तेनाप्रादुर्भूतेनाविद्यमानेनोपमर्द इति ॥ १५ ॥

नातीतानागतयोः कारकशब्दप्रयोगात् ॥ १६ ॥

अतीते चानागते चाविद्यमाने कारकशब्दाः प्रयुज्यन्ते पुत्रो जनिष्यते जनिष्यमाणं पुत्रमभिनन्दति पुत्रस्य जनिष्यमाणस्य नाम करोति। अभूत् कुम्भो भित्त्वा कुम्भमनुशोचति। भित्त्वस्य कुम्भस्य कपालानि, अजाताः पुत्राः पितरं तापयन्तीति बहुलं भाक्ताः प्रयोगाः दृश्यन्ते, का पुनरियं भक्तिः आनन्तर्यभक्तिः आनन्तर्यसामर्थ्यादुपमृद्य प्रादुर्भावार्थः प्रादुर्भविष्यङ्कुर उपमृद्नातीति भाक्तं कर्तृत्वमिति ॥ १६ ॥

न विनष्टेभ्योऽनिष्पत्तेः ॥ १७ ॥

न विनष्टाद्बीजादङ्कुर उत्पद्यत इति तस्मात्सामान्यभावाद् भावोत्पत्तिरिति ॥ १७ ॥

क्रमनिर्देशात्प्रतिषेधः ॥ १८ ॥

चक्रोत्तरम् ।—उपमृद्य प्रादुर्भवतीति न युक्तः, प्रयोगो व्याघातात् उपमर्दकस्य पूर्वमसत्त्वे उपमर्दकत्वायोगात् पूर्वं सत्त्वे च परतः प्रादुर्भावायोगात् ॥ १५ ॥

पूर्वपक्षी दूषयति ।—नायुक्तः प्रयोगः अतीतेऽनागते च कारकशब्दप्रयोगात् कर्तृ-कर्मादिबोधकशब्दप्रयोगात्, यथा अजनिष्यते पुत्रः, अजनिष्यमाणं पुत्रमभिनन्दति अभूत् कुम्भो भित्त्वा कुम्भमनुशोचति ॥ १६ ॥

नन्वाक्षामोपचारिकः प्रयोगस्तथापि किं बीजादिर्विनष्टस्योपादानत्वं मन्यसे बीजादिविनाशस्य वा अन्त्येऽपि तस्योपादानत्वं निमित्तत्वं वा तत्रादौ उत्तरम्। विनष्टानां बीजादीनामुपादातृत्वायोगात् अत एव न द्वितीयस्यापि विनष्टं विनाशस्यतो नोत्पत्तिः द्रव्यत्वस्य भावकार्यसमवायिकारणतादच्छेदकत्वात् ॥ १७ ॥

उपमर्दप्रादुर्भावयोः पौर्वापर्यनियमः क्रमः स चावयवाभावाद्बीजाङ्कुरोत्पत्तेर्हेतुर्निर्दिश्यते स च न प्रतिषिध्यत इति। व्यूहान्तरव्यूहानामवयवानां पूर्वव्यूहनिवृत्तौ व्यूहान्तराद्व्यूहनिष्पत्तिर्नाभावात्। बीजावयवाः कृतविविधिमित्तात् प्रादुर्भूतक्रियाः पूर्वव्यूहं जहति व्यूहान्तरमापद्यन्ते व्यूहान्तरादङ्कुर उत्पद्यते। दृश्यन्ते चावयवावस्तयोर्योगाच्चाङ्कुरोत्पत्तिहेतवः। न चानिवृत्ते पूर्वव्यूहे बीजावयवानां शक्यं व्यूहान्तरेण भवितुमित्युपमर्दप्रादुर्भावयोः पौर्वापर्यनियमः क्रमः, तस्माच्चाभावाद्भावोत्पत्तिरिति। न चान्यद्बीजावयवेभ्योऽङ्कुरोत्पत्तिकारणमित्युपपद्यते बीजोपादाननियम इति ॥ १८ ॥

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ॥ १९ ॥

अथापर आह।—पुरुषोऽयं समीहमानो नावश्यं समीहाफलमाप्नोति तेनानुमीयते पराधीनं पुरुषकर्मफलाराधनमिति यदधीनं स ईश्वरः तस्मादीश्वरः कारणमिति ॥ १९ ॥

तृतीये त्वाह।—अभावस्य कारणत्वं प्रतिषिध्यते प्रतिबन्धकाभावस्य हेतुत्वोपपत्तादित्याह—क्रमेति। बीजे विनष्टेऽङ्कुरो जायत इति प्रत्ययाद्बीजस्य प्रतिबन्धकत्वाभावः कारणं बीजं विनष्टं हि तदवयवैरंशुमात्रिभिरणुभिरवयवसहितैरङ्कुरं कारयते अभावमात्रस्य कारणत्वे चूर्णीकृतादपि बीजादङ्कुरोत्पत्तिः स्यादभावस्य निर्विशेषत्वादिति भावः ॥ १८ ॥

सप्तमं तु अवयवोपादाननियमात्कारणप्रकारत्वम् ॥ ४१ ॥

मतान्तरमाह।—अनेन ब्रह्मपरिणामवादी वा दर्शित इति वदन्ति, तथा हि ब्रह्मैव नामरूपप्रपञ्चभेदेन विवर्तितमिति श्रुतिकौशीतकादिभाष्येण एत एव प्राक्तनदण्डस्य सत्यत्वापरित्यागः प्रपञ्चेषु, तदपनादादिव सर्पिषा त्वक्षेति वार्त्तिकवादः, ब्रह्मैव चानादिनिर्वचनीयाविद्यावशात्तादात्म्यापन्नं विवर्तते मृत्तत्कार्यवत्तादात्म्यभेदादिति विवर्तवादः। तत्र पुरुषकर्मैक आदृयमस्तु किमीश्वरेण

न पुरुषकर्माभावे फलानिष्पत्तेः ॥ २० ॥

ईश्वराधीना चेत् फलनिष्पत्तिः । स्यादपि तर्हि पुरुषस्य समीहामन्तरेण फलं निष्पद्येतेति ॥ २० ॥

तत्कारितत्वादहेतुः ॥ २१ ॥

पुरुषकारमीश्वरोऽनुगृह्णाति फलाय पुरुषस्य यतमानस्येश्वरः फलं सम्पादयतीति । यदा न सम्पादयति तदा पुरुषकर्मापफलं भवतीति तस्मादीश्वरकारितत्वादहेतुः पुरुषकर्माभावे फलानिष्पत्तेरिति, शुचिविशिष्टमात्मान्तरमीश्वरः तच्छास्त्रकृत्वात् कृत्यान्तरानुपपत्तेः । अधर्ममिथ्याज्ञानप्रमादाद्याश्च धर्मज्ञानसमाधिसम्पदा च विशिष्टमात्मान्तरमीश्वरः तस्य च धर्मज्ञानसमाधिफलमणिमाद्यष्टविधमैश्वर्यं मङ्कुत्वानुविधायी चास्य धर्मः प्रत्यात्मवृत्तीन् धर्माधर्मसञ्चयान् पृथिव्यादीनि च भूतानि प्रवर्तयति, एवञ्च स्वकृताभ्यागमस्वालोपेन विर्माणप्राकाम्यमीश्वरस्य स्वकृतकर्मफलं वेदितव्यम्, आप्तकल्पाद्यं

कार इत्येतत्र आह—पुरुषेति । पुरुषकर्मणो हि वैफल्यमपि दृष्टम् तत्कार्यस्यान्यथात्वं वाऽयं, तथाचेश्वर एव सर्वं यदीच्छति तथा जगद्विपरिवर्तते सत्येवाह किं पुरुषकर्मणेति भावः. यस्मात्तस्मात् केवलेश्वरकारकत्वपक्षं प्रकरणं तदुपादानतापक्षे तु न किमपि जगत्साकल्यमिति ॥ १९ ॥

समाधत्ते ।—केवलं न ब्रह्मणः परन्तु ईश्वरस्यैव हेतुत्वे तदिच्छाया अप्रतिविधायाऽविघातायाश्चानन्त्यप्रसादनन्त्यप्रसङ्गे हेतोरपरिहृतः सर्वं सर्वदा स्यात् स्याच्च कार्यवैचित्र्यमिति पुरुषकर्मणोऽपि सहकारितावश्यकौ ब्रह्मण उपादानत्वन्तु न सम्भवति अजडत्वाद्विकारत्वासम्भवात् तस्य कारणतामात्रं सिध्यत इति भावः ॥ २० ॥

नन्वेवं पुरुषव्यापारस्य फले व्यभिचारे न स्यादिति चेदत्राह ।—फलाभावस्य पुरुषकर्माभावकारितत्वात् पुरुषस्य कर्म अदृष्टं तदभावाधीनत्वात् पुरुषकारः अदृष्टः फलानुपधायकः । नन्वीश्वर एव च ब्रह्मत्र भाव्यं शुचिविशिष्टमात्मान्तरमीश्वरः,

यथा पितापत्यानां तथा पितृभूत ईश्वरो भूतानाम्, न चात्मकल्पादन्यः कश्चित् सम्भवति न तावदस्य बुद्धिं विना कश्चिद्धर्मो लिङ्गभूतः शक्यः उपपादयितुम्, आगमाच्च दृष्टा वाद्या सर्वज्ञातेश्वर इति बुद्धादिभिश्चात्मलिङ्गैर्निरूपाख्यमीश्वरं प्रत्यक्षानुमानागमविषयातीतं कः शक्तः उपपादयितुम्। स्वजनताभागमलोपेन च प्रवर्त्तमानस्यास्य यदुक्तं प्रतिषेधजातमकर्मनिमित्ते शरीरसर्गे तत् सर्वं प्रसज्यत इति ॥ २१ ॥

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ॥ २२ ॥

अपरमिदानीमाह।—अनिमित्ता शरीराद्युत्पत्तिः कण्टक-

गर्भैर्नित्यज्ञानेच्छाप्रयत्नैः सामान्यगुणैश्च संयोगादिभिर्विशिष्टाकालं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा हिताहितोपदेशकर्त्ता जगतः पितेति, परे तु प्रसङ्गादीश्वरप्रतिपादनायतानिमूर्त्ती तथाहि ईश्वरः कारणम् अर्थाज्ञन्यज्ञानस्य, अनुमानन्तु लिङ्गादिकं सकर्तृकं कार्यत्वाद्घटवदित्यनुमानम्। ननु जीवानामेव कर्तृत्वं स्यादत आह—प्रकर्षेति। प्रकृष्टकर्मणां वैफल्यं दृश्यते तथा च विफलं कर्म्मेति प्रवर्त्तमानत्वादशक्तौ जीवानां, यतः उपादानगोचरापरोक्षज्ञानादिमत्त्वे हि कर्तृत्वं, नच लिखाद्युपादानगोचरज्ञानं जीवानामिति भावः, नन्वदृष्टद्वारा जीवानां कर्तृत्वमस्त्विष्यतइत्यत आह—न प्रकर्षेति। फलस्य कार्य्यस्य कर्मणोऽवैफल्यनियमेः तस्य कर्मणोऽभोगसाधनत्वात्तत्कर्म्मजन्यत्वमिति जीवाय प्रकर्षेति समाधत्ते—तदिति। कर्म्मणोऽपि तत्कारितत्वादीश्वरकारितत्वाच्चैतन्यसंयोगाधिष्ठितस्यैव जनकत्वादिति भावः ॥ २१ ॥

समाप्तमीश्वरोपादानताप्रकरणम् ॥ ४५ ॥

यदि च कार्य्यणामाकस्मिकत्वं तदा न परमाण्वादीनामुपादानत्वं सर्वेश्वरस्य निमित्तत्वमत आकस्मिकत्वनिराकरणप्रकरणमारभते, तत्र पूर्वपक्षसूत्रम्।—अनिमित्तत इति प्रथमान्तं तस्मिन् अनिमित्ता, भावोत्पत्तिरित्यर्थः भावेति व्यक्तार्थं घटाद्युत्पत्तिर्न

नैस्वाभाविकदर्शनात् कण्टकस्य तैक्ष्ण्यं पर्वतधातूनां चित्रता आवुः श्लक्ष्णता निमित्तञ्चोपादानं दृष्टं तथा शरीरसर्गाऽपीति ॥२२॥

✓ अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥

अनिमित्ततो भावोत्पत्तिरित्युच्यते यतश्चोत्पद्यते तन्निमित्तमनिमित्तस्य निमित्तत्वान्नानिमित्ता भावोत्पत्तिरिति ॥२३॥

निमित्तानिमित्तयोरर्थान्तरभावाद्प्रतिषेधः॥२४॥

अन्यद्धि निमित्तमन्यच्च निमित्तप्रत्याख्यानं, न च प्रत्याख्यानमेव प्रत्याख्येयं, यथानुदकः कमण्डलुरिति नोदकप्रतिषेध उदकं भवतीति, न खल्वयं वादोऽकर्मनिमित्तः शरीरादिसर्ग इत्येतस्मात्र भिद्यते । अभेदात् तत्प्रतिषेधेनैव प्रतिषिद्धो वेदितव्य इति ॥ २४ ॥

कारणनियमाद् उत्पत्तिमत्त्वात् कण्टकैक्ष्ण्यादयुत्पत्तिमत्, यद्वा घटादिकं न सकारणकं भावत्वात् कण्टकैक्ष्ण्यादिवत् तैक्ष्ण्यं संस्थानविशेषः । आदिपदात्पृथिवीत्वादिपरिग्रहः, तदकारणकनिवृत्त्यर्थः ॥ २२

एकदेशी भाष्यं दूषयति —अनिमित्तत इति हेतुपदधर्मनिर्देशादनिमित्तस्यैव निमित्तत्वात् कथमनिमित्तत इति । २३ ।

दूषयति —अनिमित्तस्य निमित्तस्य च अर्थान्तरभावात् भेदात् उक्तः प्रतिषेधो न युक्तः अनिमित्तस्य निमित्तायत्तत्वात्, शरीरकाकर्मनिमित्तत्वदर्शनेनैव च तदृषितप्रायमित्याशयेन भाष्यं दूषितमिति । तस्मात् भवदुपमेयं व्याचष्टे । मैवार्थते —अनिमित्तत इति । अनिमित्तस्य अनिमित्तत्वसाधकस्य निमित्तवादनिमित्तस्यैव निमित्तत्वान्निमित्ततः कथमनिमित्तत इति व्याख्यानम् अनिमित्तवादानुपपत्तिं कण्टकैक्ष्ण्यादिकमपि नाकारणकम् अनुपलब्धिविशेषसहकारेणाभिसंदधाति दर्शयन् । दृष्टान्तस्वरसात् —निमित्तेति । इदमत्र निमित्तमिदमनिमित्तमिति प्रतीत्या तयोर्भेदमभिदधिरे निमित्तप्रतिषेधो न युक्त इत्यस्य च तार्त्तीयीकिकी प्रतीतिर्नोपपद्यतेति भावः ॥ २४ ॥

समाप्तमाकस्मिकत्वप्रकरणम् ॥ ५५ ॥

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥

अन्येऽनुमन्यन्ते।—किमनित्यत्वम् यस्य कदाचिन्नावस्तदनित्यम् उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकमविनष्टं नास्ति किं पुनः सर्वं, भौतिकञ्च शरीरादि, अभौतिकञ्च बुद्ध्यादि, तदुभयमुत्पत्तिविनाशधर्मकं विज्ञायते तस्मात् तत्सर्वं, अनित्यमिति ॥ २५ ॥

नानित्यतानित्यत्वात् ॥ २६ ॥

यदि तावत् सर्वस्यानित्यता नित्या, तन्नित्यत्वान्न सर्वमनित्यम्, अथानित्या तस्यामविद्यमानायां सर्वं नित्यमिति ॥ २६ ॥

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥ २७ ॥

तस्या अनित्यतायाः अप्यनित्यत्वम् कथम्? यथाग्निर्दाह्यं विनाश्यानुविनश्यति एवं सर्वस्यानित्यता सर्वं विनाश्यानुविनश्यतीति ॥ २७ ॥

सर्वस्यैवानित्यत्वे नात्मादेरपि नित्यत्वं स्यादतः सर्वानित्यत्वनिराकरणप्रकरणं. तत्र प्रमेयत्वम् अनित्यत्वव्याप्यं नवेति संशये पूर्वपक्षसूत्रम्। अनित्यं विनाशि उत्पत्तिमतो विनाशधर्मकत्वात् उत्पत्तिमत्त्वञ्चाकाशादेरपि मेयत्वात् सिद्धमिति भावः, तेन परमते तव नासिद्धिः। यद्वा उत्पत्तिविनाशधर्मकत्वात् उत्पत्तिविनाशधर्मकाणां नानसिद्धत्वात् तद्विरहप्रमाणकमिति हृदयं, परे तु अनित्यत्वं कादाचित्कत्वम् उत्पत्तिधर्मकत्वाविनाशधर्मकत्वादिति हेतुद्वयं तात्पर्यमित्याहुः ॥ २५ ॥

दूषयति।—उत्पत्तिमत्त्वं न विनाशित्वसाधकम्, अनित्यताया ध्वंसस्य नित्यत्वादविनाशित्वात् तत्र व्यभिचारात् ॥ २६ ॥

आविष्करोति।—तस्या अनित्यतायाः अप्यनित्यत्वं यथाग्निर्दाह्यस्येन्धनादेर्विनाशात्तत्र स्वयमपि नश्यति न तु दाह्यान्यत्वं, तथा घटादेरपि नाशो नश्यति,

नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात्॥२८॥

अयं खलु वादो नित्यं प्रत्याचष्टे नित्यस्य च प्रत्याख्यानमनुपपन्नं, कस्मात् ? यथोपलब्धिव्यवस्थानात् । यस्योत्पत्तिविनाशधर्मकत्वमुपलभ्यते प्रमाणतस्तदनित्यं, यस्य नोपलभ्यते तद्विपरीतं, नच परमसूक्ष्माणां भूतानामाकाशकालदिगात्ममनसां तद्गुणानाञ्च कैषाञ्चित् सामान्यविशेषसमवायानामुत्पत्तिविनाशधर्मकत्वं प्रमाणत उपलभ्यते तस्मान्नित्यान्येतानीति ॥ २८ ॥

सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥

अयमन्य एकान्तः । भूतमात्रमिदं सर्वं तानि च नित्यानि भूतोच्छेदानुपपत्तेरिति ॥ २९ ॥

नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥

उत्पत्तिकारणञ्चोपलभ्यते विनाशकारणञ्च तत् सर्वनित्यत्वे व्याहन्यत इति ॥ ३० ॥

न घटादुत्पन्नं, भ्रंसभ्रंसस्यापि प्रतियोगिभ्रंसत्वात्, भ्रंसप्रागभावानाधारकालस्य प्रतियोग्यधिकरणत्वमिति त्र्यभिरप्रयोजकत्वात्त्रीन्यजनमित्यर्थः ॥ २७ ॥

समाधत्ते —नित्यस्य नित्यत्वविशिष्टस्य नित्यत्वस्य न प्रत्याख्यानमिति फलितं यथोपलब्धिः उपलब्धानतिक्रमेण तथाच धर्मिग्राहकमानेन लाघवमूलकतर्केणाकाशादिनित्यत्वव्यवस्थापनादिति ॥ २८ ॥

समाप्तं सर्वनित्यत्वनिराकरणप्रकरणम् ॥ ४६ ॥

सर्वनित्यत्वे न प्रेत्यभावादिसिद्धिरतस्तन्निराकरणप्रकरणं तदारभ्यते सूत्रम् । सर्वं नित्यं भूतत्वान्यथत्वाद्वा तव दृष्टान्तप्रदर्शनाय पञ्चभूतनित्यत्वादित्युक्तं तेन परमाण्वाकाशदृष्टान्तता लभ्यते ॥ २९ ॥

तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥

यस्योत्पत्तिविनाशकारणमुपलभ्यत इति मन्यसे तद्भूतलक्षणहीनमर्थान्तरं गच्छति भूतलक्षणावरोधाद्भूतमात्रमिदमित्ययुक्तोऽयं प्रतिषेधः इति ॥ ३१ ॥

नोत्पत्तितत्कारणोपलब्धेः ॥ ३२ ॥

कारणसमानगुणस्योत्पत्तिः कारणस्योपलभ्यते। न चैतदुभयं नित्यविषयं न चोत्पत्तितत्कारणोपलब्धिः शक्या प्रत्याख्यातुं, न चाविषया काचिदुपलब्धिः उपलब्धिसामर्थ्यात् कारणेन समानगुणं कार्यमुत्पद्यत इत्यनुमीयते न खल्वपलब्धेर्विषय इति। एवञ्च तल्लक्षणावरोधोपपत्तिरिति, उत्पत्तिविनाशकारणप्रयुक्तस्य ज्ञातुः प्रयत्नो दृष्ट इति, प्रसिद्धश्चावयवी तद्धर्मा उत्पत्तिविनाशधर्मा चावयवी सिद्ध इति। शब्दकर्मबुद्ध्यादीनां चाव्याप्तिः पञ्चभूतनित्यत्वात्तल्लक्षणावरोधाच्चेत्यनेन शब्दकर्मबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च न व्याप्तास्तस्मादनेकान्तः, स्वप्नविषयाभिमानवन्मिथ्योपलब्धिरिति चेत् भूतोपलब्धौ तुल्यम्। यथा स्वप्ने विषयाभिमान एवमुत्पत्तिकारणाभिमान इति एवञ्च भूतोपलब्धा तुल्यम्, व्युत्थिश्या-

---

समाधत्ते।—सर्वनित्यत्वं न युक्तं घटादीनाम् उत्पत्तिविनाशकारणानां कपाल संयोगमुद्गरपातादीनाम् उपलब्धेस्तथाचोत्पादविनाशावत्त्वकत्वमिति ॥ ३० ॥

पुनः शङ्कते।—उक्तप्रतिषेधो न नित्यस्य परमाण्वादेर्यद्यस्मात् भूतत्वादि घटादौ तदवयवोपधात् तल्लक्षणात् तथाचोत्पादादिप्रत्ययो भवति इति भावः ॥ ३१ ॥

दूषयति।—अनित्यत्वनिषेधो न युक्तः उपलब्धिकारणात् तत्प्रमाणकादुपलब्धेः तथाचोत्पादविनाशप्रतीतेः प्रामाणिकत्वात्तस्य निषेध [illegible] कादाचित्कत्वयोः

व्युपलब्धिरपि स्वप्नविषयाभिमानवत् प्रसज्यते, पृथिव्याद्यभावे सर्वव्यवहारविलोप इति चेत् तदितरत्र समानम् उत्पत्तिविनाशकारणोपलब्धिविषयस्याप्यभावे सर्वव्यवहारविलोप इति, सोऽयं नित्यानामतीन्द्रियत्वादविषयत्वाच्चोत्पत्तिविनाशयोः स्वप्नविषयाभिमानवदनित्यहेतुरिति। अवस्थितस्योपादानस्य धर्ममात्रं निवर्त्तते धर्ममात्रमुपजायते स खल्वुत्पत्तिविनाशयोर्विषयः। यच्चोपजायते तत् प्रागप्युपजननादस्ति। यच्च निवर्त्तते तन्निवृत्तमप्यस्तीति। एवञ्च सर्वस्य नित्यत्वमिति ॥ ३२ ॥

न व्यवस्थानुपपत्तेः ॥ ३३ ॥

अयमुपजनः इयं निवृत्तिरिति व्यवस्था नोपपद्यते उपजातनिवृत्तयोर्विद्यमानत्वात् अयं धर्म उपजातोऽयं निवृत्त इति सद्भावाविशेषादव्यवस्था। इदानीमुपजननिवृत्ती नेदानीमिति कालव्यवस्था नोपपद्यते सर्वदा विद्यमानत्वात् अस्य धर्मस्योपजननिवृत्ती नास्येति व्यवस्थानुपपत्तिरुभयोरविशेषात्। अनागतोऽतीत इति कालव्यवस्थानुपपत्तिः वर्त्तमानस्य सद्भावलक्षणत्वात् अविद्यमानस्यात्मलाभ उपजनो विद्यमानस्यालक्षणं निवृत्तिरित्येतस्मिन् सति नैते दोषाः तस्माद् यदुक्तं प्रागप्युपजननादस्ति निवृत्तत्वादस्ति तदयुक्तमिति ॥ ३३ ॥

व्यवस्थानुपपत्तेः न चाविभागात् तदुपपत्तिरस्यैवानित्यत्वे सर्वनित्यत्वव्याघातात्। विवेचयिष्यते चेदं स्पष्टतरमुपरिष्टात् ॥ ३२ ॥

कुतोऽविनाशप्रत्ययस्य भावत्वं स्यादित्याशङ्क्याह।—सार्वलौकिकप्रमाणत्वेन सिद्धस्यापि भावत्वशङ्कायां प्रमाणमस्यव्यवहारविशेषः स्यादित्यर्थः ॥ ३३ ॥

समाप्तं सर्वनित्यत्वनिराकरणप्रकरणम् ॥ ४७ ॥

सर्वं पृथग्भावलक्षणपृथक्त्वात् ॥ ३४ ॥

अयमन्य एकान्तः। सर्वं नाना न कश्चिदेको भावो विद्यते. कस्मात्? भावलक्षणपृथक्त्वात्. भावस्य लक्षणमभिधानं येन लक्ष्यते भावः स समाख्याशब्दः तस्य पृथग्विषयकत्वात् सर्वो भावः समाख्याशब्दः समूहवाचो कुभ इति संज्ञाशब्दो गन्धरसरूपस्पर्शसमूहे बुध्नपार्श्वग्रीवादिसमूहे च वर्त्तते निदर्शनमात्रत्वेदमिति ॥ ३४ ॥

नानैकलक्षणैरेकभावनिष्पत्तेः ॥ ३५ ॥

अनेकविरुद्धलक्षणैरिति मध्यमपदलोपो समासः। गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः सम्बद्ध एको भावो निष्पद्यते गुणव्यतिरिक्तश्च द्रव्यमवयवव्यतिरिक्तश्चावयवीति विभक्तन्यायश्चैतदुभयमिति ॥ ३५ ॥

लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ३६ ॥

अथापि न कश्चिदेको भाव इत्ययुक्तः प्रतिषेधः, कस्मात्?

अथ प्रसङ्गात् सर्वपृथक्त्वप्रकरणं. तत्र पूर्वपक्षसूत्रम्।—सर्वं वस्तु पृथक् नाना लक्षणैरेतैरेति लक्षणं समाख्या तया पृथक् पृथगर्थकत्वं तथा च प्रयोगः घटादिः समूहरूपः वाच्यत्वात् सेनावनादिवत् अतीन्द्रिये मनआदौ मानाभावाद्धेतोः शरीरातिरिक्तात् गुणकर्मसंघीरावयवभेदादिविशेषसमवाययोर्नानाभावाद्भावस्य तुच्छत्वान्न व्यभिचारः, यथा घटादिकं स्वस्मादपि पृथक्, भावलक्षणानां गन्धरसादीनां तत्तदवयवादीनाञ्च पृथक्त्वात् घटादेश्च तद्भेदादिति भावः ॥ ३४ ॥

समाधत्ते।—अनेकलक्षणैरनेकस्वरूपैः रूपरसादिभिस्तत्तदवयवैश्च विशिष्टस्यैकस्यैव भावस्य निष्पत्तेरुपपत्तेरित्यर्थः, तथाचैकस्य धर्मिणः प्रत्यक्षादिप्रमाणसिद्धत्वात् तस्य च चाक्षुषत्वरासत्वादिविरुद्धधर्माश्रयतद्रूपरसाद्यात्मकत्वाभावाद्धेतवयवानाञ्च कारणत्वात् कार्यकारणयोर्भेदाभावाच्च न तत्तदात्मकत्वं घटादेः सम्भवतीति भावः ॥ ३५ ॥

सत्यत्वव्यवस्थानादेव यदिह सत्यं भावस्य संज्ञाशब्दभूतं तदेकस्मिन् व्यवस्थितं यं कुम्भमद्राक्षं तं स्पृशामि यमेवाक्षाक्षं तं पश्यामीति, नाणुसमूहे स्पृश्यते इति । अणुसमूहे चाप्टशमादि यदृश्यते तदेकमेवेति । अथाप्येतदनूक्तं नास्त्येको भावो यस्मात् समुदायः । एकानुपपत्तेर्नास्त्येव समूहः नास्त्येको भावो यस्मात् समूहे भावशब्दप्रयोगः एकस्य चानुपपत्तेः समूहो नोपपद्यते । एकसमुच्चयो हि समूह इति व्याहतत्वादनुपपन्नं नास्त्येको भाव इति यस्य प्रतिषेधः प्रतिभायते समूहे भावशब्दप्रयोगादिति हेतुं ब्रुवता स एवाभ्यनुज्ञायते एकसमुच्चयो हि समूह इति समूहे भावशब्दप्रयोगादिति च समूहमाश्रित्य प्रत्येकं समूहप्रतिषेधो नास्त्येको भाव इति सोऽयमुभयतो व्याघातादयुक्तमनवद्य इति । अयमपर एकान्तः ॥ ३६ ॥

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३७ ॥

यादृङ्नावज्ञातं तत्सर्वमभावः, कस्मात् ? भावेष्वितरेतराभावसिद्धेः, असन् गौरश्वात्मनास्ति नश्वो गौः । असन्नश्वो गवात्मनाऽगौरश्व इत्यसत्त्वयस्य प्रतिषेधस्य च भावशब्देन सामाना-

---

हेतुमाह ।—सत्यत्वस्य यथोक्तानां घटपटादीनां, व्यवस्थानाद्व्यवस्थितत्वादेवाप्रतिषेधः प्रत्यक्षव्यवस्थापन मित्यर्थः. कपालसमवेतद्रव्यत्वादिकं हि घटादिसत्यत्वं कपाले घट इत्यादिप्रतीतिसिद्धं. नचैदं समूहात्मकत्वे सत्यवति । एवं सत्यत्वस्य घटादिरूपस्य यमहमद्राक्षं तं स्पृशामीति प्रत्यक्षेण व्यवस्थितत्वात् । परमाणोरप्रत्यक्षत्वान्न तत्सत्यः, किंतु समूहस्यैवाक्षव्यवस्थितेरेव नीलं वृक्षं समूहो हि नानाव्यक्तिसमुदायः, स च नैकत्यानेकत्वमन्तरेणाभ्युपगमे सिध्यतीति भावः ॥ ३६ ॥

समाप्तं सर्वशून्यनिराकरणप्रकरणम् ॥ ४८ ॥

धिकरणात्. सर्वमभाव इति प्रतिज्ञावाक्ये पदयोः प्रतिज्ञा-हेत्वोश्च व्याघातादसुत्तम्, अनेकस्याशेषता सर्वशब्दस्यार्थो भावप्रतिषेधस्याभावश्शब्दस्यार्थः पूर्वं सोपाख्यमुत्तरं निरुपाख्यम्। तत्र समुपाख्यायमानं कथं निरुपाख्यमभावः स्यादिति न जात्वभावो निरुपाख्योऽनेकतयाऽशेषतया शक्यः प्रतिज्ञातुमिति, सर्वमेतदभाव इति चेत् यदिदं सर्वमिति मन्यसे तदभाव इति एवं चेदनिष्टस्तो व्याघातः अनेकमशेषञ्चेति नाभावप्रत्ययेन शक्यं भवितुम्, अस्ति चायं प्रत्ययः सर्वमिति तस्मान्नाभाव इति, प्रतिज्ञाहेत्वोश्च व्याघातः सर्वमभाव इति भावप्रतिषेधः प्रतिज्ञा भावेष्वितरेतराभावसिद्धेरिति हेतुः। भावेष्वितरेतराभावमनुज्ञायाश्रित्य चेतरेतराभावसिद्धा सर्वमभाव इत्युच्यते यदि सर्वमभावो भावेष्वितरेतराभावसिद्धेरिति नोपपद्यते, अथ भावेष्वितरेतराभावसिद्धिः सर्वमभाव इति नोपपद्यते सूत्रेण चाभिसम्बन्धः ॥ ३७ ॥

न स्वभावसिद्धेर्भावानाम् ॥ ३८ ॥

न सर्वभावः कस्मात् स्वेन भावेन सद्भावात् भावानां, स्वेन धर्मेण भावा भवन्तीति प्रतिज्ञायते कश्च स्वो धर्मो भावानां द्रव्यगुणकर्मणां सदादिसामान्यं द्रव्याणां क्रियावदित्येवमादिर्विशेषः, स्वयमप्येषां पृथिव्या इति च प्रत्येकज्ञानतो

सर्वशून्यत्वेन कार्यकारणभावासम्भव इति तन्निराकरणप्रकरणमारभते।—तत्र ज्ञानविषयत्वमभावत्वव्याप्यं न वेति संशये पूर्वपक्षसूत्रम्।—सर्वं विवादपदमभावस्तुच्छं, तत्र प्रत्यक्षं मानमाह—भावेष्विति। भावत्वाभिमतेषु घटादिषु अभावत्वसिद्धेः घटः पटो नेत्यादि प्रतीत्या सर्वस्याभावत्वसिद्धेः ॥ ३७ ॥

भेदः। सामान्यविशेषसमवायानाञ्च विशिष्टा धर्मा गृह्यन्ते सोऽयमभावस्य निरूपाख्यत्वात् सम्प्रत्ययकोऽर्थभेदो न स्यात्, अस्ति त्वयं तस्माच्च सर्वमभाव इति। अथवा न स्वभावसिद्धे-र्भावानामिति। स्वरूपसिद्धेरिति गौरिति प्रयुज्यमाने शब्दे जातिविशिष्टं द्रव्यं गृह्यते नाभावमात्रं, यदिच सर्वमभावः गौरित्यभावः प्रतीयेत गोशब्देन चाभावः उच्येत, यस्मात्तु गोशब्दप्रयोगे द्रव्यविशेषः प्रतीयते नाभावस्तस्मादयुक्तमिति, अथवा न स्वभावसिद्धेरिति। असन् गौरश्वात्मनेति गवात्मना कस्मान्नोच्यते अवचनात् गवात्मना गौरस्तीति स्वभावसिद्धिः, अनश्वोऽश्व इति वा अगौर्गौरिति वा कस्मान्नोच्यते अवच-नात् स्वेन रूपेण विद्यमानता द्रव्यस्येति विज्ञायते अव्यति-रेकप्रतिषेधे च भावानामसंयोगादिसम्बन्धो व्यतिरेकः, अव्या-व्यतिरेकोऽभेदाख्यसम्बन्धः। प्रत्ययसामानाधिकरण्यं यथा न सन्ति कुण्डे बदराणीति असन् गौरश्वात्मनामनश्वे गौरिति च गवाश्वयोरव्यतिरेकः प्रतिषिध्यते गवाश्वयोरेकत्वं नास्तीति। तस्मिन् प्रतिषिध्यमाने भावेन गवा सामानाधिकरण्य-मसत्प्रत्ययस्यासन् गौरश्वात्मनेति, यथा न सन्ति कुण्डे बदराणीति कुण्डे : बदरसंयोगे प्रतिषिध्यमाने सन्निरस-त्प्रत्ययस्य सामानाधिकरण्यमिति ॥ ३८ ॥

न स्वभावसिद्धिरापेक्षिकत्वात् ॥ ३९ ॥

अपेक्षाकृतमापेक्षिकं ह्रस्वापेक्षाकृतं दीर्घं दीर्घापेक्षा-

सिद्धान्तसूत्रम्।—भावानां पृथिव्यादीनां स्वभावस्य धर्मादेः स्वरूपादेव सिद्धेः; न हि तुच्छस्य वन्ध्यरूपादिवत् सत्त्वेन प्रतीतिर्वा सम्भवति ॥ ३८ ॥

कृतं ह्रस्वं, न खेनात्मनावस्थितं किञ्चित्, कस्मात्? अपेक्षासामर्थ्यात्, तस्मान्न स्वभावसिद्धभावानामिति ॥ ३९ ॥

व्याहतत्वादयुक्तम् ॥ ४० ॥

यदि ह्रस्वापेक्षाकृतं दीर्घं किमिदानीमपेक्ष्य ह्रस्वमिति गृह्यते, अथ दीर्घापेक्षाकृतं ह्रस्वं दीर्घमनापेक्षिकम्, एवमितरेतराश्रययोरेकस्याभावेऽन्यतराभावादुभयाभाव इति अपेक्षाव्यवस्थानुपपत्तिः, स्वभावसिद्धावसत्यां समयोः परिमण्डलयोर्वा द्रव्ययोरापेक्षिके दीर्घत्वह्रस्वत्वे कस्मान्न भवतः? अपेक्षायामनपेक्षायाञ्च द्रव्ययोरभेदः, यावतो द्रव्ये अपेक्षमाणे तावतो एवानपेक्षमाणे नान्यतरत्र भेदः, आपेक्षिकत्वे तु सत्यन्यतरत्र विशेषोपजनः स्यादिति, किमपेक्षासामर्थ्यमिति चेत् द्वयोर्ग्रहणेऽतिशयग्रहणोपपत्तिः। हे द्रव्ये पश्यत्येकश्च विद्यमानमतिशयं गृह्णाति, तद्दीर्घमिति व्यवस्यति, यच्च हीनं गृह्णाति तद्ह्रस्वमिति व्यवस्यतीति। एतच्चापेक्षासामर्थ्यमिति। अर्थेन सङ्ख्याक्रान्ताः। सर्वमेकं सदविशेषात्, सर्वं द्वेधा नित्यानित्यभेदात्, सर्वं त्रेधा ज्ञाता ज्ञानं ज्ञेयमिति, सर्वं चतुर्धा प्रमाता प्रमाणं प्रमेयं प्रमितिरिति, एवं यथासम्भवमन्यत्रापीति ॥ ४० ॥

पुनः शङ्कते।—न हि सर्वेषां भावानामेकः स्वभावः सम्भवति आपेक्षिकत्वात् भिन्नत्वात् भिन्नस्य एकस्वभावत्वे स्वरूपादपि भेदापत्तेः, यद्वा इतरापेक्षत्वात् एतदपेक्षयाऽयं नीलतर एतदपेक्षया ह्रस्व इति प्रतीतेः यच्च सापेक्षत्वन्तु यथा जवासापेक्षं स्फटिकाकरणम् ॥ ३९ ॥

समाधत्ते।—सापेक्षत्वस्य तुच्छत्वव्याप्तेर्व्याहतत्वादसिद्धत्वात् न वा घटादेः

सङ्घैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥४१॥

तत्र परीक्षा ।—यदि साध्यसाधनयोर्नानात्वमेकान्तो न सिध्यति व्यतिरेकात्, अथ साध्यसाधनयोरभेदः एवमप्येकान्तो न सिध्यति साधनाभावात्, नहि तमन्तरेण कस्यचित् सिद्धिरिति ॥ ४१ ॥

न कारणावयवभावात् ॥ ४२ ॥

न सङ्घैकान्तानामसिद्धिः, कस्मात् ? कारणस्यावयवभावात्, अवयवः कश्चित् साधनभूत इत्यव्यतिरेकः, एवं हेत्वादीनामपीति ॥ ४२ ॥

सापेक्षत्वं सम्भवति, किञ्च सापेक्षत्वं सापेक्षं न वा, आद्ये तस्य तुच्छत्वान्न साधकत्वम्, अन्त्ये तस्यैव सत्यत्वात् कुतः सर्वशून्यत्वमिति भावः ॥ ४० ॥

समाप्तं सर्वशून्यतानिराकरणप्रकरणम् ॥ ४९ ॥

अथ सङ्घैकान्तवादनिराकरणप्रकरणम् तत्र भाष्यम् ।—अथैमे सङ्घैकान्तवादाः सर्वमेकं सदविशेषात् सर्वं द्वेधा नित्यानित्यभेदात्, सर्वं त्रेधा ज्ञाता ज्ञेयं ज्ञानमिति, सर्वं चतुर्धा प्रमाता प्रमाणं प्रमेयं प्रमितिरिति, एवं यथासम्भवमन्येऽपि, तत्र यथा नित्यानित्यलक्षणधर्माभ्यां द्वेधं तथा सर्वमेकमिति अष्टौ दर्शनानि । परे त्वेवं व्याचक्षते—एकमित्यद्वैतवादसङ्ग्रहा च ब्रह्मैवैकं निर्विशेषं सत्यं सर्वमन्यन्मिथ्या, यथा सर्वं प्रपञ्चजातम् एकं हेतुशून्यं सदविशेषात् घटः सन् घटः सन्निति प्रतीतेः घटाभिन्नसदभिन्नपटस्य घटाभेदसिद्धेः श्रुतिरपि एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चनेत्यादि । अन्येऽपीत्यनेन रूपसंज्ञासंस्कारवेदनानुभवाः पञ्च स्कन्धा इति सौत्रान्तिका इत्यादिसमुच्चयः एतेष्वाद्येषु सिद्धान्तयति । सङ्घैकान्ता न सिध्यति कारणस्य प्रमाणस्यानुपपत्तेः, उपपत्तौ वा न सङ्घैकान्तः, साधनस्य साध्यातिरिक्तस्यापेक्षितत्वात् ॥ ४१ ॥

आचष्टे ।—न सङ्घैकान्तस्यासिद्धिः कारणस्य प्रमाणस्यावयवभावात् तच्चैकदेशत्वादवयवावयविनोश्च भेदाभावः ॥ ४२ ॥

निरवयवत्वादहेतुः ॥ ४३ ॥

कारणस्यावयवभावादित्यहेतुः कस्मात् सर्वमेकमित्यनपवर्गेण प्रतिज्ञाय कस्यचिदेकत्वमुच्यते तच्च व्यपाहृत्योऽवयवः साधनभूतो नोपपद्यते एवं हेतादिष्वपीति। ते खल्विमे सङ्घातैकान्ताः विशेषकारितस्यार्थविस्तारस्य प्रत्याख्याने न वर्त्तन्ते प्रत्यक्षानुमानागमविरोधाच्चिथ्यावादा भवन्ति। अथाभ्यनुज्ञानेन वर्त्तन्ते समानधर्मकारितार्थसंग्रहो विशेषकारितस्यार्थभेद इति एवमेकान्तत्वं जहतीति। ते खल्वेते तत्त्वज्ञानप्रविवेकार्थमेकान्ताः परीक्षिता इति। प्रेत्यभावानन्तरं फलं तस्मिन् ॥ ४३ ॥

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४४ ॥

पचति दोग्धीति सद्यः फलमोदनपयसी, कर्षति वपतीति कालान्तरे फलं शस्याधिगम इति। अस्ति चेयं क्रिया अग्निहोत्रं जुहुयात् स्वर्गकाम इति ॥ ४४ ॥

न सद्यः, फलं कालान्तरोपभोग्यत्वात् ॥ ४५ ॥

दूषयति।—उक्तो हेतुर्न युक्तः सर्वस्येव पचतेनावशिष्टस्याभावात् पचैकदेशस्य हेतुत्वासम्भवादिति भावः, श्रुतिस्तु ब्रह्मैकपरेति। एतच्च नाकाभ्यं रोचते, सत्त्वेनैकस्य नित्यानित्यभेदाद्वैविध्यादेरभ्युपगतत्वादनित्यस्याप्यनुमानस्य नित्यानित्यसाधकत्वे विरोधाभावात्, कथमितरथा षट्पदार्थी सप्तपदार्थी च सिध्येदिति? तस्मादद्वैतवादनिराकरणपरत्व एव प्रकरणं सङ्गच्छत इति संक्षेपः॥ ४२ ॥

समाप्तं सङ्घैकान्तवादनिराकरणप्रकरणम् ॥ ५० ॥

अथावसरतः फले परीक्षणीये संशयमाह।—पाकादिक्रियायाः सद्यः फलकत्वस्य क्वचादेः कालान्तरफलकत्वस्य दर्शनादग्निहोत्रयजनादेर्विधिवादैर्वा फलं साध्यं कालान्तरीयं वेति संशयः॥ ४४ ॥

एतस्याः फले संशयः । स्वर्गः फलं श्रूयते तच्च भिन्नेऽस्मिन् देहभेदादुत्पद्यत इति, न सद्यो ग्रामादिकामानामारम्भफलमिति ॥ ४५ ॥

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ॥ ४६ ॥

ध्वस्तायां प्रवृत्तौ प्रवृत्तेः फलं न कारणमन्तरेणोत्पत्तुमर्हति, न खलु वै विनष्टात् कारणात् किञ्चिदुत्पद्यत इति ॥ ४६ ॥

प्राङ्निष्पत्तेर्वृक्षफलवत्तत् स्यात् ॥ ४७ ॥

यथा फलार्थिना वृक्षमूले सेकादिपरिकर्म क्रियते तस्मिंश्च प्रध्वस्ते पृथिवीधातुरप्धातुना संगृहीतः आन्तरेण तेजसा पच्यमानो रसद्रव्यं निवर्त्तयति स द्रव्यभूतो रसो वृक्षानुगतः पाकविशिष्टो व्यूहविशेषेण सन्निविश्यमानः पर्णादि फलं निर्वर्त्तयति । एवं परिषेकादिकर्म चाथवत्, नच विनष्टात् फलनिष्पत्तिः, तथा प्रवृत्त्या संस्कारो धर्माधर्मलक्षणो जन्यते स जातो निमित्तान्तरानुगृहीतः कालान्तरे फलं निष्पादयतीति । उक्तश्चैतत् पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति तदिदं प्राङ्निष्पत्तेर्निष्पद्यमानम् ॥ ४७ ॥

तवैहिकफलौर्ध्वदैहिकादीनामेव फलत्वसम्भवे नाहृष्टादिकल्पनमिति पूर्वपक्षे सिद्धान्तसूत्रम् ।—कालान्तरोपभोग्यत्वेन प्रतिपादनादित्यर्थः स्वर्गो हि फलं श्रूयते स च दुःखासम्भिन्नसुखं न चैहिकं सुखं तथा, एवं हिंसादिजन्यस्वरूपोपभोगः फलं श्रूयते न चेह तत्सम्भव इति भावः ॥ ४५ ॥

शङ्कते ।—कालान्तरेण तत्फलकर्मणः फलं न सम्भवति हेतोस्तत्कर्मणो विनाशात् ॥ ४६ ॥

समाधत्ते ।—स्वर्गादिनिष्पत्तेः प्राक् तदद्वारं स्यात् । दृष्टान्तमाह—वृक्षफलवत्, यथा मूलसेकादिनाशेऽपि तदधीनावयवोपचयादिद्वारेण फलोत्पत्तिस्तथा प्रवृत्तेऽपि यागादिनाशेऽपि तज्जन्याहृष्टरूपद्वारसम्भवात् स्वर्गादुत्पत्तिरिति ॥ ४७ ॥

नासन्नसन्नसदसदुभयतोवैधर्म्यात् ॥ ४८ ॥

प्राङ्निष्पत्तेर्निष्पत्तिधर्मकं नासत् उपादाननियमात् कस्यचिदुत्पत्तये किञ्चिदुपादेयं न सर्वं सर्वस्योत्पत्तावित्यसङ्गाये नियमो नोपपद्यत इति, न सत् प्रागुत्पत्तेर्विद्यमानस्योत्पत्तिरनुपपन्नेति, न सदसत् सदसतोर्वैधर्म्यात् सदित्यर्थाभ्यनुज्ञा असदित्यर्थप्रतिषेधः एतयोर्व्याघातो वैधर्म्यं व्याघातादव्यतिरेकानुपपत्तिरिति ॥ ४८ ॥

प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनात् ॥ ४९ ॥

कस्मात् ? यत्पुनरुक्तं प्रागुत्पत्तेः कार्यस्यासदुपादाननियमादिति ॥ ४९ ॥

बुद्धिसिद्धन्तु तदसत् ॥ ५० ॥

इदमस्योत्पत्तये समर्थं न सर्वमिति प्रागुत्पत्तेर्नियतकारणं

ननु कार्यकारणभाव एव न विचारसह इत्याशङ्क्याह।—प्राङ्निष्पत्तेरित्यनुवर्त्तते फलमित्यध्याहर्त्तव्यं, तथाचोत्पत्तेः प्राक् फलं नासत् असत उत्पत्तौ शशशृङ्गादेरप्युत्पत्तिः स्यात्, स्याच्च सिकतादावपि तैलं, नवा सत् सत् उत्पत्तिविरोधात् अत एव न सदसदसतोः सत्त्वासत्त्वलक्षणवैधर्म्यात् ॥ ४८ ॥

समाधत्ते।—उत्पत्तिधर्मकम् उत्पत्तिधर्मकत्वेनोपलभ्यमानं पटादिकमुत्पत्तेः प्रागसदिति अद्धा तत्त्वम् उत्पादनाशयोः प्रमितत्वात् इदानीं घट उत्पन्न इदानीं घटो विनष्ट इति प्रत्ययात् सतस्तु नोत्पत्तिसम्भव उत्पन्नस्यापुनरुत्पादप्रसङ्गात्, यद्यपि नाशस्य न तत्र वैशिष्ट्यं तथाप्युत्पन्नभावस्य नाशायोगादुत्पादसाधकत्वेन नाश उक्तः ॥ ४९ ॥

असदुत्पत्तौ नियमो न स्यादित्यवाह।—सत्कार्यम् असत् प्रागभावप्रतियोगि-बुद्धिसिद्धं बुद्ध्या विषयीकृतं तथा हि इदं तन्तुषु पटो भविष्यतीति ज्ञात्वा कुविन्दः प्रवर्त्तते न तु पटोऽस्तीति ज्ञात्वा तथा सति सिद्धत्वेन ज्ञाते

कार्यं वृद्धा सिद्धमुत्पत्तिनियमदर्शनात् तस्मादुपादाननियमस्योपपत्तिः सति तु कार्ये प्रागुत्पत्तेरुत्पत्तिरेव नास्तीति प्राह ॥ ५० ॥

आश्रयव्यतिरेकादृच्छाफलोत्पत्तिवदित्यहेतुः ॥५१॥

मूलसेकादि परिकर्म फलच्छोभयं वृक्षाश्रयम्, कर्म चेच्छरीरे फलच्छामुत्पादयेत्आश्रयव्यतिरेकादहेतुरिति ॥ ५१ ॥

प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ५२ ॥

प्रीतिरात्मप्रत्यक्षत्वादात्माश्रया तदाश्रयमेव कर्म धर्मसंज्ञितं धर्मस्यात्मगुणत्वात् । तस्मादाश्रयव्यतिरेकानुपपत्तिरिति ॥ ५२ ॥

न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात् ॥ ५३ ॥

इच्छाऽभावात् प्रवृत्त्यनुपपत्तेः सिकतादौ घटो भविष्यतीति न जायते किन्तु न भविष्यतीति जायत एव, कुत इति चेदनुभवं पृच्छ । किञ्च तन्मतेऽपि कुतो न जायते तत्र घटाभावादिति चेत् कथमिदं निरवयवि घटात् पूर्वं तन्तुसिकतयोस्तुल्यत्वात् तन्तुवेनाश्रयतीति चेत् तन्तुत्वेन कारणतेत्येव स्यात् प्रवृत्त्यनुरोधात् ॥ ५० ॥

नन्वस्तु हेतुफलभावस्तथापि इच्छाफलवदिति दृष्टान्तवैषम्यान्नाहृष्टसिद्धिरित्याशयेन शङ्कते ।—प्राक्तनित्यसेर्यत्नफलवदित्यहेतुः, कुतः ? आश्रयव्यतिरेकात्, येन कायेन कर्म कृतं तस्य नाशात् इच्छायास्तु तस्य इच्छस्य सत्त्वात् सलिलसेकादिकं परिकर्मोपयुज्यत इत्यभिप्रायः ॥ ५१ ॥

समाधत्ते ।—आश्रयव्यतिरेकादिति हेतुर्न युक्तः प्रीतेः सुखस्य स्वर्गशरीराश्रयत्वेन जायमानस्यात्मवृत्तित्वाद् यागादिस्वामानाधिकरण्यादित्यर्थः ॥ ५२ ॥

पुत्रादि फलं निर्दिश्यते न प्रीतिः यामकामो यजेत पुत्रकामो यजेतेति। तत्र यदुक्तं प्रीतिः फलमित्येतदयुक्तमिति ॥ ५३ ॥

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः॥५४॥

पुत्रादिसम्बन्धात् फलं प्रीतिलक्षणमुत्पद्यत इति पुत्रादिषु फलवदुपचारः यथाऽन्ने प्राणशब्दोऽन्नं वै प्राणा इति। फलानन्तरं दुःखमुद्दिष्टम्, उक्तञ्च बाधनालक्षणं दुःखमिति। तत् किमिदं प्रत्यात्मवेदनीयस्य सर्वजन्तुप्रत्यक्षस्य सुखस्य प्रत्याख्यानम्, आहोस्विदन्यः कश्चन इति। अन्य इत्याह कथं न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम्, अयन्तु जन्ममरणप्रबन्धानुभवनिमित्तादुःखाद्विविक्तस्य दुःखप्रहाणतो दुःखसंज्ञाभावनोपदेशो दुःखहानार्थ इति, कया युक्त्या सर्वे खलु सत्त्वनिकायाः सर्वाण्युत्पत्तिस्थानानि सर्वः पुनर्भवो बाधनानुषक्तो दुःखसाहचर्य्याद्बाधनालक्षणं दुःखमित्युक्तम् ऋषिभिर्दुःखसंज्ञाभावनमुपदिश्यते अत्र च हेतुरुपादीयते ॥ ५४ ॥

विविधबाधनायोगाद्दुःखमेव जन्मोत्पत्तिः ॥५५॥

क्वचित्सामानाधिकरण्यसम्बन्धेऽपि सर्वत्र स तथेति शङ्कते।—पुत्रादीनां फलनिर्देशात् सामानाधिकरण्यं न सम्भवतीति भावः॥ ५३ ॥

यद्यपि पुत्रादीनामैहिकफलत्वात् तत्राश्रयव्यतिरेकाभावात् शङ्केव न, तथापि यत्र जन्मान्तरीयधनादिकमपि फलं स्यात् तत्रापि नानुपपत्तिरित्याशयेनाह।—तत्सम्बन्धात् पुत्रादिसम्बन्धात् फलनिष्पत्तेः प्रीत्युत्पत्तेः तेषु पुत्रादिषु फलवदुपचारः फलत्वेन व्यपदेशः यथाऽन्नं वै प्राणिनां प्राणा इति॥ ५४ ॥

समाप्तं फलपरीक्षाप्रकरणम्॥ ५१ ॥

जन्म जायत इति शरीरेन्द्रियबुद्धयः, शरीरादीनाञ्च संस्थानविशिष्टानां प्रादुर्भाव उत्पत्तिः। विविधा च बाधना हीना मध्यमोत्कृष्टा चेति। उत्कृष्टा नारकिषां, तिरश्चान्तु मध्यमा, मनुष्याणान्तु हीना, देवानां हीनतरा वीतरागाणाञ्च, एवं सर्वमुत्पत्तिस्थानं विविधबाधनानुषक्तं पश्यतः सुखे तत्साधनेषु च शरीरेन्द्रियबुद्धिषु दुःखसंज्ञा व्यवतिष्ठते, दुःखसंज्ञाव्यवस्थानात् सर्वलोकेष्वनभिरतिसंज्ञा भवति, अनभिरतिसंज्ञामुपासीनस्य सर्वलोकविषया तृष्णा विच्छिद्यते, तृष्णाप्रहाणात् सर्वदुःखाद्विमुच्यत इति। यथा विषयोगात् पयो विषमिति बुध्यमानो नोपादत्ते, अनुपाददानो मरणदुःखं नाप्नोति, दुःखोद्वेगस्तु न सुखस्य प्रत्याख्यानम् ॥५५॥

न सुखस्यान्तरालनिष्पत्तेः ॥ ५६ ॥

कस्मात् ? न खल्वयं दुःखोद्वेगः सुखस्य प्रत्याख्यानम्। कस्मात् ? सुखस्यान्तरालनिष्पत्तेः। निष्पद्यते खलु बाधनान्तरालेषु सुखं प्रत्यात्मवेदनोयं शरीरिणां, तदशक्यं प्रत्याख्यातुमिति ॥ ५६ ॥

अथ क्रमप्राप्तं दुःखं परीक्षणीयं, तच्च बाधनालक्षणं दुःखमित्युक्तं तदर्थस्तु दुःखसजातिमत्त्वमित्युक्तं तच्च शरीरादौ दुःखेऽव्याप्तमित्याशङ्क्याह।—जननयोगाज्जन्मशरीरादिकं, तदुत्पत्तिसम्बन्धः विविधबाधनायोगात् दुःखमिति व्यपदिश्यते न तु बाधनमेव तत् दुःखं तथा च विविधदुःखानुषक्ततया हेयत्वार्थं दुःखमिति भावनीयमुपदिश्यते ॥ ५५ ॥

ननु दुःखभावनेन किं सुखं प्रत्याख्यायते न चैतच्छक्यमत आह।—दुःखानां मध्ये सुखस्याप्युत्पत्तेस्तत्प्रत्याख्यानस्याशक्यत्वात् ॥ ५६ ॥

बाधनाऽनिवृत्तेर्वेदयतः पर्य्येषणदोषादप्रतिषेधः॥५७

अथापि सुखस्य दुःखोद्वेगेनेति प्रकरणात् पर्य्येषणं प्रार्थना-विषयार्जनतृष्णापर्य्येषणस्य दोषो यदयं वेदयमानः प्रार्थयते तस्य प्रार्थितं न सम्पद्यते, सम्पद्य वा विपद्यते, न्यूनं वा सम्पद्यते, बहु प्रत्यनीकं वा सम्पद्यत इत्येतस्मात् पर्य्येषणदोषाज्ज्ञानाविधो मानसः सन्तापो भवति। एवं वेदयतः पर्य्येषणदोषाद्बाधनाया अनिवृत्तिः। बाधनानिवृत्तेर्दुःखसंज्ञाभावनमुह्यिष्यते, अनेन कारणेन दुःखजन्म नतु सुखस्याभावादिति। अथाप्येतदनुक्तम्। कामं कामयमानस्य यदा कामः समृध्यति, अथेनमपरः कामः क्षिप्रमेव प्रबाधते। अपि चेदुदनेमिं समन्ताद्भूमिमिमां लभते सगवाश्वां, न स तेन धनेन धनेषी तृप्यति किन्तु सुखं धनकाम इति॥ ५७॥

दुःखविकल्पे सुखाभिमानाच्च॥ ५८॥

दुःखसंज्ञाभावनोपदेशः क्रियते, अयं खलु सुखसंवेदने व्यवस्थितः सुखं परमपुरुषार्थं मन्यते न सुखादन्यन्निःश्रेयसमस्ति सुखे प्राप्ते चरितार्थः कृतकरणाया भवति। मिथ्यासङ्कल्पात् सुखं तत्साधनेषु च विषयेषु संरज्यते संरक्तः सुखाय घटते घटमानस्यास्य जन्मजरान्याधिप्रायणानिष्टसंयोगेष्ट-

---

ननु सुखदुःखसम्बन्धाविशेषात् सुखभावनमेव किं नेष्यत इत्यत्राह।—दुःखभावनस्य न प्रतिषेधः वेदयतः सुखसाधनत्वं जानतः पर्य्येषणदोषात् पर्य्येषणं सुखार्थप्रवर्त्तने दोषात् सुखार्थप्रवर्त्तनाभो हि अर्जनपालनादौ विविधाभिराधनाभिरुपतप्यतेऽतो दुःखभावनं वैराग्यहेतुतयोपदिश्यते॥ ५७॥

ननु दुःखमनुभवतः स्वत एव निवृत्तिसम्भवात् दुःखभावनोपदेशो व्यर्थं

वियोगप्रार्थितानुपपत्तिनिमित्तमनेकविधं यावद्दुःखमुत्पद्यते तं दुःखविकल्पं सुखमित्यभिमन्यते, सुखाङ्गभूतं दुःखं, न दुःखमनापाद्य शक्यं सुखमवाप्तुं, तादर्थ्यात् सुखमेवेदमिति सुखसंज्ञापहृतप्रज्ञो जायस्व म्रियस्व सन्भावतोति संसारं नातिवर्त्तते, तदस्याः सुखसंज्ञायाः प्रतिषेधो दुःखसंज्ञाभावनमुपदिश्यते दुःखानुषङ्गाद् दुःखं जन्मेति न सुखस्वाभावात् यद्येवं कस्माद् दुःखं जन्मेति नोच्यते सोऽयमेवं वाच्ये यदेवमाह दुःखमेव जन्मेति तेन सुखाभावं ज्ञापयतीति। जन्मनियमार्थो यो वै खल्वयमेवशब्दः कथं न दुःखं जन्म स्वरूपतः किन्तु दुःखोपचारात्, एवं सुखमपीति, एतदनेनैव निवर्त्तते न तु दुःखमेव जन्मेति ॥ ५८ ॥

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ५९ ॥

दुःखोद्देशानन्तरमपवर्गः स प्रत्याख्यायते।—ऋणानुबन्धाभावात्यपवर्गः, जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते, ब्रह्मचर्य्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्य इति,

---

त्यत आह।—दुःखस्य विविधः कल्पो यत्र तादृशे प्रतिषिद्धहिंसाभोजनमैथुनादौ प्रवृत्तिर्मा भूदित्ययमुपदेश इति भावः ॥ ५८ ॥

समाप्तं दुःखपरीक्षाप्रकरणम् ॥ ५२ ॥

अथ क्रमप्राप्तमपवर्गः परीक्षणीयः। तत्र च तदर्थकप्रवृत्तिकालाभावात् तदभाव इति पूर्वपक्षयति।—ऋणादनुबन्धादपवर्गानुष्ठानकालाभावादपवर्गाभावः स्यात् तथा च श्रूयते "जायमानो ह वै ब्राह्मणस्त्रिभिः ऋणैः ऋणवान् जायते ब्रह्मचर्य्येण ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजया पितृभ्य इति" ऋषिभ्यः ऋषिऋणेभ्यो ब्रह्मचर्य्येण मुच्यते, देवेभ्यः देवर्णेभ्यः यज्ञेन मुच्यते, प्रजया अपत्येन पितृऋणेभ्यो मुच्यते. ऋणापाकरणेनैव च जीवनारम्भः तथा च श्रूयते "तद्धैतं यदग्निहोत्रं दर्शपौर्णमासौ च,

ऋणानि तेषामनुबन्धः स्वकर्मभिः सम्बन्धः कर्मसम्बन्धवचनात्। जारामर्यं वा एतत् सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चेति जरया ह एव तस्मात् सत्राद्विमुच्यते मृत्युना ह चेति, ऋणानुबन्धादपवर्गानुष्ठानकालो नास्तीत्यपवर्गाभावः। क्लेशानुबन्धाच्चास्त्यपवर्गः, क्लेशानुबद्धस्य जायते नास्य क्लेशानुबन्धविच्छेदो गच्छति। प्रवृत्त्यनुबन्धाच्चास्त्यपवर्गः। जन्मप्रभृत्ययं यावत् प्रायणं वाग्बुद्धिशरीरारम्भेणाविमुक्तो गच्छति तच्च यदुक्तं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति तदनुपपन्नमिति। अत्राभिधीयते, यत्तावदृणानुबन्धादिति ऋणैरिव ऋणैरिति ॥ ५९ ॥

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दा-प्रशंसोपपत्तेः ॥ ६० ॥

ऋणैरिति नायं प्रधानशब्दः यत्र खल्वेकः प्रत्यादेयं ददाति द्वितीयश्च प्रतिदेयं गच्छति तत्रास्य दृष्टत्वात् प्रधानऋणशब्दः, न चैतदिहोपपद्यते प्रधानशब्दानुपपत्तेर्गुणशब्देनायमनुवादः ऋणैरिव ऋणैरिति प्रयुक्तोपमश्चैतत् अग्निर्माणवक इति। अन्यत्र दृष्टश्चायमृणशब्द इह प्रयुज्यते यथाऽग्नि-

---

जरया ह वा एष तस्मात्सत्राद्विमुच्यते मृत्युना च" इति ऋणापाकरणमन्तरेण च न तत्र प्रवृत्तिः, तथा च स्मर्यते "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षन्तु सेवमानो पतत्यधः ॥" एवं क्लेशानुबन्धादपि पुरुषो हि रागादिनिमित्तं कर्मारभमाणः क्लेशानुबद्ध एव दृश्यते तत् कथमपवर्गः? एवं प्रवृत्त्यनुबन्धादपि पुरुषो हि वाग्बुद्धिशरीरैस्तत्तत्कर्मारभमाणो धर्माधर्मौ यावज्जीवमुपार्जयन् कथमपवृज्यतामिति ॥ ५९ ॥

समाधत्ते।—आयमानं ह्यर्थमनुवादो हि प्रधानशब्दः, न हि आयमानः

शब्दो माणवके, कथं गुणशब्देनानुवादः निन्दाप्रशंसोपपत्तेः कर्मलोपे ऋणोव ऋणादानाविन्द्यते, कर्मानुष्ठाने च ऋणीव ऋणदानात् प्रशस्यते। जायमान इति गुणशब्दो विपर्ययेऽनधिकारात्। जायमानो ह वै ब्राह्मण इति च शब्दो गृहस्थः सम्पद्यमानो जायमान इति। यदायं गृहस्थो जायते तदा कर्मभिरधिक्रियते माढतो जायमानस्यानधिकारात्, यदा तु माढतो जायते कुमारो न तदा कर्मभिरधिक्रियते, अर्थिनः शक्तस्य चाधिकारात्। अर्थिनः कर्मभिरधिकारः कर्मविधौ काममंयोगस्मृतेः "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्येवमादि, शक्तस्य च प्रवृत्तिसम्भवात् शक्तस्य कर्मभिरधिकारः प्रवृत्तिसम्भवात्, शक्तः खलु विहिते कर्मणि प्रवर्त्तते नेतर इति, उभयाभावस्तु प्रधानशब्दार्थे माढतो जायमाने कुमारे उभयमर्थिता शक्तिश्च न भवतीति। न भिद्यते च लौकिकाद्वाक्याद्वेदिकं वाक्यं प्रेक्षापूर्वकारिपुरुषप्रणीतत्वेन तत्र लौकिकस्तावदपरीक्षकोऽपि न जातमात्रं कुमारकमेवं ब्रूयादधीष्व यजस्व ब्रह्मचर्य्यं चरेति। कुत एवम् ऋषिरूपपन्नानवद्यवादी उपदेशार्थेन प्रयुक्त उपदिशति। न खलु वै नर्त्तकोऽन्धेषु प्रवर्त्तते न गायको बधिरेष्विति, उपदिष्टार्थविज्ञानश्चोपदेशविषयः यश्चोपदिष्टमर्थं विजानाति तं प्रत्युपदेशः क्रियते न चैतदस्ति जायमानकुमारक इति गार्हस्थ्यलिङ्गञ्च मन्त्रब्राह्मणं कर्माभिवदति यच्च मन्त्रब्राह्मणं

कर्मस्वधिक्रियते, तथाच भाष्यं यदा तु माढतो जायते कुमारको न तदा कर्मभिरधिक्रियते अर्थिनः शक्तस्य चाधिकारादिति, जायमान इत्यनेन को वा व्यावर्त्तनीयः, न ह्यजातस्य प्रवृत्तिरस्ति येनासौ व्यावर्त्तनीयः, तत्र भाष्ये जाय-

कर्माभिवदति तत्पल्लोसम्बन्धिना गार्हस्थ्यलिङ्गेनोपपद्यम्। तस्माद्गृहस्थोऽयं जायमानोऽभिधीयत इति। अर्थित्वस्य चाविपरिणामे जरामर्थ्यवादोपपत्तेः, यावच्चास्य फलेनार्थित्वं न विपरिणमते न निवर्त्तते तावदनेन कर्मानुष्ठेयमित्युपपद्यते जरामर्थ्यवादस्तं प्रत्येति, जरया ह वेत्यायुषस्तुरीयस्य चतुर्थस्य प्रव्रज्यायुक्तस्य वचनं, जरया ह वैष एतस्माद्विमुच्यत इति, आयुषस्तुरीयं चतुर्थं प्रव्रज्यायुक्तं जरेत्युच्यते, तत्र हि प्रव्रज्या विधीयते अत्यन्तजरासंयोगे जरया ह वेत्यनर्थकम् अशक्तो विमुच्यत इत्येतदपि नोपपद्यते स्वयमशक्तस्य वाह्यां शक्तिमाह।—"अन्तेवासी वा जुहुयाद्ब्रह्मणा स परिक्रीतः"। "क्षीरहोता वा जुहुयादनेन स परिक्रीतः"। इति। अथापि विहितं वान्द्येत कामाद्वार्थैः परिकल्पेत विहितानुवचनं न्याय्यमिति ऋणवानिवास्वतन्त्रो गृहस्थः कर्मसु प्रवर्त्तत इत्युपपन्नं वाक्यस्य सामर्थ्यं, फलस्य हि साधनानि प्रयत्नविषयो न फलं, तानि सम्पन्नानि फलाय कल्पन्ते, विहितञ्च जायमानं विधीयते च जायमानं तेन यः सम्बध्यते सोऽयं जायमान इति। प्रत्यक्षविधानाभावादिति चेत् न प्रतिषेधस्यापि प्रत्यक्षविधानाभावादिति। प्रत्यक्षतो विधीयते

मान इति गुणशब्दो विपर्य्ययेऽनधिकारादिति, तथा च जायमान इत्यनेनोपनीत उच्यते तस्य ब्रह्मचर्य्यास्त्रवधिकारात् अग्निहोत्रादौ गृहस्थस्याधिकारः यौगे वहानी वाधीयतामिति श्रुतेः एवमशब्दोऽपि न मुख्यः न खलु प्रत्यादेशं कश्चन ददाति, परन्तु ऋणापाकरणस्यावश्यकत्वख्यापनाय तथोक्त, लाक्षणिक शब्दप्रयोगे बीजमाह निन्दाप्रशंसोपपत्तेः ऋणानपाकरणतदपाकरणाभ्यामग्निहोत्रादेरकरणतत्करणाभ्यां निन्दाप्रशंसे उपपद्येते, न चानुष्ठानकालाभावः

गार्हस्थ्यं ब्राह्मणेन, यदि चाश्रमान्तरमभविष्यत् तदपि व्यधास्यत प्रत्यक्षतः, प्रत्यक्षविधानाभावान्नास्त्याश्रमान्तरमिति न प्रतिषेधस्य प्रत्यक्षविधानाभावात् न प्रतिषेधोऽपि वै ब्राह्मणेन प्रत्यक्षतो विधीयते न सन्त्याश्रमान्तराणि, एक एव गृहस्थाश्रम इति प्रतिषेधस्य प्रत्यक्षतोऽश्रवणादयुक्तमेतदिति ॥ ६० ॥

अधिकाराच्च विधानं विद्यान्तरवत् ॥ ६१ ॥

यथा ब्राह्मान्तराणि स्वे स्वेऽधिकारे प्रत्यक्षतो विधायकानि नार्थान्तराभावात्, एवमिदं, ब्राह्मणं गृहस्थशास्त्रं स्वेऽधिकारे प्रत्यक्षतो विधायकं नाश्रमान्तराणामभावादिति । ऋगृब्राह्मणस्यापवर्गाभिधाय्यभिधीयते । ऋचश्च ब्राह्मणानि चापवर्गाभिवादीनि भवन्ति । ऋचश्च तावत्,—"कर्मभिर्मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमिच्छमानाः । अथापरे ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशुः" ॥ "न कर्मणा न प्रजया धनेन, त्यागेनैके अमृतत्वमानशुः" । "परेण नाकं निहितं गुहायां, विभ्राजते यद्यतयो विशन्ति" ॥ "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" ॥ अथ ब्राह्मणानि, त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति, प्रथमस्तप एव, द्वितीयो ब्रह्मचर्याचार्यकुलवासी, तृतीयोऽत्यन्तमात्मानमा-

---

जरया विमुच्यत इत्युक्तेः न च जरयाऽग्निहोत्रपालनाशे अग्नेवाग्नौ वा जुहुयात् ब्राह्मणा हि न परिक्रीत इत्यादिनाऽग्नाग्नावपि विधानात्, तस्मादायुषस्तुर्यभागो जरेत्युच्यते, किंच जरामर्यवादः कामनाभिप्रायेण तथा च भाष्यम् अर्थित्वञ्च चापरित्यागे जरामर्यवादोपपत्तेरिति अर्थित्वं कामना तदपरित्यागे तदङ्गी कर्मकरणाभिप्रायेण जरामर्यवाद उपपद्यते ॥ ६० ॥ ६१ ॥

चार्यकुलेऽवसादयन्, सर्व एवैते पुण्यलोका भवन्ति। ब्रह्मसंस्थोऽमृतत्वमेति। एतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीति अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तथा क्रतुर्भवति तथा तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यत इति कर्मभिः संसरणमुक्ता प्रकृतमन्यदुपदिशन्ति इति तु कामयमानो योऽकामो निष्काम आत्मकामो भवति न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येतीति। तत्र यदुक्तमृणानुबन्धादपवर्गाभाव इत्येतद् युक्तमिति ये चत्वारः पथया देवयाना इति च चातुराश्रम्यश्रुतेरेकाश्रम्यानुपपत्तेः, फलार्थित्वेदं ब्राह्मणस्यारामर्थं वा एतत् सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चेति ॥६१॥

समारोपणादात्मन्यप्रतिषेधः ॥ ६२ ॥

कथम्? प्राजापत्यामिष्टिं निरूप्य तस्यां सर्ववेदसं हुत्वा आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेदिति श्रूयते, तेन विजानीमः प्रजावित्तलोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति, एषणाभ्यश्च व्युत्थितस्य पात्रचयान्तानि कर्माणि नोपपद्यन्त इति नाविशेषेण कर्तुः प्रयाजकफलं भवतीति। चातुराश्रम्य-विधानाच्चेतिहास-पुराण-धर्मशास्त्रेष्वेकाश्रम्यानुपपत्तेः। तदप्रमाणमिति चेत् न प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते, तं वा खल्वेते

ननु काम्यानां कामनाविरहेण त्यागसम्भवेऽपि नित्यानां कथं त्यागः, श्रूयते हि यावज्जीवमग्निहोत्रं जुहुयादिति तत्राह।—अपवर्गप्रतिषेधो न युक्तः श्रुतीनाम्

अथर्वाङ्गिरस एतदितिहासपुराणमभ्यवदत् इतिहासपुराणं पञ्चमं वेदानां वेद इति। तस्मादयुक्तमेतदप्रामाण्यमिति। अप्रामाण्ये च धर्मशास्त्रस्य प्राणभृतां व्यवहारलोपात्लोकोच्छेद-प्रसङ्गः। दृष्टृप्रवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः, य एव मन्त्रब्राह्मणस्य दृष्टारः प्रवक्तारश्च ते खल्वितिहास-पुराणस्य धर्मशास्त्रस्य चेति। विषयव्यवस्थानाच्च यथाविषयं प्रामाण्यम् अन्यो मन्त्रब्राह्मणस्य विषयोऽन्यश्चेतिहासपुराणधर्मशास्त्राणा-मिति। यद्धो मन्त्रब्राह्मणस्य, लोकवृत्तमितिहास-पुराणस्य लोकव्यवहारव्यवस्थानं धर्मशास्त्रस्य विषयः। तच्चैकेन सर्वं व्यवस्थाप्यत इति, यथाविषयमेतानि प्रमाणानीन्द्रियादिव-दिति। यत् पुनरेतत् क्लेशानुबन्धस्याविच्छेदादिति ॥ ६२ ॥

पापचयात्तानुपपत्तेश्च फलाभावः ॥ ६२ ॥ क ॥

आत्मनि समारोपविधानात् श्रूयते प्राजापत्यामिष्टिं निरूप्य तस्यां सार्ववेदसं स्वात्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेदिति अत एव चत्वारः वयसो देवयाना इति चातुराश्रम्यस्मृतिरपि सङ्गच्छते ॥ ६२ ॥

नन्वग्निहोत्रस्याप्रतिबन्धकत्वेऽपि तत्फलस्वर्ग एवापवर्गप्रतिबन्धकः स्यादत आह ।— ज्ञानिनः फलस्य स्वर्गस्याभावः, अग्निहोत्रं हि पापचयात्तं पापाच्चाग्निहोत्रपापाच्चि श्रेयाश्रयः प्रसीदत्स यजमानस्याङ्गेषु विद्यासु सुखे घृतपूर्णां मुचमिति क्रमेण, भिन्नोत्पत्तिकत्वे नैव तत्परित्यागात्, अग्निहोत्रफलाभावेऽपि ज्योतिष्टोमजन्य-ज्ञानादिहिंसादिफलानां प्रतिबन्धकत्वं स्यादतो हेत्वन्तरसमुच्चयाय चकार उपन्यस्तः तथा च प्रारब्धातिरिक्तकर्मणां ज्ञानादेव क्षय इत्याशयः. श्रूयते हि तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति एवं शौचस्य चाप्त कर्माणि तस्मिन् दृष्टे परावरे। अर्यते ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तमेति दृत्यस्य कामनायुत्पन्नस्य प्रजानुत्पादोऽपि नापवर्गविरोधी तथा च श्रूयते एतदेव ये पूर्वे ब्राह्मणा अन्वाद्या विदांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ॥६३॥

यथा सुषुप्तस्य खलु स्वप्नादर्शने रागानुबन्धः सुखदुःखानुबन्धश्च विच्छिद्यते तथाऽपवर्गेऽपीति। एतञ्च ब्रह्मविदो मुक्तस्यात्मनो रूपमुदाहरन्तीति। यदपि प्रवृत्त्यनुबन्धादिति ॥ ६३ ॥

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६४ ॥

प्रक्षीणेषु रागद्वेषमोहेषु प्रवृत्तिर्न प्रतिसन्धानाय, पूर्वसञ्चितस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म तच्चादृष्टकारितं, तस्यां प्रक्षीणायां पूर्वजन्माभावे जन्मान्तराभावोऽप्रतिसन्धानमपवर्गः। कर्मवैकल्यप्रसङ्ग इति चेत् न, कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात्, पूर्वजन्मनिवृत्तौ पुनर्जन्म न भवतीत्युच्यते न तु कर्मविपाकप्रतिसंवेदनं प्रत्याख्यायते। सर्वाणि पूर्वकर्माणि क्षीयन्ते जन्मनि विपच्यन्त इति ॥ ६४ ॥

न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६५ ॥

नोपपद्यते क्लेशानुबन्धविच्छेदः, कस्मात्? क्लेशसन्ततेः

सोऽयमात्मा लोक इति ते ह्यस्मै पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्तीति, अन्ये तु फलाभावः फलस्य समुच्छेदं प्रति अग्निहोत्रादौ प्रयोजकत्वाभावस्तथा सति भिक्षणामपि पावित्र्यादिस्यं इत्याहुः। इति वृत्तिसम्मतम् अधिकमूत्रम् ॥ ६२ ॥ क ॥

क्लेशानुबन्धं दूषयति।—स्वप्नादर्शनकाले सुषुप्तस्य यथा क्लेशभावेन दुःखाभावस्तथाऽपवर्गेऽपि रागाद्यभावेन दुःखाभावः स्यात् ॥ ६३ ॥

प्रवृत्त्यनुबन्धाद्यपवर्गाभावं दूषयति।—क्रियतेऽनेनेति क्लेशो रागादिः, तद्विरहिणी या प्रवृत्तिः सा प्रतिसन्धानाय प्रतिबन्धाय न भवति धर्माधर्मौ न जनयतीत्यर्थः ॥ ६४ ॥

स्वाभाविकत्वात् अनादिरियं क्लेशसन्ततिः न चानादिः शक्य उच्छेत्तुमिति ॥ ६५ ॥

प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम् ॥ ६६ ॥

अत्र कश्चित् परिहारमाह ।—यथाऽनादिः प्रागुत्पत्तेरभाव उत्पत्तेन भावेन निवर्त्यते एव स्वाभाविकी क्लेशसन्ततिर्निवर्त्येति ॥ ६६ ॥

अणुश्यामतानित्यत्ववद्वा ॥ ६७ ॥

अपर आह तथाऽनादिरणुश्यामता अथचाग्निसंयोगादनित्या तथा क्लेशसन्ततिरपीति, मतः खलु धर्मो नित्यत्वमनित्यत्वञ्च तत्त्वभावे भावे भाक्तमिति । अनादिरणुश्यामतेति हेत्वभावादयुक्तम्, अनुत्पत्तिधर्मकमनित्यमिति नाच हेतुरस्तीति ॥ ६७ ॥

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६८ ॥

अयं तु समाधिः । कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति समुच्चयः । मिथ्यासङ्कल्पेभ्यो रञ्जनीय-कोपनीय-मोहनीयेभ्यः रागद्वेषमोहा उत्पद्यन्ते, कर्म च सत्त्वनिकायनिवर्त्तकं नैयमिकान् रागद्वेषमोहान् निर्वर्त्तयति नियमदर्शनात्, दृश्यते हि कश्चित्सत्त्वनिकायो रागबहुलः कश्चिद्द्वेषबहुलः कश्चिन्मोह-

---

क्लेशाभावमसहमानः शङ्कते ।—क्लेशसन्ततेरुच्छेदो न युक्तः स्वाभाविकत्वात् ॥ ६५ ॥

एकदेशी समाधत्ते ।—प्रागुत्पत्तेरभावानित्यत्ववत् प्रागभावानित्यत्ववत् अनादेः परमाणुश्यामतायाः विनाशवद्वा विनाशः ॥ ६६ ॥ ६७ ॥

बहुल इति। इतरेतरनिमित्ता च रागादीनामुत्पत्तिः मूढो रज्यति, मूढः कुप्यति, रक्तो मुह्यति, कुपितो मुह्यति। सर्वेमिथ्यासङ्कल्पानां तत्त्वज्ञानादनुत्पत्तिः। कारणानुत्पत्तौ च कार्य्यानुत्पत्तेरिति, रागादीनामत्यन्तमनुत्पत्तिरिति। अनादिश्च क्लेशसन्ततिरित्युक्तम्। सर्व्व इमे खल्वाध्यात्मिका भावा अनादिना प्रबन्धेन प्रवर्त्तन्ते शरीरादयः, न जात्वत्र कश्चिदनुत्पन्नपूर्वः प्रथमत उत्पद्यते अन्यत्र तत्त्वज्ञानात्, नचैवं सत्यनुत्पत्तिधर्मकं किञ्चिदायधर्मकं प्रतिज्ञायत इति। कर्म च सत्त्वनिकायनिर्वर्त्तकं तत्त्वज्ञानकृतात् मिथ्यासङ्कल्पविघाताद्न रागाद्युत्पत्तिनिमित्तं भवति सुखदुःखसंविक्तिफलन्तु भवतीति॥ ६८॥

इति वात्स्यायनीये न्यायभाष्ये चतुर्थाध्यायस्याद्यमाह्निकम्।

चतुर्थाध्यायस्य

द्वितीयमाह्निकम्।

किञ्चु खलु भो यावन्तो विषयास्तावत्सु प्रत्येकं ज्ञान-

अनित्यत्वं विनाशिभावत्वं नच सत प्रागभावे नवाऽसम्यासतादिरनादिसाध्या च भाष्यम् अनादिरणुश्यामनेति हेत्वभावादयुक्तमित्यनो मतदयमपेक्ष्य सिद्धान्तमाह।—नोक्तं यक्तं कृतौ रागादीनां सङ्कल्पनिमित्तत्वात् सङ्कल्पो मिथ्याज्ञानं निमित्तं येषां तथाच तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तौ रागादिनिमित्तनिवृत्तिर्युक्तत एवेति भावः॥ ६८॥

समाप्तमपवर्गपरीक्षाप्रकरणम्॥ ४२॥

समाप्तं चतुर्थाध्यायस्य प्रथममाह्निकम्॥ १॥

मुत्पद्यते। अथ क्वचिदुत्पद्यत इति कश्चात्र विशेषः, न तावदेकैकत्र यावद्विषयमुत्पद्यते ज्ञेयानामानन्त्यात्, नापि क्वचिदुत्पद्यते, यत्र नोत्पद्यते तत्रानिवृत्तो मोह इति मोहश्चेषप्रसङ्गः। न चान्यविषयेण तत्त्वज्ञानेनान्यविषयो मोहः शक्यः प्रतिषेद्धुमिति। मिथ्याज्ञानं वै खलु मोहो न तत्त्वज्ञानस्यानुत्पत्तिमात्रं, तच्च मिथ्याज्ञानं यत्र विषये प्रवर्त्तमानं संसारबीजं भवति स विषयस्तत्त्वतो ज्ञेय इति, किं पुनस्तन्मिथ्याज्ञानम् अनात्मन्यात्मग्रहः, अहमस्मीति मोहोऽहङ्कार इति। अनात्माहं खल्वहमस्मीति पश्यतो दृष्टिरहङ्कार इति, किं पुनस्तदर्थजातं तद्विषयोऽहङ्कारः शरीरेन्द्रियमनोवेदनाबुद्धयः, कथं तद्विषयोऽहङ्कारः संसारबीजं भवति? अयं खलु शरीराद्यर्थजातमहमस्मीति व्यवसितस्तदुच्छेदेनात्मोच्छेदं मन्यमानोऽनुच्छेदलक्षणापरिप्लुतः पुनः पुनस्तदुपादत्ते तदुपाददानो जन्ममरणाय यतते तेनाविमोक्षान्नात्यन्तं दुःखाद्विमुच्यते इति। यस्तु दुःखं दुःखायतनं दुःखानुषक्तं सुखञ्च सर्वमिदं दुःखमिति पश्यति, स दुःखं परिजानाति परिज्ञातञ्च दुःखं प्रहीणं भवत्यनुपादानात् सविषान्नवत्, एवं दोषान् कर्म च दुःखहेतुरिति पश्यति, नवा प्रहीणेषु दोषेषु दुःखप्रबन्धोच्छेदेन शक्यं भवितुमिति दोषान् जहाति, प्रहीणेषु च दोषेषु न प्रवृत्तिः प्रतिसन्धानायेत्युक्तं, प्रेत्यभावफलदुःखानि च ज्ञेयानि व्यवस्थापयति कर्म च दोषांश्च प्रहेयान् अपवर्गोऽधिगन्तव्यस्तस्याधिगमोपायस्तत्त्वज्ञानम्, एवं चतसृभिर्विधाभिः प्रमेयं विभक्तमासेवमानस्याभ्यस्यतो भावयतः सम्यग्दर्शनं यथाभूतावबोधस्तत्त्वज्ञानमुत्पद्यते, एवं च।—

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥१॥

शरीरादि दुःखात्मं प्रमेयं दोषनिमित्तं तद्विषयत्वान्मिथ्या-ज्ञानस्य, तदिदं तत्त्वज्ञानं तद्विषयमुत्पन्नमहङ्कारं निवर्त्तयति, समानविषये तयोर्विरोधात्, एवं तत्त्वज्ञानादुदुःखजन्मप्रवृत्ति-दोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति, स चायं शास्त्रार्थसंग्रहोऽनूद्यते नापूर्वो विधीयत इति ॥ १ ॥

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः ॥२॥

प्रसङ्ख्यानानुपूर्व्या तु खलु कामविषया इन्द्रियार्था इति रूपादय उच्यन्ते, ते मिथ्यासङ्कल्प्यमाना रागद्वेषमोहान् प्रवर्त्त-यन्ति तान् पूर्वं प्रसङ्ख्यायीत, तांश्च प्रसङ्ख्यानस्य रूपादिविषयो मिथ्यासङ्कल्पो निवर्त्तते, तन्निवृत्तावध्यात्मं शरीरादि प्रसङ्ख्यायीत, ततप्रसङ्ख्यानादध्यात्मविषयोऽहङ्कारो निवर्त्तते, सोऽयमध्यात्मं बहिश्च विविक्तचित्तो विहरन् मुक्त इत्युच्यते। अतः परं कांचित्

अथ शास्त्रस्य फलं प्रयोजनमपवर्गः स चोद्दिष्टो लक्षितः परीक्षितोऽप्य किञ्चित्करः कारणादिरूपणात् तत्त्वमिहितमेव दुःखादिमूले कारणाभावमेव दुःखाभावोऽपवर्ग इतीति चेत्सत्यं मिथ्याज्ञानापगमहेतुर्नाभिहितः तत्त्वज्ञानं तत्र हेतुरिति चेत् कस्य तत्त्वं ज्ञातव्यमित्यभिधानीयमित्याशयेन तत्त्वज्ञानपरीक्षा मेव चाक्रिकार्थः। तत्र च षट् प्रकरणानि, आदौ तत्त्वज्ञानोत्पत्तिप्रकरणम्, अन्यानि च यथायथं वक्ष्यन्ते, तत्र सिद्धान्तसूत्रम्।—अहङ्कारोऽहमित्यभिमानः स च शरीरादिविषयको मिथ्याज्ञानमुच्यते, तत्र दोषनिमित्तानां शरीरादीनां तत्त्वस्य चात्मनः ज्ञानान्निवर्त्तते आत्मत्वेन हि शरीरादौ मुह्यन् रञ्जनीयत्वात् रज्यति, क्रोधनीयेषु कुप्यति, कैश्चित् दोषनिमित्तानां रागादीनां तत्त्वज्ञानादत्यवदनिष्टानु-बन्धित्वज्ञानादहङ्कारस्याभिमानस्य निवृत्तिरित्यर्थः इत्याहुः ॥ १ ॥

ननु के तावदनुरञ्जनीया विषयाः येषु रज्यन् संसरतीत्यतो विवेकाय तानुप दिशति।—मूढस्य समीक्षणेन भावनं तद्विषयीकृता रूपादयः दोषस्य रागादि-

संज्ञा हेया, काचिद्भावयितव्येत्युपदिश्यते, नार्थनिराकरण-मर्थोपादानं वा ॥ २ ॥

तन्निमित्तत्ववयव्यभिमानः ॥ ३ ॥

कथमिति तेषां दोषाणां निमित्तत्ववयव्यभिमानः, सा च खलु स्त्रीसंज्ञा सपरिष्कारा पुरुषस्य, पुरुषसंज्ञा च स्त्रियाः। परिष्कारस्य निमित्तसंज्ञा अनुव्यञ्जनसंज्ञा च, निमित्तसंज्ञा रमनाभोक्तं दन्तोष्ठं चक्षुर्नासिकम्, अनुव्यञ्जनसंज्ञा इत्थं दन्तौ इत्थमोष्ठाविति, सेयं संज्ञा कामं वर्द्धयति तदनुषक्तांश्च दोषान् विवर्जनीयान्, वर्जनत्वस्याः भेदेनावयवसंज्ञा केशलोममांस-शोणितास्थिस्नायुशिराकर्कपित्तौजआदिसंज्ञा, तामशुभसंज्ञेत्याचक्षते, तामस्य भावयतः कामरागः प्रहीयते, सत्त्वे च द्विविधे विषये काचित् संज्ञा भावनीया काचित् परिवर्जनीयेत्युपदिश्यते, यथा विषसम्पृक्तेऽन्नेऽन्नसंज्ञोपादानाय विषसंज्ञा प्रहाणायेति ॥ ३ ॥

निमित्तं सुन्दरीयमिति जानन् रज्यति शत्रुरयमिति द्वेष्टि ते रूपादेः हेयत्वेन भावनीयाः प्रथमं ततः शरीरात्मविवेकः ॥ २ ॥

ननु सौन्दर्यादिकं पश्यतो रागादिप्रसङ्गोऽपि दुष्परिहरः, तदुक्तं—"चञ्चलं हि मनः कृष्ण प्रमाथिबलवद्दृढम्" इत्यतो रागादिनिरस्त्र्युपायं दर्शयितुमाह।—अवयविनि तरुणादिशरीरे अभिमानः परिष्कारबुद्धिस्तन्निमित्तं रागादिनिमित्तं, तथा च सा बुद्धिर्हेया यत एव भाव्यादौ परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया दोषदर्शनमशुभसंज्ञा सा भावनीयेति। अनुरञ्जनसंज्ञा यथा—"खेलत्-खञ्जननयना परिणतबिम्बाधरा पृथुश्रोणी। कमलसुकुमारतनुरियं पूर्णेन्दुमुखी सुखाय मे भवित्री" ॥ इति। अशुभसंज्ञा यथा—"चर्मनिर्मितपात्रेयं मांसासृक्पूय-पूरिता। अज्ञो रज्यति यो मूढः पिशाचः कस्ततोऽधिकः" ॥ स्वशरीरादौ अशुभसंज्ञैव भावनीया एवं कोपहेयेऽपि शुभसंज्ञा। "सा हेष्यसौ दुराचार इत्यादिषु

विद्याऽविद्याद्वैविध्यात् संशयः ॥ ४ ॥

अथेदानीमर्थं निराकरिष्यताऽवयव्युपपाद्यते।—सदसतोरुपलब्धाद्विद्या द्विविधा, सदसतोरनुपलब्धादविद्यापि द्विविधा, उपलभ्यमानेऽवयविनि विद्याद्वैविध्यात् संशयः, अनुपलभ्यमाने चाविद्याद्वैविध्यात् संशयः सोऽयमवयवी यद्युपलभ्यते अथापि नोपलभ्यते न कथञ्चन संशयात् मुच्यत इति ॥ ४ ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥

तस्मिन्ननुपपन्नः संशयः, कस्मात् ? पूर्वोक्तहेतूनामप्रतिषेधादस्ति द्रव्यान्तरारम्भ इति ॥ ५ ॥

द्रव्यनुपपत्तेरपि तर्हि संशयानुपपत्तिः ॥ ६ ॥

षयेष्टतः। कण्ठपीठं मुष्टारेण छित्त्वास्य क्वा सुखी कदा" ॥ अयमर्थः तु—"मांसास्क्कीकसमयो देहः किं मेऽपराध्यति। परस्मादपरः कर्त्ता कर्त्तव्यः कथ मया" ॥ इति ॥ २ ॥

समाप्तं तत्त्वज्ञानोत्पत्तिप्रकरणम् ॥ ५४ ॥

अथ प्रमाणादिद्रव्यविप्रकरणं, तत्रेदम् शरीरे धर्मस्यास्य मत्स्यैऽपि एकं ज्ञेयमपरं हेयमिति निर्विकल्पम्, अतोऽवयवी नास्ति, किन्तु परमाणुपुञ्ज इति तत्त्वं, तदेव तन्मूलनिर्मूलनीयं परमाणुपुञ्ज इत्यप्यापातितः परमाणोरप्यसौ निराकरिष्यमाणत्वादिति सौगतशङ्कामपाकर्तुमयमारम्भः, यद्यपि द्वितीयाध्याये व्यवस्थापित एवावयवी तथापि स्वयूथिकदार्ष्ट्येन सौत्रान्तिकस्य वैभाषिकस्य चाव प्रत्यवस्थानमिति तव संशयप्रदर्शनाय सूत्रम्।—संशय इत्यस्य अवयविनीत्यादिः, अवयविनः प्रत्यक्षसिद्धत्वात् तदप्रसादो दूषकत्व इत्यत उक्तं विद्येति प्रमाणसमूहेन ज्ञानद्वैविध्यात् ज्ञानलक्षणसाधारणधर्मदर्शनात् ज्ञाने प्रामाण्यसंशयादवयविनि संशय इत्यर्थः ॥ ४ ॥

समाधत्ते।—तत्रावयविनि न संशयः, पूर्वहेतुप्रसिद्धत्वात्, द्वितीयाध्यायोक्तयुक्तिभिरवयविनः प्रकर्षेण सिद्धत्वात् ॥ ५ ॥

द्रव्यानुपपत्तेरपि तर्हि संशयानुपपत्तिर्नास्त्यवयवीति तद्विभजते ॥ ६ ॥

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ ७ ॥

एकैकोऽवयवो न तावत् कृत्स्नेऽवयविनि वर्त्तते तयोः परिमाणभेदादवयवान्तरसम्बन्धाभावप्रसङ्गाच्च, नाप्यवयव्येकदेशेन, न ह्यस्यान्येऽवयवा एकदेशभूताः सन्तीति। अथावयवेष्वेवावयवी वर्त्तते ॥७ ॥

तेषु चावृत्तेरवयव्यभावः ॥ ८ ॥

न तावत् प्रत्यवयवं वर्त्तते तयोः परिमाणभेदात् द्रव्यस्य चैकद्रव्यत्वप्रसङ्गात्, नाप्येकदेशैः सर्वेषु अन्यावयवाभावात्, तदेवं युक्तः संशयो नास्त्यवयवीति ॥ ८ ॥

पृथक्चावयवेभ्योऽवृत्तेः ॥ ९ ॥

पृथक् चावयवेभ्यो धर्मिभ्यो धर्मस्यायहणादिति समानम् ॥ ९ ॥

अवयविनि बाधकं शङ्कते।—अथिरवधारणे, तर्हि संशयानुपपत्तिरित्यनुपपत्तितोऽवयव्यभावादेव स्यादित्यर्थः, इत्यनुपपत्तिं विहरणीति भाष्यकारः कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः। अवयवी हि एकैकावयवे कार्त्स्न्येन एकदेशेन वा, नाद्यः, विषमपरिमाणत्वात्। अन्त्येऽपि तेनैवावयवेनान्येन वा, नाद्यः, स्वस्मिन् वृत्तिविरोधात्, नान्त्यः, अवयवान्तरस्यावयवान्तरावृत्तेः. तथापि कथमवयव्यभाव इत्यत आह तेषु चावृत्तेरवयव्यभावः, तेषु अवयवेषु पूर्वोक्तयुक्त्या अभावादवयवी नास्ति न ह्यसाववृत्तित्वमभ्युपेयत इति भावः सूत्रभेदमित्यपि वदन्ति ॥ ८ ॥

नन्वासामवृत्तिरेवावयवीति शङ्कायां पूर्वपक्षिसूत्रम्। अवयवेभ्यः पृथक् अवयवी नास्तीति शेषः, तेषु चावृत्तेरित्यस्य सूत्रत्वे अवयव्यभाव इत्यनुवर्त्तते, कुतः ? अवृत्तेः, द्रव्यभावेऽवयविनो नित्यत्वप्रसङ्गः, न च नित्योऽवयव्युपलभ्यते तस्मे नास्त्येवावय-

न चावयव्यवयवाः ॥ १० ॥

एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥

किं प्रत्यवयवं कृत्स्नोऽवयवी वर्त्तते अथैकदेशेनेति नोपपद्यते प्रश्नः, कस्मात्? एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेः। कृत्स्नमित्यनेकस्याशेषाभिधानम्, एकदेश इति नानात्वे कस्यचिदभिधानं, ताविमौ कृत्स्नैकदेशशब्दौ भेदविषयौ नैकस्मिन्नवयविन्युपपद्येते भेदाभावादिति, अन्यावयवाभावान्नैकदेशेन वर्त्तत इत्यहेतुः ॥ ११ ॥

अवयवान्तराभावेऽप्यवृत्तेरहेतुः ॥ १२ ॥

अवयवान्तराभावादिति यद्यप्येकदेशोऽवयवान्तरभूतः स्यात् तथाप्यवयवेऽवयवान्तरं वर्त्तेत नावयवीति, अन्यावयवाभावेऽप्यवृत्तेरवयविनो नैकदेशेन वृत्तिरन्यावयवाभावादित्य-

---

वीति भावः, यदा कृत्स्नैकदेशाभ्यामवयवी न वर्त्तते किन्तु स्वरूपेणैवेति शङ्कायां पूर्वपक्षिणः नूनं पृथगिति। अवयवेभ्यः पृथगवयवी नास्ति, कुतः? अवृत्तेः, अवयविनः प्रमाणात्, तथासति नित्यं स्यादिति भावः। कस्मिन् अवयवातिरिक्तोऽवयवी वर्त्तत इत्यत्र पूर्वपक्षिणः नूनं पृथगिति पूर्वोक्तयुक्त्याऽवयवेभ्यः पृथगप्यवृत्तेः ॥ ९ ॥

नन्ववयवावयविनोस्तादात्म्यमेव सम्बन्धः स्यादत आह।—न हि तन्तुः पटस्तन्तौ पट इति कश्चित्प्रत्येति नवाऽभेदेनाधाराधेयभाव उपपद्यते ॥ १० ॥

मिश्रास्तूत्तरम्।—अवयवी कार्त्स्न्येन एकदेशेन वा वर्त्तत इति प्रश्नो युक्तः, एकस्मिन्नवयविनि भेदाभावाद्भेदनियतशब्दप्रयोगस्यायुक्तत्वात्, अनेकस्याशेषता हि कार्त्स्न्यं समुदायिनां किञ्चित्त्वमेकदेशत्वं न चैकस्य तदुभयत्व इति भावः ॥ ११ ॥

हेतुः, वृत्तिः कथमिति चेत् एकस्यानेकत्राश्रयाश्रितसम्बन्धलक्षणा प्राप्तिः, आश्रयाश्रितभावः कथमिति चेत् यस्य यतोऽन्यत्रालब्धभानुपपत्तिः स आश्रयः, न कारणद्रव्येभ्योऽन्यत्र कार्यद्रव्यमात्मानं लभते, विपर्ययस्तु कारणद्रव्येष्विति, नित्येषु कथमिति चेत् अनित्येषु दर्शनात् सिद्धम्। नित्येषु द्रव्येषु कथमाश्रयाश्रयिभाव इतीति चेत् अनित्येषु द्रव्यगुणेषु दर्शनादाश्रयाश्रितभावस्य नित्येषु सिद्धिरिति। तस्मादवयव्यभिमानः प्रतिषिद्धते निःश्रेयसकामस्य नावयवी यथा रूपादिषु मिथ्यासङ्कल्पो न रूपादय इति ॥ १२ ॥

केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः ॥ १३ ॥

सर्वावयवावयव्यसिद्धेरिति प्रत्यवस्थितोऽप्येतदाह।—यथैकैकः केशस्तैमिरिकेण नोपलभ्यते, केशसमूहस्तूपलभ्यते, तथैकैकोऽणुर्नोपलभ्यते अणुसञ्चयस्तूपलभ्यते, तदिदमणुसमूहविषयं ग्रहणमिति ॥ १३ ॥

इतश्च वृत्तिविकल्पो न युक्त इत्याह।—अवयवी स्वावयवेषु नैकदेशेन वर्त्तते अवयवान्तराभावादिति यः परेषां हेतुः स न युक्तः, कुतः ? अवयवान्तराभावेऽप्यवयवी, अवयवान्तरसद्भावेऽपि तस्यैव परं वृत्तिरायाति नत्ववयविनोऽपीति, यदा अवयवे वर्त्तमानस्य कृत्स्नैकदेशवृत्तिकल्पो न हेतुः, कुतः ? अवयवान्तरस्य अवयविभिन्नस्य अवयवस्य भावेऽपि सद्भावेऽपि सम्भवात् घटादिवत् स्वरूपेणैवावयवितो भवति. सम्भवात् तत्रैः कृत्स्नैकदेशान्यतरनियमो घटादौ व्यभिचार्यर्थप्रयोजक इति भावः ॥ १२ ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वादित्यनेन सर्वावयवावयव्यसिद्धेरिति पूर्वोक्तयुक्तिः स्मारिता पूर्वपक्षी तां दूषयितुमुपक्रमते।—यथा तैमिरिकस्य तिमिरदोषचक्षुषो नैकः केशः प्रत्यक्षः किन्तु तत्समूहः एवमेकः परमाणुरप्रत्यक्षः तत्समूहरूपो घटादि प्रत्यक्षः स्यात् ॥ १३ ॥

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषय-ग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ १४ ॥

यथाविषयमिन्द्रियाणां पटुमन्दभावाद्विषयग्रहणानां पटु-मन्दभावो भवति, चक्षुः खलु प्रकृष्यमाणं नाविषयं गन्धं गृह्णाति, निकृष्यमाणञ्च न स्वविषयात् प्रच्यवते, सोऽयं तैमिरिकः कश्चिच्चक्षुर्विषयं केशं न गृह्णाति कश्चित् गृह्णाति केशमसूक्ष्मम्, उभयं ह्यतैमिरिकेण चक्षुषा गृह्यते, परमा-णवस्त्वतीन्द्रिया इन्द्रियाविषयीभूता न केनचिदिन्द्रियेण गृह्यन्ते, समुदितास्तु गृह्यन्त इत्यविषये प्रवृत्तिरिन्द्रियस्य प्रसज्येत, न ह्यात्मार्थान्तरभूतेभ्यो गृह्यत इति, ते खल्विमे परमाणवः सन्निता गृह्यमाणा अतीन्द्रियत्वं जहति, वियुक्ताश्चागृह्यमाणा अतीन्द्रियत्वं जहति इति सोऽयं द्रव्यान्तरानुत्पत्तावतिमहान् व्याघातः, इत्युपपद्यते द्रव्या-न्तरम्, यत् ग्रहणस्य विषय इति, सञ्चयमात्रं विषय इति चेत् न, सञ्चयस्य संयोगभावात् तस्य चातीन्द्रियस्याग्रहणाद-युक्तम्, सञ्चयः खल्वनेकस्य संयोगः, न च गृह्यमाणाश्रयो गृह्यते नातीन्द्रियाश्रयः। भवति ह्येदमनेन संयुक्तमिति, तस्मादयुक्तमेतदिति। गृह्यमाणस्य चेन्द्रियेण विषयस्यावर-णाद्यनुपलब्धिकारणमुपलभ्यते, तस्मान्नेन्द्रियदौर्बल्यादनुपलब्धि-रणूनाम्। यथा नेन्द्रियदौर्बल्याच्चक्षुषाऽनुपलब्धिर्गन्धादीना-मिति ॥ १४ ॥

उत्तरयति।—इन्द्रियाणां पाटवे विषयग्रहणस्य पाटवं प्रकर्षे इन्द्रियाणां मान्द्ये तद्ग्रहणस्य मान्द्यमपकर्षः न तु पटुतरं चक्षुः शब्दं गृह्णाति तदिदमुक्तं स्वविषयानतिक्रमेणेति व्याख्यातार्थमाह—नाविषये प्रवृत्तिरिति, तथा च स्वाविषयं परमाणुं समूहत्वापन्नमपि कथं चक्षुर्ग्राह्यादिति भावः॥ १४ ॥

अवयवावयविप्रसङ्गश्चैवमाप्रलयात् ॥ १५ ॥

यः खल्ववयविनोऽवयवेषु वृत्तिप्रतिषेधादभावः सोऽयमवयवस्यावयवेषु प्रसज्यमानः, सर्वप्रलयाय वा कल्पेत, निरवयवाद्वा परमाणुत्वं निवर्त्तेत, उभयथा चोपलब्धिविषयस्याभावः, तदभावादुपलब्ध्यभावः। उपलब्ध्याश्रयत्वायं वृत्तिप्रतिषेधः स आश्रयं व्याघ्रवात्मद्योताय कल्पत इति ॥ १५ ॥

न प्रलयोऽणुसद्भावात् ॥ १६ ॥

अथापि अवयवविभागमाश्रित्य वृत्तिप्रतिषेधादभावः प्रसज्यमानो निरवयवात् परमाणोर्निवर्त्तते न सर्वप्रलयाय कल्पते। निरवयवत्वं तु खलु परमाणोर्विभागैरल्पतरप्रसङ्गस्य यतो नाल्पीयस्त्वावस्थानात् लोष्टस्य खलु प्रविभज्यमानावयवस्याल्पतरमल्पतममुत्तरमुत्तरं भवति स चायमल्पतरप्रसङ्गः यस्मान्नाल्पतरमस्ति यः परमोऽल्पस्तत्र निवर्त्तते, यतश्च नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे इति ॥ १६ ॥

परं वा त्रुटेः ॥ १७ ॥

दोषान्तराभिधानाय सूत्रम्।—एवमुक्तप्रकारेण वृत्तिविकल्पदोषोऽवयविन्यवयवे च प्रसक्त आ प्रलयात् प्रलयोऽभावस्तदा च सर्वाभाव एव स्यान्न कस्यापि दृश्यमिति साधकं सर्वावहणमयत्नसिद्धेरिति ॥ १५ ॥

अस्तु सर्वाभाव इत्याह।—आश्रयनाशाभावेन परमाणोर्नाशाभावेन तत्सद्भावात्, यद्वा नव्यवयवावयविप्रवाहरूपया प्रलयपर्यन्तं स्वीकार्यः प्रलये च निखिलपृथिव्यादिनाशात् पुनः सर्गे च खादित्याश्रयेण भवते अवयवेति, समाधत्ते नेति, न सकलपृथिव्यादिनाशः परमाणुसद्भावादित्यर्थः ॥ १६ ॥

अवयवविभागस्यानवस्थानाद्द्रव्याणामसंख्येयत्वात् त्रुटि-निहत्तिरिति ॥ १७ ॥

आकाशव्यतिभेदात् तदनुपपत्तिः ॥ १८ ॥

अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह।—तस्याणोर्निरवयवत्वस्यानुपपत्तिः, कस्मात् ? आकाशव्यतिभेदात्। अन्तर्बहिश्चाणुराकाशेन समाविष्टो व्यतिभिन्नः व्यतिभेदात् सावयवः, सावयवत्वादनित्य इति ॥ १८ ॥

आकाशासर्वगतत्वं वा ॥ १९ ॥

अथैतन्नेष्यते परमाणोरन्तर्नास्त्याकाशमित्यसर्वगतत्वं प्रसज्यत इति ॥ १९ ॥

अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनात् कार्यं तदभावः ॥ २० ॥

अन्तरिति पिहितं कारणान्तरैः कारणमुच्यते, बहिरिति च व्यवधायकमव्यवहितं कारणमेवोच्यते, तदेतत्कार्यद्रव्यस्य

परमाणुरेव क इत्यत्राह।—त्रुटेः परं यदतिसूक्ष्मं तत्परमाणुः, बाधकोऽवधारणे, अथवा त्रुटेरवयवस्तदवयवी वा परमाणुरिति विकल्पार्थौ वाशब्दः, यद्वा त्रुटेः परं सूक्ष्मं परमाणुः त्रुटावेव वा विश्राम इति विकल्पोऽभिमतः ॥ १७ ॥

समानमवयवावयविप्रकरणम् ॥ ५५ ॥

अत्र विषयस्य गूढत्वात् क्व परमाणुसद्भावनेति संशयनिराकरणाय निरवयवप्रकरणं, तत्र पूर्वपक्षसूत्रम्।—तस्य निरवयवस्याणोरनुपपत्तिः, कुतः ? आकाशव्यतिभेदात्, अन्तर्बहिश्चाकाशसमावेशात् तथा च सावयवत्वात्तस्यानित्य इति ॥ १८ ॥

अथ नाकाशव्यतिभेदस्तर्हि आकाशमसर्वगतं स्यादित्याह।—आदित्यशेषः ॥ १९ ॥

सम्भवति नाणोरकार्य्यत्वात्, अकार्य्यं हि परमाणावन्तर्बहिरित्यस्याभावः। यत्र चास्य भावोऽणुकार्य्यं तत्र परमाणुः, यतो हि नाल्पतरमस्ति स परमाणुरिति ॥ २० ॥

शब्दसंयोगविभवाच्च सर्वगतम् ॥ २१ ॥

यत्र क्वचिदुत्पन्नाः शब्दा विभवन्त्याकाशे तदाश्रया भवन्ति मनोभिः परमाणुभिस्तत्कार्य्यैश्च संयोगा विभवन्त्याकाशे नासंयुक्तमाकाशेन किञ्चिन्मूर्त्तद्रव्यमुपलभ्यते तस्मादाकाशं सर्वगतमिति ॥ २१ ॥

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ २२ ॥

संयताप्रतिघातिना द्रव्येण न व्यूह्यते, यथा काष्ठेनोदकं, कस्मात् ? निरवयवत्वात्, सर्वञ्च प्रतिघाति द्रव्यं न विष्टभ्नाति, नास्य क्रियाहेतुं गुणं प्रतिबध्नाति, कस्मात् ? अमूर्त्तत्वात्, विपर्य्यये हि विष्टब्धो दृष्ट इति। स भवान् सर्वगते द्रव्ये दृष्टं धर्मं विपरीते नाशङ्कितुमर्हति। अवयवस्थाणुत्वप्रसङ्गादणुकार्य्यप्रतिषेधः। सावयवत्वे चाणोरवयवयोऽणुतर इति प्रसज्यते, कस्मात् ? कार्य्यकारणद्रव्ययोः परिमाण-

---

समाधत्ते।—अत्र शब्दो वह्निशब्दश्च कार्यद्रव्यसावयवविशेषवाची न चाकार्य्येऽवयवसम्भव एवार्थः। वह्निरिति दृष्टान्तार्थम् ॥ २० ॥

आकाशस्यासर्वगतत्वं स्यादित्यत आह।—शब्दश्च संयोगश्च यौ विभवः तथा च शब्दजनकाभिघातसंयोगस्य यो विभवः सार्वत्रिकत्वं तस्मात् पुनः सर्वगतम् आकाशमिति शेषः, सर्वदेशे शब्दोत्पत्त्या तत्समवायसंयोगानुमानात् सर्वमूर्तसंयोगित्वरूपसर्वगतत्वं तस्य सिद्धम् ॥ २१ ॥

आकाशस्य सर्वसंयोगित्वे व्यूहनविष्टम्भौ स्यातामत आह।—व्यूहः प्रतिहतस्य पदार्थस्य विष्टम्भ उत्तरदेशगतिप्रतिबन्धः आकाशे तयोरभावः निष्प्रयोजनत्वात् विभुत्वं

भेददर्शनात्। तस्मादखवयवस्याणुतरत्वं, यत्तु सावयवो-ऽणुकार्य्यं तदिति, तस्मादणुकार्य्यमिदं प्रतिषिद्धयत इति, कारणविभागाच्च कार्य्यस्यानित्यत्वं नाकाशस्यतिभेदात् लोष्ट-स्यावयवविभागादनित्यत्वं नाकाशसमावेशादिति ॥ २२ ॥

मूर्त्तिमताञ्च संस्थानोपपत्तेरवयवसद्भावः ॥२३॥

परिच्छिन्नानां हि सवर्णवतां संस्थानं त्रिकोणं चतुरस्रं समं परिमण्डलमित्युपपद्यते, यत् तत्संस्थानं सोऽवयवसन्निवेशः, परिमण्डलाद्याश्रयस्तस्मात् सावयवा इति ॥ २३ ॥

संयोगोपपत्तेश्च ॥ २४ ॥

मध्ये सवर्णः पूर्वापराभ्यामणुभ्यां संयुक्तस्तयोर्व्यवधानं कुरुते व्यवधानेनानुमीयते, पूर्वभागेन पूर्वेणाणुना संयुज्यते, परभागेणापरेणाणुना संयुज्यते, यौ तौ पूर्वापरौ भागौ तावस्यावयवौ, एवं सर्वतः संयुज्यमानस्य सर्वतोभागा अवयवा इति, यत् तावन्मूर्त्तिमतां संस्थानोपपत्तेरवयवसद्भाव इति, अत्रोक्तं किमुक्तं विभागात्परतरप्रसङ्गस्य यतो नाल्पीयस्त्वस्य निष्पत्तेरखवयवस्य चाणुतरत्वप्रसङ्गादणुकार्य्यप्रतिषेध इति।

सर्वगतत्वं यद्येते मूर्त्ते शून्यतावादिमते न संगच्छते आकाशादीनामपि तथात्वप्रसङ्गात् तथापि त्वन्मत इति पूरयित्वा व्याख्येये ॥ २२ ॥

पूर्वपक्षी युक्त्यन्तरमाशङ्कते।—परमाणोरिति शेषः हेतुमाह संस्थानोपपत्तेः संस्थानवत्त्वात् परमाणुर्हि परिमण्डलाकारः संस्थानवत्त्वं मानं मत्वा वदति मूर्त्तिमतामिति, मूर्त्तत्वात् संस्थानवत्त्वमित्यर्थः, च: पूर्वोक्तहेतुं समुच्चिनोति, मूर्त्तत्वस्य हेतुत्वसमुच्चयार्थो वा चकारः ॥ २३ ॥

युक्त्यन्तरमाह।—अवयवसद्भाव इत्यनुवर्त्तते संयोगवत्त्वादिति हेत्वर्थः संयोग-

यत् पुनरेतत् संयोगोपपत्तेश्चेति सावयवत्वाद्व्यवधानमाश्रयस्य चाव्याप्या भागभक्तिः, उक्तत्वाच्च अवयवानश्च सावयवतोरक्षोः प्रतिघाताद्व्यवधायको न सावयवत्वात्, सावयवत्वात्, सावयवत्वाच्च व्यवधाने सत्यप्संयोगो नाश्रयं व्याप्नोतीति भागभक्तिर्भवति। भागवानिवायमिति. उक्तत्वाच्च विभागेऽप्यतरप्रसङ्गस्य यतो नाल्पीयस्त्वावस्थानात् तदवयवस्य चाणुतरत्वप्रसङ्गादणुकार्य्यप्रतिषेध इति मूर्त्तिमत्वाच्च संस्थानोपपत्तेः संयोगोपपत्तेश्च परमाणूनां सावयवत्वमिति हेत्वोः ॥ २४ ॥

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः॥२५॥

यावन्मूर्त्तिमद् यावच्च संयुज्यते तत्सर्वं सावयवमित्यनवस्थाकारिणाविमौ हेतू, मा चानवस्था नोपपद्यते सत्यामवस्थायां सत्यौ हेतू स्याताम्। तस्मादप्रतिषेधोऽयं निरवयवत्वस्येति। विभागस्य च विभज्यमानहानिर्नोपपद्यते, तस्मात् प्रलयान्तता नोपपद्यत इति। अनवस्थायाश्च प्रत्यधिकरणं द्रव्यावयवानामानन्त्यात् परिमाणभेदानां गुरुत्वस्य चायहणं, समानपरिमाणत्वं चावयवावयवनोः परमाणवयवविभागादूर्द्धमिति। यदिदं भवान् बुद्धौ गृह्णित्य बुद्धिविषयाः सन्तीति

वत्वात् कथं सावयवत्वमिति चेन्न सत्यं संयोगस्याव्याप्यवृत्तित्वादस्याप्यवृत्तित्वस्यावच्छेदकभेदं विना नोपपत्तेः, अवच्छेदकावयवेति। ननु परमाण्ववयवेऽप्ययं न्यायः स्यात्तथाचानवस्थितपरम्पराप्रसङ्ग इति चेत् सत्यं तर्हि परमाण्वसमवायित्वं स्वीकृत्य मूर्त्तत्वाद्घटं निरवयवमाकाशादिकमपि नास्तीति भावः ॥ २४ ॥

समाधत्ते।—पूर्वोक्तयुक्त्या परमाणोर्निरवयवत्वप्रतिषेधो न युक्तः, कुतः ? अनवस्थाकारित्वात्, प्रामाणिकीयमनवस्था स्यादत आह—अनवस्थानुपपत्तेश्चेति। सर्वेषामनवस्थितावयवत्वे मेरुसर्षपयोस्तुल्यपरिमाणत्वापत्तिरित्यत्र तत्संयोगावच्छेदकादिग्भिन्नभाग,

मन्यते, मिथ्याबुद्धय एताः। यदि हि तत्त्वबुद्धयः स्युर्बुद्धया विवेचने क्रियमाणे याथात्म्यं बुद्धिविषयायासुपलभ्येत ॥ २५ ॥

बुद्ध्याविवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तत्त्वापकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥ २६ ॥

यथायं तन्तुरयं तन्तुरिति प्रत्येकं तन्तुषु विविच्यमानेषु नार्थान्तरं किञ्चिदुपलभ्यते यत्पटबुद्धेर्विषयः स्यात् याथात्म्यानुपलब्धेरसति विषये पटबुद्धिर्भवतीति मिथ्याबुद्धिर्भवति एवं सर्वत्रेति ॥ २६ ॥

व्याहतत्वादहेतुः ॥ २७ ॥

यदि बुद्ध्या विवेचनं भावानां, न सर्वभावानां याथात्म्यानुपलब्धिः। अथ सर्वभावानां याथात्म्यानुपलब्धिर्न बुद्ध्या

न वा युक्तायुक्ता निष्प्रमाणकत्वात् प्रमाणसत्त्वे युक्तत्वविरोधात् निष्प्रमाणकयुक्तताऽभ्युपगमे किमपराद्धं पूर्वतर्केति दिक् ॥ २५ ॥

समाप्तं निरवयवप्रकरणम् ॥ ५६ ॥

ननु वास्तवार्थाभावात् कृतोऽवयववाक्यविन्यासस्येति मतमपाकर्तुं वास्तवार्थभङ्ग निराकरणमारभते प्रमेयत्वं ज्ञानत्वव्याप्यं नवेति संशयः, तत्र पूर्वपक्षसूत्रम्।—तत्प्रकरणविच्छेदार्थः. भावानां बुद्ध्या विवेचनादभेदोल्लेखात् याथात्म्यस्य ज्ञानभेदत्वचक्षुज्ञानानुपलब्धिरनुपपत्तिः घट इति ज्ञानं सत्तं ज्ञातमिति स्वानुभवेन तत्र घट इति ज्ञानमित्यनेन ज्ञानघटयोरभेद उल्लिख्यते, ततो न ज्ञानातिरिक्तो विषयः. यथा घटे विविच्यमाने तन्तुनामेवापकर्षणादावतिरिक्तं न वस्तु, एवं तन्तवोऽपि नावयव्यतिरिक्ता इति घटत्वादिरिव ज्ञानस्यैवाकारविशेष इति भावः ॥ २६ ॥

समाधत्ते।—उक्तो हेतुर्न युक्तः, व्याहतत्वात्, न हि बुद्ध्या विवेचने घटस्य

विवेचनं भावानां याथात्म्यानुपलब्धिरेति व्याहन्यते, तदुत्प्रमवयवावयविप्रसङ्गश्चैवमाप्रलयादिति ॥ २७ ॥

तदाश्रयत्वादपृथग्ग्रहणम् ॥ २८ ॥

कार्यद्रव्यं कारणद्रव्याश्रितं तत् कारणेभ्यः पृथङ् नोपलभ्यते विपर्यये पृथग्ग्रहणात्, यथाश्रयाश्रितभावो नास्ति तच्च पृथगग्रहणमिति बुद्ध्या विवेचनात् तु भावानां पृथग्ग्रहणमतोन्द्रियेष्वणुषु यदिन्द्रियेण ग्रहणं तदेतया बुद्ध्या विविच्यमानमन्त्यादिति ॥ २८ ॥

प्रमाणतश्चार्थप्रतिपत्तेः ॥ २९ ॥

बुद्ध्या विवेचनाद्भावानां याथात्म्योपलब्धिः । यदस्ति यथा च तत् सर्वं प्रमाणम उपलब्ध्या सिद्धति । या च प्रमाणत उपलब्धिस्तद्बुद्ध्या विवेचनं भावानां, तेन सर्वशास्त्राणि सर्वकर्माणि सर्वे च शरीरिणां व्यवहारा व्याप्ताः । परीक्ष्यमाणो हि बुद्ध्याध्यवस्यति इदमस्तीदं नास्तीति तत्र न सर्वभावानुपपत्तिः ॥ २९ ॥

तत्स्वरूपता सिध्यति, तत्तः पट इति हि प्रतीयते, न तु तन्तुः पट इति, एवं पटेन प्रावरणं न तु तन्तुभिः, किञ्च तत्पटविवेचनादेव वास्त्वर्थसिद्धिः ज्ञानेन तु स्वस्मिन् पटाभेदो नाक्षिप्यते स्वाविषयकत्वादनुव्यवसायेन तु पटविषयकत्वं व्यवसायि समुक्षिप्यते ॥ २७ ॥

ननु तन्तुपटयोर्भेदे पार्थक्येन ग्रहणं स्यादित्यत्राह ।—पृथग्ग्रहणं यदि तन्तुविषयकप्रत्यक्षविषयत्वं पटस्यापाद्यते तदोत्तरं तदाश्रयत्वादिति पटो हि तन्त्वाश्रितः, तेन समवायसम्बन्धात्पटप्रत्यक्षस्य तन्तुविषयकत्वं यदि च भेदप्रत्यय आपाद्यते तदा भवत्येवेति भावः ॥ २८ ॥

ननु ज्ञानस्योभयवादिसिद्धत्वात् तस्यात्र पदार्थकल्पने लाघवात् तदतिरिक्तपदार्था-

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ ३० ॥

एवञ्च सति सर्वं नास्तीति नोपपद्यते, कस्मात्? प्रमाणानुपपत्त्युपपत्तिभ्यां, यदि सर्वं नास्तीति प्रमाणमुपपद्यते, सर्वं नास्तीत्येतद्व्याहन्यते। अथ प्रमाणं नोपपद्यते सर्वं नास्तीत्यस्य कथं सिद्धिः, अथ प्रमाणमन्तरेण सिद्धिः, सर्वमस्तीत्यस्य कथं न सिद्धिः ॥ ३० ॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः॥ ३१॥

मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ३२ ॥

यथा स्वप्ने न विषयाः सन्त्यथ चाभिमानो भवति, एवं न प्रमाणानि प्रमेयाणि च सन्ति, अथच प्रमाणप्रमेयाभिमानो भवति ॥ ३१ ॥ ३२ ॥

हेत्वभावादसिद्धिः ॥ ३३ ॥

स्वप्नान्ते विषयाभिमानवत् प्रमाणप्रमेयाभिमानो न पुन-

भावसिद्धिः स्यादित्यत आह।—पूर्वोक्तदूषणं, मनुष्यस्तीति चकारः, घटस्य घटादेः प्रतिपत्तेः प्रमाणाधीनत्वात्, तथा च प्रामाणिकेऽर्थे गौरवं न बाधकमिति भावः, अन्यथा ज्ञानमपि न सिध्येन्नीरवादिरप्यसतापत्तिः ॥ २९ ॥

न वा वाच्यार्थाभावसाधनं सम्भवतीत्याह।—व्याघातान्न वाच्याभाव इति शेषः, वाच्यं नास्तीत्यत्र यदि प्रमाणमस्ति तदा प्रमाणस्य वाच्यस्य सत्त्वान्न वाच्याभावः। अथ नास्ति तदा निष्प्रमाणकत्वान्न तन्निश्चितिरित्यर्थः, किञ्च घटादौ यदि प्रमाणमस्ति तदा तत एव वाच्यार्थसिद्धिः अथाप्रमाणं तदा कथं घट इति ज्ञानस्य घटाकारत्वं मन्यसे ज्ञानस्यैवानुत्पत्तेरिति ॥ ३० ॥

ननु प्रमाणप्रमेयव्यवहारो न पारमार्थिकः एवन्तु विज्ञानानि तत्तदाकाराणि भासन्तेऽपरिवाकवशादेव स्वाप्नप्रत्ययवदैन्द्रजालिकप्रतीतिवच्चाविर्भवन्तीत्याशयेन मङ्गलं सूत्राभ्याम्। अष्टमम् ॥ ३१ ॥ ३२ ॥

जागरितान्ते विषयोपलब्धिवदिति चेत् न हेतुर्नास्ति हेत्वभावादसिद्धिः। स्वप्नान्ते वासन्तो विषया उपलभ्यन्त इत्यत्रापि हेत्वभावः। प्रतिबोधेऽनुपलब्धादिति चेत् प्रतिबोधविषयोपलब्धादप्रतिषेधः, यदि प्रतिबोधेऽनुपलब्धात् स्वप्ने विषया न सन्तीति तर्हि स्वप्ने प्रतिबुद्धेन विषया उपलभ्यन्ते उपलब्धात् सन्तीति विपर्यये हि हेतुसामर्थ्यम्, उपलब्धाभावे सत्यनुपलब्धादभावः सिद्ध्यति, उभयथा त्वभावे नानुपलब्धस्य सामर्थ्यमस्ति, यथा प्रदीपस्याभावादनुपलब्धेर्न नभसि, तत्र भावे नाभावः समर्थयत इति, स्वप्नान्तविकल्पे, च हेतुवचनं स्वप्नविषयाभिमानवादिति ब्रुवता स्वप्नान्तविकल्पे हेतुर्वाच्यः, कश्चित् स्वप्नाभर्योपसंहितः, कश्चित् प्रमोदोपसंहितः, कश्चिदुभयविपरीतः कदाचित् स्वप्नमेव न पश्यतीति, निमित्तवतस्तु स्वप्नविषयाभिमानस्य निमित्तविकल्पादविकल्पोपपत्तिः ॥ २३ ॥

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ २४ ॥

पूर्वोपलब्धो विषयो यथा स्मृतिश्च सङ्कल्पश्च पूर्वोपलब्धविषयो न तस्य प्रत्याख्यानाय कल्पते, तथा स्वप्ने विषयग्रहणं पूर्वोपलब्धविषयं न तस्य प्रत्याख्यानाय कल्पते। एवं दृष्टविषयश्च स्वप्नान्तो जागरितान्तेन यः सुप्तः स्वप्नं पश्यति स

तनाधर्मे।—वासनाभावस्यासिद्धिः हेत्वभावात् प्रमाणाभावात् यथेति-यदुदाहरणमुपगमे घटोऽयमित्यादिज्ञानमालम्बसिद्धिरित्यर्थः, न च वासनावशात् स्वादिति वाच्यं, असतायां वासितायामप्यसौ प्रसङ्गात्, वासनायाः सत्यत्वमानत्वेन चानुभवादेरपि सत्यानापत्तिरिति दिक् ॥ २२ ॥

सत्यत्वविषया अपीत्युक्ता यदि स्वप्नप्रत्यया इव भावना प्रत्यया इव परीक्षि

एव जाग्रत्-स्वप्नदर्शनानि प्रतिसन्धत्ते इदमद्राक्षमिति। तत्र जाग्रद्बुद्धिवृत्तिवशात् स्वप्नविषयाभिमानो मिथ्येति व्यवसायः, सति च प्रतिसन्धाने या जाग्रतो बुद्धिवृत्तिस्तद्ग्राह्यं व्यवसायः स्वप्नविषयाभिमानो मिथ्येति। उभयाविशेषे तु साधनानर्थक्यं, यस्य स्वप्नान्तजागरितान्तयोरविशेषस्तस्य स्वप्नविषयाभिमानवदिति साधनमनर्थकं, तदाश्रयप्रत्याख्यानात्। अतस्मिंस्तदिति च व्यवसायः, प्रधानाश्रयः, अपुरुषे स्थाणौ पुरुष इति व्यवसायः, स प्रधानाश्रयो न खलु पुरुषेऽनुपलब्धे पुरुष इत्यपुरुषे व्यवसायो भवति, एवं स्वप्नविषयस्य व्यवसायो हस्तिनमद्राक्षं पर्वतमद्राक्षमिति प्रधानाश्रयो भवितुमर्हति ॥ ३४ ॥

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥ ३५ ॥

एवञ्च सति स्थाणौ पुरुषोऽयमिति व्यवसायो मिथ्योपलब्धिरतस्मिंस्तदिति ज्ञानं, स्थाणौ स्थाणुरिति व्यवसायस्तत्त्वज्ञानं, तत्त्वज्ञानेन च मिथ्योपलब्धिर्निवर्त्यते नार्थः स्थाणुपुरुषसामान्यलक्षणः, यथा प्रतिबोधे या ज्ञानवृत्तिस्तया स्वप्नविषयाभि-

---

प्रत्यया भवेयुरित्यत आह।—पूर्वोपलब्धिविषय इति शेषः, सदृश्य उपजीतभावं, यथा भूम्यादि पूर्वोपलब्धविषयकं तथा स्वप्नप्रत्ययोऽपीति न निर्विषयकः, न च स्वप्ने स्वमपि खादति निजशिरः खरुजनमपि पश्यति नचिरं पूर्वोपलब्धमिति वाच्यं, खस्य खादनस्य च निजशिरसः खरुजनस्य च पूर्वोपलब्धत्वात् संसर्गभानस्य च भ्रान्तत्वात् नवाऽहेतुकत्वं भूम्यादिदृष्टान्तेन, संस्कारस्य भूतौ भूतेन विशिष्टबुद्धौ च हेतुत्वस्याभिमतत्वात् तत्र भ्रमे दोषः कालविशेषोऽदृष्टविशेषोद्बोधो वेत्यन्यदेतत् ॥ ३४ ॥

ज्ञानो निवर्त्तते नार्थो विषयसामान्यलक्षणः, तथा माया-गन्धर्वनगरमृगतृष्णिकानामपि या बुद्धयोऽतस्मिंस्तदिति व्यवसायास्तत्राप्यनेनैव क्रमेण मिथ्योपलब्धिविनाशस्वरूपज्ञानाभावार्थप्रतिषेध इति। उपादानवच्च मायादिषु मिथ्याज्ञानम्। अज्ञापनीयस्वरूपञ्च द्रव्यमुपादाय साधनवान् परस्य मिथ्याध्यवसायं करोति सा माया। नीहारप्रभृतीनां नगरस्वरूपमविवेके दूरान्नगरबुद्धिरुत्पद्यते, विपर्यये तदभावात्, सूर्यमरीचिषु भौमेनोष्णा संसृष्टेषु स्पन्दमानेषूदकबुद्धिर्भवति, सामान्यग्रहणात् सन्निकर्षस्य, विपर्यये तदभावात्, क्वचित् कदाचित् कस्यचित्च भावान्निमित्तं मिथ्याज्ञानम्। दृष्टश्च बुद्धिरेतं मायाप्रयोक्तुः परस्य च दूरान्तिकस्थयोर्गन्धर्वनगरमृगतृष्णिकासु, सुप्तप्रतिबुद्धयोश्च स्वप्नविषये तदेतत् सर्वस्याभावे निरूपाख्यतायां निरात्मकत्वेनोपपद्यत इति॥ ३५॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्॥ ३६॥

मिथ्याबुद्धेश्चार्थवदप्रतिषेधः, कस्मात्? निमित्तोपलम्भात् सद्भावोपलम्भाच्च, उपलभ्यते मिथ्याबुद्धिर्निमित्तं, मिथ्याबुद्धिश्च प्रत्यात्ममुत्पद्या गृह्यते संवेद्यत्वात्, कस्मात्? मिथ्याबुद्धिरप्यस्तीति॥ ३६॥

ननु अनस्यापि सविषयकत्वे सत्प्रतिरोधः कथं स्यादित्याशङ्क्याह।—मिथ्योपलब्धेर्यावदन्धर्वनगरादिज्ञानस्य तत्त्वज्ञानादनारोपितवस्तुप्रत्ययाधिगमः प्रतिरोधी अनस्तज्ज्ञानं वा, एवं स्वप्नप्रत्ययस्यापि दर्पणमुखविबिम्बस्य तत्त्वज्ञानेनाप्रतिरोधेऽपि अनस्तज्ज्ञानं भवत्येवेति भावः॥ ३५॥

नाध्यक्षिकस्तु बाह्यास्तित्वं प्रसाध्य तदृष्टान्तेन बुद्धेरप्यसत्त्वं साधयति तं प्रत्याह।—एवं बाह्यवदबुद्धेरपि य अविशेषः, निमित्तसद्भावोपलम्भात् बहिर्वदन्तश्च

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥३७॥

तत्त्वं स्थाणुरिति प्रधानं पुरुष इति। तत्त्वप्रधानयोरभेदात् स्थाणौ पुरुष इति मिथ्याबुद्धिरुत्पद्यते सामान्यग्रहणात्, एवं पताकायां बलाकेति, लोष्टे कपोत इति. न तु समाने विषये मिथ्याबुद्धीनां समावेशः, सामान्यग्रहणाश्रयस्थानात्। यस्य तु निरात्मकं निरूपाख्यं सर्वं तस्य समावेशः प्रसज्यते, गन्धादौ च प्रमेये गन्धादिबुद्धयो मिथ्याभिमतास्तत्त्वप्रधानयोः सामान्यग्रहणस्य चाभावात् तत्त्वबुद्धय एव भवन्ति। तस्मादयुक्तमेतत् प्रमाणप्रमेयबुद्धयो मिथ्येति, दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तमिति ॥ ३७ ॥

समाधिविशेषाभ्यासात् ॥ ३८ ॥

अथ कथं तत्त्वज्ञानमुत्पद्यत इति। न तु प्रत्याहृतस्येन्द्रियेभ्यो मनसो धारकेण प्रयत्नेन धार्यमाणस्यात्मना संयोग-

---

प्रमितत्वात् न स्थाणौकं सहेतुकं सम्भवति सहेतुकत्वे च कादाचित्कत्वव्याकोपः, केचित् धर्मस्य सहिषयत्वे प्रमात्वं स्यादित्यत्राह—बुद्धेरिति, एवं प्रमात्वं निमित्तस्य प्रकारस्य सद्भावः सत्त्वं यत्र तद्भा च यत्रिभज्ञतयोः सत्यत्वेऽपि यत्रौ रजतत्व वैशिष्ट्याभावान्न तद्बुद्धे प्रमात्वमिति भाव इत्याहुः, अत्र चोपलम्भपदमनति प्रयोजनकम् ॥ ३६ ॥

न वा मिथ्याबुद्धिदृष्टान्तेन ज्ञानमात्रस्यात्मन्याश्रयविषयकत्वं सहिषयकत्वाभावो वा सम्भवतीत्याह।—तत्त्वं धर्मिस्वरूपप्रधानम् आरोप्यं तयोश्च भेदे धर्मिणि प्रमात्वमारोप्यरजतत्वांशे च भ्रमत्वमिति दृष्टान्तासिद्धिरिति भावः, केचित् प्रमात्वाप्रमात्वयोर्विरोधान्नैकत्र समावेश इत्यत्र आह—तत्त्वेति, तथा च विषयभेदान्न विरोध इति भावः इत्याहुः ॥ ३७ ॥

समाप्तं न्यायार्थमङ्गनिराकरणप्रकरणम् ॥ ५७ ॥

स्तत्त्वबुभुत्साविशिष्टः, सति हि तस्मिन्निन्द्रियार्थेषु बुद्धयो नोत्पद्यन्ते, तदभ्यासवशात् तत्त्वबुद्धिरुत्पद्यते, यदुक्तं सति हि तस्मिन्निन्द्रियार्थेषु बुद्धयो नोत्पद्यन्त इत्येतत् ॥ ३८ ॥

नार्थविशेषप्राबल्यात् ॥ ३९ ॥

अनिच्छतोऽपि बुद्ध्युत्पत्तेर्नैतदुक्तं, कस्मात् ? अर्थविशेषप्राबल्यात्, अबुभुत्समानस्यापि बुद्ध्युत्पत्तिदृष्टा । यथा स्तनयित्नुशब्दप्रभृतिषु ॥ ३९ ॥

छद्मादिभिः प्रवर्त्तनाच्च ॥ ४० ॥

तत्र समाधिविशेषो नोपपद्यते । च्युत्पिपासाभ्यां शोतोष्णाभ्यां व्याधिभिश्चानिच्छतोऽपि बुद्धयः प्रवर्त्तन्ते । तस्मादेकाग्र्यानुपपत्तिरिति । अस्त्येतत् समाधिव्युत्थाननिमित्तं समाधिप्रत्यनीकञ्च मति त्वेतस्मिन् ॥ ४० ॥

नन् शास्त्राधीनं तत्त्वज्ञानं चणिकमनलङ्गाणं मिथ्याज्ञानं स्यादेव न हि तादृशं किञ्चिदेव ज्ञानं दृढभूमिसवासनमिथ्याज्ञानसमूलघातनसमर्थतत्त्वज्ञानविरुद्धिप्रकरणमारभते तत्त्वज्ञानविरुद्धिस्तत्त्वज्ञानवासना तत्स्यात्यन्तिकी मिथ्याज्ञाननाशः तत्र तत्त्वज्ञानविरुद्धौ हेतुमाह ।—समाधिः चित्तस्याभिमतविषयनिष्ठत्वं, तस्य प्रकर्षो विषयान्तरानभिष्वङ्गलक्षणः तस्याभ्यासात् पौनःपुन्यात् तत्त्वज्ञानविरुद्धिः, तदेव च निदिध्यासनमामनन्ति, तत्त्वज्ञानविरुद्धा च मिथ्याज्ञानवासना तिरोभावबलेन च योगसूत्रं—"तत्रः संस्कारोऽन्यसंस्कारप्रतिबन्धी" प्रतिबन्धः कार्याजननमात्रमादनं विनाशो वा ॥ ३८ ॥

नन् रागादिभिः प्रतिबन्धात् समाधिरेव नोत्पद्यतीत्याशङ्क्य सूत्राभ्याम् ।—अर्थविशेषस्य तनयवनितादिरागस्य प्राबल्याद्विरक्तावस्थानबन्धात् तदबुभुत्सानमवर्जनीयमिति तदभावः, व्याघ्र। घननर्जितादिज्ञानेन प्रतिबन्धः, एवं बुभुक्षाभयादिभिः प्रतिबद्धस्वरूपमात्र प्रवर्तेत ॥ ३९ ॥ ४० ॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ ४१ ॥

पूर्वकृतो जन्मान्तरोपचितस्तत्त्वज्ञानहेतुर्धर्मप्रविवेकः फलानुबन्धो योगाभ्याससामर्थ्यं, निष्फले हि अभ्यासेनाभ्यासा आद्रियेरन्। दृष्टं हि लौकिकेषु कर्मस्वभ्याससामर्थ्यं प्रत्यनीकपरिहारार्थंश्च ॥ ४१ ॥

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥४२॥

योगाभ्यासजनितो धर्मो जन्मान्तरेऽप्यनुवर्त्तते प्रचयकाष्ठागते तत्त्वज्ञानहेतौ धर्मे प्रकृष्टायां समाधिभावनायां तत्त्वज्ञानमुत्पद्यत इति, दृष्टश्च समाधिर्नार्थविशेषप्राबल्याभिभवः। नाहमेतदश्रौषं नाहमेतदज्ञामिषमन्यत्र मे मनोऽभूदित्याह लौकिक इति'। यद्यर्थविशेषप्राबल्यादनिच्छतोऽपि बुद्धुत्पत्तिरनुज्ञायते ॥ ४२ ॥

अपवर्गेऽप्येवं प्रसङ्गः ॥ ४३ ॥

मुक्तस्यापि वाह्यार्थसामर्थ्याद्बुद्धय उत्पद्येरन्निति ॥ ४३ ॥

न निष्पन्नावश्यम्भावित्वात् ॥ ४४ ॥

पविहरति।—जन्मान्तरकृतसमाधिजन्यसंस्कारवशात् समाधिसिद्धिरित्यर्थः अत एव चानैकजन्मसंसिद्ध इत्यादि सङ्गच्छते, वयन्तु पूर्वकृतस्य प्रथमतः कृतस्येश्वराराधनस्य फलं धर्मविशेषलक्षण्यादित्यर्थः, तथा च योगमूलं समाधिसिद्धीश्वरप्रणिधानात् मवान्तरञ्च तदेव "ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च" तत ईश्वरप्रणिधानात् विषयप्रातिकूल्येन चित्तावस्थानं प्रत्यूहाभावश्चेत्यर्थः ॥ ४१ ॥

योगाभ्यासजानमनुवर्तते।—तत्र स्थिरचित्तता स्यादिति भावः, इदं न सूत्रं भाष्यमिति केचित् ॥ ४२ ॥

तटस्थः सङ्गते।—एवं प्रसङ्गः अर्थविशेषप्राबल्याविषयावभासप्रसङ्गः ॥ ४३ ॥

कर्मवशाद्विप्रकृष्टशरीरे चेष्टेन्द्रियार्थाश्रये निमित्ततोभावादवश्यम्भावो बुद्धीनामुत्पादः, न च प्रबलोऽपि सन् वाह्योऽर्थ आत्मनो बुद्ध्युत्पादे समर्थो भवति। तस्येन्द्रियेण संयोगाद्बुद्ध्युत्पादे सामर्थ्यं दृष्टमिति ॥ ४४ ॥

तदभावश्चापवर्गे ॥ ४५ ॥

तस्य बुद्धिनिमित्ताश्रयस्य शरीरेन्द्रियस्य धर्माधर्माभावादभावोऽपवर्गे तत्र यदुक्तमपवर्गेऽप्येवं प्रसङ्ग इति तदयुक्तम्। तस्मात् सर्वदुःखविमोक्षोऽपवर्गः यस्मात् सर्वदुःखबीजं सर्वदुःखायतनं चापवर्गे विच्छिद्यते, तस्मात् सर्वेण दुःखेन विमुक्तिरपवर्गो न निर्बीजं निरायतनञ्च दुःखमुत्पद्यत इति ॥ ४५ ॥

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ ४६ ॥

तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः। यमः समानमात्रमिणां धर्मसाधनं, नियमस्तु विशिष्टम्, आत्मसंस्कारः पुनरधर्महानं धर्मोपचयश्च, योगशास्त्राच्चाध्यात्म-

---

समाधौ।—निष्पन्नस्य शरीरादेः अवश्यम्भावित्वात् कारणत्वात् ज्ञानादिरिति शेषः ॥ ४४ ॥

ननु किमेतावतेत्यत आह।—तस्य शरीरादेरभावः तदारब्धकधर्माधर्मविरहादिति भावः ॥ ४५ ॥

ननु समाधिमात्रादेव निष्पन्नोऽपवर्गः स्यात् साधनान्तरं वाऽपेक्षणीयमत आह यदा समाधिसाधनत्वाह।—तदर्थमपवर्गार्थमिति भाष्यादौ तदर्थं समाध्यर्थमिति वा यमादाह बौधायनः—"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" नियमानाह—"शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" स्वाध्यायः स्वाभिमतमन्त्रजपः निषिद्धानाचरणतत्तदाश्रमविहिताचरणे यमनियमा इत्यर्थे, आत्म-

विधिः प्रतिपत्तव्यः। स पुनस्तपः प्राणायामः प्रत्याहारो ध्यान-धारणा इति इन्द्रियविषयेषु प्रसङ्ग्यानाभ्यासो रागद्वेष-प्रहाणार्थः। उपायस्तु योगाचारविधानमिति ॥ ४६ ॥

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥ ४७ ॥

तदर्थमिति प्रकृतं, ज्ञायतेऽनेनेति ज्ञानमात्मविद्याशास्त्रं तस्य ग्रहणमध्ययनधारणे, अभ्यासः सततक्रियाध्ययनश्रवण-चिन्तनानि तद्विद्यैश्च सह संवाद इति प्रज्ञापरिपाकार्थं,

---

संस्कारः आत्मनोऽपवर्गाधिगमक्षमता। ननु यमनियमावेव साधने उताहो अन्यदपीत्यत आह —योगादिति। आत्मविधिः आत्मसाक्षात्कारविधायकवाक्यम् आत्मा वा अरे द्रष्टव्य आत्मानं वेदिज्ञानीयादित्यादि, योगादिति प्रतिपाद्यत्वं प्रसम्बध्यते;, तथाच योगशास्त्रोक्तात्मतत्त्वाधिगमसाधनैरात्मसंस्कारः कर्त्तव्य इत्यर्थः, तथाच योगसूत्रं—"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः" तदर्थस्य योगाङ्गानां यमनियमादीनां अनुष्ठानात्क्लिष्टमलहेयविद्यादिरूपायाः क्षये सति ज्ञानस्य दीप्तिः प्रकर्षः, स च विवेकख्यातिपर्य्यन्तो जायते, सा च सत्त्व-पुरुषान्यताप्रत्ययात्मसाक्षात्कारः, अस्मात्तु देहादिभिन्नात्मसाक्षात्कारः, स च नैदानी-मविद्याप्रतिबन्धाद्दुःखात्यन्तनाशस्य तुरायोग्यत्वाच्च भवति चासौ यावज्जीवमेव. योगाङ्गानि तत्रोक्तानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो-ऽष्टावङ्गानि, आसनं पद्मासनादि कुशासनादि च वैशाजिनकुशोत्तरमिति भग-वद्वचनात्। प्राणायाममाह योगसूत्रं—"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" तस्मिन् आसनस्थैर्य्ये, प्राणवायोरेव नासिकाप्रवेशरूपक्रियाविशेषात् श्वास-प्रश्वासस्यपदेशः, बहिरिन्द्रियाणां स्वस्वविषयदौर्मुख्येनावस्थानं प्रत्याहारः। धारणा-माह योगसूत्र—"देशबन्धश्चित्तस्य धारणा" देशे नाभिचक्रादौ चित्तस्य बन्धो विषया-न्तरवैमुख्येनावस्थानम्। ध्यानमाह।—"तत्र प्रत्ययैकतानता ध्यानं" धारणैव धारा-वाहिनी ध्यानमित्यर्थः। समाधिमाह।—"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" अर्थस्य घटादेर्यो ज्ञानस्वरूपश्च यदि ध्याने न भासते तदा समाधिरित्यर्थः सूत्रान्तरं त्वयमन्तरङ्गं पूर्वेभ्यः चरमत्वयं साक्षादुपकारकमित्यर्थः ॥ ४६ ॥

ननूक्तं किमात्मोद्दिश्येदं शास्त्रमित्यत आह।—तदर्थमित्यनुवर्त्तते, ज्ञायतेऽनेनेति ज्ञानं,

परिपाकस्तु संशयच्छेदनमविज्ञाताथविबोधोऽध्यवसिताभ्यनुज्ञानमिति ॥ ४७ ॥

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात् ॥ ४८ ॥

समाय वादः संवादः, तद्विशेष सह संवाद इत्यविभक्तार्थं वचनं विभज्यते, एतन्निगदेनैव नीतार्थमिति यदिदं मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्येति ॥ ४८ ॥

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे॥ ४९ ॥

तमुपेयादिति वर्त्तते परतः प्रश्नामुपादित्समानस्तत्त्वबुभुत्साप्रकाशनेन स्वपक्षमनवक्षापयन् स्वदर्शनं परिशोधयेदिति। अन्योऽन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि स्वपक्षरागेण चैके न्यायमतिवर्त्तन्ते तत्र ॥ ४९ ॥

आर्षं प्रकृतं तस्य यद्वचनमध्ययनधारणे तदाध्यासो दृढतरसंस्कारः तद्विशेषैस्तदभियुक्तैः संवादः स्यान्नभवदाक्यायः, न हि योगाङ्गज्ञानाय तत्प्रापेक्षत्वेन न प्रकृतशास्त्रवैफल्यं ज्ञेयस्वरूपवैलक्षण्यात् ॥ ४७ ॥

संवादप्रकारं दर्शयितुमाह।—तं तद्विद्यं सब्रह्मचारी सहाध्यायी विशिष्टः प्रकृष्टज्ञानवान्, श्रेयोऽर्थी मुमुक्षुः (विशिष्टः पूर्वोक्तभिन्न इत्यर्थः इति कश्चित्) विशिनष्टि न्यायस्थं अनसूयिभिरिति ॥ ४८ ॥

संवादप्रकारमाह।—वाशब्दो नियमार्थः, अर्थित्वे तत्त्वबुभुत्सायां सत्यां प्रयोजनार्थं तत्त्वनिर्णयार्थं प्रतिपक्षहीनं प्रतिकूलपक्षहीनं यथा स्यात् तथाऽभ्युपेयात्, तथा च भाष्यं—"स्वपक्षमनवक्षाप्य स्वदर्शनं परिशोधयेत्" इति तत्त्वनिर्णीषुस्तथा न पक्षपात इति भावः ॥ ४९ ॥

समाप्तं तत्त्वज्ञानविशिष्टप्रकरणम् ॥ ५८ ॥

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीज-
प्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ५० ॥

अनुत्पन्नतत्त्वज्ञानानामप्रज्ञोपदोषाणां तदर्थं घटमाना-
नामितदिति। विद्यानिर्वेदादिभिश्च परीक्षाविधीयमानस्य,
ताभ्यां विगृह्य कथनम्। विगृह्येति विजिगीषया न तत्त्व-
बुभुत्सयेति। तदेतद्विद्यापालनार्थं न लाभपूजाख्यात्यर्थ-
मिति ॥ ५० ॥

ताभ्यां विगृह्य कथनम् ॥ ५० ॥ क ॥

इति वात्स्यायनीये न्यायभाष्ये चतुर्थाध्यायस्य द्वितीयमाह्निकम्।
समाप्तश्चायं चतुर्थोऽध्यायः ॥ ४ ॥

तद्विदैः सह संवाद इत्यत्र वयौ वाच्यैः सह संवादः न कर्तव्य इति भवो माभूदिति तत्त्वज्ञानपरिपालनप्रकरणमारभते।—तत्त्वाध्यवसायस्य तत्त्वनिर्णयस्य संरक्षणं परीक्ष्यदूषणाक्रन्दनेनाप्रामाण्यप्रलापविघटनं तदर्थं जल्पवितण्डे पूर्वमुक्ते इति शेषः ॥ ५० ॥

ननु ताभ्यां किं कार्यमित्यत आह।—अयमर्थः वयौ वाच्यैः तद्दर्शनाभ्यामा-हितकुज्ञानैरपरैर्वा यदि स्वपक्ष आक्षिप्यते तदा ताभ्यां जल्पवितण्डाभ्यां स्वप-क्षरक्षणं चैतत् वक्तव्यं:पातिनामाक्षेपे तु वादजल्पवितण्डाभिर्यथोक्तं जयपराजयैरिति भावः, वस्तुतस्तु मुमुक्षोर्न तादृशैः सह संवादो वीतरागत्वान्न हि शास्त्रपरिपालन मपि तदुद्देश्यं, न वा तदुपेक्षयैव शास्त्रं गच्छति, किन्तु शास्त्रमध्येयमेतेति तत्त्व मिति। इति इतिसञ्चयतम् अधिकमुक्तम् ॥ ५० ॥ क ॥

समाप्तं तत्त्वज्ञानपरिपालनप्रकरणम् ॥ ५९ ॥

समाप्तं चतुर्थाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

इति महामहोपाध्यायश्रीमद्विद्यानिवासमहाचार्यात्मज श्रीविश्वनाथविद्याम-
पञ्चाननभट्टाचार्यविरचितायां न्यायसूत्रवृत्तौ चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमाध्यायस्य

प्रथममाह्निकम् ।

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्व-मिति संक्षेपेणोक्तं तल्लक्षणेन विभज्यते, ताः खल्विमा जातयः स्थापनाहेतौ प्रयुक्ते चतुर्विंशतिः प्रतिषेधहेतवः ।

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्प-साध्य-प्राप्ताप्राप्तिप्रसङ्ग-प्रतिदृष्टान्तानुत्पत्तिसंशय-प्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धि-नित्यानित्यकार्य्यसमाः ॥ १ ॥

साधर्म्येण प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतोः साधर्म्यसमः, अविशेषं तत्र तयोदाहरिष्यामः । एवं वैधर्म्य-समप्रभृतयोऽपि निर्वक्तव्याः ॥ १ ॥

नत्वा शङ्करचरणं शरणं दीनस्य दुर्गमे तरणम् ।

सम्प्रति निरूपयामः पञ्चममध्यायमतिगहनम् ॥

अथ जातिनिग्रहस्थानयोरुद्दिष्टयोर्लक्षितयोर्बहुत्वं तद्विकल्पाज्जातिनिग्रह-स्थानबहुत्वमित्यनेन सूचितं, अवच्छिद्यजिज्ञासानुसारिप्रमाणादिपरीक्षाऽनारिता सम्यग्ज्ञानवतः प्रयत्नतोयं, तत्र जातिपरीक्षासहितजातिनिग्रहस्थाननिर्देशलक्षण-मध्यायार्थः जातिपरीक्षासहितजातिविशेषलक्षणं प्रथमाह्निकार्थः, समदश चात्र प्रकरणानि, तत्रादौ सत्प्रतिपक्षदूषणाभासाग्रकरणम्, अन्यानि च यथास्थानं वक्ष्यन्ते, तत्र च विशेषलक्षणार्थं जातिं विभजते ।

अत्र च साधर्म्यादीनां कार्य्यान्तानां दश ते: समा इत्यर्थात् साधर्म्यसमादय-श्चतुर्विंशतिर्जातय इत्यर्थः, अत्र च जातेर्विशेषणात् स्त्रीलिङ्गं समाशब्दं मन्यन्ते, भाष्य-वार्त्तिकादौ समशब्दः, क्वचिन्मूलेषु तु समशब्दो निर्विवाद एव, तत्र जातिशब्दस्य

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्य्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ २ ॥

लक्षणन्तु साधर्म्येणोपसंहारे साध्यधर्मविपर्य्ययोपपत्तेः साधर्म्येणैव प्रत्यवस्थानमविशिष्यमाणे स्थापनाहेतुतः साधर्म्यसमः प्रतिषेधः। निदर्शनं क्रियावानात्मा द्रव्यत्व क्रियाहेतुगुणयोगात् द्रव्यं लोष्टः क्रियाहेतुगुणयुक्तः क्रियावान् तथा चात्मा तस्मात् क्रियावानिति, एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते निष्क्रिय आत्मा विभुनो द्रव्यत्व निष्क्रियत्वात् विभु चाकाशं निष्क्रियत्व तथा चात्मा तस्मान्निष्क्रिय इति, न चास्ति विशेषहेतुः क्रियावत्त्वसाधर्म्यात् क्रियावता भवितव्यं न पुनरक्रियसाधर्म्यानिष्क्रियेणेति विशेषहेत्वभावात् साधर्म्यसमः प्रतिषेधो भवति। अथ वैधर्म्यसमः। क्रियाहेतुगुणयुक्तो लोष्टः परिच्छिन्नो दृष्टो न च तथात्मा तस्मान्न लोष्टवत् क्रियावानिति। न चास्ति विशेषहेतुः। क्रियावत्त्वसाधर्म्यात् क्रियावता भवितव्यं न पुनः क्रियावद्वैधर्म्यादक्रियेणेति। विशेष-

---

ओलिङ्गतया यद्यपि नान्यवत्त्वापि प्रतिषेधो विशेष इति भाष्यादयः, वयन्तु तद्विकल्पादिति सूत्रव्याख्यानेनैव विशेषत्वं विविधः कस्य: प्रकारो विकल्पः तथा चैते साधर्म्यसमादयो त्रयोविंशतिप्रकारा एवमग्रिमसूत्रेष्वपि, इत्यत्र त्रयोविंशतावे साधर्म्यसमेत्यपीति भ्रमः समीकरणार्थं प्रयोगः सम इति वार्त्तिकं, यद्यपि नैतावता समीकरणं तथापि समीकरणोद्देश्यकथनमात्रमेव, अथवा साधर्म्येणैव समं यत्र न साधर्म्यसमः, एकधर्म्यान्योन्याधिकरणेऽपि साधर्म्यं समनैवेति भावः ॥ १ ॥

साधर्म्यवैधर्म्यसमौ लक्षयति।—उपसंहारे साध्यधर्मोपसंहरणे वादिना कृते तद्धर्मस्य साध्यधर्मस्य यो विपर्ययो व्यतिरेकस्तस्य साधर्म्यवैधर्म्याभ्यां दीपलाभ्यां व्याख्यानपेक्षाभ्यां यदुपपादनं ततो ऽपि: साधर्म्यवैधर्म्यसमाख्यौ तदयमर्थः वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिनः साधर्म्यमप्रयुक्त-

हेत्वभावाद्वैधर्म्यसमः। वैधर्म्येण चोपसंहारे निष्क्रिय आत्मा विभुत्वात् क्रियावद्द्रव्यमविभु दृष्टं यथा लोष्टः, न च तथात्मा तस्मान्निष्क्रिय इति वैधर्म्येण प्रत्यवस्थानं निष्क्रियं द्रव्यमाकाशं क्रियाहेतुगुणरहितं दृष्टं न तथात्मा तस्माच्च निष्क्रिय इति न चास्ति विशेषहेतुः, क्रियावद्वैधर्म्यान्निष्क्रियेण भवितव्यं न पुनरक्रियवैधर्म्यात् क्रियावतेति। विशेषहेत्वभावाद्वैधर्म्यसमः, क्रियावान्, लोष्टः क्रियाहेतुगुणयुक्तो दृष्टस्तथा चात्मा तस्मात् क्रियावानिति न चास्ति विशेषहेतुः। क्रियावद्वैधर्म्यान्निष्क्रियो न पुनः क्रियावत्साधर्म्यात् क्रियावानिति विशेषहेत्वभावात् साधर्म्यसमः॥ २॥

गोत्वाद्गोसिद्धिवत् तत्सिद्धिः॥ ३॥

अनयोरुत्तरम्।—साधर्म्यमात्रेण वैधर्म्यमात्रेण च साध्यसाधने प्रतिज्ञायमाने स्याद्व्यवस्था, सा तु धर्मविशेषे नोपपद्यते गोसाधर्म्यात् गोत्वाज्जातिविशेषाद्गौः सिद्ध्यति न

हेतुना तदभावापादनं साधर्म्यसमावैधर्म्यमात्रप्रवृत्तहेतुना तदभावापादनं वैधर्म्यसमा, तत्र साधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वादृष्टवत् व्यतिरेकेण वा व्योमवदित्युपसंहरतैनदेवं यदनित्यघटसाधर्म्यादित्याकाशवैधर्म्यादाऽनित्यः स्यान्नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्यादविशेषो वा वक्तव्यः, वैधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वादृष्टवत् चाकाशवदिति स्थापनायाम् अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः स्यादविशेषो वा वक्तव्य इति अत्र साधर्म्यत्वमात्रं वैधर्म्यत्वमात्रं वा गमकतीपधिकमित्यभिमानात् सत्प्रतिपक्षदोषनाभासे यैसी अनैकान्तिकदोषनाभासेति वार्त्तिके त्वनैकान्तिकपदं योगात् सत्प्रतिपक्षपरं एकान्ततः साध्यसाधकत्वाभावात्॥ २॥

अनयोरुत्तरत्वे योजयति।—गोत्वात् गोसिद्धिर्गौरित्यवधार इति सम्प्रदायः, वयन्तु गोत्वाद्गवेतरसमवेतत्वे सति गोसमवेताज्जातेः एतेन व्यक्तिपक्षधर्मत्वे दर्शिते गोर्गोत्वस्य तादात्म्येन गौरेव वा सिद्ध्यर्थेन तथैव कृतकत्वादपि व्यक्ति-

तु साध्यादिसम्बन्धात्, अश्वादिवैधर्म्याद्गोत्वादेव न गौः सिद्ध्यति न गुणादिभेदात् तच्चेतत् कृतव्यवस्थानमवयवप्रकरणे प्रमाणानामभिसम्बन्धाच्चैकार्थकारित्वं समानं वाक्य इति हेत्वाभासाश्रया खल्वियमव्यवस्थेति ॥ ३ ॥

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाद्धेतुत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ॥ ४ ॥

दृष्टान्तधर्मं साध्येन समासञ्जयत्कर्षसमः। यदि क्रियाहेतुगुणयोगाल्लोष्टवत् क्रियावानेवात्मा लोष्टवदेव स्पर्शवानपि प्राप्नोति, अथ न स्पर्शवान् लोष्टवत् क्रियावानपि न

पक्षधर्मतामहितादनित्यत्वसिद्धिर्न तु व्याप्तिपक्षधर्मतावचनान्न साधर्म्यमात्रात्. तथा चेति षट्पक्षकसाधर्म्यात् प्रमेयत्वादितत्त्वहेतुवचनमप्यहेतुकं स्यादित्ययं विशेषः ॥ २ ॥

इति सत्प्रतिपक्षहेत्वाभासप्रकरणम् ॥ ६० ॥

क्रमप्राप्तं जातिषट्कं निरूपयति।—उत्कर्षेण समः उत्कर्षसम एवमपकर्षसमोऽपि वर्ण्यावर्ण्यसाध्येति भावप्रधानो निर्देशः वर्ण्यत्वादिना समो वर्ण्यसमादिः अविद्यमानधर्मस्यैव उत्कर्षः, विद्यमानधर्मस्यैवापकर्षः, वर्ण्यत्वं वर्णनीयत्वं तच्च सन्दिग्धसाध्यकत्वादि तदभावोऽवर्ण्यत्वं विकल्पो विविध्य साध्यत्वं पक्षावयवसाधनीयत्वं साध्यदृष्टान्तयोर्धर्मविकल्पादिति पक्षानामुत्थानबीजं उभयसाध्यत्वादिति षष्ठस्य तदयमर्थः साध्यनिर्देशेति साध्यं पक्षः तथा च साध्यदृष्टान्तयोरित्यस्य पक्षदृष्टान्तयोरन्यतरस्मिन्नित्यर्थः धर्मविकल्पो धर्मस्य वैचित्र्यं, तच्च क्वचित्सत्त्वं क्वचिदसत्त्वं, प्रकृते साध्यसाधनान्यतररूपस्य धर्मस्य विकल्पात्सत्त्वाद्योऽविद्यमानधर्मारोपः स उत्कर्षसमः व्याप्तिमपरीक्ष्य पक्षदृष्टान्तान्यतरस्मिन् साध्यसाधनान्यतरेणाविद्यमानधर्मप्रसञ्जनं उत्कर्षसम इति फलितार्थः, यथाशब्दोऽनित्यः कृतकत्वादिति स्थापनायाम् अनित्यत्वेन कृतकत्वं घटे दृष्टमतः शब्देऽपि दृष्टवान् स्यात्, तथा च विवक्षितविपरीतसाधनादिविशेषविकल्पो हेतुत्वहेत्वाभासा चेयम्, एव श्रावणशब्दत्वसाधर्म्यात् कृतकत्वादेरपि श्रावणः स्यादविशेषात् कृतत्वं घटे

प्राप्नोति विपर्यये वा विशेषो वक्तव्य इति साध्ये धर्माभावं दृष्टान्तात् प्रसजतोऽपकर्षसमः, लोष्टः खलु क्रियावानविभुर्दृष्टः यात्मात्मापि क्रियावानविभुरस्तु, विपर्यये वा विशेषो वक्तव्य इति। स्थापनीयो वर्ण्यो विपर्ययादवर्ण्यः। तावेतौ साध्यदृष्टान्तधर्मौ विपर्ययस्य तौ वर्ण्यावर्ण्यसमौ भवतः, साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात् साध्यधर्मविकल्पं प्रसजतो

यावत्त्वापादनेऽर्थान्तरमत उक्तलक्षणे दृष्टान्तपदं साध्यपदस्य न देयम्, अपकर्षसमायान्तु धर्मविकल्पः, धर्मस्य सहचरितधर्मस्य विकल्पोऽस्त्वं ततः अपकर्षः साध्यसाधनान्यतरस्याभावप्रसञ्जनं तथा च पक्षदृष्टान्तान्यतरस्मिन् व्याप्तिमपुरस्कृत्य सहचरितधर्माभावेन हेत्वसाध्यान्यतराभाव प्रसञ्जनमपकर्षसमा यथाशब्दोऽनित्यः कृतकत्वादित्यत्र, यत्रानित्यत्वसहचरितघटधर्मात् कृतकत्वादनित्यः शब्दस्तदा कृतकत्वानित्यत्वसहचरितघटधर्मैकदेशवत्त्वव्याहत्या शब्दे कृतकत्वस्यानित्यत्वस्य च व्याहतिः स्यात्, व्याप्तिनिर्देशना द्वितीये बाधदेशना, एवं शब्दे कृतकत्वसहचरितसाधर्म्यस्य, संयोगादावनित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्याहत्या घटेऽनित्यत्वं कृतकत्वस्य व्यावर्त्तनेति दृष्टान्ते साध्यसाधनवैकल्यदेशनाभासाऽपीयं यत्तु वार्त्तिके शब्दो नीरूप इतिवत् घटोऽपि नीरूपः स्यादित्यपकर्ष इति तदसत्, घटे नीरूपत्वापादनस्यार्थान्तरत्वात् आचार्येश्वरमोऽप्येवं. यत्तु वैधर्म्यसमाया श्चैवात्रभावः स्यादिति तन्न, उपपद्यसङ्करेऽनुपपत्तेरसङ्गतात्, वर्ण्यसमायान्तु साध्यसिद्धाभाववाद् सन्दिग्धसाध्यधर्मादिर्वा तस्य धर्मः, सन्दिग्धसाध्यकादिहेतुत्वस्य विकल्पात्सत्वात् दृष्टान्ते वर्ण्यत्वस्य सन्दिग्धसाध्यकत्वस्यापादनं वर्ण्यसमा तदयमर्थः पक्षसिद्धिहेतुर्हि गमकः पक्षस्य सन्दिग्धसाध्यकत्वस्य च सन्दिग्धसाध्यकहेतुत्वया दृष्टान्तेऽपि स्वीकार्यः तथा च दृष्टान्तस्यापि सन्दिग्धसाध्यकत्वात्पक्षत्वनिश्चितत्वनियमादसाधारणो हेतुरहेतुसमाभासा चेयं हेतुः सन्दिग्धसाध्यकहेतुर्यदि न दृष्टान्ते तदा गमकहेत्वभावात् साधनविकल्पो दृष्टान्तः स्यादिति भावः, अवर्ण्यसमायान्तु दृष्टान्ते सिद्धसाध्यके यो धर्मो हेतुस्तस्य सत्त्वात्, पक्षे शब्दादावसन्दिग्धसाध्यकत्वापादनमवर्ण्यसमा दृष्टान्ते हेतोर्यादृशं तादृशो हेतुरेव गमक त्वभिमानेन एवमापादनं दृष्टान्ते यो हेतुः सिद्धसाध्यकहेतुः. स चेत्र, पक्षे तदागमकहेत्वभावात् स्वरूपासिद्धिः स्यादतस्तादृशो हेतुरवश्यं पक्षत्वाभिमते स्वीकार्यः, तथा च सन्दिग्धसाध्यकत्वलक्षणपक्षत्वाभावादाश्रयासिद्धिः स्यादिति

विकल्पसमः। क्रियाहेतुगुणयुक्तं किञ्चिन्मूर्तं यथा लोष्टः, किञ्चिन्नमूर्तं यथा वायुः, एवं क्रियाहेतुगुणयुक्तं किञ्चित् क्रियावत् स्यात् यथा लोष्टः, किञ्चिदक्रियं यथात्मा विभुर्वा वायुरिति हेत्वाश्रयवयवसामर्थ्ययोगी धर्मः साध्यः। तं दृष्टान्ते प्रसजतः साध्यसमः। यदि यथा लोष्टस्तथात्मा प्राप्तस्तर्हि यथात्मा तथा लोष्ट इति साध्यश्चायमात्मा क्रियावानिति कामं लोष्टोऽपि साध्यः। अथ नैवं न तर्हि यथा लोष्टस्तथात्मा ॥ ४ ॥

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥५॥

एतेषामुत्तरम्।—अलभ्यः सिद्धस्य निह्नवः सिद्धश्च किञ्चित्

देशनाभासा चेयं विकल्पसमायान्तु पक्षे दृष्टान्ते च यो धर्मस्तस्य विकल्पो विरुद्धः कल्पो व्यभिचारित्वम्, उपलक्षणं चैतत् अन्यतरसिद्धधर्मस्यापि बोध्यं, व्यभिचारोऽपि हेतोर्धर्मान्तरं प्रति धर्मान्तरस्य साध्यं प्रति धर्मान्तरस्य धर्मान्तरं प्रति वा तथा च क्वचिद्धर्मस्य क्वचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्य प्रति व्यभिचारापादनं विकल्पसमा, यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य घटत्वव्यभिचारदर्शनादगुरुत्वस्यानित्यत्वव्यभिचारदर्शनादनित्यत्वस्य मूर्तत्वव्यभिचारदर्शनाद्धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदित्यनेकान्तिककोटेरना भासा चेयं, पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनं साध्यसमा तथायमाशयः एतत्प्रयोगसाध्यस्यैवानुमितिविषयत्वं तथा च पक्षादेरनुमितिविषयत्वात् साध्य वदेतत्प्रयोगसाध्यत्वम्, अतः साध्यसमा, तथा हि पक्षादेः पूर्वं सिद्धत्वे एतत प्रयोगसाध्यत्वाभावान्नानुमितिविषयत्वं पूर्वमसिद्धत्वे पक्षादेरज्ञानादाश्रयासिद्धा-दयस्तद्धेतवोऽना भासा चेयं सूत्रार्थेतु उभयसाध्यत्वात् उभयं पक्षदृष्टान्तौ तद्धर्मौ हेत्वादिः तत्साध्यत्वं तदधीनानुमितिविषयत्वं साध्यस्येव पक्षादेरपीति तुल्यता-पादनम् इति सिद्धोपदिष्टभाषणमेते सिद्धस्याप्यनुमितिविषयत्वात् साध्यसमत्वं हेतोश्च साध्यत्वे हेतुमानं दृष्टान्तोऽपि साध्य इत्याशयः ॥ ४ ॥

एतावत्समदृष्टान्तत्वे बीजमाह।—किञ्चित् साधर्म्यात् साधर्म्यविशेषात् व्याप्ति-घटितात् उपसंहारसिद्धेः साध्यसिद्धेः वैधर्म्यादितद्विपरीतात् व्याप्तिनिरपेक्षात्

साधर्म्यादुपमानं यथा गौस्तथा गवय इति। तत्र न लभ्यो गोगवययोर्धर्मविकल्पमवोदयितुम्। एवं साधके धर्मे दृष्टान्तादिसामर्थ्ययुक्ते न लभ्यः साध्यदृष्टान्तयोर्धर्मविकल्पाद्वैधर्म्यात् प्रतिषेधो वक्तुमिति ॥ ५ ॥

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥

यत्र लौकिकपरीक्षकाणां बुद्धिसाम्यं तेनाविपरीतोऽर्थोऽतिदिश्यते प्रज्ञापनार्थमेवं साध्यातिदेशाद्दृष्टान्त उपपद्यमाने साध्यत्वमनुपपन्नमिति ॥ ६ ॥

साधर्म्यमात्रात् भवता कृतः प्रतिषेधो न संभवतीत्यर्थः, अन्यथा प्रमेयत्वरूपसाधकसाधर्म्यात् तद्दृष्टान्तसाध्यमपि सम्यक् स्यादिति भावः. तथा चायं क्रमः अनित्यत्वव्याख्यान कृतकत्वात् शब्दोऽनित्यत्वमुपसंहरामो न तु कृतकत्वं दृष्टान्तस्यापि व्याप्यं येन तत्र दृष्टान्तव्यापादनीयं शब्दे एवम् अनित्यत्वं न दृष्टान्तव्याप्यं येन दृष्टान्ताभावादनित्यत्वाभावः शब्दे स्यात्, एवं धर्म्यसमेऽपि किंचित साधर्म्यात् व्याप्यतावच्छेदकावच्छिन्नाद्धेतोः साध्यसिद्धिः तादृग्धेतुमत्त्वं दृष्टान्तसाध्यत्वाद्धर्मिणः, न तु पक्ष व्यापकीभूतावच्छिन्नो हेतुमत्तावदवच्छिन्नहेतुमत्त्वम् अन्यथा त्वयापि दृष्टान्तो कर्तव्यः सोऽपि न स्यात् एवमवर्ण्यसमेऽपि व्याप्यतावच्छेदकावच्छिन्नस्य दृष्टान्तदृष्टस्य पक्षे सत्त्वात् साध्यसिद्धिर्न तु दृष्टान्तनिष्ठव्याप्यतावच्छिन्नस्य पक्षे सत्त्वम्, एवं विकल्पसमेऽपि प्रकृतसाध्यव्याप्यात् प्रकृतहेतोः साध्यसिद्धिसद्धर्म्यात् यत्किंचिदाभिचारात् कृतः प्रतिषेधो न संभवति, न हि यत्किंचिदाभिचारादेव प्रकृतहेतोः प्रकृतसाध्यसाधकत्वमतिप्रसङ्गात्, एवं साध्यसमेऽपि व्याप्याद्धेतोः सिद्धे पक्षे साध्यसिद्धिः न तु पक्षदृष्टान्तादर्थोऽनेन साध्यते, तथा सति क्वचिदपि साध्यसिद्धिर्न स्यात् त्वदीयदूषणमपि विशीर्येत ॥ ५ ॥

वर्म्यवर्म्यं साध्यसमम् समाधत्तेऽतिप्रसङ्गादिति।—दृष्टान्तोपपत्तेः साध्यातिदेशात् दृष्टान्ते हि साध्यमतिदिश्यते तावतैव दृष्टान्तत्वमुपपद्यते न त्वन्यो धर्मः पक्षदृष्टान्तयोरभेदापत्तेः पक्षादपि साध्यसमत्वमनेन व्युत्पन्नम्। दृष्टोऽसौ दृष्टान्तः पक्षः तस्मादयमित्यतः पक्षात्कीर्तनात् तथा च साध्यस्यातिदेशात् साधनात् पक्ष एवोच्यते, न तु पक्षोऽपि साध्यतेऽतिप्रसङ्गादिति भावः ॥ ६ ॥

समाप्तं जातिषट्कप्रकरणम् ॥ ६१ ॥

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्ता अविशिष्टत्वादप्राप्ता असाधकत्वाच्च प्राप्ताप्राप्तिसमौ ॥ ७ ॥

हेतुः प्राप्य वा साध्यं साधयेदप्राप्य वा, न तावत् प्राप्य, प्राप्यामविशिष्टत्वादसाधकः। द्वयोर्विद्यमानयोः प्राप्तौ सत्यां किं कस्य साधकं साध्यं वा? अप्राप्य साधकं न भवति नाप्राप्तः प्रदीपः प्रकाश्ययतीति प्राप्ता प्रत्यवस्थानं प्राप्तिसमः। अप्राप्ता प्रत्यवस्थानमप्राप्तिसमः ॥ ७ ॥

घटादिनिष्पत्तिदर्शनात् पीड़ने चाभिचाराद्प्रतिषेधः ॥ ८ ॥

अनयोरुत्तरम्।—उभयथा खल्वयुक्तः प्रतिषेधः, कर्तृकरणा-

क्रमप्राप्तौ प्राप्ताप्राप्तिसमौ लक्षयति।—हेतोरिति साधकत्वमिति शेषः प्राप्तिपक्षे दोषमाह—प्राप्ताऽविशिष्टत्वादिति, द्वयोरपि प्राप्तत्वाविशेषात् किं कस्य साधकम्, अप्राप्तिपक्षे दोषमाह—अप्राप्तेति, अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात् साधकत्वञ्च कारकज्ञापकसाधारणम्, एवञ्च कारकज्ञापकलक्षणं साधनं कार्यज्ञाप्यलक्षणेन साध्येन सम्बद्धं सत्साधकं यत् तदा सत्त्वाविशेषान्न कार्यकारणभावः, तज्जन्यस्य प्रागेव ज्ञातत्वान्न ज्ञाप्यज्ञापकभावः प्राप्तयोर्न जन्यजनकभावः प्राप्तेन खरविषाणेनेवामेदादित्याशय इत्यन्ये, तथा च प्राप्ताऽविशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमा यदि चाप्राप्य लिङ्गं साध्यबुद्धिं जनयति साध्याभावबुद्धिमेव किं न जनयेत् अप्राप्तत्वाविशेषात् तथा चाप्राप्ता साधकत्वादनिष्टापादनमप्राप्तिसमा प्रतिकूलतर्कदर्शनाभासो मेमे ॥ ७ ॥

अनयोरसदुत्तरत्वे बीजमाह।—दृष्टादितो घटादिनिष्पत्तेर्दर्शनात् सर्वसाधकप्रत्यक्षसिद्धत्वादनिचारात् ग्लेनादितः यवपीड़ने च व्यभिचाराच्च तादृक्षः प्रतिषेधः

क्रियाकरणानि प्राप्य सदं घटादिकार्यं निष्पादयन्ति अभिघाराद्य पीड़ने सति दृष्टमप्राप्य साधकत्वमिति ॥ ८ ॥

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥ ९ ॥

साधनस्यापि साधनं वक्तव्यमिति प्रसङ्गे प्रत्यवस्थानं प्रसङ्गसमः प्रतिषेधः क्रियाहेतुगुणयोगी क्रियावान् लोष्ट इति हेतुर्नापदिश्यते, न च हेतुमन्तरेण सिद्धिरस्तीति प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः। क्रियावानात्मा क्रियाहेतुगुणयोगात् लोष्टवदित्युक्ते प्रतिदृष्टान्त उपादीयते क्रियाहेतुगुणयुक्तमाकाशं निष्क्रियमिति कः पुनराकाशस्य क्रियाहेतुर्गुणो वायुना संयोगः संस्कारापेक्षः वायुवनस्पतिसंयोगवदिति ॥ ९ ॥

सम्भवति न हि कारणं दण्डादि प्रागेव घटादिना सम्बद्धमपि तु सदादिना सर्वदादिरयुद्देश्यतया पीड़ां जनयति, अन्यथा लोकवेदसिद्धकार्यकारणभावोच्छेदे तदुक्तो हेतुरप्यसाधकं स्यादिति ॥ ८ ॥

इति प्राप्यप्राप्तिसमजातिद्वयप्रकरणम् ॥ ६२ ॥

क्रमप्राप्ते प्रसङ्गप्रतिदृष्टान्तसमे जाती लक्षयति ।—दृष्टान्तस्य कारणं प्रमाणं तदनपदेशोऽनभिधानम् अभिधानं चानतिप्रपञ्चनकं तथा च दृष्टान्तस्य साध्यवत्त्वे प्रमाणाभावात् प्रत्यवस्थानमर्थः यद्यपीदं सदुत्तरमेव तथापि दृष्टान्ते प्रमाणं वाच्यं, तत्रापि प्रमाणान्तरमित्यनवस्थया प्रत्यवस्थाने तात्पर्यं तदुक्तमाचार्येणानवस्थाभासप्रसङ्गः प्रसङ्गसम इति, एतन्मते हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसम एव, पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणाक्षतिगणेष्वन्तर्भूतमिति विशेषः अनवस्थादिभेदाभासा चेयम्। प्रतिदृष्टान्तेन प्रत्यवस्थानात् प्रतिदृष्टान्तसम एतच्च साधारणं तेन प्रतिदृष्टान्तमात्रबलेन व्याप्तिमपुरस्कृत्य प्रत्यवस्थानमर्थः तेन साधर्म्यसमाद्भेदः यदि षट्दृष्टान्तबलेनाग्निवत् शब्दः तदाकाशदृष्टान्त-

प्रदीपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः॥ १० ॥

अनयोरुत्तरम्।—इदं तावदयं पृष्टो वक्तुमर्हति अथ के प्रदीपमुपाददते किमर्थं वेति दिदृक्षमाणदृश्यदर्शनार्थमिति। अथ प्रदीपं दिदृक्षमाणाः प्रदीपान्तरं कस्मान्नोपाददते, अन्तरेणापि प्रदीपान्तरं दृश्यते प्रदीपः, तत्र प्रदीपदर्शनार्थं प्रदीपोपादानं निरर्थकम् अथ दृष्टान्तः किमर्थमुच्यत इति। अप्रज्ञातस्य ज्ञापनार्थमिति, अथ दृष्टान्ते कारणापदेशः, किमर्थं दृश्यते यदि प्रज्ञापनार्थम् प्रज्ञातो दृष्टान्तः, स खलु लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति तत् प्रज्ञानार्थः कारणापदेशो निरर्थक इति प्रसङ्गसमस्योत्तरम् ॥ १० ॥

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः॥ ११ ॥

अथ प्रतिदृष्टान्तसमस्योत्तरम्।—प्रतिदृष्टान्तं ब्रुवता न विशेषहेतुरुपदिश्यते अनेन प्रकारेण प्रतिदृष्टान्तः साधको न दृष्टान्त इति एवं प्रतिदृष्टान्तहेतुत्वेनाहेतुर्दृष्टान्त इत्युपपद्यते,

---

वर्त्तेन नित्य एव स्यात्। नित्यः किं न स्यादिति बाधः प्रतिरोधो बाधादनीयः हेतुरनङ्गं दृष्टान्तमात्रबलादेव साध्यमिद्धिरित्यभिमानः बाधप्रतिरोधान्यतरदर्शनाभासा चेयम् ॥ ९ ॥

प्रसङ्गसमे प्रत्युत्तरमाह।—दृष्टान्तो हि निदर्शनस्थानत्वेन साध्यनियमार्थम पेक्ष्यते, न तु दृष्टान्त दृष्टान्तान्तरवस्थितपरम्परा लौकिकेक्षा युक्तिसिद्धा वा अन्यथा घटादिप्रत्यक्षाय प्रदीप इव प्रदीपप्रत्ययार्थमनवस्थितप्रदीपपरम्परा प्रसज्येत त्वदीयसाधनमपि व्याहन्येत ॥ १० ॥

प्रतिदृष्टान्तसमे प्रत्युत्तरमाह।—कथायमुत्तरक्रमः प्रतिदृष्टान्तस्वया किमर्थमुपादीयते मदीयहेतोर्बाधार्थं सत्प्रतिपक्षितत्वार्थं वा, नायः, यतः प्रतिदृष्टान्तस्य हेतुत्वे स्वार्थसाधकत्वे मदीयो दृष्टान्तो नाहेतुः स्वसाधकत्वाच्च

स च कथमहेतुर्न स्यात्तत्प्रतिषिद्धः साधकः स्यादिति ॥ ११ ॥

प्रा गुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवदित्युक्ते अपर आह प्रागुत्पत्तेरनुत्पन्ने शब्दे प्रयत्नानन्तरीयकत्वमनित्यत्वकारणं नास्ति तदभावाच्चित्यत्वं प्राप्तं नित्यस्य चोत्पत्तिर्नास्ति अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः ॥ १२ ॥

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ १३ ॥

अत्रोत्तरम् ।—तथा भावादुत्पन्नस्येति उत्पन्नः खल्वयं शब्द इति भवति प्रागुत्पत्तेः शब्द एव नास्ति उत्पन्नस्य शब्दभावात्

तुल्यबलत्वान्न बाधो न वा द्वितीयोऽपि, यतः प्रतिदृष्टान्तस्य स्वार्थसाधकत्वे उच्यमाने नाहेतुदृष्टान्तः, मदीयो दृष्टान्तस्तु सहेतुकत्वादधिकबलः । वक्ष्यति हेतुं विना दृष्टान्तमात्रेण न सत्प्रतिपक्षसम्भावना तदभावव्याप्यवत्ताज्ञानाभावात् हेतूपादाने तु सदुत्तरत्वमेवेति भावः इति ॥ ११ ॥

इति प्रसङ्गसमप्रतिदृष्टान्तसमप्रकरणम् ॥ ६३ ॥

क्रमप्राप्तमनुत्पत्तिसमं लक्षयति । प्रागुत्पत्तेरिति साधनाङ्गस्येति शेषः कारणाभावात् हेत्वभावात् तथा च साधनाङ्गपक्षहेतुदृष्टान्तानामुत्पत्तेः प्राक् हेत्वभाव इत्यनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः यथा घटो रूपवान् गन्धात् घटवदित्युक्ते घटोत्पत्तेर्गन्धोत्पत्तेश्च पूर्वं हेत्वभावादसिद्धिः, पटे च गन्धोत्पत्तेः पूर्वं हेत्वभावेन दृष्टान्तासिद्धिः, एवम् आश्रयसिद्धे रूपाभावाद्वायोश्च अनुत्पत्त्या प्रत्यवस्थानस्य तत्रापि सत्त्वात् उत्पत्तेः पूर्वं हेत्वाद्यभावेन प्रत्यवस्थानस्यैव सत्त्वात् जातिरेव सतीति च विशेषवचनं तेनोत्पत्तिकालावच्छिन्नो घटो गन्धवानित्यत्र बाधेन प्रत्यवस्थाने नातिव्याप्तिः, असिद्धादिदोषनाभासा चेयम् ॥ १२ ॥

अत्रोत्तरमाह ।—उत्पन्नस्य तथा भावात् घटाद्यात्मकत्वात् तत्र कारणस्य हेतोरुपपत्तेः सत्त्वात् कथं कारणप्रतिषेधः अयमाशयः, पक्षे हेत्वभावोऽसिद्धिः

शब्दस्य सतः प्रयत्नानन्तरीयकत्वमनित्यत्वकारणमुपपद्यते कारणोपपत्तेरयुक्तोऽयं दोषः प्रागुत्पत्तेः कारणाभावादिति ॥ १३ ॥

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः ॥ १४ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवदित्यस्मिन् हेतौ संशयेन प्रत्यवतिष्ठते सति प्रयत्नानन्तरीयकत्वे अस्त्येवास्य नित्येन सामान्येन साधर्म्यमैन्द्रियकत्वमस्ति च घटेनानित्येन। अतो नित्यानित्यसाधर्म्यादनिवृत्तः संशय इति ॥१४॥

साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशयोऽत्यन्तसंशयप्रसङ्गो नित्यत्वान्नाभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १५ ॥

न त्वनुत्पन्ने हेत्वभावः सम्भवति अधिकरणाभावात्, न हि हेत्वभावमात्रान्निग्रहः त्वदीयहेतोरपि क्वचिदभावमत्त्वादिनेन दृष्टान्तान्निग्रहस्यांख्याता यदा कदाचिन्नास्त्येव दृष्टान्तत्वोपपत्तेः एवं हेत्वादीनां यदा कदाचिन्नास्त्वादेव हेत्वादिभावो न तु सार्वत्रिकी तदपेक्षेति ॥ १३ ॥

त्वत्वनुत्पत्तिसमप्रकरणम् ॥ ६४ ॥

क्रमप्राप्तं संशयसमं लक्षयति :—नित्यानित्यसाधर्म्यादिति संशयकारणोपलक्षणं, तेन समानधर्मदर्शनादिपरिक्लिप्तसंशयकारणवशात् संशयेन प्रत्यवस्थानं संशयसमः अधिकस्तूदाहरणपरः, तथा हि शब्दोऽनित्यः कार्यत्वाद्घटवदित्यस्मिन् सामान्ये गोत्वादौ दृष्टान्ते घटे ऐन्द्रियकत्वं तुल्यं, यथा कार्यत्वादिधर्मयोगादनित्यत्वं निर्णीयते तथा ऐन्द्रियकत्वात् संशयकारणाच्चानित्यत्वं सन्दिह्यताम्, एवं शब्दस्यायसाधर्म्यदर्शनादपि संशयो बोध्यः, तथा च हेतुस्थानेऽप्रामाण्यसङ्कीर्णसङ्कीर्णाभ्यां साध्यसंशयात् सत्प्रतिपक्षदोषसमाभासेयम् ॥ १४ ॥

अथोत्तरम्।—विशेषाहेधर्म्यादवधार्यमाणेऽर्थे पुरुष इति न स्थाणुपुरुषसाधर्म्यात् संशयोऽवकाशं लभते, एवं वैधर्म्याद्विशेषात् प्रयत्नानन्तरीयकत्वादवधार्यमाणे शब्दस्यानित्यत्वे नित्यानित्यसाधर्म्यात् संशयोऽवकाशं न लभते, यदि वै लभेत ततः स्थाणुपुरुषसाधर्म्यानुच्छेदादत्यन्तं संशयः स्यात् गृह्यमाणे च विशेषे नित्यसाधर्म्यं संशयहेतुरिति नाभ्युपगम्यते, न हि गृह्यमाणे पुरुषस्य विशेषे स्थाणुपुरुषसाधर्म्यं संशयहेतुर्भवति ॥ १५ ॥

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः॥१६॥

उभयेन नित्येन चानित्येन साधर्म्यात् पक्षप्रतिपक्षयोः प्रवृत्तेः प्रक्रिया, अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद्घटवदित्येकः पक्षं प्रवर्तयति, द्वितीयश्च नित्यसाधर्म्यात्। एवञ्च सति प्रयत्नानन्तरीयकत्वादिति हेतुरनित्यसाधर्म्येणोच्यमानेन हेतौ तदिदं प्रकरणानतिवृत्त्या प्रत्यवस्थानं प्रकरणसमः, समानश्चैतद्धर्म्योऽपि उभयवैधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इति ॥ १६ ॥

अथोत्तरम्।—साधर्म्यात् साधर्म्यदर्शनात् संशय आपाद्यमानेऽपि न संशयो वैधर्म्याद्वैधर्म्यदर्शनात्. यदिच कार्यत्वरूपविशेषदर्शनेऽपि संशयस्तदाऽत्यन्तसंशयप्रसङ्गः संशयानुच्छेदप्रसङ्गः। न च तथाऽभ्युपगन्तुं शक्यमित्याह—नित्यत्वेति. सामान्यस्य समानधर्मदर्शनस्य नित्यत्वानभ्युपगमात् नित्यसंशयजनकत्वानभ्युपगमात् तथा सति त्वदीयहेतूरपि न परपक्षप्रतिषेधकः स्यादिति भावः, सामान्यस्य गोत्वादेर्नित्यत्वानभ्युपगमात् नित्यत्वानभ्युपगमप्रसङ्गात् तथापि साधारणधर्मप्रमेयत्वादिना संशय एव स्यादिति केचित् ॥ १५ ॥

इति संशयसमप्रकरणम् ॥ ६५ ॥

क्रमप्राप्तं प्रकरणसमं लक्षयति।—उभयसाधर्म्यात् पक्षद्वयसङ्गतादतिरिक्त-

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः॥ १७॥

अस्योत्तरम्।—उभयसाधर्म्यात् प्रक्रियासिद्धिं ब्रुवता प्रतिपक्षात् प्रक्रियासिद्धिरुक्ता भवति, यद्युभयसाधर्म्यं तच्चैकतरः प्रतिपक्ष इत्येवं सत्युपपन्नः प्रतिपक्षो भवति प्रतिपक्षोपपत्तेरनुपपन्नः प्रतिषेधो यतः प्रतिपक्षोपपत्तिः प्रतिषेधोपपत्तिश्चेति विप्रतिषिद्धमिति तत्त्वानवधारणाच्च प्रक्रियासिद्धिर्विपर्ययेऽपि प्रकरणावसानात् तत्त्वावधारणे ह्यवसितं प्रकरणं भवतीति॥ १७॥

वैकाल्यासिद्धेर्हेतोरहेतुसमः॥ १८॥

हेतुः साधनं तत् साध्यात् पूर्वं पश्चात् सह वा भवेत् यदि पूर्वं साधनमसति साध्ये कस्य साधनम्, अथ पश्चात् असति साधने कस्येदं साध्यम्। अथ युगपत् साध्यसाधने ह्योर्विद्य-

---

यच्चारादा प्रक्रियाप्रकर्षेण क्रियान्नाधनं विपरीतसाधनमिति फलितार्थः, तत् सिद्धेस्तस्य पूर्वमेव सिद्धेः तथाचाधिकबलत्वेनावरोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः, यथाशब्दोऽनित्यः कृतकत्वादित्युक्ते: नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात् बाधदेशनाभासा चेयम्॥१६॥

अथोत्तरमाह।—प्रतिपक्षादिपरीतसाध्यसाधकत्वेनानित्यताज्ञानबलवत्वादितः प्रकरणसिद्धिद्वारा मदीयसाध्यस्य यः प्रतिषेधः त्वया क्रियते तस्यानुपपत्तिः, कुतः? प्रतिपक्षोपपत्तेः, त्वत्पक्षापेक्षया प्रतिपक्षस्य मदीयपक्षस्योपपत्तेः साधनात् अयमाशयः श्रावणत्वेन पूर्वं नित्यत्वस्य साधनाद्धी बाध उच्यते, स नोपपद्यते पूर्वं साधितस्य बलवत्त्वाभावात् कदाचित् कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात्॥ १७॥

इति प्रकरणसमप्रकरणम्॥ ६६॥

क्रमप्राप्तमहेतुसमं लक्षयति।—वैकाल्यं कार्यकालस्यापूर्वापरकालाः तेन हेतोरसिद्धेः हेतुत्वासिद्धेः अयमर्थः दण्डादिकं घटादेर्न पूर्ववर्त्तितया ज्ञातुं

मानयोः किं कस्य साधनं किं कस्य साध्यमिति हेतुना न विशिष्यते अहेतुता साधर्म्यात् प्रत्यवस्थानमहेतुसमः ॥ १८ ॥

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥

अस्योत्तरम् ।—न त्रैकाल्यासिद्धिः, कस्मात् ? हेतुतः साध्यसिद्धेः । निवर्त्तनीयस्य निर्वृत्तिः विज्ञेयस्य विज्ञानम् उभयं कारणतो दृश्यते सोऽयं महान् प्रत्यक्षविषय उदाहरणमिति । यत्तु खलूक्तमसति साध्ये कस्य साधनमिति यत्तु निर्वर्त्त्यते यच्च विज्ञाप्यते तस्येति ॥ १९ ॥

प्रतिषेधानुपपत्तेः प्रतिषेद्धव्याप्रतिषेधः ॥ २० ॥

पूर्वं पश्चाद् युगपद्वा प्रतिषेध इति नोपपद्यते प्रतिषेधानुपपत्तेः स्थापनाहेतुः सिद्ध इति ॥ २० ॥

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ २१ ॥

सदानीं घटादेरभावात् कस्य कारणं स्यात् अत एव न घटादुत्तरकालवर्त्तिनयाऽपि सत्या समानकालवर्त्तितया मुख्यकालवर्त्तिनोः सव्येतरविषाणयोरिवाविनिगमनापत्तेः, तथाच कालसम्बन्धखण्डनेनाहेतुतया प्रत्यवस्थानमहेतुसमः कारणभावखण्डनेन अग्निहेतोरपि खण्डनाच्च तदसंगतः प्रतिकूलतर्कदैन्यनाभासा चेयम् ॥ १८ ॥

अथोत्तरमाह ।—त्रैकाल्यासिद्धित्रैकाल्येन याऽसिद्धिरुक्ता सा न, कुतः ? हेतुतः साध्यसिद्धेः त्वयाऽप्यभ्युपगमात् ॥ १९ ॥

पूर्ववर्त्तितालाभेऽपि हेतुतासम्भवात्, अन्यथा स्वदीयहेतोरपि साध्यं न सिद्धेदित्याह ।—हेतुफलभावखण्डने प्रतिषेधस्याप्यनुपपत्तेः प्रतिषेद्धव्यस्य परकीयहेतोर्न प्रतिषेध इत्यर्थः ॥ २० ॥

इति ५मं हेतुसमप्रकरणम् ॥ ५ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद्घटवदिति स्थापिते पक्षे अर्थापत्त्या प्रतिपक्षं साधयतोऽर्थापत्तिसमः, यदि प्रयत्नानन्तरीयकत्वादनित्यसाधर्म्यादनित्यः शब्द इत्यर्थादापद्यते नित्यसाधर्म्यान्नित्य इति आस्तित्वस्य नित्येन साधर्म्यमप्यर्थ इति ॥ २१ ॥

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥

अस्योत्तरम्।—अनुपपाद्य सामर्थ्यमनुक्तमर्थादापद्यत इति ब्रुवतः पक्षहानेरुपपत्तिरनुक्तत्वात् अनित्यपक्षसिद्धावर्थादापन्नमानित्यपक्षस्य हानिरिति, अनैकान्तिकत्वाच्चार्थापत्तेः उभयपक्षसमा चेयमर्थापत्तिः, यदि नित्यसाधर्म्यादस्पर्शत्वादाकाशवच्च नित्यः शब्दः अर्थादापन्नमनित्यसाधर्म्यात् प्रयत्नानन्तरीयकत्वादनित्य इति, न चेयं विपर्ययमात्रादैकान्तेनार्थापत्तिः. न खलु वै घनस्य श्यावगुणः पतनमित्यर्थादापद्यते द्रवाणामपां पतनाभाव इति ॥ २२ ॥

क्षमप्रामण्यमर्थापत्तिसमं लक्षयति।—अर्थापत्तिरर्थापत्त्याभासः तथा चार्थापत्त्याभासेन प्रतिपक्षसाधनाय प्रत्यवस्थानमर्थापत्तिसमः अयमाशयः अर्थापत्तिर्हि उक्तेनानुक्तमाक्षिपति यथा शब्दोऽनित्य इत्युक्तेऽर्थादापद्यतेऽनित्यं नित्यं तथा च दृष्टान्तासिद्धिः विरोधश्च कृतकत्वादनित्य इत्युक्तेऽर्थादापन्नम् अन्यथानुपपत्तौ सत्यां प्रतिपत्तौ वा अनुमानादनित्य इत्युक्ते प्रत्यक्षान्नित्य इति च बाधः विशेषविधिः शैथिल्यनिषेधफलकत्वमित्यभिमानः सर्वदोषदर्शनाभासा चेयम् ॥ २१ ॥

अस्योत्तरम्।—किमुक्तेन अनुक्तं यत्किञ्चिदेवार्थादापद्यते उक्तोपपादकं वा आहो स्वित्पक्षहानिरप्यापाद्यतां त्वयानुक्तत्वात् अन्ये अस्या अर्थापत्तेरनैकान्तिकत्वम् ऐकान्तिकत्वम् एकपक्षसाधकत्वं वदं तन्नास्ति न हि अनित्य इत्यस्योपपादकं

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ २३ ॥

एको धर्मः प्रयत्नानन्तरीयकत्वं शब्दघटयोरुपपद्यत इत्यविशेषे उभयोरनित्यत्वे सर्वस्याविशेषः प्रसज्यते। कथम् ? सद्भावोपपत्तेः, एको धर्मः सद्भावः सर्वस्योपपद्यते सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गात् प्रत्यवस्थानमविशेषसमः ॥ २३ ॥

क्वचिद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः ॥ २४ ॥

अस्योत्तरम् ।—यथा साध्यदृष्टान्तयोरेकधर्मस्य प्रयत्नानन्तरीयकत्वस्योपपत्तेरनित्यत्वधर्मान्तरमविशेषेण, एवं सर्वभावानां सद्भावोपपत्तिनिमित्तं धर्मान्तरमस्ति येनाविशेषः स्यात्, अथ मतमनित्यत्वमेव धर्मान्तरं सद्भावोपपत्तिनिमित्तं भावानां सर्वत्र स्यादित्येवं खलु वै कल्प्यमाने अनित्याः

नित्यत्वमिति. न हि विशेषविधिमात्रं शेषनिषेधफलकमपि तु मतिं तात्पर्य क्वचित्, न हि नीलो घट इत्युक्ते सर्वमन्यद्घटोन्नमिति क्वचित् प्रतिपद्यते ॥ २२ ॥

इति अर्थापत्तिसमप्रकरणम् ॥ ६८ ॥

अविशेषसमं लक्षयति ।—एकस्य धर्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः अस्मात् यदि शब्दघटयोरनित्यत्वेनाविशेष उच्यते तदा सर्वेषामविशेषप्रसङ्गः, कुतः ? सद्भावोपपत्तेः, सतः सत्तायाश्च ये भावा धर्माः (षष्ठीसमासात्) सत्त्वप्रमेयत्वादयस्तेषामुपपत्तेः अस्मात् तथा च सर्वेषामेकजातीयत्वे इतरेतरात्मोच्छेदः, सर्वेषामनित्यत्वे आत्मादिविलय इत्यादि तथा च सत्तात्मनिधर्मैक्याविशेषापादनमविशेषसमेति फलितम्, अत्र चाविशेषसम इति सत्यानिर्देशः सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गादिति सत्यं ज्ञेयं व्युत्पादकं प्रतिकूलतर्कदीधितिभासा चेयम् ॥ २३ ॥

अथोत्तरयति ।—तद्धर्मस्य हेतोर्धर्मो व्यासादिस्थस्य क्वचित् कृतकत्वादौ

सर्वे भावाः सद्भावोपपत्तेरितिपक्षः प्राप्नोति, तत्र प्रतिज्ञार्थव्यतिरिक्तमन्यदुदाहरणं नास्ति, अनुदाहरणत्वे हेतुर्नास्तीति प्रतिज्ञैकदेशस्य च उदाहरणत्वमनुपपन्नं न हि साध्यमुदाहरणं भवति, ततश्च नित्यानित्यभावादनित्यनित्यत्वानुपपत्तिः, तस्मात् सद्भावोपपत्तेः सर्वाविशेषप्रसङ्ग इति निरभिधेयमेतदाक्षमिति सर्वभावानां सद्भावोपपत्तेरनित्यत्वमिति ब्रुवताऽनुज्ञातं शब्दस्यानित्यत्वं तत्रानुपपन्नः प्रतिषेध इति ॥ २४ ॥

उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥

यद्यनित्यत्वकारणमुपपद्यते शब्दस्येत्यनित्यः शब्दो नित्यत्वकारणमप्युपपद्यते अस्पर्शत्वमिति नित्यत्वमप्युपपद्यते उभयस्यानित्यत्वस्य नित्यत्वस्य च कारणोपपत्त्या प्रत्यवस्थानमुपपत्तिसमः ॥ २५ ॥

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥२६॥

अस्योत्तरम् ।—उभयकारणोपपत्तेरिति ब्रुवता नानित्यत्वकारणोपपत्तेरनित्यत्वं प्रतिषिध्यते यदि प्रतिषिध्यते नोभय-

---

उपपत्तेः सत्त्वात् क्वचित् सत्त्वादौ अनुपपत्तेः अभावात् त्वदुक्तस्य प्रतिषेधस्याभावोऽस्मत्र इत्यर्थः ॥ २४ ॥

इति अविशेषसमप्रकरणम् ॥ ६८ ॥

उपपत्तिसमं लक्षयति ।—उभयं पक्षप्रतिपक्षौ तयोः कारणस्य प्रमाणस्य उपपत्तेः सत्त्वात् तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्धर्मेण परपक्षदूषणेन स्वपक्षसाधनेन प्रत्यवस्थानम् उपपत्तिसमः, यथा शब्दोऽनित्यः कृतकत्वादित्यत्रे यथा त्वत्पक्षेऽनित्यत्वे प्रमाणमस्ति तथा मत्पक्षोऽपि सप्रमाणकः त्वत्पक्षमत्पक्षान्यतरत्वात् त्वत्पक्षवत् तथाच बाधः प्रतिरोधो वा तद्दूषणाभासा चेयम् ॥ २५ ॥

अथोत्तरमाह ।—अयं त्वदुक्तप्रतिषेधो न सम्भवति, कुतः ? मत्पक्षे उपपत्ति-

कारणोपपत्तिः स्यात् उभयकारणोपपत्तिवचनादनित्यत्व-कारणोपपत्तिरभ्यनुज्ञायते अभ्यनुज्ञानादनुपपन्नः प्रतिषेधः, व्याघातात् प्रतिषेध इति चेत् समानो व्याघात एकस्य नित्यत्वानित्यत्वप्रसङ्गं व्याहतम् ब्रुवतोऽन्यः प्रतिषेध इति चेत् स्वपक्षपरपक्षयोः समानो व्याघातः, स च नैकतरस्य साधक इति ॥ २६ ॥

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः॥२७॥

निर्दिष्टप्रयत्नानन्तरीयकत्वस्यानित्यत्वकारणस्याभावेऽपि वायुनोदनादुच्चशाखाभङ्गजस्य शब्दस्यानित्यत्वमुपलभ्यते निर्दिष्टस्य साधनस्याभावेऽपि साध्यधर्मोपलब्ध्या प्रत्यवस्थान-मुपलब्धिसमः ॥ २७॥

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ २८ ॥

अस्योत्तरम् ।—प्रयत्नानन्तरीयकत्वादिति ब्रुवता कारणत उत्पत्तिरभिधीयते न कार्यस्य कारणनियमः यदि च

कारणस्य सत्यत्वसाधकप्रमाणस्य त्वयाऽभ्यनुज्ञानात् तया हि सत्यत्वस्य दृष्टान्ती-करणेन स्वप्रमाणकत्वमनुज्ञातमतः कथं तत्प्रतिषेधः शक्यते कर्तुम् अनुज्ञात-स्यापि प्रतिषेधे स्वपक्ष एव किं न प्रतिषिध्यते ॥ २६ ॥

इति उपपत्तिसमप्रकरणम् ॥ ७० ॥

उपलब्धिसमं लक्षयति ।—वादिना निर्दिष्टस्य कारणस्य साधनस्याभावेऽपि साध्यस्योपलम्भात् प्रत्यवस्थानमुपलब्धिसम इत्यर्थः, तथा हि पर्वतो वह्निमान् धूमादित्यादिकं वह्न्यवधारणार्थमुच्यते, न च तत् सम्भवति धूमं विना चालोका-दितोऽपि वह्निसिद्धेः, तथा च न तस्य साधकत्वमिति प्रतिकूलतर्कः, न वा धूमा-द्वह्निमानेवेत्यवधारणं द्रव्यत्वादेरपि धूमेन साधनात्, न वा पर्वत एव वह्निमानेवेत्यादिकम् अवधारयितुं शक्यते महानसादेरपि वह्निमत्त्वादन्यथा दृष्टान्तासिद्धिः स्यात्, एवं वह्नियुक्तपर्वतस्यापि सत्त्वाबाध इत्यादि तद्दिशनाभासा चेयम् ॥ २७ ॥

अस्योत्तरमाह ।—कारणान्तरात् साधनान्तरादालोकादितोऽपि तस्य धर्मस्य

कारणान्तरादप्युपपद्यमानस्य शब्दस्य तदनित्यत्वमुपपद्यते किमत्र प्रतिषिध्यत इति न प्रागुच्चारणादविद्यमानस्य शब्दस्यानुपलब्धिः, कस्मात्? आवरणाद्यनुपलब्धेः, यथा विद्यमानस्योदकादेरर्थस्यावरणादेरनुपलब्धिः नैवं शब्दस्यायहणकारणेनावरणादिनानुपलब्धिः गृह्यते चैतदस्यायहणकारणमुदकादिवन्न गृह्यते, तस्मादुदकादिविपरीतः शब्दोऽनुपलभ्यमान इति ॥ २८ ॥

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥२९॥

तेषामावरणादीनामनुपलब्धिर्नोपलभ्यते अनुपलम्भात्तस्तीत्यभावोऽस्याः सिद्ध्यति, अभावसिद्धौ हेत्वभावात् तद्विपरीतमस्तित्वमावरणादीनामवधार्यते तद्विपरीतोपपत्तेर्यत् प्रतिज्ञातं न प्रागुच्चारणाद्विद्यमानस्य शब्दस्यानुपलब्धिरित्यतन्न सिद्ध्यति माऽयं हेतुरावरणाद्यनुपलब्धेरित्यावरणादिषु चाव-

---

साध्यसाधनसंबन्धस्तदुक्तः प्रतिषेधो न सम्भवति अयमाशयः न हि वयमत्रावरणार्थं वक्ष्यमाणं धूमादित्यादिकं प्रयुञ्जामहे अपितु सन्दिग्धस्य वक्तुः सिद्ध्यर्थम् अन्यथा त्वदुक्तमसाधकतासाधनमपि न स्यादसाधकतासाधकत्वान्तरस्यापि सत्त्वात् ॥ २८ ॥

इति उपलब्धिसमप्रकरणम् ॥ ७१ ॥

अनुपलब्धिसमं लक्षयति।—यद्यपि चैषं द्वितीयाध्याये दर्शितो दूषितो च तथाप्यनुपलब्धिसमजातिरेवमिति तदानुरूप्येण क्रममात्राऽभिधीयते तत्रायं क्रमः नैयायिकस्यावच्छेदानित्यत्वमेव साध्यते यदि शब्दो नित्यः स्यादुच्चारणात् प्राक् कुतो नोपलभ्यते, न हि घटाद्यावरणकुड्यादिवच्छब्दस्यावरणमस्ति तदनुपलब्धेरिति तत्रैवं जातिवादी प्रत्यवतिष्ठते यद्यावरणानुपलब्धेरावरणाभावः सिध्यति तदा आवरणानुपलब्धेरप्यनुपलम्भादावरणानुपलब्धेरप्यभावः सिध्येत् तथाचावरणानुपलब्धिप्रमाणकं आवरणाभावो न स्यादपि त्वावरणोपपत्तिरेव स्यादिति शब्दनित्यत्वे नोक्तं बाधकं युक्तम्। तत्त्वनुपलब्धेरनुपलम्भान्तरानपेक्षत्वात् कथमेवमिति

रणाद्यनुपलब्धौ च समयानुपलब्धा प्रत्यवस्थितोऽनुपलब्धि-समो भवति ॥ २८ ॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ३० ॥

अस्योत्तरम् ।—आवरणाद्यनुपलब्धिर्नास्त्यनुपलम्भादित्यहेतुः, कस्मात् ? अनुपलम्भात्मकत्वादनुपलब्धेः, उपलम्भाभावमात्र-त्वादनुपलब्धेः, यदस्ति तदुपलब्धेर्विषयः उपलब्धा तदस्तीति प्रतिज्ञायते, यन्नास्ति तदनुपलब्धेर्विषयः अनुपलभ्यमानं नास्तीति प्रतिज्ञायते । सोऽयमावरणाद्यनु-पलब्धेरनुपलम्भाभावोऽनुपलब्धौ स्वविषये प्रवर्त्तमानो न स्वविषयं प्रतिषेधति । अप्रतिषिद्धा चावरणाद्यनुपलब्धि-र्हेतुत्वाय कल्पते, आवरणादीनि तु विद्यमानत्वादुपलब्धे-र्विषयास्तेषामुपलब्धा भवितव्यं, यत्तानि नोपलभ्यन्ते तदुपलब्धेः स्वविषयप्रतिपादिकाया अभावादनुपलम्भादनुप-लब्धेर्विषयो गम्यते न मन्त्यावरणादीनि शब्दस्याग्रहण-कारणानीति अनुपलम्भादनुपलब्धिः सिद्धयति, विषयः स तस्येति ॥ ३० ॥

चेत् इत्यम् अनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणे स्वयमेव स्वसिद्धेनुपलब्धिरूपेति वाक्यं, तथा च तद्यैवानुपलब्ध्यानुपलब्धत्वसम्भवात् तदभावसिद्धेः स्वात्मन्यनुपलब्धिरूपत्वा-भावेऽनुपलब्धित्वमेव न स्यात् अनुपलब्धेरनुपलब्ध्यन्तरापेक्षयेऽनवस्था स्पष्टैव इत्य-र्थेवंरूपेण प्रत्यवस्थानमनुपलब्धिसम इत्यर्थः प्रतिकूलतर्कदृशनाभासा चेयम् ॥ २९ ॥

अत्रोत्तरमाह ।—अनुपलब्धिः आत्मन्यनुपलब्धिरिति कोऽर्थः स्वयमनुपलब्धि-रूपेति चेन्नैवमस्ति स्वविषयिण्यनुपलब्धिरिति चेदेतत् प्रसक्तम् अनुपलब्धेरनुपलम्भा-त्मकत्वात् उपलम्भाभावात्मकत्वात् अभावस्य च निर्विषयकत्वात् स्वात्मन्यनुपलब्धि-त्वाभावेऽनुपलब्धित्वमेव कथमस्या इति चेत् कतमो विरोधः न हि घटः स्वविषयो न भवतीति नार्थं घटः आवरणाभावः कथमनुपलब्धिविषय इति चेत् क एव-माह किन्त्वनुपलब्धिसद्भूतेन्द्रिययाथात्म्यादनुपलब्धियाथात्म्य इत्युपचर्यते अतस्तदनुप-

ज्ञानविकल्पानाञ्च भावाभावसंवेदनाद्ध्यात्मम् ॥ ३१ ॥

अहेतुरिति वर्त्तते। शरीरे शरीरिणां ज्ञानविकल्पानां भावाभावौ संवेदनीयौ, अस्ति मे संशयज्ञानं नास्ति मे संशयज्ञानमिति, एवं प्रत्यक्षानुमानागमस्मृतिज्ञानेषु सैयमावरणाद्यनुपलब्धिरूपलब्ध्यभावः स्वसंवेद्यो नास्ति मे शब्दस्यावरणाद्यनुपलब्धिरिति नोपलभ्यन्ते शब्दस्याग्रहणकारणाद्यावरणादीनीति, तत्र यदुक्तं तदनुपलब्धेरनुपलम्भादभावसिद्धिरिति एतन्नोपपद्यते ॥ ३१ ॥

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः। ३२ ॥

अनित्येन घटेन साधर्म्यादनित्यः शब्द इति ब्रुवतोऽस्ति घटेनानित्येन सर्वभावानां साधर्म्यमिति सर्वस्यानित्यत्वम-

---

लब्धेरनुपलम्भादित्यादिकमहेतुः, अन्यथा त्वत्साधनमपि दोषानुपलब्धेरनुपलम्भात् सदोषमेव स्यादिति ॥ ३० ॥

नन्वनुपलब्धेः स्वस्मिन्ननुपलब्धित्वाभावेऽनुपलब्धिरपि कैन निश्चेतव्य आह।—अध्यात्मम् आत्मन्यधि ज्ञानविकल्पानां ज्ञानविशेषाणां भावाभावयोर्मनसा संवेदनात् घटं साक्षात्करोमि वह्निमनुमिनोमि नानुमिनोमीत्येवं ज्ञानविशेषतद्भावानां मनसैव मृग्यत्वादिति भावः ॥ ३१ ॥

इति अनुपलब्धिसमप्रकरणम् ॥ ७२ ॥

अनित्यसमं लक्षयति।—यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वात् तेन सह तुल्यधर्मोपपत्तेः शब्देऽनित्यत्वं साध्यते तदा सर्वस्मिन्नेवानित्यत्वं स्यात् सत्त्वादिरूपसाधर्म्यसम्भवात्, न चेदमर्थान्तरमनित्यसमेति वाच्यं, सर्वस्यानित्यत्वे व्यतिरेकाभावादनुमानदूषकत्वे तात्पर्यात् परस्यान्वयव्यतिरेकित्व एवानुमानत्वादित्याशयः, तथा

निष्टं समर्थयते, सोऽयमनित्यत्वेन प्रत्यवस्थानादनित्यसम इति ॥ ३२ ॥

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च ॥ ३३ ॥

अथोत्तरम् ।—प्रतिज्ञाद्यवयवयुक्तं वाक्यं पक्षनिर्वर्त्तकं प्रतिपक्षलक्षणं प्रतिषेधस्तस्य पक्षेण प्रतिषेध्येन साधर्म्यं प्रतिज्ञादियोगः तद् यद्यनित्यसाधर्म्यादनित्यत्वस्यासिद्धिः साधर्म्यादसिद्धेः प्रतिषेधस्याप्यसिद्धिः प्रतिषेध्येन साधर्म्यादिति ॥ ३३ ॥

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथाभावान्नाविशेषः॥३४॥

दृष्टान्ते यः खलु धर्मः साध्यसाधनभावेन प्रज्ञायते स

च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्दृष्टान्तसाधर्म्येण सर्वस्य साध्यत्वापादनमनित्यसमः साध्यपदादविशेषसमोऽतीत्यवच्छेदकत्व सर्वविशेष एवापाद्यते नतु सर्वस्य साध्यत्वं, यस्तु अनित्यत्वेन समोऽनित्यसमेति भावप्रधानो निर्देशस्तथा च अनवधेयमेव लक्षणमिति तन्न, वह्निमान् धूमादित्यादौ महानसादिसाधर्म्यात् सत्त्वाद्यवयव वह्निमत्त्वं स्यादित्यस्य ज्ञात्यन्तरत्वापत्तेः, आचार्यास्तु साधर्म्य वैधर्म्यस्याप्युपलक्षणं यथाकाशवैधर्म्यात् कृतकत्वाच्छब्दोऽनित्यस्तथाकाशवैधर्म्यादाकाशभिन्नत्वादित: सर्वमेवानित्यं स्यादित्यत्र लक्षणे यत्किञ्चिद्वैधर्म्येणैव वाक्यनिवृत्तेः, अत्र च वैधर्म्यस्य विपक्षाऽनित्वान्न सर्वस्य साध्यत्वापादनं किन्त्वाकाशादीनामप्यनित्यत्वं स्यादिति, तत्र चाद्यांशरहितमेवेदं प्रतिकूलतर्कदैन्यनाभासा चेयम् ॥ ३२ ॥

अथोत्तरमाह ।—यदि यत्किञ्चित् साधर्म्यात् सर्वस्य साध्यत्वसमापादयतस्तव साधर्म्यस्यासाधकत्वमभिमतं तदा त्वत्कृतप्रतिषेधस्याप्यसिद्धिः तस्यापि प्रतिषेध्यसाधर्म्येण प्रवृत्तत्वात् त्वया स्वं साध्यने कृतकत्वं न साधकं दृष्टान्तसाधर्म्यरूपत्वात् सत्त्वादिवत् अत्र च त्वदीयहेतुस्त्वत्प्रतिषेध्येन मदीयहेतुना कृतकत्वेन सत्त्वेन च सह साधर्म्यरूपतया चायमपि न साधकः स्यात् ॥ ३३ ॥

हेतुत्वेनाभिधीयते स चोभयथा भवति, केनचित् समानः कुतश्चिद्विशिष्टः, सामान्यात् साधर्म्यं विशेषाच्च वैधर्म्यम्, एवं साधर्म्यविशेषो हेतुः नाविशेषेण साधर्म्यमात्रं वैधर्म्यमात्रं वा, साधर्म्यमात्रं वैधर्म्यमात्रं चाश्रित्य भावानाह । साधर्म्यानुरूपधर्मोपपत्तेः सर्वोनित्यत्वप्रसङ्गादनित्यसम इति एतदयुक्तमिति अविशेषसमप्रतिषेधे च यदुक्तं तदपि वेदितव्यम् ॥ ३४ ॥

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ॥ ३५ ॥

अनित्यः शब्द इति प्रतिज्ञायते तदनित्यत्वं किं शब्दे नित्यमथानित्यं, यदि तावत् सदा भवति धर्मस्य सदाभावाद्धर्मिणोऽपि सदाभाव इति नित्यः शब्द इति । अथ न सर्वदा

यदि च साधर्म्यमात्रं न साधकमपि तु व्याप्तिसहितनित्यमिष्टं तदा कृतकत्वं तदस्ति न तु सत्त्व इति विशेष इत्याह :—साध्यसाधनभावेन व्याप्यव्यापकभावेन दृष्टान्ते प्रज्ञातस्य प्रमितस्य धर्मस्य कृतकत्वस्य हेतुत्वात् साधकत्वात तस्य हेतुत्वस्य उभयथा अन्वयेन व्यतिरेकेण च भावात् सदीयहेतौ सत्त्वात् सत्त्वादिनाऽविशेष इति यदुक्तं तन्न भवति ॥ ३४ ॥

इत्यनित्यसमप्रकरणम् ॥ ७२ ॥

नित्यसमं लक्षयति ।—अनित्यस्य भावः अनित्यत्वं, तस्य नित्यं सर्वकालं स्वीकारे अनित्ये शब्दे नित्यत्वं स्यादित्यापादनं नित्यसमा जातिप्रयोगः अनित्यत्वस्य नित्यत्वस्वीकारेऽनित्यत्वाभावदशायां तस्यानित्यत्वं न तस्यापि नित्यत्वापत्तिः, न हि दण्डाभावदशायां दण्डीत्युच्यते यतोऽनित्यत्वस्य नित्यत्वमेव स्वीकार इत्यभ्युपगन्तव्यं, तथा च शब्दस्यापि नित्यत्वापत्तिः, तेन बाधः सत्प्रतिपक्षो वा तद्वैजनाभासा वेयं, एवमनित्यत्वं यदि नित्यं कथं शब्दस्यानित्यतां कुर्यात् ? न हि रक्तं मञ्जरञ्जनं परस्य नीलतां सम्पादयति यथाऽनित्यं तदा तदभावदशायाम् अनित्यत्वं न स्यादित्यादिकमूह्यम् । एतदनुसारेण लक्षणमपि कार्यमित्याचार्याः, वयन्तु अनित्यस्य भावो धर्मस्तस्य नित्यमभ्युपगमेऽनित्यत्वेनाभ्युपगतस्य नित्यत्वं स्यात्, यथा क्षितिः

भवति अनित्यत्वस्याभावान्नित्यः शब्दः । एवं नित्यत्वेन प्रत्यवस्थानान्नित्यसमः ॥ ३५ ॥

प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ३६ ॥

अस्योत्तरम् ।—प्रतिषेध्ये शब्दे नित्यत्वमनित्यत्वस्य भावादित्युच्यमानेऽनुज्ञातं शब्दस्यानित्यत्वम्, अनित्यत्वोपपत्तेश्च नानित्यः शब्द इति प्रतिषेधो नोपपद्यते, अथ नाभ्युपगम्यते नित्यत्वमनित्यत्वस्य भावादिति हेतुर्न भवतीति हेत्वभावात् प्रतिषेधानुपपत्तिरिति । उत्पन्नस्य निरोधादभावः शब्दस्यानित्यत्वं तत्र परिप्रश्नानुपपत्तेः, सोऽयं प्रश्नः तदा नित्यत्वं किं शब्दे सर्वदा भवति, अथ नेत्यनुपपन्नः, कस्मात् ? उत्पन्नस्य यो निरोधादभावः शब्दस्य तदनित्यत्वम्, एवञ्च सत्यधिकरणार्थयोर्विभागो व्याघातान्नास्तीति नित्यानित्यविरोधाच्च नित्यत्वमनित्यत्वं चैकस्य धर्मिणो धर्मौ विरुध्येते न सम्भवतः तत्र यदुक्तं नित्यमनित्यत्वस्य भावान्नित्य एव तदवर्त्तमानार्थमुक्तमिति ॥३६ ॥

सकर्तृकत्वस्य अनित्यत्वेनैर्थक्यं: सकर्तृकत्वं त्वया चितौ नित्यमुपेयते न वा न चेत् तदा साध्याभावादंशतो बाधः अथ चितौ नित्यमेव सकर्तृकत्वं तदा विरुद्धं तद्धेतोरनाभासा चेयमिति क्रमः ॥ ३५ ॥

अथोत्तरमाह ।—प्रतिषेध्ये मत्पक्षे शब्दे सर्वदा अनित्यभावात् अनित्यत्वात् अनित्ये शब्दे अनित्यत्वमुपपद्यते, न हि सम्भवति अनित्यत्वं नित्यमस्मिन् क्वचन तन्नित्यमिति व्याघातात्, न च नित्यमिति सर्वकालमित्यर्थः तथा च शब्दस्यानित्यत्वे कथं सर्वकालमनित्यत्वसम्भव इति वाच्यं, सर्वकालमित्यस्य यावत् सत्त्वनित्यत्वात् अतः स्वतः प्रतिषेधो न सम्भवति । मतान्तरे तु अनित्यत्वेऽनित्यत्वोपपत्तेरित्यस्यया यः प्रतिषेधः कृतः स न सम्भवतीत्यर्थः ॥ ३६ ॥

इति नित्यसमप्रकरणम् ॥ ७४ ॥

प्रयत्नकार्य्यानेकत्वात्कार्य्यसमः॥ ३७॥

प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति, यस्य प्रयत्नानन्तरमात्मलाभस्तत् खल्वभूत्वा भवति, यथा घटादिकार्य्यमनित्यमिति च भूत्वा न भवतीत्येतद्दृष्टान्तायते। एवमवस्थिते प्रयत्नकार्य्यानेकत्वादिति प्रतिषेध उच्यते। प्रयत्नानन्तरमात्मलाभश्च दृष्टो घटादीनां व्यवधानापोहाच्चाभिव्यक्तिर्व्यवहितानां, तत् किं प्रयत्नानन्तरमात्मलाभः शब्दस्य आहोऽभिव्यक्तिरिति विशेषो नास्ति कार्य्याविशेषेण प्रत्यवस्थानं कार्य्यसमः॥ ३७॥

कार्य्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः॥ ३८॥

अस्योत्तरम्।—सति कार्य्यान्यत्वे अनुपलब्धिकारणोपपत्तेः प्रयत्नस्याहेतुत्वं शब्दस्याभिव्यक्तये यच्च प्रयत्नानन्तरमभिव्यक्तिस्तस्यानुपलब्धेः कारणं व्यवधानमुपपद्यते। व्यवधानापोहाच्च

कार्य्यसमं लक्षयति।—प्रयत्नकार्य्यस्य प्रयत्नसम्पादनीयस्यानेकत्वात् अनेकविषयत्वात् अयमर्थः शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नानन्तरीयकत्वं प्रयत्नकार्य्ये घटादौ प्रयत्नानन्तरोपलभ्यमाने कौलकादावपि दृष्टं तत्र द्वितीयं न तत्सत्यत्वसाधकम्, आद्यं तु असिद्धं, तथा च सामान्यत उक्तहेतोरनभिमतविशेषनिराकरणेन प्रत्यवस्थानं कार्य्यसमा असिद्धदूषणाभासाश्चैते, अथवा प्रयत्नकार्य्याणां प्रयत्नकर्त्तव्यानां कर्त्तव्यप्रयत्नानामिति यावत् तादृशानां अनेकविधत्वादुक्तान्यत्व व्याघातकमुत्तरं कार्य्यसमा तथा चाह्या आकृतिगणत्वात् सूत्रानुदर्शितानामपि परिग्रहः यथा त्वत्पक्षे किञ्चिद्दूषणं भविष्यतीति मत्तो पिशाचीसमा कार्य्यकारणभावस्योपकारनिगदतेऽनवस्थेत्यनुपकारसमा इत्यादि॥ ३७॥

अथोत्तरम्।—शब्दस्य कार्य्यान्यत्वेऽकार्य्यत्वे प्रयत्नस्य कर्त्तुं प्रयत्नस्य अहेतुत्वम्

प्रयत्नानन्तरभाविनोऽर्थस्योपलब्धिलक्षणाभिव्यक्तिर्भवतीति न तु शब्दस्यानुपलब्धिकारणं किञ्चिदुपपद्यते, यस्य प्रयत्नानन्तरमपोद्याच्छब्दस्योपलब्धिलक्षणाभिव्यक्तिर्भवतीति तस्मादुत्पद्यते शब्दो नाभिव्यज्यत इति हेतोर्भेदेनैकान्तिकत्वमुपपद्यते अनैकान्तिकत्वादसाधकः स्यात् इति, यदि चानैकान्तिकत्वादसाधकत्वम् ॥ ३८ ॥

प्रतिषेधेऽपि समानो दोषः ॥ ३९ ॥

प्रतिषेधोऽप्यनैकान्तिकः किञ्चित् प्रतिषेधति किञ्चिन्नेति अनैकान्तिकत्वादसाधक इति, अथवा शब्दस्यानित्यत्वपक्षे प्रयत्नानन्तरमुत्पादो नाभिव्यक्तिरिति विशेषहेत्वभावः, नित्यत्वपक्षेऽपि प्रयत्नानन्तरमभिव्यक्तिर्नोत्पाद इति विशेषहेत्वभावः, सोऽयमुभयपक्षसमो विशेषहेत्वभाव इत्युभयमप्यनैकान्तिकत्वमिति ॥ ३९ ॥

धकारणत्वम् इदञ्च तदा स्यात् यदनुपलब्धिकारणस्वभावरथादिकमुपपद्यते न च तच्छब्देऽस्तीत्यर्थः, आकृतिजातिपक्षे तु कार्य्याणां जातीनामनत्वे नानाविधत्वे इदमुत्तरं प्रयत्नस्य स्वदीयदूषणप्रयत्नस्य चहेतुत्वम् असाधकतासाधकत्वाभावः उपलब्धेः कारणस्य प्रमाणस्य निर्दोषवाक्यस्य या उपपत्तिः निर्दोषवाक्याधीनोपपादनं तदभावात् तद्वाक्यस्य स्वपक्षव्याघातकत्वादित्यर्थः ॥ ३८ ॥

इति कार्य्यसमप्रकरणम् ॥ ७५ ॥

एवं तावज्जातिवादिनं प्रति सर्वत्र सदुत्तरैर्जयोद्धारः कार्य्य इत्यभिहितं, तेन निर्णयविजयपक्षकत्वं कथायां सम्पद्यते असदुत्तरोद्धारे तु बन्धवधोः संप्रयोगवत्तान्निमित्तसाधिद्धिरिति व्युत्पादयितुं कथाभेदरूपां षट्पदीं विभजिषायै प्रदर्शयति ।—प्रयत्नानन्तरीयकत्वं न शब्दे नित्यत्वं साधयति अनैकान्तिकत्वादिति यो दोषः स स्वपक्षेऽपि तुल्यः प्रयत्नाभिव्यङ्ग्यत्वसाम्यसाधकत्वात्, अथवा अनैकान्तिकत्वादसाधक

सर्वत्रैवम् ॥ ४० ॥

सर्वेषु साधर्म्यप्रभृतिषु प्रतिषेधहेतुषु यत्र विशेषो नोपलभ्यते तत्रोभयोः पक्षयोः समः प्रसज्यत इति ॥ ४० ॥

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥ ४१ ॥

योऽयं प्रतिषेधेऽपि समानो दोषोऽनैकान्तिकत्वमापाद्यते सोऽयं प्रतिषेधस्य प्रतिषेधेऽपि समानः, तत्रानित्यः शब्दः प्रयत्नानन्तरीयकत्वादिति साधनवादिनः स्थापना प्रथमः पक्षः, प्रयत्नकार्य्यानैकत्वात् कार्य्यसम इति दूषणवादिनः प्रतिषेधहेतुना द्वितीयः पक्षः, स च प्रतिषेध इत्युच्यते, तस्मिन् प्रतिषेधविप्रतिषेधेऽपि समानो दोषोऽनैकान्तिकत्वं चतुर्थः पक्षः ॥ ४१ ॥

इति त्वया प्रतिषेधः कृतः तवाप्ययं दोषः समानः, न ह्यनैकान्तिकत्वं सर्वस्यैवासाधकत्वं साधयति स्वरूपासाधकत्वासाधकत्वात् ॥ ३९ ॥

सेयं मतानुज्ञा किं कार्य्यसमायामेव नेत्याह।—एवंविधमन्यत्र सर्वत्रैव जातौ सम्भवतीत्यर्थः, यथा शब्दोऽनित्यः शब्दत्वादित्यत्र नित्याकाशसाधर्म्यात् मूर्त्तत्वान्नित्यः स्यादिति साधर्म्यसमायाम् अकार्य्यधर्म्यान्नित्यत्वं आकाशवच्छब्दे प्रसज्यमानत्वं स्यादित्युत्कर्षसमा एवमन्यत्राप्युह्यं यद्यप्ययमतिदेशः षट्पदानन्तरमेव वाच्यसुचितस्तथापि विपक्षादिकमपि सूचयितुमवैधोक्त उभयानुज्ञबोधफलो हि षट्पदी विपक्षादावपि तत्फलकत्वं तुल्यमिति भावः, तर्हि विपक्षादेव लक्षणेन पर्य्यनुयोज्योपेक्षणीयत्वे कथासमाप्तौ कुतः षट्पदीति चेन् पुंसां रुरुत्वैवैचित्र्येण तत्फलत्वात् ॥ ४० ॥

तुल्यधर्मविरोधी विप्रतिषेधः तथा च प्रतिषेधस्य यो विप्रतिषेधस्तत्र प्रतिषेधदोषवद्दोष इत्यर्थः, तथा हि शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादिति स्थापनावादिनः प्रथमः पक्षः प्रयत्नकार्य्यानैकत्वात् कार्य्यसम इति प्रतिषेधवादिनो द्वितीयः

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥ ४२ ॥

प्रतिषेधं द्वितीयं पक्षं सदोषमभ्युपेत्य तदुद्धारमनुज्ञानुज्ञाय प्रतिषेधविप्रतिषेधे तृतीये पक्षे समानमनैकान्तिकत्वमिति समानं दूषणं प्रसजतो दूषणवादिनो मतानुज्ञा प्रसज्यत इति पञ्चमः पक्षः ॥ ४२ ॥

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोष इति ॥४३॥

स्थापनापक्षे प्रयत्नकार्य्यानैकत्वादिति दोषः, स्थापनाहेतुवादिनः स्वपक्षलक्षणो भवति, कस्मात् ? स्वपक्षसमुत्थत्वात्, सोऽयं स्वपक्षलक्षणं दोषमपेक्षमाणोऽनुद्धृत्यानुज्ञाय प्रतिषेधेऽपि समानो दोष इत्युपपद्यमानं दोषं परपक्ष उपसंहरति, इत्थं चानैकान्तिकः प्रतिषेध इति हेतुं निर्दिशति, तत्र स्वपक्षलक्षणापेक्षयोपपद्यमानदोषोपसंहारे हेतुनिर्देशे च सत्यनेन परपक्षोऽभ्युपगतो भवति, कथं कृत्वा यः परेण प्रयत्नकार्य्यानैकत्वादित्यादिनाऽनैकान्तिकदोष उक्तस्तमनुद्धृत्य

पक्षः प्रतिषेधेऽप्यनैकान्तिकत्वं तुल्यमिति वादिनस्तृतीयः पक्षः योऽयं विप्रतिषेधेऽपि तथैवानैकान्तिकत्वं तुल्यमानदोषाद्वावनं वा चतुर्थः पक्षः ॥ ४१ ॥

पञ्चमं पक्षमाह ।—प्रतिषेधं द्वितीयं पक्षं सदोषमभ्युपेत्य तत्र तदुक्तं दोषमनुद्धृत्य प्रतिषेधविप्रतिषेधे तदीयपक्षे तृतीये समानं दोषं प्रसजतस्तव मतानुज्ञाऽऽगमकं निग्रहस्थानमित्यर्थः ॥ ४२ ॥

सर्वं पक्षमाह ।—स्वपक्षः स्थापनारूपः प्रथमः पक्षः तं सपक्षीकृत्य ग्रहणो

प्रतिषेधेऽपि समानो दोषो भवति, यथा परस्य प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधेऽपि समानं दोषं प्रसजतः परपक्षाभ्युपगमात् समानो दोषो भवति, यथा परस्य प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधेऽपि समानं दोषं प्रसजतो मतानुज्ञा प्रसज्यत इति, स खल्वयं षडः पक्षः, तत्र खलु स्थापनाहेतुवादिनः प्रथमद्वितीयपञ्चमपक्षाः, प्रतिषेधहेतुवादिनो द्वितीयचतुर्थषष्ठपक्षाः, तेषां साध्यसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरविशेषात् पुनरुक्तदोषप्रसङ्गः। चतुर्थपक्षे समानदोषत्वं परस्योच्यते प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोष इति, षष्ठेऽपि परपक्षाभ्युपगमात् समानो दोष इति समानदोषत्वमेवोच्यते, नार्थविशेषः कश्चिदस्ति समानस्तृतीयपञ्चमयोः पुनरुक्तदोषप्रसङ्गः, तृतीयपक्षेऽपि प्रतिषेधेऽपि समानो दोष इति समानत्वमभ्युपगम्यते, पञ्चमपक्षेऽपि प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गोऽभ्युपगम्यते नार्थविशेषः कश्चिदुच्यत इति, तत्र पञ्चमषष्ठपक्षयोरर्थाविशेषात् पुनरुक्तदोषः, तृतीयचतुर्थयोर्मतानुज्ञा, प्रथमद्वितीययोर्विशेषहेत्वभाव इति, षट्पक्षामुभयोरसिद्धिः, कदा षट्पक्षी यदा प्रतिषेधेऽपि समानो दोष इत्येवं प्रवर्त्तते तदोभयोः पक्षयोरसिद्धिः, यदा तु कार्य्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेरित्यनेन तृतीयपक्षो युज्यते तदा विशेषहेतुवचनात् प्रयत्नानन्तरमात्मलाभः

द्वितीयपक्षः स्वपक्षलक्षणस्यापेक्षा समादरः। तव दोषमनुद्भावयतीति फलितार्थः, तथा च तृतीयपक्षे दोषमनुद्भाव्यैव स्वपक्षोपपादन कार्यं अन्यथा हेतुर्विशिष्टः प्रतिषेधेऽपि समानो दोष इति पृष्टः तेनापि मतानुज्ञा इत्यसिद्धिः तदेवं षट्-

अन्यस्य नाभिव्यक्तिरिति सिद्धिः प्रथमपक्षो न षट्पक्षी प्रवर्त्तत इति ॥ ४३ ॥

इति वात्स्यायनीये न्यायभाष्ये पञ्चमाध्याय-
स्याद्यमाह्निकम् ।

पञ्चमाध्यायस्य

द्वितीयमाह्निकम् ।

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानस्य बहुत्वमिति संक्षेपेणोक्तं तदिदानीं विभजनीयानि निग्रहस्थानानि खलु पराजयवस्तून्यपराधाधिकरणानि प्रायेण प्रतिज्ञाद्यवयवा-श्रयाणि तत्त्ववादिनमतत्त्ववादिनञ्चाभिसम्प्लवन्ते तेषां विभागः ।

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकम-विज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो

पक्षयोरुभयोरप्ययुक्तत्वादित्यदर्षासिद्धिः यदि तु स्थापनावादी जातिवादिनं स्वदूषणेनैव दूषयति तदा षट्पक्षी न प्रवर्त्तत इति ॥ ४३ ॥

इति कथाभासप्रकरणम् ॥ ७६ ॥

इति श्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ
पञ्चमाध्यायस्याद्यमाह्निकम् ॥ १ ॥

मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥

तानीमानि द्वाविंशतिधा विभज्य लक्ष्यन्ते ॥ १ ॥

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ २ ॥

साध्यधर्मप्रत्यनीकेन धर्मेण प्रत्यवस्थिते प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्यनुजानन् प्रतिज्ञां जहातीति प्रतिज्ञाहानिः, निदर्शनम् ऐन्द्रियकत्वादनित्यः शब्दो घटवदिति ब्रुवते अपर आह दृष्टमैन्द्रियकत्वं सामान्ये नित्ये कस्मान्न तथा शब्द इति प्रत्यवस्थिते इदमाह यद्यैन्द्रियकं सामान्यं नित्यं कामं

अथेदानीं निग्रहस्थानविशेषलक्षणाभिधानं तदेव चाङ्गिकार्थः, तत्र चैष प्रकरणानि, तत्र आद्यं प्रतिज्ञाहेत्वन्यतराश्रित-निग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम्, अन्यानि च यथास्थानं वक्ष्यन्ते। तत्र विशेषलक्षणार्थमादौ विभजते।—अत्र चक्षुषैव एतानि तु निग्रहस्थानानि न पुनरपक्षादिलक्षणभावाद्यादिकं न वा झटिति संवरणेन तिरोहिता च वाक्यैत्यर्थौ खल्वत इति प्राहः, तस्मात् चक्षादोऽनुज्ञासमुच्चये तेन दृष्टान्तं साधनवैकल्यादीनां परिग्रहः ॥ १ ॥

तत्र क्रमेण प्रतिज्ञाहान्यादीनां लक्षणेषु वक्ष्यमाणेषु प्रथमोद्दिष्टां प्रतिज्ञाहानिं लक्षयति।—प्रतिकूलो दृष्टान्तो यत्र स प्रतिदृष्टान्तः परपक्षः, स्वः स्वीयः दृष्टान्तो यत्र स स्वदृष्टान्तः स्वपक्षः, तथा च स्वपक्षे परपक्षधर्माभ्यनुज्ञा प्रतिज्ञाहानिः स्वयं विशिष्याभिहितपरित्याग इति फलितार्थः। सिद्धान्तस्तु स्वयं विशिष्य नाभिधीयत इति नासिद्धान्तसाङ्कर्यं, सिद्धं पक्षहेतुदृष्टान्तसाध्यतत्प्रत्यनीकानिमेदात् पञ्चधा भवति, यथा शब्दोऽनित्यः कृतकत्वादिभ्यः प्रत्यभिज्ञया बाधितविषयोऽनित्यस्तादृशे चक्षु तर्हि घट एव पक्ष इति एवं तत्रैव ऐन्द्रियकत्वादिति हेतो-

घटो नित्योऽस्त्विति स खल्वयं साधकस्य दृष्टान्तस्य नित्यत्वं प्रसञ्जयन्निगमनान्तमेव पक्षं जहाति पक्षं जहत् प्रतिज्ञां जहातीत्युच्यते प्रतिज्ञाश्रयत्वात् पक्षस्येति ॥ २ ॥

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ ३ ॥

प्रतिज्ञातार्थोऽनित्यः शब्दः ऐन्द्रियकत्वात् घटवदित्यस्य योऽस्य प्रतिषेधः प्रतिदृष्टान्तेन हेतुव्यभिचारः सामान्यमैन्द्रियकं नित्यमिति तस्मिंश्च प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पादिति दृष्टान्तप्रतिदृष्टान्तयोः साधर्म्ययोगे धर्मभेदात् सामान्यमैन्द्रियकं सर्वगतम् ऐन्द्रियकत्वमसर्वगतो घट इति धर्मविकल्पात् तदर्थं निर्देश इति साध्यमिहार्थं, कथं यथा घटोऽसर्वगत एवं शब्दोऽप्यसर्वगतो घटवदेवानित्य इति, तत्रानित्यः शब्द इति पूर्वा प्रतिज्ञा, असर्वगत इति द्वितीया प्रतिज्ञा

नैकान्तिकत्वमिति प्रत्युक्ते यस्तु कृतकत्वादिति हेतुरिति, एवं पर्वतो वह्निमान् धूमादयोगोलकवदित्युक्ते दृष्टान्तः साधनविकल इति प्रत्युक्ते यस्तु तर्हि महानसवदिति, एवम् अत्रैव सिद्धसाधने च प्रत्युक्ते यस्तु तर्हि इन्धनवानिति अन्यद्वानिस्तुविशेषणाद्यादिः यथा तत्रैव नीलधूमादित्युक्ते ऽसमर्थविशेषणत्वेन प्रत्युक्ते यस्तु तर्हि धूमादिति हेतुरित्यादि ॥ २ ॥

प्रतिज्ञान्तरं लक्षयति ।—प्रतिज्ञातस्यार्थस्य प्रतिषेधे कृते तद्दूषणोद्भिधीर्षया धर्मस्य धर्मान्तरस्य विशिष्टः कल्पो विकल्पः तद्विशेषणान्तरविशिष्टतया प्रतिज्ञार्थस्य कथनमिति खलितार्थः, प्रतिषेध इत्यनेन कृतिति संवरणे विलम्बेनापि स्वयं दूषणं विधाय विशेषणे न दोष इत्युक्तं प्रतिज्ञातार्थस्येत्युपलक्षणं हेत्यतिरिक्तार्थस्येति तत्त्वं, तेन उदाहरणान्तरसाधनधर्मान्तरस्य प्रतिज्ञान्तरत्वेन संग्रहीतं भवति, इदञ्च पक्षसाध्यविशेषणभेदात् प्रभेदं विविधं, यथा शब्दो नित्य इत्युक्ते धर्मी साधनं पक्षश्च प्रत्युक्ते धर्मात्मकः शब्दः पक्ष इति प्रतिज्ञान्तरं न पक्षमात्रान्तरं

प्रतिज्ञान्तरं. तत् कथं निग्रहस्थानमिति, न प्रतिज्ञायाः साधनं प्रतिज्ञान्तरं, किन्तु हेतूदाहरणे साधनं प्रतिज्ञायाः, तदेतदसाधनोपादानमनर्थकमिति आनर्थक्यान्निग्रहस्थानमिति ॥ ३ ॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥४॥

गुणव्यतिरिक्तं द्रव्यमिति प्रतिज्ञा, रूपादितोऽर्थान्तरस्यानुपलब्धेरिति हेतुः, सोऽयं प्रतिज्ञाहेत्वोर्विरोधः कथम्? यदि गुणव्यतिरिक्तं द्रव्यं रूपादिभ्योऽर्थान्तरस्यानुपलब्धिर्नोपपद्यते, अथ रूपादिभ्योऽर्थान्तरस्यानुपलब्धिः, गुणव्यतिरिक्तं द्रव्यमिति नोपपद्यते, गुणव्यतिरिक्तञ्च द्रव्यं रूपादिभ्यश्चार्थान्तरस्यानुपलब्धिरिति विरुध्यते व्याहन्यते न भवतीति ॥ ४ ॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः॥५॥

अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते परो ब्रूयात् सामान्यमैन्द्रियकं न च अनित्यमेवं शब्दोऽप्यैन्द्रियको न चानित्य

प्रकृतोपयोगात् न चेयं प्रतिज्ञाहानिः पूर्वोक्तस्यापरित्यागात, एवं पर्वतो वह्निमान् सुरभिमलिनधूमवत्त्वादित्युक्ते अमलनधूमेनाप्रत्यक्षेण च परेण प्रत्युक्ते अप्रत्यक्षमेव वह्निमानित्यत्र एवं तादृशवह्नौ साध्ये यः सुरभिमलिनधूमवान् स वह्निमानित्युदाहरणे न्यूनत्वेन प्रत्युक्ते स तादृशवह्निमानित्यत्र एवमन्यदप्यूह्यम् ॥ ३ ॥

प्रतिज्ञाविरोधं लक्षयति।—अत्र च प्रतिज्ञाहेतूपदेशे कथाकालीनवाक्यपरे तथा च कथायां स्ववचनार्थविरोधः प्रतिज्ञाविरोधः यद्यपि काञ्चनमयः पर्वतो वह्निमान् पर्वतः काञ्चनमयवह्निमान् ह्रदो वह्निमान् ह्रदत्वात् पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ हेत्वाभासान्तरमाङ्क्ष्यं तथा व्युपपेयमङ्करेऽपि तथाधेरसाङ्क्ष्यान्न दोषः न चासङ्कीर्णस्थलाभावः पर्वतो वह्निमान् धूमात् यो यो धूमवान् स निरग्निरित्युदाहरणे निरग्नित्वायमित्युपनये च तत्त्वात्, एवं निगमनेऽपि बोध्यम् ॥ ४ ॥

इति, एवं प्रतिषिद्धे पक्षे यदि ब्रूयात् कः पुनराह अनित्यः शब्द इति, सोऽयं प्रतिज्ञातार्थनिह्नवः प्रतिज्ञासंन्यास इति ॥ ५॥

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥

निदर्शनम् एकप्रकृतीदं व्यक्तमिति प्रतिज्ञा, कस्माद्धेतोः एकप्रकृतीनां विकाराणां परिमाणात् मृत्पूर्वकाणां शरावादीनां दृष्टं परिमाणं, यावान् प्रकृतेर्ध्रुवो भवति तावान् विकार इति, दृष्टश्च प्रतिविकारं परिमाणम्, अस्ति चेदं परिमाणं प्रतिव्यक्तं, तदेकप्रकृतीनां विकाराणां परिमाणात् पश्यामो व्यक्तमिदमेकप्रकृतीति। अस्य व्यभिचारेण प्रत्यवस्थानं, नानाप्रकृतीनामेकप्रकृतीनाञ्च विकाराणां दृष्टं परिमाणमिति, एवं प्रत्यवस्थिते यत्र एकप्रकृतिसमन्वये सति शरावादिविकाराणां परिमाणदर्शनात् सुखदुःखमोहसमन्वितं चेदं व्यक्तं परिमितं दृश्यते तत्र प्रकृत्यन्तररूपसमन्वयाभावे सत्येकप्रकृतित्वमिति, तदिदमविशेषोक्ते हेतौ प्रतिषिद्धे विशेषं ब्रूवतो हेत्वन्तरं भवति, सति च हेत्वन्तर-

---

प्रतिज्ञासंन्यासं लक्षयति।—पक्षस्य स्वाभिहितस्य परेण प्रतिषेधे कृते सति तत्परिग्रहेच्छया प्रतिज्ञातार्थस्यापनयनमपलाप इत्यर्थः, यथा शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते सामान्ये व्यभिचारेण परेण प्रत्युक्ते क एवमाह शब्दोऽनित्य इति ॥ ५ ॥ ७

हेत्वन्तरं लक्षयति।—अत्र च हेतावित्यनेन हेत्वयवार्थो न विवक्षितोऽपि तु साधनार्थः, स च हेत्वयवश्च उदाहरणादिको वा अविशेषोक्त इति पूर्वोक्त एवार्थोऽविशेषमिच्छत इति साभिप्रायं, तेन परीक्षकपक्षोद्देक्षीयेण तत्रैव हेतौ विशेषवाचकपदोपोद्बलकत्वेन वा यत्किमपि हेत्वन्तरं तथा च परीक्षकपक्षोद्देक्षीयेण पूर्वोक्तहेतुलक्षणव्यवच्छेदकातिरिक्तहेतुलक्षणव्यवच्छेदकविशिष्टलक्षणं हेत्वन्तरं हेतौ

भावे पूर्वस्य हेतोरसाधकत्वान्निग्रहस्थानं हेत्वन्तरवचने सति यदि हेत्वर्थनिदर्शनो दृष्टान्त उपादीयते, नेदं व्यक्तमेक-प्रकृतिकं भवति प्रकृत्यन्तरोपादानात्, अथ नोपादीयते दृष्टान्ते हेत्वर्थस्यानिदर्शितस्य साधकभावानुपपत्तेरानर्थक्याद्धेतोर-निवृत्तं निग्रहस्थानमिति ॥ ६ ॥

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम्॥ ७ ॥

यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां ब्रूयात् नित्यः शब्दोऽस्पर्शत्वादिति हेतुः, हेतुर्नाम क्विनोतेर्धातोस्तुनिप्रत्यये कृदन्तपदं, पदञ्च नामाख्यातोपसर्ग-निपाता अभिधेयस्य क्रियान्तरयोगाद्विशिष्यमाणरूपः शब्दो नाम, क्रियाकारकसमुदायः, कारकसङ्घाविशिष्टक्रियाकाल-योगाभिधाख्याख्यातं, धात्वर्थमात्रञ्च कालाभिधानविशिष्टं, योगेष्वर्थादभिद्यमानरूपा निपाताः उपसृज्यमानाः क्रियाव-द्योतका उपसर्गा इत्येवमादि, तदर्थान्तरं वेदितव्यमिति ॥ ७ ॥

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥

यथा नित्यः शब्दः कचटतपाः जबगडदशत्वात् झभञ्

विशेषवदान एव हेत्वन्तरमिति प्राहुः, पूर्वोक्तं हेत्वन्तरे उदाहरणादौ वा. यथा शब्दोऽनित्यः बाह्येन्द्रियप्रत्यक्षत्वादित्युक्ते सामान्येऽनैकान्तिकत्वेन च प्रत्युक्ते सामान्यवत्त्वे सतीति विशेषणं, एवं विशिष्टहेतुमुक्ता यत बाह्येन्द्रियप्रत्यक्षं तदनित्यमित्युदाहरणे व्यणुकेन प्रत्युक्ते विशिष्टोक्तौ, एवमुपनयविशेषवचोऽपि ॥ ६ ॥

समाप्तं प्रतिज्ञाहेत्वन्तरान्वितनिग्रहपञ्चकविशेषलक्षणप्रकरणम् ॥७७॥

अर्थान्तरं लक्षयति।—प्रकृतात् प्रकृतोपयुक्तात् व्यक्तोपे पञ्चमी, तेन प्रकृतोप-युक्तमर्थमुपेक्ष्यासम्बद्धार्थाभिधानम् अर्थान्तरं प्रकृतानाकाङ्क्षिताभिधानमिति फलि-तार्थः, यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते शब्दो मृदः स चाकाशस्येत्यादि ॥ ७ ॥

षट्धष्वदिति एवं प्रकारं निरर्थकम्, अभिधानाभिधेयभावानुपपत्तौ अर्थगतेरभावाद् वर्णा एव क्रमेण निर्दिश्यन्त इति ॥ ८ ॥

परिषत्प्रतिवादिभ्यां चिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥

यद्वाक्यं परिषदा प्रतिवादिना च चिरभिहितमपि न विज्ञायते श्लिष्टशब्दमप्रतीतप्रयोगमतिद्रुतोच्चारितमित्येवमादिना कारणेन तदविज्ञातमविज्ञातार्थमसामर्थ्यसंवरणाय प्रयुक्तमिति निग्रहस्थानम् ॥ ९ ॥

निरर्थकं लक्षयति ।—वर्णानां क्रमेण निर्देशो जवगडेत्यादिप्रयोगस्तुल्यो निर्देशो निरर्थकं निग्रहस्थानं अवाचकपदप्रयोग इति फलितार्थः, वाचकत्वं शक्त्या लिङ्गलक्षणया आम्नायपरिभाषया वा बोध्यं, समयबन्धस्यतिरेकेणेति विशेषणीयं नेम यथाश्रुतेन विचारः कर्तव्य इति समयसम्बन्धलाघवाभ्युपे न दोषः, झटिति स्मरणे तु न दोष इत्युक्तप्रायम् अस्य सम्भवः प्रमादादित्यवधेयम् ॥ ८ ॥

अविज्ञातार्थं लक्षयति ।—चिरभिहितं वादिनेति शेषः, चिरभिधानं चानवधानादिनाऽऽशु निरासाय । परिषत्प्रतिवाद्यन्यतरेण विज्ञाते तु नाविज्ञातार्थमिति भावः, तथा च अवद्यतावच्छेदकलब्युत्पन्नपरिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवाचकयावत्प्रयोगोऽविज्ञातार्थमिति, वाचकेत्यनेन निरर्थकापार्थकव्युदासः । अत्र च परावज्ञानापादनेन मम जयो भविष्यतीति अनादृत्तिसम्भवः, न च यथाकथञ्चित्परो जेतव्य इत्यज्ञानापादनं व्याप्यमेवेति वाच्यं, तथा सति भङ्ग्यादि परमदुर्बोध यत्किञ्चिदभिधानेनैव सर्वत्र जयसम्भवात्, एतच्च लेशासम्भव: अवाधारणतन्मात्रप्रसिद्धं, यथा पञ्चस्कन्धादयो बौद्धानां, तत्र रूपादय: पञ्चेन्द्रियाणि च रूपस्कन्ध:, सविकल्पकं संज्ञास्कन्ध:, रागद्वेषाभिनिवेशा: संस्कारस्कन्ध:, सुखदुःखे वेदनास्कन्ध:, निर्विकल्पकं ज्ञानस्कन्ध:, द्वितीयमतिप्रसङ्गनिवारणमभिप्रेत्य कट्टिकं, यथा कम्पतनयधृतिहेतुरयं त्रिनयनसमाननामधेयवान् तत्कैतुमत्यादित्यादि दशमोऽयं स्त्रिय, यथा वेत्ति भावतीत्यादि । एवम् अतिद्रुतोच्चारिताविज्ञातार्थमिति

पौर्वापर्य्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥१०॥

यद्यानेकस्य पदस्य वाक्यस्य वा पौर्वापर्य्येणान्वययोगो नास्तीत्यसम्बन्धार्थकत्वं गृह्यते तत्समुदायोऽर्थस्यापायादपार्थकम्। यथा दश दाड़िमानि षड़पूपाः कुण्डमजाजिनं पलल-पिण्डः। अथ रौरुकमेतत् कुमार्याः पात्रं तस्याः पिता अप्रतिग्रहीन इति ॥ १० ॥

अवयवविपर्य्यासवचनमप्राप्तकालम् ॥ ११ ॥

प्रतिज्ञादीनामवयवानां यथालक्षणमर्थवशात् क्रमः, तद्भावयवविपर्य्यासेन वचनमप्राप्तकालमसम्बन्धार्थकाद्धं निग्रह-स्थानमिति ॥ ११ ॥

भाष्यम्। यत्र नाद्यस्य सम्बन्ध उभयतन्त्राभिप्रायमध्ये सति उभयतन्त्राभिप्रायीव विचारसम्भवादिति चेत् सत्यं तथापि यत्र नैयायिकमीमांसकयोर्विचारेऽन्यतरो मीमांसादिपरिभाषया वदति तत्र निग्रह इत्याशयः, तत्रापि चेत् यया कयाचित् परिभाषयोच्यतामिति परः प्रीत्या स्मरति न तत्राद्योपादानमिति उत्तरयोस्तु सर्वत्रैवेति ॥ ९ ॥

अपार्थकं लक्षयति।—पौर्वापर्य्यं काण्यकारणभावलक्षणायोगादसम्बन्धात् शाब्द-बोधजनकाकाङ्क्षाज्ञानाभावादिति फलितार्थः, अप्रतिसम्बद्धोऽसम्बद्धोऽर्थः प्रयोजनं शाब्दबोधरूपं यत्र यद्यपि दशदाड़िमानि षड़पूपाः कुण्डमजाजिनमित्यादावन्यान्तर-वाक्यार्थबोधसम्बन्धव्याप्तिरस्त्यामिव निरर्थके तथाप्यभिमतवाक्यार्थबोधानुकूला-काङ्क्षादियुक्तबोधजनकपदत्वं तत् अविज्ञातार्थं तु स्वस्य बोधोभवत्येवेति नातिव्याप्तिः, उदाहरणन्तु अयोग्यानासन्नाकाङ्क्षवाक्यम् ॥ १० ॥

समानमभिमतवाक्यार्थप्रतिपादकनिग्रहस्थानचतुष्टयप्रकरणम् ॥ ७८ ॥

अप्राप्तकालं लक्षयति।—अवयवस्य वक्ष्यमाणस्य विपर्य्यासो वैपरीत्यं, तथा च सम्भवत्यवयवविपर्य्यासभूतप्रतिज्ञाहेत्वाद्यभिधानं पर्य्यवस्यति, तत्रार्थ क्रमः वादिना साधनमुक्त्वा साधनाङ्गता ज्ञापनाय उदाहरणोक्त्या दृष्टान्तः पादः, प्रतिवादि-नश्च दूषणाभिधा द्वितीयः पादः, प्रतिवादिनः दूषणसाधनं तत्र हेत्वाभासो-

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥

प्रतिज्ञादीनामवयवानामन्यतमेनाप्यवयवेन हीनं न्यूनं निग्रहस्थानं, साधनाभावे साध्यासिद्धिरिति ॥ १२ ॥

हेतूदाहरणाधिकमधिकम् ॥ १३ ॥

एकेन कृतत्वादन्यतरस्यानर्थक्यमिति तदेतन्नियमाभ्युपगमे वेदितव्यमिति ॥ १३ ॥

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ १४ ॥

अन्यत्रानुवादात् शब्दपुनरुक्तमर्थपुनरुक्तं वा, नित्यः शब्दो

त्रयीचेति तृतीयः पादः, जयपराजयव्यवस्था चतुर्थः पादः, एवं प्रतिज्ञादीनां लक्षणं तत्र सभाद्योभव्यासीदादिना व्यवस्थाभिधानमप्राप्तकालमिति ॥ ११ ॥

न्यूनं लक्षयति ।—अवयवेन स्वाश्रयसिद्धेन तेन सौगतस्य द्यवयवाभिधानेऽपि न न्यूनत्वम् । तस्यावयवहीनत्वं अवयवत्वावच्छिन्नाभावः तथाच कथमसौ स्वाह्त आहान्यतमेनापीति, तथाच यत्किञ्चिदवयवमूत्वावयवाभिधानं फलितं तच्चायमपसिद्धान्तः सिद्धान्तविरुद्धानभ्युपगमात् अपि तु सभाद्योभादिनाऽनभिधानात् ॥ १२ ॥

अधिकं लक्षयति ।—हेतूदाहरणेत्युपलक्षणं दूषणाद्यधिकमपि बोध्यं, तथा च कृतकर्त्तव्यापुनरुक्ताभिधानमिति फलितम्, अनुवादस्तु न कृतकर्त्तव्यः साभिप्रायत्वात् प्रतिज्ञाधिकस्य पुनरुक्तं, धूमादालोकात् महानसवत्त्वरवदित्यादिकन्तु विना समयबन्धं दाढ्यादिभावान्नाधिकं, यथा शब्दनित्यं शब्दत्वत्ववदिति तु नाधिकं किन्तु पुनरुक्तम् ॥ १३ ॥

समाप्तं सप्तसिद्धान्तानुरूपप्रबोधाभासनिग्रहस्थानविवेकप्रकरणम् ॥ ७८ ॥

पुनरुक्तं लक्षयति ।—पुनर्वचनं पुनरुक्तं तत्र विशेषमाह शब्दार्थयोरिति. तेन शब्दपुनरुक्तमर्थपुनरुक्तञ्च लभ्यते अनुवादेऽतिव्याप्तिवारणायान्यत्रानुवादादिति अनुवादाभावे ::सतीत्यर्थः, (निगमनोक्तं पुनरभिधानं हि पुनरुक्तं,) अनुवादस्तु

नित्यः शब्द इति शब्दपुनरुक्तम्, अर्थपुनरुक्तमनित्यः शब्दो निरोधधर्मकोच्चान इति ॥ १४ ॥

अनुवादे त्वपुनरुक्तं शब्दाभ्यासादर्थविशेषोपपत्तेः ॥ १५ ॥

यथा हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनमिति ॥ १५ ॥

अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥ १६ ॥

पुनरुक्तमिति प्रकृतं, निदर्शनम् उत्पत्तिधर्मकत्वादनित्यमित्युक्ता अर्थादापन्नस्य योऽभिधायकः शब्दस्तेन स्वशब्देन ब्रूयादनुत्पत्तिधर्मकं नित्यमिति। तच्च पुनरुक्तं वेदितव्यम्, अर्थसम्प्रत्ययार्थे शब्दप्रयोगे प्रतीतः सोऽर्थोऽर्थापन्नेति ॥ १६ ॥

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यनुच्चारणमननुभाषणम् ॥ १७ ॥

व्याख्यारूपः स्वप्रयोजनश्च एवेति भावः, तथाच समानार्थक-पूर्वानुपूर्वीक शब्दप्रयोगः शब्दपुनरुक्तं समानार्थकभिन्नानुपूर्वीक-शब्दस्य निष्प्रयोजनं पुनरभिधानमर्थपुनरुक्तं चार्थं यथा घटो घट इति द्विरुक्तौ, तथा घटः कलश इति एतच्च प्रमाणादिना बोध्यः ॥ १४ ॥

पुनरुक्तप्रभेदानन्तरमाह।—पुनरुक्तमित्यनुवर्त्तते, यच्चिपुनरुक्तं समानार्थकोभिन्नपूर्वीकोऽतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्तं शब्दमेव च चार्थपुनरुक्तमिति गीयते, यथा बहिरुच्चैः इति पूर्वपदाधिक्योक्तिरियं उच्चैर्बहिरिति उत्तरपदाधिक्योक्तिः, एवं बहिरसि [गेहे नास्तीति विधाधिक्योक्तिः, अथवा गेहे नास्ति बहिरसीति निषेधाधिक्योक्तिः पुनरुक्तमेकिध्यभेदं भाष्यादिसम्मतं, अन्ये तु शब्दपुनरुक्तं द्विविधं तत्रैव शब्दस्य पुनरभिधानं पर्य्यायेणाभिधानम् अन्यत् पुनरर्थपुनरुक्तमिति वदन्तः ॥ १५ ॥ १६ ॥

विज्ञातस्य वाक्यार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदप्रत्युच्चारणं तदननुभाषणं नाम निग्रहस्थानमिति, अप्रत्युच्चारयन् किमाश्रयं परपक्षप्रतिषेधं ब्रूयात् ॥ १७ ॥

अविज्ञातस्याज्ञानम् ॥ १८ ॥

विज्ञातार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदविज्ञानं तदज्ञानं निग्रहस्थानमिति । अयं खल्वविज्ञाय कस्य प्रतिषेधं ब्रूयादिति ॥ १८ ॥

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १९ ॥

परपक्षप्रतिषेधः उत्तरं तदुद्यदा न प्रतिपद्यते तदा निग्रहीतो भवति ॥ १९ ॥

अननुभाषणं व्याचष्टे ।—परिषदा विज्ञातस्य त्रिरभिहितस्य वादिना वाक्यार्थस्य यदा न प्रत्युच्चारणमननुभाषणं वादिना वारत्रयं वाक्यमिति दर्शितं, तदाह त्रिरभिधानेऽपि यत्प्रत्युच्चारणविरोधी व्यापारः तत्प्रत्यनुभाषणं निग्रहस्थानमित्यर्थः, यद्वा न-शब्देनिरादयोऽज्ञानसमानविषयाः इत्युक्तमिति विशेषसादृश्यविरोधात् कथमनविज्ञेऽनेति न विशेषणीयमित्याचार्याः । न चाप्रतिभासादृश्यं उत्तरप्रतिषेधादपि समानयोगादिनाऽननुभाषणस्यापि तत्सिद्धं चतुर्थं एवाहेत्यनुवादादपरीक्षितानुवादात् केवलपूर्वयोर्वा वाक्येन वेति सर्वनामग्रहणानुवादात् पञ्चममित्याचार्याः, अविज्ञानाप्रतिभाऽननुभाषणसादृश्ये यस्मिन्नु प्रथमे तदेवोद्देश्यम् ॥ १७ ॥

अज्ञानं व्याचष्टे ।—आदौ ज्ञः धातोरत्र परिषदा विज्ञातस्येत्यनुवर्तमानार्थे-त्याह परिषदा विज्ञातस्य वादिना त्रिरभिहितस्याप्यविज्ञानमित्यर्थः, इदमेव विवृणोति बुध्यत एव मेऽयमर्थोविचारणेन ज्ञातुं शक्यत इति ॥ १८ ॥

अप्रतिभां व्याचष्टे ।—उत्तरार्थं वरीत्रं बुध्यमानेऽपि सभीपसमये उत्तरं न प्रतिपद्यते तदाप्रतिभा निग्रहस्थानं न चाज्ञानमनुभाषणस्यावश्यकत्वात् तदेव दूषणमस्तीति वाच्यं, परीक्षाऽननुवादे हि सत् यत्र परीक्षमणूद्यापि गोचरं अतिपद्यते तदासादृश्यात् खलूपन्यासपाठानुरोधेन चेयम् ॥ १९ ॥

कार्य्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ २० ॥

यत्र कर्त्तव्यं व्यासङ्ग्य कथां व्यवच्छिनत्ति इदं मे कारणीयं विद्यते तस्मिन्नवसिते कथयिष्यामीति विक्षेपो नाम निग्रहस्थानम्। एकनिग्रहावसानायां कथायां स्वयमेव कथान्तरं प्रतिपद्यत इति ॥ २० ॥

स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा ॥ २१ ॥

यः परेण चोदितं दोषं स्वपक्षेऽभ्युपगम्यानुवृत्त्य वदति भवत्पक्षे समानो दोष इति स स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषं प्रसञ्जयन् पर-मतमनुजानातीति मतानुज्ञा नाम निग्रहस्थानमापद्यत इति ॥ २१ ॥

विक्षेपं लक्षयति।—कार्य्यव्यासङ्गात्कार्य्यव्यासङ्गमुद्दिश्येत्यर्थः; व्यङ्गीपे पञ्चमी, कार्य्यव्यासङ्गश्चासम्भवत्कालान्तरकत्वेनारोपितः, तेन ताडशकथाविच्छेदोविक्षेपः तेन राजपुरुषादिभिराकारणे गृहजनादिभिर्वापरुद्धकार्य्यसाकारणे खण्डदाढादिकं पक्षतो गमने वा शिरोरोगादिना प्रतिबन्धे वा न विक्षेपः। ननु कार्य्यव्यासङ्गोद्भावनं कुतः सभाक्षोभादिना चेदननुभाषणमेव उत्तरप्रतिपत्त्या चेदप्रतिभेवेति चेन्न, उत्तरावसराभावात्। वस्तुतस्तत्परत्वाभावेऽपि तदुद्भावनस्यावश्यतया विक्षेपसम्भवात्, यथा क्षितिः सकर्तृका कार्य्यत्वादित्युक्ते, चलाद्रूं व्यभिचारवारणाय उद्भाव्यत्व चेदयं पक्षसमत्वं ब्रूयात् तदा मे जिगीषतोऽस्य सङ्कार्यव्यलिखितं मया च विचारितं किञ्चित् कार्यमुद्भाव्य गृहे गत्वा दृष्ट्वा दूषणं विक्षेपसम्भवात् ॥ २० ॥

मतानुज्ञां लक्षयति।—दोषाभ्युपगमात् दोषमनुद्धृत्येत्यर्थः, यद्वा शब्दो नित्यः श्रावणत्वादित्युक्ते ध्वनावनैकान्तिकत्वेन चैत्राम्नाऽयमित्युक्तौ शब्दोऽनित्यः कृतकत्वादिति साधिते ध्वनेरपि पक्षसमत्वात् दोष इत्युक्तौ असिद्धत्वात् तथापि चैत्राम्नाऽयमित्युक्तौ सोऽयं मतानुज्ञया निगृहीतः स्वादप्रतिषिद्धमनुमतं भवतीति स्वपक्षे दोषाभ्युपगमात् ॥ २१ ॥

निग्रहस्थानप्राप्तस्यानिग्रहः पर्य्यनुयोज्योपेक्षणम् ॥ २२ ॥

पर्य्यनुयोज्यो नाम निग्रहोपपत्ता चोदनीयस्तस्योपेक्षणं निग्रहस्थानं प्राप्तोऽसीत्यननुयोगः, एतच्च कस्य पराजय इत्यनुयुक्तया परिषदा वचनीयं, न खलु निग्रहं प्राप्तः स्वकीयमिवं विदुष्यादिति ॥ २२ ॥

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥ २३ ॥

निग्रहस्थानलक्षणस्य मिथ्याध्यवसायादनिग्रहस्थाने निगृहीतोऽसीति एवं ब्रुवन् निरनुयोज्यानुयोगान्निगृहीतो वेदितव्य इति ॥ २३ ॥

पर्य्यनुयोज्योपेक्षणं लक्षयति ।—निग्रहस्थानं प्राप्तवतोऽनिग्रहः निग्रहानुद्भावनमित्यर्थः । अत्र बहुनेकनिग्रहस्थानपाते एकतरोद्भावनं तत्र च पर्य्यनुयोज्योपेक्षणावसरः, निग्रहस्थानोद्भावनत्वावच्छिन्नाभावस्यैव तत्त्वात् । ननु वादिना जयसिद्ध्युद्भाव्यं स्वकीयनिग्रहरक्षणाद्वादीति चेत् सत्यं जयस्यैवेदमुद्भाव्यं वादी च स्वयमुद्भावनेऽप्यदोषः ॥ २२ ॥

निरनुयोज्यानुयोगं लक्षयति ।—जयसारे यथार्थनिग्रहस्थानोद्भावनातिरिक्तं यन्निग्रहस्थानोद्भावनं तदित्यर्थः, एतेनाजयसारे निग्रहस्थानोद्भावने एकनिग्रहस्थाने निग्रहस्थानान्तरोद्भावने च नाव्याप्तिः, सोऽयं चतुर्थाध्यक्षं जातिरामासोऽवसरः यद्यपि चामासो व्यभिचारादावसिद्ध्याद्युद्भावनम् जनवसरप्रयुक्तजाकारी एवोद्भावनं, यदा त्वयमि चेत् प्रतिज्ञाहानिः विनेयवसि चेत् हेत्वन्तरम्, एवमवसरेतीव जयसमपि यदा उच्चारणयाज्ञाव्यवहारादेः परिसमाप्तौ एवमनुज्ञयाज्ञानाद्यनुभाषणावसरेऽनुद्भाव्यबोधाविच्छेदानुभाषणप्रसङ्गे वादिनि तदुद्भावनमित्यादिवस्तुम् ॥ २३ ॥

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥ २४ ॥

कस्यचिदर्थस्य तथाभावं प्रतिज्ञाय प्रतिज्ञातार्थविपर्ययादनियमात् कथां प्रसञ्जयतोऽपसिद्धान्तो वेदितव्यः, यथा न सदात्मानं जहाति न सतो विनाशो नासदात्मानं लभते नासदुत्पद्यत इति, सिद्धान्तमभ्युपेत्य स्वपक्षं व्यवस्थापयति एकप्रकृतोदं व्यक्तं विकाराणामन्वयदर्शनात् सदन्वितानां घटरावादीनां दृष्टमेकप्रकृतिकत्वं, तथा चायं व्यक्तभेदः सुखदुःखमोहान्वितो दृश्यते, तस्मात् समन्वयदर्शनात् सुखादिभिरेकप्रकृतीदं शरीरमिति एवमुक्तवाननुयुज्यते। अथ प्रकृतिविकार इति कथं लक्षितव्यमिति। यस्यावस्थितस्य धर्मान्तरनिवृत्तौ धर्मान्तरं प्रवर्त्तते सा प्रकृतिः। यच्च धर्मान्तरं प्रवर्त्तते स विकार इति, सोऽयं प्रतिज्ञातार्थविपर्य्यासादनियमात् कथां प्रसञ्जयति प्रतिज्ञातं खल्वनेन नासदाविर्भवति सत् तिरोभवतीति। सदसतोश्च तिरोभावाविर्भावमन्तरेण न कस्यचित् प्रवृत्तिः प्रवृत्त्युपरमश्च भवति, यदि खल्ववस्थितायां भविष्यति घटरावादिलक्षणं धर्मान्तरमिति प्रवृत्तिर्भवति, अभूदिति च प्रवृत्त्युपरमः, तदेतन्मूढमोहानामपि न स्यात्, एवं प्रत्यवस्थितो यदि सतश्चात्मज्ञानमसतश्चात्मलाभमभ्युपैति,

---

अपसिद्धान्तं लक्षयति।—सिद्धान्तं स्वशास्त्रकाराभ्युपगतमर्थं स्वीकृत्य नियमात् सन्नियमप्रत्ययात् कथाप्रसङ्ग इति तथा च कथायां स्वीकृतसिद्धान्तप्रत्ययोऽपसिद्धान्तः, तथा च साङ्ख्यमतेनाहं वदिष्यामीत्यभ्युपेत्यारब्धायां कथायाम् आविर्भावस्याविर्भावाभ्युपगमेऽवश्यंहि दृश्यस्वाद्यावाविर्भावस्थासतः सत्पत्तिं यदाभ्युपैति तदाऽपसिद्धान्तः, यद्वा यदेभिर्मतेन कथामारभते तस्य शास्त्रकाराभ्युपगमविरोधि